बौद्धभारतीग्रन्थमाला—६

Bauddha Bharati Series-6

अभिधर्मकोशम्

सम्पादकः

स्वामी द्वारिकादासशास्त्री

Bauddha Bharati Series-6

ABHIDHARMAKOSA

&

BHĀṢYA

OF

ACHARYA VASUBANDHU

WITH

SPHUṬĀRTHĀ COMMENTARY

OF

ĀCĀRYA YAŚOMITRA

PART II

(III and IV Kośasthāna)

Critically edited by

SWAMI DWARIKADAS SHASTRI

Ācārya (Vyākaraṇa, Pāli & Bauddha Darśana)

BAUDDHA BHARATI

P. B. 49, VARANASI

1971

बौद्धभारतीग्रन्थमालाप्रकाशनम्–६

आचार्ययशोमित्रकृत-
स्फुटार्थाव्याख्योपेतम्

आचार्यवसुबन्धुविरचितम्

स्वोपज्ञभाष्यसहितम्

अभिधर्मकोशम्

द्वितीयो भागः

(तृतीय-चतुर्थकोशस्थाने)

सम्पादकः

स्वामी द्वारिकादासशास्त्री
व्याकरणपालि-साहित्य-बौद्धदर्शनाचार्यः

१९७१ खिस्टाब्दः] वाराणसी [२५१४ बुद्धाब्दः

प्रास्ताविकम्

लाभस्तेषां जयस्तेषाम्, कुतस्तेषां पराजयः !
येऽनुध्यायन्ति सततं सौगतीं धर्मदेशनाम् ।।

मान्या विद्वत्तल्लजाः !

इदं खलु विमृशतामस्माकं मानसं भृशमुल्लासमासादयति यद् वयं बौद्धभारतीस्थापनातस्तृतीयस्मिन् वर्षे इदं महत्त्वशालि, अभिधर्मशास्त्रस्य मुकुटालङ्कारभूतम् आचार्यवसुबन्धुविरचितं सभाष्यम् अभिधर्मकोशाख्यं ग्रन्थरत्नं यशोमित्रकृतस्फुटार्थाव्याख्यासहितं श्रीमतां करारविन्देषु समुपाहरामः ।

सर्वैरपि दार्शनिकैर्विदितचरमेवेदं यत् प्रतीत्यसमुत्पादसिद्धान्तो बौद्धदर्शनस्य मूलम् । सिद्धान्तस्यास्य सुखावबोधाय भगवता भिक्षूणां कृतेऽभिधर्मशास्त्रं बहुधा बह्वीभिर्वाचोयुक्तिभिरुपदिष्टम् ।

परन्तु गच्छता कालेनेमा भगवतोऽभिधर्मदेशनाः सारवत्योऽपि अल्पाक्षरत्वात्, असन्दिग्धा अपि विश्वतोमुखत्वात् मध्यमधियां मन्दधियां वा जिज्ञासूनां कृते दुरवगाहा जाताः । तांस्तादृशान् जिज्ञासूनवलोक्य करुणैकहृदय आचार्यो वसुबन्धुस्तदभिधर्मशास्त्रं काभिश्चिदपूर्वाभिः कारिकाभिः स्वोपज्ञभाष्यसहितेन अभिधर्मकोशनाम्ना ग्रन्थरत्नेनैवं व्याख्यातवान्, यथा ते तादृशा अपि कियतैवायासेन दुरधिगममेतच्छास्त्रमधिगच्छेयुः ।

ततोऽप्यवरस्मिन् काले भाष्यस्यास्य गूढाशयतया तत्रत्यानामभ्युपगमवादानां सिद्धान्तानां च दुरवबोधतया मन्दमतीनामभीष्टसिद्धावन्तरायमवलोक्य आचार्ययशोमित्रेणात्र स्फुटार्थाभिधा व्याख्या रचिता । अस्यां व्याख्यायां वसुबन्धुविरचिताः सर्वा अपि कारिकाः प्रत्यक्षरं प्रतिपदं च वादिप्रतिवादिमतवैचित्र्यप्रदर्शनपुरस्सरं

भाष्यसहिता व्याख्याता: । एवं च जात: सरल: पन्था: सर्वेषामभिधर्मशास्त्रजिज्ञासूनां कृते ।

अथ च तत: प्रभृत्येवेदं सव्याख्यमभिधर्मकोशं सौगतसिद्धान्तावबोधाय सर्वैरपि दार्शनिकैरद्यावधि प्रमाणत्वेन स्वीकृतम् ।

अस्येदं महत्त्वमत्रधार्यैवास्माभि: धर्मकीर्त्तिग्रन्थावलिप्रकाशनेन सहैवास्यापि ग्रन्थरत्नस्य प्रकाशनं समारब्धम् ।

अत्रास्माभि: पाटलिपुत्रीय काशीप्रसाद जायसवाल शोधसंस्थानत: प्रकाशमापन्नं भाष्यम् (का० संकेतेन), तथा कलिकातानगरत: प्रकाशितं श्रीलाहासम्पादितं चतुर्थकोशस्थानपर्यन्तं स्फुटार्थाटीकापुस्तकम् (स्फु० मुद्रितपाठसंकेतेन) आदर्शत्वेन स्वीकृतम् ।

मूले भाष्ये च स्फुटार्थानुसार्येव पाठ: स्वीकृत: । पाठान्तरं च टिप्पण्यां स्थापितम् ।

तत्रास्य प्रथमो भाग: प्रथमद्वितीयकोशस्थानात्मक: परुत् तत्रभवतां समक्षमुपस्थापित: । इदानी चायं द्वितीयो भागस्तृतीयचतुर्थकोशस्थानात्मकोऽपि मुद्रणमापन्न: ।

अवशिष्टांऽशोऽप्यनुपदमेव प्रकाशमेष्यन् विदुषां मनस्तोषमावक्ष्यतीत्याशास्ते ।

प्रकाशक:

ग्रन्थ-ग्रन्थकृतां सूची

मूले भाष्ये च व्याख्यायाम् आचार्याभ्यां स्मृता इह ।
ग्रन्था वा ग्रन्थकर्तारस्तेषां सूची प्रतायते ॥

❀ ॐ नमो बुद्धाय ❀

तृतीयं कोशस्थानम्

(लोकनिर्देशः)

इदमिदानीं वक्तव्यम्—कामरूपारूप्यधातुनैयम्येन[1] चित्तादीनां कृतो निर्देशः, तत्र कतमे ते कामरूपारूप्यधातव इति ? उच्यते—

नरकप्रेततिर्यञ्चो मनुष्याः षड् दिवौकसः ।
कामधातुः,

स्फुटार्थाव्याख्यायां

तृतीयं कोशस्थानम्

इदमिदानीं वक्तव्यमिति । द्वितीयस्य तृतीयस्य च कोशस्थानस्य सम्बन्धप्रदर्शनार्थमिदमुक्तम् । *कामरूपारूप्यधातुनैयम्येन चित्तादीनां कृतो निर्देश* इति । नियमस्य भावो नैयम्यम्, नियम एव वा नैयम्यम्, तेन चित्तादीनां कृतो निर्देशः;

"कुशलाकुशलं कामे निवृत्तानिवृत्तं मनः ।
रूपारूप्येष्वकुशलादन्यत्र" (अभि० को० २.६७) इति वचनात् ।

आदिशब्देन चैत्तादीनां ग्रहणम्;

"सवितर्कविचारत्वात् कुशले कामचेतसि ।
कौकृत्यमिद्धाकुशलान्याद्ये ध्याने न सन्त्यतः ॥ (अभि० २.२८)
"ध्यानान्तरे वितर्कश्च विचारश्चाप्यतः परम् ।" (अभि० २.३१)

इति वचनात् ।

इन्द्रियाणां कामादिनैयम्येन कृतो निर्देशः;

"कामाप्तममलं हित्वा रूपाप्तं स्त्रीपुमिन्द्रिये ।
दुःखे च हित्वा रूपाप्तं सुखे चापोह्य रूपि च ॥" (अभि० २.१२)

इति वचनात् ।

तेन कामरूपारूप्यधातवोऽनुक्तलक्षणाः—इत्यतः पृच्छति—*तत्र कतमे ते कामरूपारूप्यधातव* इति । अत इदमुच्यते—*"नरकप्रेततिर्यञ्चः"* इति ।

---

१. रूप्यनैयम्येन—का० ।

चतस्रो गतयः; षड्[1] देवनिकायाः, तद्यथा—चातुर्महाराजिकाः[2], त्रयस्त्रिंशाः[3], यामाः, तुषिताः, निर्माणरतयः, परनिर्मितवशवर्तिनश्च—इत्येष **कामधातुः सह भाजनलोकेन ।**

स एष कति स्थानानीति ? आह—

स नरकद्वीपभेदेन विंशतिः ।। १ ।।

'स्थानानि' इति वाक्यशेषः सम्बध्यते । अष्टौ महानरकाः—सञ्जीवः,

विस्तरः—*चतस्रो गतय* इति । नरकप्रेततिर्यग्मनुष्यगतयश्चतस्रः साकल्येन कामधातावन्तर्गताः, देवगतिस्तु न साकल्येन । किं तर्हि ? *षड् देवनिकाया* इति दर्शयति । तत्र नीर्यन्त इति "नृ नये" (मा० धा० ९.२६), न रञ्जयन्तीति रञ्जेः (१.७२१) । नरेरिति "री गतिरेषणयोः" (मा० धा० ९.३२) इत्यस्य प्रतिषेधपूर्वस्य रूपम् । नीर्यन्तेऽस्मिन् सत्त्वा अपुण्येनेति *नरकाः* । न रञ्जयन्त इति नरका इत्यपरे । नरेरासादनार्थस्यैतद्रूपम् । रञ्जयन्ति प्रावन्ति नास्पृहयन्ति त्राणमिति नरका इत्या*चार्यसङ्घभद्रः* । भृशमितोऽपुनरावृत्तेरिताः *प्रेताः*, पिपासया परीता इत्यपरे । तिर्यग्गमनात् तिर्यञ्चः । मनस उद्भूतत्वा-*न्मनुष्याः* । मनोरपत्या इति लौकिकाः । द्यौरोको येषामिति *"दिवौकसः"* ।

"कामप्रभावितो धातुः कामधातुः" (अभि० को० भा० ३ ३) इति वक्ष्यति । चत्वारो महाराजानो लोकपालाः—विरूढकः, विरूपाक्षः, धृत-राष्ट्रः, वैश्रवणश्च, तेषु भवाः *चातुर्महाराजिकाः* । तन्मध्यगता इत्यर्थः । तद् यथा देवेषूपपद्यते, देवमध्ये उत्पद्यत इत्यर्थः । चतुर्महाराजस्थाने भवाश्चा-तुर्महाराजिकाः, मध्यपदलोपो गोरथवदित्यपरे । सहकृतसुकृतैस्त्रोपपद्यन्त इति *त्रयस्त्रिंशाः* । समानपुण्यैरित्यर्थः । अष्टौ वसवः, द्वावश्विनौ, एकादश रुद्राः द्वादशादित्या इति तावत् प्रमुखत्वात् त्रयस्त्रिंशा इति लौकिकाः । तदनुसारेण प्रवचनेऽपि तथा नामव्यवहार इत्यपरे । दुःखाद् याताः पुण्येन नेति *यामाः* । दुःखानि वा यामयन्तीति यामाः । तुषा तुष्टया इताः, तुषो वा विद्यन्ते एषामिति *तुषिताः* । स्वयं कृते निर्माणे रतिरेषामिति *निर्माणरतयः* । पर-निर्मितान् भोगान् वशे वर्त्तयितुं शीलमेषामिति *परनिर्मितवशवर्तिनः* ।

स्थानानीति वाक्यशेष इति । यानि विंशतिस्थानानि स कामधातुः । यदि तु विंशतिस्थानः "विंशतिः" इति उत्तरपदलोपः क्रियेत, तद्यथा—पीततोया अश्वाः पीता इति, सुतरां श्लिष्यति । *सञ्जीवः*, यत्र सत्त्वान् म्रियमाणान्

१. षट् च—का० । २. चातुर्महाराजकायिकाः—का० ।
३. त्रायस्त्रिंशाः—का० ।

कालसूत्रः, सङ्घातः, रौरवः, महारौरवः, तपन; प्रतापनः, अवीचिश्चेति; चत्वारो द्वीपाः—जम्बूद्वीपः, पूर्वविदेहः, अवरगोदानीयः, उत्तरकुरुश्च; षट् चानन्तरोक्ता देवनिकायाः; तिर्यञ्चः प्रेताश्च—इत्येतानि विंशतिः स्थानानि कामधातुः परनिर्मितवशवर्त्तिभ्यो यावदवीचिः, सभाजनग्रहणेन तु यावद् वायु-मण्डलम् ॥ १ ॥

एतस्माच्च कामधातोः—

ऊर्ध्वं सप्तदशस्थानो रूपधातुः

कथमिति ? आह—

पृथक् पृथक् ।

ध्यानं त्रिभूमिकं तत्र, चतुर्थं त्वष्टभूमिकम् ॥ २ ॥

प्रथमद्वितीयतृतीयध्यानानि प्रत्येकं त्रिभूमिकानि ।

तत्र प्रथमध्यानम्—ब्रह्मकायिकाः, ब्रह्मपुरोहिताः, महाब्रह्माणः; द्वितीयम्—परीत्ताभाः, अप्रमाणाभाः, आभास्वराः; तृतीयम्—परीत्तशुभाः, अप्रमाणशुभाः,

---

वायवो जीवयन्ति । *कालसूत्रः,* यत्र कालसूत्राणि पातयित्वा सत्त्वास्तक्ष्यन्ते । *सङ्घातः,* यत्र मेषाकृतयः पर्वतादय उभयत आपतन्तः सत्त्वान् पीडयन्ति । *रौरवः,* यत्र सत्त्वाः पात्यमानाः परमविकृतं रुदन्ति । यत्र तु विशेषेण स *महा-रौरवः* । *तपनः,* यत्राग्न्यादिभिस्तप्यन्ते सत्त्वाः । यत्र तु विशेषेण स *प्रतापनः ।* *अवीचिः,* यत्रातिमात्राग्निज्वालालिङ्गितानां सत्त्वानां सुखवीचिरन्तरं नास्ति । *जम्बुद्वीपः* जम्बुचिह्नद्वीपो द्वीपः । *पूर्वविदेहः* सुमेरोः पूर्वेण । *अवरगोदानीयः* पश्चिमेन । *उत्तरकुरुरु*त्तरेण । एवं नामान एते द्वीपा लोकप्रतीताः । *षट् चानन्तरोक्ता देवनिकायाः । इत्येतानि विंशतिः स्थानानी*ति । अष्टौ नरकाः, चत्वारो द्वीपाः, षट् चानन्तरोक्ताश्चातुर्महाराजिकादयः, प्रेतास्तिर्यञ्चश्चाभिन्ना इति विंशतिस्थानः कामधातुः । *यावद् वायुमण्डलमि*ति । अधस्ताद् यत्राब्मण्डलं भवति ॥ १ ॥

"*रूपधातुः*" इति । रूपप्रभावितो धातुः ।

"*पृथक् पृथक् ध्यानं त्रिभूमिकं तत्र चतुर्थं त्वष्टभूमिकम्*" इति । तत्र रूपधातौ सर्वेषामपि ध्यानानां मृदुमध्याधिमात्रभेदेन प्रत्येकं त्रिभूमिकम् । *ब्रह्मकायिका ब्रह्मपुरोहिता महाब्रह्माण इति प्रथमम् । परीत्ताभा अप्रमाणाभा आभास्वरा इति द्वितीयम् । परीत्तशुभा अप्रमाणशुभाः शुभकृत्स्ना इति तृतीयम् ।*

शुभकृत्स्नाः; चतुर्थम्—अनभ्रकाः, पुण्यप्रसवाः, बृहत्फलाः; अबृहाः, अतपाः, सुदृशाः, सुदर्शनाः, अकनिष्ठाः—इत्येतानि सप्तदश स्थानानि रूपधातुः।

सह तन्निवासिभिः सत्त्वैः षोडशेति काश्मीराः। ब्रह्मपुरोहितेष्वेव किल स्थानमुत्कृष्टतरं महाब्रह्मणः परिगण इवाभिनिर्वृत्तमेकनायकम्, न तु भूम्यन्तरमिति॥

अनभ्रकाः पुण्यप्रसवा बृहत्फला इति चतुर्थम्। तस्य त्वधिमात्रस्यैवानास्रवध्यानव्यवकिरणेन मृदुमध्याधिमात्राधिमात्रतराधिमात्रतमभेदभिन्नेन पुनः पञ्च स्थानान्तराणि—*अबृहा अतपाः सुदृशाः सुदर्शना अकनिष्ठाश्चेति*। अतश्चतुर्थं ध्यानमष्टभूमिकमित्युच्यते। तत्र बृहत्कुशलमूलनिर्यातत्वात् ब्रह्मा। कश्चासौ? यो महाब्रह्मेत्युच्यते। ध्यानान्तरलाभात् पश्चात् पूर्वच्युत्युपपत्तिलाभात् प्रमाणादिविशेषादिभिश्चास्य महान्, तस्य कायो निवास एषां विद्यते इति ब्रह्मकायिकाः। ब्रह्मा पुरोधीयते एषामिति ब्रह्मपुरोहिताः। आयुर्वर्णादिभिर्विशेषैर्महान् ब्रह्मा एषामिति महाब्रह्माणः। परीत्तैषामाभा स्वभूमिमपेक्ष्येति परीत्ताभाः। नाभाप्रमाणमेषां शक्यं प्रमातुमित्यप्रमाणाभाः। कृत्स्नस्थानान्तरोद्भासनादाभास्वराः। मनोभूमिकं सुखं शुभमित्युच्यते, तदेषां स्वभूमिमपेक्ष्य परीत्तमिति परीत्तशुभाः। अप्रमाणं शुभमेषामप्रमाणशुभाः। शुभं कृत्स्नमेषामिति शुभकृत्स्नाः। न तदुत्कृष्टतरमन्यत्रास्ति सुखमित्यभिप्रायः। अभ्रवदेषां भूमिसम्बन्धो नास्तीत्यनभ्रकाः। सह सत्त्वेन तद्विमानोदयव्ययादिति वचनान्नैषामुपरि भूम्यन्तरमस्तीत्यनभ्रकाः। अभ्रमिव ह्यपरि न भूमिसम्बन्ध इत्यपरे। आनिञ्ज्यकर्मसम्भूतत्वात् पुण्येभ्यः प्रसव एषामिति पुण्यप्रसवाः। स्थानान्तरप्रतिबद्धं पार्थग्जनिकं सर्वोत्कृष्टं बृहदेषां फलमुद्भवति इति बृहत्फलाः। पृथग्जनामिश्रत्वाच्छुद्ध आवास एषामिति शुद्धावासाः। शुद्धावासान्तरेभ्योऽनुत्कृष्टत्वादबृंहिता इत्यबृहाः। नाल्पेन वा कालेनात्मनः स्थानं बृंहन्ति जहतीत्यबृहाः। विशिष्टसमाधिलाभान्नात्र क्लेशास्तपन्तीत्यतपाः। कल्याणाशयत्वाद्वा न परांस्तापयन्तीत्यतपाः। परिशुद्धदर्शनत्वात् सुष्ठु पश्यन्तीति सुदृशाः। शोभदर्शनत्वात् सुदर्शनाः। तदुत्कृष्टतरभूम्यन्तराभावान्नैते कनिष्ठा इत्यकनिष्ठाः; ज्येष्ठभूतत्वात्। स्थानिन एते निर्दिष्टाः, कथमिदमुच्यते—*इत्येतानि सप्तदश स्थानानीति*? स्थानिशब्देन स्थाननिर्देशाददोष एव। एवं बहिर्देशकनयेन सप्तदशस्थानान्येव रूपधातुः।

षोडशेति काश्मीराः। षोडशस्थानानि रूपधातुरिति काश्मीराः। *परिगण इवेति*। परिषण्ड इव। आटविककोट्ट इत्यपरे। *न तु भूम्यन्तरमिति*। न तु भूम्यन्तरसम्बन्धमिति ॥ २ ॥

आरूप्यधातुरस्थानः

न ह्यरूपिणां धर्माणां स्थानमस्ति । अतीतानागताविज्ञप्त्यरूपिणो हि धर्मा अदेशस्था इति नियमः । स तु—

उपपत्त्या चतुर्विधः ।

उपपत्तिभेदेन **चतुर्विध** आरूप्यधातुः । यदुत आकाशानन्त्यायतनम्, विज्ञानानन्त्यायतनम्, आकिञ्चन्यायतनम्, नैवसंज्ञानासंज्ञायतनमिति । न त्वेषां देशकृतमौत्तराधर्यं भिद्यते । यत्रैव हि देशे तत्समापत्तिलाभिनश्च्यवन्ते तत्रैवोपपद्यन्ते इति । पुनश्च तस्माच्च्यवमानानां तत्रैवान्तराभवोऽभिनिर्वर्त्तते ॥

यथा रूपिणां सत्त्वानां रूपं निश्रित्य प्रवर्त्तते चित्तसन्ततिः, एवमारूप्येषु किं निश्रित्य प्रवर्त्तते ?

निकायं जीवितं चात्र निःश्रिता चित्तसन्ततिः ॥ ३ ॥

निकायसभागं जीवितेन्द्रियं च निश्रित्येत्याभिधार्मिकाः ।

रूपिणामपि तर्हि सत्त्वानां किमर्थं न तदेव द्वयं निश्रित्य प्रवर्त्तते चित्तसन्ततिः ? दुर्बलत्वात् ।

अतीतानागताविज्ञप्त्यरूपिणो हि धर्मा अदेशस्था इति । अतीतानागतारूपिणोऽप्यदेशस्थाः । अविज्ञप्तिः रूपिणी वर्त्तमानाप्यदेशस्था । अरूपिणो वेदनादयस्तथैव वर्त्तमाना अप्यदेशस्थाः, किमङ्गातीतानागताः !

"उपपत्त्या चतुर्विधः" इति । कर्मनिवृत्ता जन्मान्तरे स्कन्धप्रवृत्तिः = उपपत्तिः, तया । *आरूप्यधातुश्चतुर्विधः* । चतुःप्रकारः । *यदुताकाशानन्त्यायतनमिति* । विस्तरः—अनन्तमाकाशमिति समापत्तिप्रयोगकालाकारादाकाशानन्त्यम्, तस्य तदेव चायतनम् । एवमनन्तं विज्ञानं नास्ति किञ्चिदिति तदाकाराद् *विज्ञानानन्त्यायतनम्, आकिञ्चन्यायतनं* चोच्यते । संज्ञागण्डः = संज्ञाशल्यम्, आसंज्ञिकं संमोह इति संज्ञामान्द्योत्पत्तेर्नैवसंज्ञानासंज्ञायतनमित्युच्यते । *न त्वेषां देशकृतमौत्तराधर्यमिति* । अदेशस्थत्वात् ।

यथा रूपिणामिति विस्तरः । किं कृतेयमाशङ्का ? इह नैरात्म्ये सति चित्तचैत्तानां कामरूपधात्वो रूपनिश्रयाप्रवृत्तिः कल्प्येत, आरूप्येषु तु रूपं नास्तीति तत्र चित्तचैत्तप्रवृत्त्या न भवितव्यमित्याशङ्कानिवृत्त्यर्थमिदमुच्यते—

"निकायं जीवितं चात्र निःश्रिता चित्तसन्ततिः" इति । च-शब्देन पृथग्जनत्वासमन्वागमप्राप्तिजात्यादयः संगृह्यन्ते । *दुर्बलत्वादिति* । कस्यचित् सन्ततेः ।

तस्याः केन बलवत्त्वम् ? समापत्तिविशेषजत्वात । सा हि समापत्तिर्विभूतरूपसंज्ञा ।

तत एव तर्हि बलवत्त्वात् प्रवर्त्तिष्यते, किं पुनर्निश्रयेण ? इदं चापि वक्तव्यम्—यथा रूपिणां सत्त्वानां रूपं निश्रित्य प्रवर्त्तते निकायसभागः, जीवितेन्द्रियं च; एवमरूपिणां सत्त्वानां किं निश्रित्य प्रवर्त्तते ? तदेतद्[1] द्वयमन्योऽन्यम् । रूपिणामपि तर्हि किमर्थं न तदेव द्वयमन्योन्यम् ? दुर्बलत्वात् तयोः । तत्रेदानीं केन बलवत्त्वम् ? समापत्तिविशेषजत्वात् । तदेतच्चित्तसन्ततौ समानं चित्तचैत्तेषु वा । तस्मान्नास्त्यरूपिणां सत्त्वानां चित्तसन्ततेरन्योन्यं निश्रय इति **सौत्रान्तिकाः ।**

अपि तु यस्याश्चित्तसन्ततेराक्षेपहेतुरवीततृष्णः, रूपे तस्याः सह रूपेण

रूपिणां सत्त्वानां दुर्बला चित्तसन्ततिरविभूतरूपसंज्ञत्वाद् विना रूपेण न वर्त्तते, ततो रूपं निश्रित्य वर्त्तते ।

तस्याः केन बलवत्त्वमिति । तस्या आरूप्यावचर्याः केन कारणेन बलवत्त्वम् ? अत आह—*समापत्तिविशेषजत्वादिति* विस्तरः । *विभूतरूपसंज्ञेति ।* विगतरूपसंज्ञेत्यर्थः । अतस्तज्जा आरूप्या चित्तसन्ततिरपि रूपनिरपेक्षा प्रवर्त्तते । तत एव तर्हि बलवत्वात् समापत्तिविशेषजनितात् प्रवर्त्तयिष्यते । किञ्चिदनिश्रित्येत्यभिप्रायः ।

यथा रूपिणामिति विस्तरः । यथा रूपिणां रूपनिश्रिते निकायसभागजीवितेन्द्रिये, एवमरूपिणां किंनिश्रिते इति वाक्यार्थः ।

तदेतदेतद् द्वयमन्योन्यमिति । निकायसभागो जीवितेन्द्रियं निश्रित्य प्रवर्त्तते, जीवितेन्द्रियं च निकायसभागमिति । *किमर्थं न तदेव द्वयमन्योन्यमिति ।* किं रूपनिश्रयेणेत्यभिप्रायः । *तत्रेदानीमिति ।* तत्रारूप्यधातौ केन बलवत्त्वं *तयो*र्निकायसभागजीवितेन्द्रिययोः । *तदेतत् चित्तसन्ततौ समानमिति ।* असावपि चित्तसन्ततिः समापत्तिविशेषाज्जाता भवतीति न द्वयं निश्रित्य प्रवर्त्तयिष्यते । अनाश्रिते प्रवर्त्तयिष्यत इति *चित्तचैत्तेषु वा समानमिति* प्रकृतम् । किं पुनः समानमन्योन्यनिश्रयत्वम् ? यथा निकायसभागो जीवितेन्द्रियं निश्रित्य प्रवर्त्तते, जीवितेन्द्रियं च निकायसभागं निश्रित्य प्रवर्त्तते; तथा चित्तं निश्रित्य चैत्ताः प्रवर्त्तयिष्यन्ते, चैत्तांश्च निश्रित्य चित्तं प्रवर्त्तयिष्यत इति । तदन्योन्याश्रयकल्पना निष्प्रयोजनेति । *यस्याश्चित्तसन्ततेरिति ।* विस्तरः—चित्तसन्ततेराक्षेपाय हेतुरा-

१. तदेव—का० ।

सम्भवाद् रूपं निश्रित्य प्रवृत्तिः; यस्यास्तु हेतुर्वीततृष्णः, रूपे तस्या अनपेक्ष्य रूपं प्रवृत्तिः; हेतोस्तद्विमुखत्वादिति ।

अथ कस्मादेते कामरूपारूप्यधातव इत्युच्यन्ते ? स्वलक्षणधारणाद् धातुः । कामप्रतिसंयुक्तो धातुः कामधातुः, रूपप्रतिसंयुक्तो धातू रूपधातुः; मध्यपदलोपाद् वज्रवालकवत्, मरिचपानकवच्च । नात्र रूपमस्तीत्यरूपः, अरूपस्य भाव आरूप्यम्; रूपणीयो वा रूप्यः, न रूप्योऽरूप्यः, तद्भाव आरूप्यम्, तत्प्रतिसंयुक्तो धातुरारूप्यधातुः ।

कामानां वा[1] धातुः कामधातुः, कामान् यो दधाति । एवं रूपारूप्यधातू वेदितव्यौ ॥

कोऽयं कामो नाम ?

समासतः कवडीकाराहारमैथुनोपसंहितो रागः ।

क्षेपहेतुः कर्मक्लेशलक्षणः । विगता तृष्णा अस्येति वीततृष्णः, न वीततृष्णोऽवीततृष्णः । क ? रूपे । तस्याः चित्तसन्ततेः *सह रूपेण सम्भवाद् रूपं निश्रित्य प्रवृत्तिः । हेस्तोस्तद्विमुखत्वादिति* । आक्षेपहेतो रूपविमुखत्वादित्यर्थः ।

वज्रवालकवदिति । वज्रेण प्रतिसंयुक्तो वालकोऽङ्गुलीयकः कटको वा वज्रवालकः । *मरिचपानकवच्च* । यथा मरिचैः प्रतिसंयुक्तं पानकं मरिचपानकम् मध्यपदलोपात्, तद्वत् कामप्रतिसंयुक्तो धातुः कामधातुरित्यादिः । *रूपणीयो वेति*। बाधनीय इत्यर्थः। रूपयोगाच्च स शक्यते बाधितुम्। *तद्भाव आरूप्यमिति*। यदा धातूत्तरपदमेतद्भवति तदारूप्यधातुरिति युज्यते। यदा तु निरुत्तरपद आरूप्यशब्दप्रयोगः, तद्यथा—अतिक्रम्य रूपाण्यारूप्या इति, तदा आरूपा एवारूप्या इति स्वार्थे तद्धितात् परिग्रहः कार्यः । आरूप्ये वा साधव आरूप्या इति पश्यामः ।

कामानां वा धातुरिति । षष्ठीसमासेनैव साधयति विनापि प्रतिसंयुक्तशब्दलोपेन । कश्चासौ कामानां धातुः ? इत्याह—*कामान् यो दधातीति । एवं रूपारूप्यधातू वेदितव्याविति* । रूपाणां धातु रूपधातुरिति, रूपाणि यो दधातीति । आरूप्यस्य धातुरारूप्यधातुः, आरूप्यं यो दधातीति ।

कवडीकाराहारमैथुनोपसंहितो राग इति । कवडीक्रियत इति कवडीकारः, स एवाहारः कवडीकाराहारः । मिथुने भवः मैथुनम्=द्वन्द्वालिङ्गनादि । कवडीकाराहारमैथुनाभ्यामुपसंहितः सम्बन्धो जनित इति वा कवडीकाराहारमैथुनोपसंहितो रागः । कामः, काम्यतेऽनेनेति काम इति कृत्वा ।

---

१. का० पुस्तके नास्ति ।

"न ते कामा यानि चित्राणि लोके संकल्परागः पुरुषस्य कामः ।
तिष्ठन्ति चित्राणि तथैव लोके अथात्र धीरा विनयन्ति कामम्" ॥

( )

इति गाथाभिधानात् ।

आजीवक आर्यशारिपुत्रं प्रत्याह—

"न ते कामा यानि चित्राणि लोके संकल्परागं वदसीह कामम् ।
भिक्षुर्भविष्यत्यपि कामभोगी संकल्पयन् सोऽकुशलान् वितर्कान्" ॥

( )

आर्यशारिपुत्र आह—

"ते चेत् कामा यानि चित्राणि लोके संकल्परागो यदि ते न कामः ।
शास्ताऽपि ते भविता कामभोगी दृष्ट्वैव रूपाणि मनोरमाणि" ॥

किं पुनर्ये केचन धर्माः कामरूपारूप्यधातुषु समुदाचरन्ति, सर्वे ते कामरूपारूप्यप्रतिसंयुक्ताः ? नेत्याह । किं तर्हि ? येषु कामरूपारूप्यरागा

कथमेवं गम्यत इति ? स्थविरशारिपुत्रभाषितया गाथया तमर्थं दर्शयति— *"न ते कामा यानीति"* इति विस्तरः । *आजीवकेन* यदुक्तं गाथान्तरेण "भिक्षो कामवितर्कं विकल्पयतः कामभोगित्वम्" इति, तदभ्युपगतं *स्थविरेण* । त्रिविधो हि कामोपभोगः—कायेन, वाचा, मनसा च । तत्रावीतरागो मनसा कामोपभोगित्वेऽपि सति नाभिक्षुर्भवति । केवलं त्वस्य शीलमपरिशुद्धं वर्त्तते । यस्तु कायेन वाचा ताथागतीं शिक्षापदलेखां लङ्घयित्वा कामान् परिभुंक्ते, स कामोपभोग्यभिक्षुर्भवतीति । तस्मात् स दोषान्तरमाह—

"ते चेत् कामाः" इति विस्तरः । यदि तव 'चित्राः' रूपादयो विषयाः 'कामाः' इति पक्षः, 'शास्ता ते अवीतरागः' इत्यभ्युपगतः । तेन 'शास्तापि ते भविता' भविष्यति । *'कामभोगी दृष्ट्वैव रूपाणि मनोरमाणि'* कायेनाप्युपभुंजानोऽपि तान् विषयान् इति प्रसक्तम् । न चैवमिष्यते, तस्मात् *'सङ्कल्परागः पुरुषस्य कामः'* इति सिद्धम् ।

केचनेति । केचिदित्यर्थः । *नेत्याहेति ।* प्रतिषेधयति । यस्माद् धात्वन्तरधर्माः धात्वन्तरे समुदाचरन्त्यधातुपतिताश्च । कामधातौ हि त्रैधातुकानास्रवा धर्माः समुदाचरन्ति, एवं रूपधातौ कामावचरं हि निर्माणचित्तं तत्र समुदाचरति, आरूप्यधातावारूप्यावचरा अनास्रवाश्च । तस्मात् प्रतिषेधयति—

अनुशेरते । के पुनरमी कामरूपारूप्यरागाः ? ये कामरूपारूप्यधातुष्वनुशेरते ।

इदमिदानीं तदश्वबन्धीयम्—कस्यायमश्वबन्धः ? यस्यायमश्वः; कस्यायमश्वः ? यस्यायमश्वबन्धः—इत्युभयमपि न ज्ञायते ?

नेदमश्वबन्धीयम्; कृतनिर्देशानि हि स्थानानि कामधातौ, तेष्ववीतरागस्य यो रागः स कामरागः । यत्रानुशेते सोऽपि धर्मः कामप्रतिसंयुक्तः ।

एवं रूपारूप्यरागावधोवीतरागस्य यथायोगं वेदितव्यौ ।

असमाहितभूमिको वा रागः कामरागः। ध्यानारूप्येषु रागो रूपारूप्यरागः।

नेति । किं तर्हि ? येषु कामरूपारूप्यरागा अनुशेरते । येषु कामरागोऽनुशेते आलम्बनतः सम्प्रयोगतो वा यथासम्भवम्, ते कामप्रतिसंयुक्ताः । येषु रूपारूप्यरागावनुशयाते ते यथाक्रमं रूपारूप्यप्रतिसंयुक्ता इति । *इदमिदानीं तदश्वबन्धीयमिति ।* अश्वश्चाश्वबन्धश्चाश्वबन्धम्, अश्वबन्धमिवाश्वबन्धीयम् । अथवा—अश्वबन्धस्येदमश्वबन्धीयमिति[1] । *कस्यायमश्वबन्ध* इति कश्चित् पृच्छति । तस्येतरः कथयति—*यस्यायमश्व* इति । स पुनः पृच्छति—*कस्यायमश्व* इति । इतर पुनः कथयति—*यस्यायमश्वबन्ध* इति । *उभयमपि न ज्ञायते ।* अश्वबन्धः, अश्व इति च । यथेदमुभयमसिद्धेनान्योन्येन न परिच्छिद्यते, तथेहापि न रागैर्धातवः साध्यन्ते, धातुभिश्च रागा इत्युभयमप्येतन्न सिध्यति ।

कृतनिर्देशानि हि स्थानानि कामधाताविति ।

नरकप्रेततिर्यञ्चो मनुष्याः षड्दिवौकसः ।
कामधातुः स नरकद्वीपभेदेन विंशतिः ॥ (अभि० ३ १)

इति कामधातौ कृतनिर्देशानि स्थानानि ।

तेषु स्थानेष्ववीतरागस्य यो रागः स कामराग इति । *एवं रूपारूप्यरागाविति ।* कृतनिर्देशानि हि स्थानानि, कामधातोः "ऊर्ध्वं सप्तदशस्थानो रूपधातुः" (अभि० ३.२) इति । तेष्ववीतरागस्य यो रागः स रूपरागः । तथा कृतनिर्देशोपपत्तिरारूप्यधातोः—"आरूप्यधातुरस्थान उपपत्त्या चतुर्विधः" (अभि० को० ३.२) इति । तेषु वीतरागस्य यो रागः स आरूप्यराग इति । *यथायोगमिति ।* स्थाननिर्देशापेक्षम् ।

ध्यानारूप्येषु राग इति । समापत्ति-उपपत्तिध्यानेषु रागो रूपरागः । एवमारूप्यरागः ।

---

१. ०दमश्वबन्धीयमश्वबन्धीयमिति मुद्रित. पाठ ।

निर्माणचित्ते कथं कामरागः ? श्रुत्वा परिहाय च तदास्वादनात्। निर्माण-वशेन वा निर्मापकचित्तेऽपि[1] रागः। गन्धरसनिर्माणान् वा तस्य कामावचरत्वम्; रूपावचरेण तयोरनिर्माणात्।

किं पुनरेकमेव त्रैधातुकम्? त्रैधातुकानामन्तो नास्ति। यावदाकाशं तावन्तो धातवः। अत एव च नास्त्यपूर्वसत्त्वप्रादुर्भावः। प्रतिबुद्धोत्पादं चासंख्येय-सत्त्वपरिनिर्वाणेऽपि नास्ति सत्त्वानां परिक्षयः, आकाशवत्।

कथमवस्थानं लोकधातूनाम्?

तिर्यक्सूत्र उक्तम्, तद्यथा—"ईषाधारे देवे वर्षति नास्ति वीचिर्वा अन्तरिका वा अन्तरिक्षाद्[2] वारिधाराणां प्रपतन्तीनाम्; एवं पूर्वस्यां दिशि नास्ति वीचिर्वा अन्तरिका वा लोकधातूनां संवर्त्तमानानां विवर्त्तमानानां च। यथा पूर्वस्यां दिशि, एवं दक्षिणस्याम्, पश्चिमायाम्, उत्तरस्याम्" ( ) इति।

निर्माणचित्ते कथं कामराग इति। कामावचरे निर्माणचित्ते ध्यानफले कथं कामवीतरागाणां कामरागः, यतस्तस्य न कामावचरत्वम्; यदा ह्यसाववीतरागस्तदा निर्माणचित्तं न समुदाचरन्ति, यदा निर्माणचित्तं समुदाचरति तदा न तस्य राग उत्पद्यते, कथमस्य कामरागेण विना कामावचरत्वं व्यवस्थाप्यत इत्यर्थः। *श्रुत्वा परिहाय च तदास्वादनादि*ति। श्रुत्वा तत्परतो निर्माणचित्तेऽस्य राग उत्पद्यते, परिहाय वा आत्मीयान्निर्माण-चित्तात्, तस्यास्वादनादिति। एवं ध्यायिनः कामावचरेण निर्माणचित्तेन कामावचरं निर्माणं निर्मिण्वन्तीति श्रुत्वा तदालम्बनो राग उत्पद्यते। अनुस्मृत्य चात्मीयं तत्र राग उत्पद्यते। *निर्माणवशेनेति*। मनोहरं निर्माणं दृष्ट्वा निर्मापके चित्ते निर्मापकस्य वा चित्ते रागः, दर्शयतीत्थं निर्माणचित्तं यस्येदृशं निर्माण-मिति। *गन्धरसनिर्माणाद्वेति*। यत् कामावचरनिर्माणनिर्मापकं कामावचरं तच्चित्तम्; कामावचरधर्महेतुत्वाद्, घटहेतुचित्तवत्। यत्तु न कामावचरं न तत् कामावचरधर्महेतुः, तद्यथा रूपावचरं चित्तम्। अत एवाह—*रूपावचरेण तयोरनिर्माणादिति*। कस्मात् पुना रूपावचरेण चित्तेन तयोर्गन्धरसयोर-निर्माणम्? तयोर्गन्धरसयोः कवडीकाराहारस्वभावत्वात्। रूपधातूपपन्नं च तद्वीतरागत्वादिति।

ईषाधार इति। ईषाप्रमाणवर्षाधारः। *नास्ति वीचिर्वा अन्तरिका* वेति।

---

१. निर्मायक०—का०। २. अन्तरीक्षाद्—का०।

न तूक्तम्—ऊर्ध्वमधश्चेति ।

ऊर्ध्वमप्यधोऽपीत्यपरे; **निकायान्तरपाठाद्** । अकनिष्ठादूर्ध्वं पुनः कामधातुः । कामधातोश्चाधः पुनरकनिष्ठाः । यश्चैकस्मात् कामधातोर्वीतरागः स सर्वेभ्यः । एवं रूपारूप्येभ्यः ।

यश्च प्रथमध्यानसंनिश्रयाद्धि उत्पादयति, स यत्र लोकधातौ जात उत्पादयति तत्रत्यमेव ब्रह्मलोकमुपागच्छति, नान्यम् ॥ ३ ॥

य एते त्रयो धातव उक्ताः—

नरकादिस्वनामोक्ता गतयः पञ्च तेषु,

नरकाः, तिर्यञ्चः, प्रेताः, देवाः, मनुष्याः—इति स्वैरेव नामभिस्तेषु **पञ्च गतयः** प्रोक्ताः । कामधातौ चतस्रो गतयः, पञ्चम्याश्च प्रदेशः । रूपारूप्यधात्वोरेकस्या देवगतेः प्रदेशः ।

किं पुनर्गतिनिर्मुक्ताः सन्ति धातवो यत एता धातुष्वित्युच्यन्ते ? सन्ति कुशलक्लिष्टभाजनान्तराभवस्वभावा अपि धातवः ।

यास्तु पञ्च गतयः—

ताः ।

अक्लिष्टाव्याकृता एव सत्त्वाख्या नान्तराभवः ॥ ४ ॥

अनिवृताव्याकृता एव गतयः । अन्यथा हि गतिसम्भेदः स्यात् ।

नैरन्तर्यं दर्शयति—न *तूक्तमूर्ध्वमधश्चेति* । अतो लोकधातूनां तिर्यगेवास्थानमिति दर्शयति ॥ ३ ॥

पञ्चम्याश्च प्रदेश इति । देवगतेः षट् कामावचरा देवा उक्ताः । शेषा रूपारूप्यावचराः ।

अन्यथा हि गतिसम्भेदः स्यादिति । गतिमिश्रिता । यदि कुशलक्लिष्टा अपि स्युर्गतिसम्भेदः स्यात् । मनुष्यो नरकसंवर्त्तनीयं कर्म करोति, यावद् देवोपपत्तिसंवर्त्तनीयम्—इत्यतो मनुष्यगतिर्नरकगतिरपि स्यात्, यावद् देवगतिरपि; तेषां कर्मणां तद्गतिपर्यापन्नत्वात् । कामधातूपपन्नश्चोर्ध्वभूमिकैः क्लेशैः समन्वागतः कामावचरेण च सार्वगतिकेन क्लिष्टेन समन्वागत इति स एव मनुष्यो नारको यावद् देव इति स्यात् ।

सत्त्वाख्या एव च, न चान्तराभवस्वभावाः । **प्रज्ञप्तिसूक्तम्**—"चतसृभिर्योनिभिः पञ्च गतयः संगृहीताः, न तु पञ्चभिर्गतिभिश्चतस्रो योनयः । किमसंगृहीतम् ? अन्तराभवः" (　　) इति ।

धर्मस्कन्धेऽपि चोक्तम्—"चक्षुर्धातुः कतमः ? चत्वारि महाभूतान्युपादाय यो रूपप्रसादश्चक्षुश्चक्षुरिन्द्रियं चक्षुरायतनं चक्षुर्धातुर्नारकस्तैर्यग्योनिकः पैतृविषयको देव्यो मानुष्यको भावनामयोऽन्तराभविकश्च" (　　) इति ।

सूत्रेऽपि च बहिष्कृतोऽन्तराभवो गतिभ्यः । कस्मिन् **सूत्रे** ? "सप्त भवाः—नरकभवस्तिर्यग्भवः प्रेतभवो देवभवो मनुष्यभवः कर्मभवोऽन्तराभवः" (　　) इति । अत्र हि पञ्च गतयः सहेतुकाः सगमनाश्चोक्ताः[1] । अत एव चानिवृताव्याकृताः सिध्यन्ति; तद्धेतोः कर्मभवस्य ताभ्यो बहिष्करणात् ।

काश्मीरकाश्च[2] **सूत्रं** पठन्ति—"स्थविरशारिपुत्रेणोक्तम्—नारकाणामायुष्मन्नास्रवाणां सम्मुखीभावान्नरकवेदनीयानि कर्माणि करोत्युपचिनोति । तेषामायुष्मन् कायवाङ्मनोवङ्कानां कायवाङ्मनोदोषकषायाणां नरकेषु रूपं संज्ञा वेदना संस्कारो विज्ञानं विपाको विपच्यते । निर्वृत्ते विपाके नारक इति संख्यां गच्छति । तत्रायुष्मन् नारको नोपलभ्यते, अन्यत्र तेभ्यो धर्मेभ्यः" इति । अतोऽप्यनिवृताव्याकृता एव गतयः ।

सत्त्वाख्या एवेति । कर्मानुरूपेणात्मभावतस्तद्गमनात् । अत एवोक्तम्—"यथाकर्म गमिष्यन्ति पुण्यपापफलोपगाः" (　　) इति । न भाजनस्वभावा इति ।

न चान्तराभवस्वभावा इति । अस्य प्रतिपादनार्थं ज्ञापकमानयन्ति । *प्रज्ञप्तिसूक्तमि*ति विस्तरः ।

सहेतुकाः सगमना इति । हेतुः कर्मभवः, गमनमन्तराभवः, गम्यतेऽनेनेति कृत्वा । गतिस्तु गम्यत इति गतिः । *तद्धेतोः कर्मभवस्य ताभ्यो बहिष्करणात्* । कुशलाकुशलस्य कर्मभवस्य ताभ्यो गतिभ्यो बहिष्करणात् ।

कश्मीरे भवाः *काश्मीरकाश्च सूत्रं पठन्तीति* । मुक्तकं तत्सूत्रं त एव पठन्ति, नान्ये इत्यभिप्रायः । *नारकाणामिति* विस्तरः । नरकानुकूला नारकाः, तेषामिति विस्तरः । *कायवाङ्मनोवङ्कानां* शाठ्यसमुत्थितानां *कर्मणां दोषकषायाणां*

---

१. सहागमनाः—का० । 　　 २. काश्मीराश्च—का० ।

प्रकरणग्रन्थस्तर्हिं परिहार्यः—"गतिषु सर्वेऽनुशया अनुशेरते" इति ? सन्धिचित्तानि[1] हि गतीनां पञ्चप्रकाराणि सन्ति, अतः सप्रवेशगतिग्रहणाददोष एव, ग्रामग्रहणे ग्रामोपविचारग्रहणवत्[2] ।

कुशलक्लिष्टा अपीत्यपरे ।

यत्तूक्तम्—"कर्मभवस्य ताभ्यो बहिष्करणात्" (   ) इति ? नावश्यं पृथग्वचनाद् बहिष्कृतो भवति । तद्यथा—पञ्चसु कषायेषु क्लेशदृष्टिकषायौ पृथगुक्तौ, न च दृष्टयो न क्लेशाः । एवं कर्मभवोऽपि गतिश्च स्यात् । पृथक् चास्य वचनं स्याद् गतिहेतुज्ञापनार्थम् ।

अन्तराभवेऽप्येष प्रसङ्गः ? नायोगात् । गच्छन्ति तामिति गतिः । न चान्तराभवो गन्तव्यः; च्युतिदेश एवोत्पादनात् ।

द्वेषरागसमुत्थितानाम् । *अतोऽप्यनिवृताव्याकृता एव* गतय इति । यस्मादुक्तम्—'निर्वृत्ते विपाके नारक इति संख्यां गच्छति' इति ।

गतिषु सर्वेऽनुशया अनुशेरत इति प्रकरणग्रन्थः परिहार्यः । वक्तव्यः परिहार इत्यर्थः; विरोधप्रसङ्गात् । यदि हि पञ्चप्रकारा धर्माः गतिस्वभावा भवेयुः, सर्वेऽनुशया अनुशयीरन् । यदि त्वव्याकृता एव गतयः स्युः, एवं वक्तव्यं स्यात्—भावना प्रहातव्याः सर्वत्रगाश्चेति । अनिवृताव्याकृता हि संस्कृता धर्मा भावनाप्रहातव्या एव । तेषु च भावनाप्रहातव्या एव सर्वत्रगाश्चानुशया अनुशेरते आलम्बनतः प्रयोगतो वा, नान्ये । तेन ज्ञायते—नानिवृताव्याकृता एव गतय इति । *सन्धिचित्तानि हि गतीनां पञ्चप्रकाराणी*ति । सन्धिचित्तानि गतीनां प्रवेशाः; तेषां पञ्चप्रकारत्वात् । दुःखदर्शनप्रहातव्यं यावद् भावनाप्रहातव्यमिति । तत्र सर्वेऽनुशया अनुशेरत इति युक्तम् । *ग्रामोपविचारग्रहणवदि*ति । ग्रामपरिसामन्तकग्रहणवदित्यर्थः ।

पञ्चसु कषायेष्विति । पञ्चकषायाः—आयुःकषायः, क्लेशकषायः, दृष्टिकषायः, कल्पकषायः, सत्त्वकषायश्च, तेषु । *क्लेशदृष्टिकषायौ पृथगुक्तौ* । क्लेशकषायाद् दृष्टिकषायः पृथगुक्त इत्यर्थः । अनयोः पृथग्वचनं गृहस्थप्रव्रजितपक्षाधिकारात् । *गतिहेतुज्ञापनार्थमिति* । गतीनां कर्मोद्भवो हेतुरिति ।

अन्तराभवेऽप्येष प्रसङ्ग इति । एवमन्तराभवोऽपि गतिश्च स्यात् । पृथक् चास्य वचनं स्यात्—गतिगमनज्ञापनार्थमिति । *गच्छन्ति तामिति* । कर्मसाधनपरिग्रहः । न चान्तराभव एवं युज्यत इति न गतिः ।

---

१. प्रतिसन्धि०—का० ।   २. ग्रामोपचार०—का० ।

आरूप्या अपि गतिर्न भविष्यन्ति; च्युतिदेश एवोत्पादात् ? एवं तर्ह्यन्तराभवत्वादेवान्तराभवो न गतिः; गत्यन्तरालत्वात् । यदि हि गतिः स्याद्, अन्तराभव इत्येव न स्यात् ।

यत्तर्हि स्थविरशारिपुत्रेणोक्तम्—"निर्वृत्ते विपाके नारक इति संख्यां गच्छति" इति ? निर्वृत्ते विपाक इत्युक्तम्, न तु[1] विपाक एवेति ।

यत्तर्ह्युक्तम्—"तत्रायुष्मन्नारको नोपलभ्यतेऽन्यत्र तेभ्यो धर्मेभ्यः" इति ? गतिगामिनः पुद्गलद्रव्यस्य प्रतिषेधं करोति—नान्यत्र स्कन्धेभ्य उपलभ्यते नारक इति, न तु स्कन्धान्तरप्रतिषेधम् ।

अव्याकृता एव तु गतयो वर्ण्यन्ते वैभाषिकैः । ताश्च विपाकस्वभावा एवेत्येके । औपचयिकस्वभावा अपीत्यपरे ॥ ४ ॥

अत्रैव पञ्चगतिके धातुत्रये यथाक्रमं वेदितव्याः—

नानात्वकायसंज्ञाश्च नानाकायैकसंज्ञिनः ।
विपर्ययाच्चैककायसंज्ञाश्चारूपिणस्त्रयः ॥ ५ ॥

---

*आरूप्या अपी*ति । विस्तरः - आरूप्या न गति. स्युः; च्युतिदेश एवोत्पादात् । आरूप्यगा हि यत्र च्यवन्ते—विहारे वा वृक्षमूले वा यावच्चतुर्थी ध्यानभूमौ, तत्रैवोत्पद्यन्त इति । अन्तराभववन्न गतिः स्यात् । *एवं तर्ही*ति । पूर्वपक्षं परित्यज्य पक्षान्तरमाश्रीयते । *गत्योरन्तरा अन्तराले भवती*ति अन्तराभव इत्यन्वर्थसंज्ञाकरणा*न्नान्तराभवो गतिरि*ति ।

वैभाषिका आहुः—*यत्तर्ही*ति । विस्तरः—*निर्वृत्ते विपाक* इति । विपाकशब्दवचनाद्विपाकस्वभावा गतिरिति तदभिप्रायः । *इतर* आह—*निर्वृत्ते विपाके* नारक इति नारको व्यवस्थाप्यते । न तूक्तं *विपाक एवे*ति । न तूक्तं विपाकस्वभावेव गतिरिति । किं तर्हि ? विपाकाविपाकस्वभावा गतिः । तस्मात् कुशलक्लिष्टा अपि गतयो भवन्तीत्यभिप्रायः । वैभाषिकः पुनराह—*यत्तर्ह्युक्तं तत्रेति विस्तरः । अन्यत्र तेभ्यो धर्मेभ्य* इति । विपाकजेभ्यः । *न तु स्कन्धान्तरप्रतिषेधम् । करोती*त्यधिकृतम् । *ताश्चे*ति विस्तरः । अव्याकृतत्वपक्षेऽपि द्वैविध्यम् । *औपचयिकस्वभावा अपी*ति । अपिशब्दाद्विपाकस्वभावा अपीति । यथोक्तम्—"विपाको जीवितं द्वेधा द्वादश" (अभि० २.१०) इति । नैष्यन्दिकास्तु न गृह्यन्ते । विपाकस्वभावा एवेत्याचार्य*सङ्घभद्रः* पूर्वमेव पक्षमिच्छति ॥ ४ ॥

---

१. तूक्तम्—का० ।

विज्ञानस्थितयः सप्त

सूत्रे उक्तम्—"रूपिणः सन्ति सत्त्वा नानात्वकाया नानात्वसंज्ञिनः, तद्यथा मनुष्यास्तदेकत्याश्च देवाः । इयं प्रथमा विज्ञानस्थितिः । कतमे पुनस्ते तदेकत्या देवाः ? कामावचराः षट् प्रथमध्यानिकाश्च[1] प्रथमाभिनिर्वृत्तवर्ज्याः"।

नानात्वेन काय एषामिति नानात्वकायाः; अनेकवर्णलिङ्गसंस्थानत्वात् । नानात्वेन संज्ञा नानात्वसंज्ञा, सैषामस्तीति नानात्वसंज्ञिनः; सुखदुःखादुःखासुखसंज्ञित्वात् ।

"रूपिणः सन्ति नानात्वकाया एकत्वसंज्ञिनः, तद्यथा—देवा ब्रह्मकायिका ये तत्प्रथमाभिनिर्वृत्ताः । इयं द्वितीया विज्ञानस्थितिः ।"

ते हि प्रथमाभिनिर्वृत्ताः सर्व एकैकसंज्ञिनो भवन्ति-'अनेन वयं ब्रह्मणा सृष्टाः' इति, ब्रह्मणोऽप्येवं भवति—'मयैते सृष्टाः' इत्यभिन्नकारणसंज्ञानादेकत्वसंज्ञिनः । अन्यथैव तु महाब्रह्मण आरोहपरिणाहौ[2], आकृतिविग्रहः, वाग्भाषा, चीवरधारणं च; अन्यथा तत्पर्षद इति नानात्वकायाः ।

यदिदमुक्तं सूत्रे—"तेषामेवं भवति—इमं वयं सत्त्वमद्राक्ष्म दीर्घायुषं दीर्घमध्वानं तिष्ठन्तं यावदहो बतान्येऽपि सत्त्वा इहोपपद्येरन्मम सभागतायामिति । अस्य च सत्त्वस्यैवंचेतसः प्रणिधिर्वयं चोपपन्नाः[3]" इति ।

कथं तमद्राक्षुः ? आभास्वरस्था इत्येके ।

ततो हि ते प्रच्युताः कथमिदानीमलब्धायां द्वितीयध्यानसमापत्तौ तद्भूमिकं

कामावचराः षट् प्रथमध्यानिकाश्च । कतमे ते ? *बहिर्देशकनयेन* ब्रह्मकायिकाः ब्रह्मपुरोहिता महाब्रह्माणश्च प्रथमाभिनिवृत्तवर्ज्याः । *काश्मीरनयेन* पुनर्ब्रह्मकायिका ब्रह्मपुरोहिताश्च प्रथमाभिनिवृत्तवर्ज्याः । ब्रह्मपुरोहितेष्वेव हि तेषां नयेन महाब्रह्माणो न स्थानान्तरनयाः । *अनेकवर्णलिङ्गसंस्थानत्वादि*ति । वर्णो नीलत्वादिः, लिङ्गम् वस्त्राभरणादि, संस्थानं दैर्घ्यादि । आरोह उन्नतता, परिणाहस्तिर्यक्प्रमाणम् । *आकृतिविग्रहः* । आकृतिलक्षणो विग्रह आकृतिविग्रहः । एवं विशेषिते वेदनादीनां विग्रहः पर्युदस्तो भवति; नासावाकृतिलक्षण इति । विग्रहः पुनः शरीरम् । *वाग्भाषा* वागुच्चारणम् ।

*कथमिदानीमि*ति विस्तरः । प्रथमध्यानप्रत्यागमनेन तैर्द्वितीयं व्यक्तम् । *तद्भूमिकं* द्वितीयध्यानभूमिकम् । पूर्वनिवासं कथमन्वस्मार्षुः ? न तावत्

१. ०ध्यानभूमिकाश्च—का० । २. आरोहपरिणाहः—का० ।
३. चेहोपपन्नाः—का० ।

पूर्वनिवासमन्वस्मार्षुः[1], लब्धायां च[2] कथं महाब्रह्मालम्बनां शीलव्रतपरामर्शदृष्टिं निविष्टाः ?

अन्तराभवस्था अद्राक्षुरित्यपरे ।

तत्रापि न दीर्घमध्वानमवस्थातुं सम्भवः; प्रतिबन्धाभावादिति ।

कथं तेषामियं[3] बुद्धिर्भवति स्म—"इमं वयं सत्त्वमद्राक्ष्म दीर्घायुषं दीर्घमध्वानं तिष्ठन्तम्" इति ?

तस्मात्तत्रस्था एव ते तस्य पूर्ववृत्तान्तं समनुस्मरन्त एव दीर्घमध्वानं तिष्ठन्तं दृष्टवन्तः, दृष्ट्वा च पश्चाद् 'अद्राक्ष्म' इत्येषां बभूव ।

"रूपिणः सन्ति सत्त्वा एकत्वकाया नानात्वसंज्ञिनः, तद्यथा देवा आभास्वराः। इयं तृतीया विज्ञानस्थितिः ।"

प्रथमध्यानभूमिकेन चित्तेन, तदविषयत्वात् । न द्वितीयध्यानभूमिकेन, तस्यालब्धत्वात् । पुनर्लब्धमिति चेत् ? अत आह—*लब्धायां चेति* विस्तरः । शीलव्रतपरामर्शदृष्टिर्महाब्रह्मालम्बना प्रथमध्यानभूमिकैव युज्यते । सा च द्वितीयध्यानलाभात् प्रहीणा न समुदाचरति । द्वितीय ध्यानभूमिकेति चेत् ? न; अधरालम्बनत्वायोगात् । न ह्यधरभूम्यालम्बनः कश्चिदपि क्लेश इष्यते ।

अन्तराभवस्था अद्राक्षुरिति। अन्तराभवस्थास्ते तं महाब्रह्माणं दृष्ट्वैवमूचुः-इमं वयं सत्त्वमद्राक्ष्मेति । *अयमपि* पक्षो न घटते । तथा हि—*तत्राप्यन्तराभावे दीर्घमध्वानमवस्थातुं न सम्भवः*, ह्यपपत्तुं *प्रतिबन्धाभावात्*, शुक्रशोणितानपेक्षत्वात् । *तेषां कथं भवतीयं बुद्धिरिमं वयं सत्त्वमद्राक्ष्म दीर्घायुषं दीर्घमध्वानं तिष्ठन्तमिति ।* दीर्घाध्वावस्थानावबोधो न प्राप्नोतीत्यर्थः ।

तस्मात्तत्रस्था एवेति विस्तरः । प्रथमध्यानभूमिष्ठा एव *तस्य* महाब्रह्मणः *पूर्ववृत्तान्तं समनुस्मरन्तः* । उत्पद्यमानवस्थायामेव *ते तं* महाब्रह्माणं पूर्वोत्पन्नं *दीर्घमध्वानं तिष्ठन्तं दृष्टवन्तः, दृष्ट्वा च पश्चात्* उत्तरकालमद्राक्ष्मेत्येषां *बभूव*। बुद्धिरिति वाक्यशेषः। एवं तु सतीदमपरिहृतं भवेत् । अस्य च सत्त्वस्यैवं चेतसः प्रणिधिः—वयं चोपपन्ना इति । उपपत्तिप्रतिलम्भिकेन प्रथमध्यानभूमिकेन तस्य महाब्रह्मण एवं चेतसः प्रणिधिमन्वस्मार्षुः, समानभूमिकत्वादित्यदोष एव । तत्सकाशं श्रवणाद्वा ।

१. ०मास्मार्षु —का० । २. वा—का० ।
३. मेवं—का० ।

अत्र पुनः पर्यन्तग्रहणात् सकलद्वितीयध्यानग्रहणं वेदितव्यम् । अन्यथा हि परीत्ताभा अप्रमाणाभाश्च कस्यां विज्ञानस्थितौ व्यवस्थाप्येरन् ।

तत्राभिन्नवर्णलिङ्गसंस्थानत्वादेकत्वकायाः । सुखसंज्ञित्वाददुःखासुखसंज्ञित्वाच्च नानात्वसंज्ञिनः ।

ते किल मौल्यां भूमौ सौमनस्येन्द्रियपरिखिन्नाः सामन्तकादुपेक्षेन्द्रियं सम्मुखीभवन्ति । सामन्तके चोपेक्षेन्द्रियपरिखिन्नाः पुनर्मौल्या भूमेः सौमनस्येन्द्रियं सम्मुखीकुर्वन्ति । यथा—कामरतिपरिखिन्ना ईश्वरा धर्मरतिं प्रत्यनुभवन्ति, धर्मरतिपरिखिन्नाः कामरतिमिति ।

ननु च शुभकृत्स्नेष्वप्येष प्रसङ्गः ? न तेषां तेन सुखेनास्ति परिखेदः । किं कारणम् ? शान्तं हि तत्सुखम्, अशान्तं च सौमनस्यम् ; चेतस उत्प्लावकत्वादिति सौत्रान्तिका व्याचक्षते । सूत्र उक्तम्—"यथा ते नानात्वसंज्ञिनः । तत्र ये सत्त्वा आभास्वरे देवनिकायेऽचिरोपपन्ना भवन्ति नैव संवर्त्तनीकुशलाः, अस्य लोकस्य ते तामर्चिषं दृष्ट्वा भीताः सन्त उद्विजन्ते, संवेगमापद्यन्ते—स हैवैषाऽर्चिः शून्यं ब्राह्मं विमानं दग्ध्वाऽर्वागागमिष्यतीति । तत्र ये सत्त्वा आभास्वरे देवनिकाये चिरोपपन्नाः संवर्त्तनीकुशला विवर्त्तनीकुशलाश्चास्य लोकस्य, ते तान् सत्त्वान् भीतानाश्वासयन्ति—मा भैष्ट मार्षाः, मा भैष्ट मार्षाः, पूर्वमप्येषाऽर्चिः शून्यं ब्राह्मं विमानं दग्ध्वाऽत्रैवान्तर्हिता" ( ) इति । अतोऽर्चिष आगमव्यपगमसंज्ञित्वाद्, भीताभीतसंज्ञित्वाच्च ते नानात्वसंज्ञिनः, न सुखादुःखासुखसंज्ञित्वादिति ।

ननु च शुभकृत्स्नेष्वप्येष प्रसङ्गः । एकत्वकाया नानात्वसंज्ञिन इति । कथम् ? यथोक्तम् । 'ते हि मौल्यां भूमौ सुखेन्द्रियपरिखिन्नाः सामन्तकोपेक्षेन्द्रियं सम्मुखीकुर्वन्ति' इति विस्तरेण वक्तव्यं स्यात् । ते चैकत्वकाया एकत्वसंज्ञिन इति पश्चाद् वक्ष्यते । *तेन सुखेनेति* तृतीयध्यानभूमिकेन । *चेतस उत्प्लावकत्वादिति* । औद्बिल्यकरत्वात् । *इन्द्रसुखेनेति* । *द्वितीयध्यान आगमव्यपगमसंज्ञित्वात्* । अचिरोपपन्नानामागमसंज्ञित्वाच्चिरोपपन्नानां व्यपगमसंज्ञित्वात् । अथ वा—अचिरोपपन्नानामागमसंज्ञित्वाच्चिरोपपन्नानामागमव्यपगमसंज्ञित्वात् । *भीताभीतसंज्ञित्वात्* । यथाक्रममचिरचिरोपपन्नत्वात् ते नानात्वसंज्ञिनो न *सुखादुःखासुखसंज्ञित्वात्*, यथोक्तं *वैभाषिकै*रिति ।

"रूपिणः सन्ति सत्त्वा एकत्वकाया एकत्वसंज्ञिनः, तद्यथा—देवाः शुभकृत्स्नाः। इयं चतुर्थी विज्ञानस्थितिः।"

तत्राभिन्नवर्णसंस्थानलिङ्गत्वादेकत्वकायाः। एकत्वसंज्ञिनः सुखसंज्ञित्वात्।

तत्र प्रथमे ध्याने क्लिष्टया संज्ञया एकत्वसंज्ञिनः, द्वितीये कुशलया संज्ञया नानात्वसंज्ञिनः, तृतीये विपाकजया संज्ञया एकत्वसंज्ञिनः।

आरूप्यास्त्रयो यथासूत्रमिति। एताः सप्त विज्ञानस्थितयः।

काऽत्र विज्ञानस्थितिः? तत्प्रतिसंयुक्ताः पञ्च स्कन्धाश्चत्वारश्च यथायोगम्।

शेषं कस्मान्न विज्ञानस्थितिः? यस्मात्—

शेषं तत्परिभेदवत्।

किं पुनः शेषम्? दुर्गतयः, चतुर्थं ध्यानम्, भवाग्रं च।

अत्र हि विज्ञानपरिभेदाः सन्ति, अत एव न विज्ञानस्थितिः।

कः पुनः परिभेदः, येन विज्ञानं परिभिद्यते? तत्रापायेषु दुःखा वेदना,

---

प्रथमे ध्याने क्लिष्टया संज्ञयेति। शीलव्रतपरामर्शसम्प्रयुक्तया, अकारणे कारणाभिनिविष्टत्वात्। *द्वितीये कुशलया संज्ञयेति।* सामन्तकमौलसंगृहीतत्वात्। *तृतीये विपाकजया संज्ञयेति।* विपाकजसुखसम्प्रयोगात्।

आरूप्यास्त्रयो यथासूत्रमिति। "अरूपिणः सन्ति सत्त्वा ये सर्वशो रूपसंज्ञानां समतिक्रमादनन्तमाकाशमित्याकाशानन्त्यायतनमुपसम्पद्य विहरन्ति, तद्यथा—देवा आकाशानन्त्यायतनोपगाः। इयं पञ्चमी विज्ञानस्थितिः। अरूपिणः सन्ति सत्त्वा ये सर्वश आकाशानन्त्यायतनं समतिक्रम्यानन्त्यं विज्ञानमिति विज्ञानानन्त्यायतनमुपसम्पद्य विहरन्ति, तद्यथा—विज्ञानानन्त्यायतनोपगा देवाः। इयं षष्ठी विज्ञानस्थितिः। अरूपिणः सन्ति सत्त्वा ये सर्वशो विज्ञानानन्त्यायतनं समतिक्रम्य नास्ति किञ्चिदित्याकिञ्चन्यायतनमुपसम्पद्य विहरन्ति, तद्यथा—आकिञ्चन्यायतनोपगाः देवाः। इयं सप्तमी विज्ञानस्थितिः" ( ) इति।

पञ्चस्कन्धाश्चत्वारश्च यथायोगमिति। आकाशानन्त्यायतनादित्रयप्रतिसंयुक्ताश्चतुःस्कन्धाः, अन्यप्रतिसंयुक्ताः पञ्चस्कन्धाः।

"शेषं तत्परिभेदवद्" इति। परिभिद्यतेऽनेनेति परिभेदः, तस्य विज्ञानस्य परिभेदस्तत्परिभेदः, सोऽस्मिन् विद्यत इति तत्परिभेदवत्। शेषं दुर्गत्यादि।

परिभेदः, उपघातकत्वात् । चतुर्थे ध्याने आसंज्ञिकमसंज्ञिसमापत्तिश्च । भवाग्रे निरोधसमापत्तिः, चित्तसन्ततिच्छेदात् ।

पुनराह—यत्रेहस्थानां गन्तुकामता तत्रस्थानां चाव्युच्चलितुकामता, असौ विज्ञानस्थितिरुक्ता । अपायेषु चोभयं नास्ति । चतुर्थे ध्याने सत्त्वा उच्चलितमानसाः पृथग्जना आसंज्ञिकं प्रवेष्टुकामाः, आर्याः शुद्धावासान् भवाग्रानपटुप्रचारत्वान्न विज्ञानस्थितिरिति ।

एताश्च सप्त विज्ञानस्थितयो यथोक्ताः ।

भवाग्रासंज्ञिसत्त्वाश्च सत्त्वावासा नव स्मृताः ॥ ६ ॥

एषु हि सत्त्वा आवसन्ति स्वेच्छया ॥ ६ ॥

अनिच्छावसनान्नान्ये

के पुनरन्ये ? अपायाः । तेषु हि सत्त्वा अकामकाः कर्मराक्षसैरावास्यन्ते, न त्विच्छया वसन्ति । अतस्तेन सत्त्वावासाः, बन्धनस्थानवत् ।

---

*अपायेषु चोभयं नास्ती*ति । नेहस्थानां गन्तुकामता, न तत्रस्थानां व्युच्चलितुकामता । *अपटुप्रचारत्वा*दिति । चित्तचैत्तानामत्र मन्दप्रचारत्वात् । अबलवद् विज्ञानं न तिष्ठतीति युक्तं वक्तुम् ।

"*भवाग्रासंज्ञिसत्त्वाश्च सत्त्वावासा नव*" इति । सूत्र उक्तम्—"नव सत्त्वावासाः । कतमे नव ? रूपिणः सन्ति सत्त्वा नानात्वकाया नानात्वसंज्ञिनः । तद्यथा—मनुष्याः, तदेकत्याश्च देवाः । अयं प्रथमः सत्त्वावासः" । द्वितीयतृतीयचतुर्था अपि यथा विज्ञानस्थितिषु तथा वक्तव्याः । अयं तु विशेषः—"रूपिणः सन्ति सत्त्वा असंज्ञिनोऽप्रतिसंज्ञिनः । तद्यथा—देवा असंज्ञिसत्त्वाः । अयं पञ्चमः सत्त्वावासः" । आरूप्याणाञ्च सत्त्वावासानां त्रयो विज्ञानस्थितिवद् वक्तव्याः । चतुर्थस्त्वारूप्यः । "अरूपिणः सन्ति सत्त्वा सर्वश आकिञ्चन्यायतनं समतिक्रम्य नैवसंज्ञानासंज्ञायतनमुपसम्पद्य विहरन्ति । तद्यथा—देवा नैवसंज्ञानासंज्ञायतनोपगाः, अयं नवमः सत्त्वावासः" इति ॥ ६ ॥

असंज्ञिसत्त्वेभ्यो येऽन्ये चतुर्थध्यानोपगाः किं ते सत्त्वावासाः, उत नेति ? नेत्याहुः । कस्मादेवमुक्तमाचार्येण—*के पुनरन्ये ? अपाया* इति ? मुखमात्रमेतदुक्तम् । असंज्ञिसत्त्वाः सत्त्वावासासंगृहीताश्चतुर्थध्यानोपगा इत्यपि वक्तव्यम् । इहापि तदेव कारणं वक्तव्यम् यद्विज्ञानस्थितिषूक्तम् । इहस्थानां ह्यपायगमनप्रार्थना नास्ति, तत्रस्थानाञ्च न वस्तुकामतेति नापायाः सत्त्वावासाः ।

अन्यत्र सूत्रे सप्त विज्ञानस्थितय उक्ताः, अन्यत्र—

चतस्रः स्थितयः पुनः ।

कतमाश्चतस्रः ? रूपोपगा विज्ञानस्थितिः, वेदनोपगा, संज्ञोपगा, संस्कारोपगा इति ।

तासां कः स्वभावः ? ता हि यथाक्रमम्—

चत्वारः सास्रवाः स्कन्धाः,

ते पुनः—

स्वभूमावेव,

नान्यत्र भूमौ । किं कारणम् ? प्रतिष्ठा हि स्थितिः । न च विसभागभूमिकेषु स्कन्धेषु विज्ञानं तृष्णावशात् प्रतितिष्ठतीति ।

कस्मान्न विज्ञानं विज्ञानस्थितिरुच्यते, यथा सप्तसु विज्ञानस्थितिषु पञ्च

असंज्ञिसत्त्वासंगृहीतेषु बृहत्फलेषु यद्यपीहस्थानां गमनप्रार्थनास्ति, तत्रस्थानां पृथग्जनानामासंज्ञिकप्रविविक्षा भवति । आर्याणां त्वनभ्रकपुण्यप्रसवेष्वपि शुद्धावासारूप्यप्रविविक्षा । परिनिर्वातुकामता च शुद्धावासानामपीति न तेषां तत्रावस्थानबुद्धिः । अतो न ते सत्त्वावासा इत्याचार्यसङ्घभद्रः ।

अन्ये पुनर्व्याचक्षते—*के पुनरन्ये, अपाया* इति । अपायानामेव वचनादनभ्रकादयः सत्त्वावासा इष्टा *आचार्यस्येति* । तैर्युक्तिरन्वेष्टव्या । *बन्धनस्थानवदिति* । *यथा* बन्धनस्थानानि न सत्त्वावासाः, *अनिच्छावसनात्*; एवमपाया इति ।

रूपोपगा विज्ञानस्थितिरिति । विज्ञानं तिष्ठत्यस्यामिति विज्ञानस्थितिः । उपगच्छतीति उपगा । विज्ञानस्य समीपचारणी इत्यर्थः । रूपं च तदुपगा च सा रूपोपगा । एवं यावत् संस्काराश्च ते उपगा च संस्कारोपगेति ।

भगवद्विशेषस्तु व्याचष्टे—*रूपोपगा विज्ञानस्थितिर्यावत् संस्कारोपगेति* । *सौत्रान्तिकानां* नयेनोच्यते । तत्र विज्ञानस्थितिर्भवसन्त्यनुच्छेदः, रूपमुपगमस्या विज्ञानस्थितेः सेयं रूपोपगा, उपगमिति उपगम्यते तदात्मीयत इति । एवं यावत् संस्कारा उपगा अस्या विज्ञानस्थितेः सेयं संस्कारोपगाः । अथवा तृष्णा स्थितिः, तिष्ठत्यनया विज्ञानं पुनर्भवसन्तत्यनुच्छेदादिति कृत्वा, विज्ञानस्य स्थितिर्विज्ञानस्थितिः । सा रूपमुपगच्छतीति तदभिष्वङ्गत इति रूपोपगा । एवं यावत् संस्कारोपगा । *वैभाषिकाणां* पुनर्नयेन कारकार्थो न शक्यते योजयितुमिति दूषयति ।

स्कन्धा इति ? स्थातुः परिवर्जनेन[1] स्थितिविधानात् । न हि स्थातैव स्थितिरुच्यते, यथा—न राजैव राजासनमिति । याँश्च धर्मानभिरुह्य विज्ञानं वाहयति नौनाविकन्यायेन, ते धर्मा विज्ञानस्थितय उक्ताः । न तु विज्ञानं विज्ञानमेवाभिरुह्य[2] वाहयत्यतो नोक्तमिति वैभाषिकाः ।

यत्तर्हि सूत्र उक्तम्—"विज्ञाने आहारे अस्ति नन्दी, अस्ति राग इति । यत्रास्ति नन्दी अस्ति रागः, प्रतिष्ठितं तत्र विज्ञानमधिरूढम्" (   ) इति, तत् कथम् ? 'सप्त च विज्ञानस्थितयः पञ्चस्कन्धस्वभावाः[3]' (   ) इति, तत् कथम् ? एवं तर्ह्यभेदेनोपपत्त्यायतनसंगृहीतेषु स्कन्धेषु साभिरामायां विज्ञानप्रवृत्तौ विज्ञानं विज्ञानस्थितिः । प्रत्येकं तु यथा रूपादयो विज्ञानस्य संक्लेशाय भवन्ति ।

अत्र ब्रूमः—द्विविधेऽप्यस्मिन् व्याख्याने रूपादिव्यतिरिक्ता विज्ञानस्थितिरुक्ता—"ता हि चत्वारः सास्रवाः स्कन्धाः" इति ।

"चतुष्कोटिरस्तु संग्रहे" इत्येतत् सर्वं निरस्तं भवतीति दोषान्तरम् । तस्मात् पूर्वकमेव व्याख्यानं साधु । एतद्*वैभाषिक*व्याख्यानं वर्णयामः, न तैरेवं व्याख्यातम्—रूपमुपगच्छतीति रूपोपगा विज्ञानस्थितिरित्यादि ।

अपरे पुनर्व्याचक्षते—रूपोपगा विज्ञानस्थितिरिति, रूपस्वभावेत्यर्थः । यथान्यत्रोक्तम्—खक्खटखरगतमिति । स्वभावोऽर्थो गत्यर्थ इत्यभिप्रायः ।

स्थातुः परिवर्जनेन । अन्यो लोके स्थाता देवदत्तादिः, अन्या स्थितिः स्थानं गृहादिकमित्यर्थः । विज्ञानं वाहयति प्रवर्त्तयतीत्यर्थः । *नौनाविकन्यायेन ।* यथा नाविको नावं वाहयति तद्वत् । *न तु विज्ञानं विज्ञानमेवाभिरुह्य वाहयतीत्यर्थः ।* एकसन्ताने विज्ञानद्वयासमवधानम् । परसन्तानविज्ञानं तु यद्यपि युगपद् भवति, न तु तदितरस्य समीपे वर्त्तत इति न तत् तस्य स्थितिर्भवति ।

नन्दी सौमनस्यम् । *सप्त च विज्ञानस्थितयः पञ्चस्कन्धस्वभावाः, तत् कथमिति ।* सप्तसु विज्ञानस्थितिषु पञ्चस्कन्धस्वभावत्वेनेष्टासु । तत् कथं विज्ञानम्, न विज्ञानस्थितिरिष्टमिति । *एवं तर्ही*ति विस्तरः । *अभेदे*नैकपिण्डरूपेण रूपादीनां स्कन्धानाम्*उपपत्त्यायतनसंगृहीतेषु स्कन्धेषु* मनुष्यादिनिकायसभागसंगृहीतेषु, *साभिरामायां* साभिरत्यां *विज्ञानप्रवृत्तौ विज्ञानं विज्ञानस्थितिः* सप्तविज्ञानस्थिति-

---

१. परिहारेण—का० । २. ०मेवारुह्य—का० ।

३. पञ्चस्कन्धसंगृहीताः—का० ।

तस्माच्चतसृषु विज्ञानस्थितिषु—

केवलम् ॥ ७ ॥

विज्ञानं न स्थितिः प्रोक्तम्,

अपि च क्षेत्रभावेन भगवता चतस्रो विज्ञानस्थितयो देशिताः, बीजभावेन च सोपादानं विज्ञानं कृत्स्नमेवेति । न पुनर्बीजं बीजस्य क्षेत्रभावेन व्यवस्थापयाम्बभूवेत्यभिप्रायं परिकल्पयामास । ये च[1] धर्माः सहवर्त्तिनो विज्ञानस्य, तेऽस्य क्षेत्रभावेन साधीयांसो भवन्तीति त एवास्य स्थितय उक्ताः ॥

अथ कथं सप्तभिर्विज्ञानस्थितिभिश्चतस्रो विज्ञानस्थितयः संगृहीताः, चतसृभिर्वा सप्त ? नैव हि सप्तभिश्चतस्रः, नापि चतसृभिः सप्त ।

चतुष्कोटि तु संग्रहे ।

संग्रहे विचार्यमाणे चतुष्कोटिकं वेदितव्यम्—स्यात् सप्तभिः संगृहीतं न

देशनायामभिप्रीयते । *प्रत्येकं* त्वेकमेकं स्कन्धं प्रति । *यथा रूपादयो विज्ञानस्य संक्लेशाय भवन्ति;* आश्रयसम्प्रयोगसहभूभावेनोपगतत्वात् । *नैवम् केवलम् ।* पृथग् । *विज्ञानम् । किम् ?* संक्लेशाय भवतीत्यधिकृतम् । कस्मात् ? युगपदाश्रयत्वाद्ययोगात् । तस्माच्चतुर्विज्ञानस्थितिदेशनायाम् "*केवलम्* पृथग् *विज्ञानं न स्थितिः प्रोक्तम् ।*"

तथा विनेयजनापेक्षया ह्येकत्र सूत्रे अन्यथा विज्ञानस्थितिरुक्ता, अन्यत्र चान्यथेति, अत आह—*अपि च क्षेत्रभावेनेति* विस्तरः । विज्ञानस्य क्षेत्रभावेन चतस्रो विज्ञानस्थितयो रूपवेदनासंज्ञासंस्कारस्वभावा देशिताः । *विज्ञानं बीजभावेन* वपनीयरूपेण सोपादानम् । स्वभूमिकया तृष्णया सतृष्णम् । कृत्स्नमेव सन्तानगतं देशितमिति । न पुनर्बीजं बीजस्य क्षेत्रभावेन व्यवस्थापयाम्बभूव भगवान् । नहि लोके बीजं क्षेत्रभावेन व्यवस्थाप्यते । *ये च धर्मा इति* विस्तरः । ये च धर्मा विज्ञानस्य सहवर्त्तिनो रूपादयः, त एव क्षेत्रभावेन साधुतरा भवन्ति । सहवर्त्ति हि बीजस्य क्षेत्रं लोके दृश्यते । विज्ञानं तु विज्ञानेन सह न वर्त्तते; युगपद् अभावात् । अतीतानागतास्तर्हि रूपादयो न विज्ञानस्थितयः प्राप्नुवन्ति ? तेऽप्यतीतानागता यथास्वमतीनागतानां विज्ञानानां स्थितयो भवन्ति । तस्मात् स्वभूमौ सर्वं एव सास्रवा रूपादयो विज्ञानस्थितयो भवन्तीत्यवगन्तव्यम् ।

---

१. का० पुस्तके नास्ति ।

चतसृभिरित्येवमादि । प्रथमा कोटिः—सप्तसु यद्विज्ञानम् । द्वितीया—अपायेषु चतुर्थे ध्याने भवाग्रे च विज्ञानवर्ज्याः स्कन्धाः । तृतीया—सप्तसु चत्वारः स्कन्धाः । चतुर्थी—एतानाकारान् स्थापयित्वा ।

यच्चैतद् गत्यादिभेदभिन्नं त्रैधातुकमुक्तम्, वेदितव्याः—

चतस्रो योनयस्तत्र सत्त्वानामण्डजादयः ॥ ८ ॥

अण्डजा योनिर्जरायुजा संस्वेदजा उपपादुका योनिः । योनिर्नाम जातिः । युवन्त्यस्यां सत्त्वा मिश्रीभवन्ति प्रसवसाम्यादिति योनिः ।

अण्डजा योनिः कतमा ? ये सत्त्वा अण्डेभ्यो जायन्ते । तद्यथा—हंसक्रोञ्चचक्रवाकमयूरशुकशारिकादयः ।

जरायुजा योनिः कतमा ? ये सत्त्वा जरायोर्जायन्ते । तद्यथा—हस्त्यश्वगोमहिषखरवराहादयः ।

संस्वेदजा योनिः कतमा ? ये सत्त्वा भूतसंस्वेदाज्जायन्ते । तद्यथा—कृमिकीटपतङ्गमशकादयः ।

उपपादुका योनिः कतमा ? ये सत्त्वा अविकला अहीनेन्द्रियाः सर्वाङ्ग-

---

प्रथमा कोटिरिति विस्तरः । *सप्तसु यद्विज्ञान*मिति । पञ्चस्कन्धस्वभावत्वात् सप्तानां विज्ञानस्थितीनाम् । तत्र विज्ञानं संगृहीतं न चतसृषु, विज्ञानस्य तत्राग्रहणात् । *विज्ञानवर्ज्याः स्कन्धा* इति । अपायादिष्वपि विज्ञानं न चतसृषु संगृहीतम्, न सप्तस्वपायादिषु, विज्ञानपरिभेदेनाग्रहणात् । *सप्तसु चत्वारः स्कन्धा* इति । सप्तसु विज्ञानस्थितिषु ये विज्ञानवर्ज्याश्चत्वारः स्कन्धा उक्ताः, ते चतसृष्वपि विज्ञानस्थितिषु संगृहीता इत्युभयत्रापि संगृहीता इति *तृतीया कोटिः । चतुर्थ्येतानाकारान् स्थापयित्वेति* । अपायेषु चतुर्थे ध्याने भवाग्रे च यद्विज्ञानमनास्रवाश्च धर्माः ।

यच्चैतद् गत्यादिभेदभिन्नमिति । आदिशब्देन भाजनान्तराभवभूम्यादि-गृह्यते । जरायुर्येन मातुः कुक्षौ गर्भे वेष्टितस्तिष्ठति तस्माज्जाता *जरायुजाः । भूतसंस्वेदजा* इति । भूतानां पृथिव्यादीनां संस्वेदाद् द्रवत्वलक्षणाज्जाता भूतसंस्वेदजाः ।

अविकलाः चक्षुरिन्द्रियाद्यवैकल्यात् । *अहीनेन्द्रियाः* काणविभ्रान्तादेरभावात् । *सर्वाङ्गैरुपेता* हस्तपादादिभिः । सर्वैश्च प्रत्यङ्गैरङ्गुल्यादिभिरुपेताः

प्रत्ययोपेताः सकृदुपजायन्ते । अत एव उपपादने[1] साधुकारित्वाद् **'उपपादुकाः'** **इत्युच्यन्ते, तद्यथा—देवनारकान्तराभविकादयः ॥ ८ ॥**

अथ कस्यां गतौ कति योनयः संविद्यन्ते ? इत्याह—

चतुर्धा नरतिर्यञ्चः

मनुष्याश्चतुर्विधाः—१. अण्डजास्तावद्, यथा कौञ्चीनिर्यातौ **शैलोपशैलौ** **स्थविरौ, मृगारमातुश्च** द्वात्रिंशत् पुत्राः, **पञ्चालराजस्य च** पञ्च **पुत्रशतानि** । २. जरायुजाः, यथेदानीम् । ३. संस्वेदजाः, तद्यथा **मान्धातृचारूपचारु-कपोतमालिन्याम्रपाल्यादयः** । ४. उपपादुकाः पुनः प्राथमकल्पिकाः ।

एवं तिर्यञ्चोऽपि चतुर्विधाः—त्रिविधा दृश्यन्त एव, उपपादुकास्तु **सुपर्णी**प्रभृतयः[2] ।

नारका उपपादुकाः ।

अन्तराभवदेवाश्च

सर्वे नारका अन्तराभविकाः । **देवाश्चोपपादुका** एव ।

सकृदुपजायन्ते, न कललाद्यनुपूर्व्या अण्डजादिवत् । *उपपादने* उपपत्तौ *साधुकारित्वात्* । शुक्लशोणिताद्यनुपादानेन सकृदुपजातत्वात् *उपपादुका इत्युच्यन्ते* ॥

*कौञ्चीनिर्यातौ*विति विस्तरः । भिन्नयानपात्रौ किल वणिजौ समुद्रतीरे कौञ्चीं समभिगतो, ततो निर्यातौ *शैलोपशैलौ स्थविरा*विति । *पञ्चालराजस्ये*ति । तस्य महादेव्याः पञ्चाण्डशतानि जातानि । तेन राज्ञा मञ्जूषायां प्रक्षिप्य गङ्गायामववाहितानि । लिच्छविराजेन सान्तःपुरेण स्नायता सा मञ्जूषोह्यमाना दृष्टा, उद्घाटिता च । तस्यां पञ्चशतानि दारकाणां दृष्टानि, गृहीतानि चेति । *मान्धातृप्रभृतयः संस्वेदजाः* । कथम् ? उपोषधस्य किल राज्ञो मूर्ध्नि पिटको जातः, तस्य वृद्धेरन्वयात् परिपाकान्वयात् परिभेदान्वयाद् दारको जातः, सोऽयं मान्धातेति संस्वेदजो भवति । राज्ञः खल्वपि मान्धातुर्जानूपरि पिटकौ जातौ, तयोर्वृद्धेरन्वयात् पूर्ववद् यावद्दारकौ जातौ,ताविमौ *चारूपचारौ* । ब्रह्मदत्तस्य किल राज्ञ उरसि पिटको जातः । तस्य वृद्धेरन्वयात् पूर्ववद् यावद्दारिका जाता, सेयं *कपोतमालिनीति* । आम्रपाल्यपि कदलीस्तम्भाज्जातेति श्रूयते । *प्राथमकल्पिका* इति । "प्रागासन् रूपिवत् सत्त्वाः" (अभि० ३.९७) इति वचनात् । *सुपर्णी*, गरुडः । प्रेतानां जरायुजत्वसिद्ध्यर्थमुच्यते ।

१. उपपदने—का० । २. नागसुपर्णि०—का० ।

प्रेता अपि जरायुजाः ॥ ९ ॥

अपिशब्दादप्युपपादुका इति । आयुष्मते **महामौद्गल्यायनाय प्रेती निवेदयते**—

"पञ्च पुत्रानहं रात्रौ दिवा पञ्च तथा परान् ।
भक्षयामि जनित्वा तान् नास्ति तृप्तिस्तथापि मे ॥"
( )

कतमा योनिः सर्वसाध्वी ? उपपादुका ।

अथ किमर्थं चरमभविको बोधिसत्त्वः प्राप्तोपपत्तिवशित्वेऽपि **जरायुजां** योनिं भजते ? एवं हि क्रियमाणे महान्तमर्थं पश्यति—'**ज्ञातिसम्बन्धेन महतः शाक्यवंशस्य** धर्मेऽवतरणार्थं चक्रवर्तिवंश्योऽयम्' इति चान्येषां बहुमानादरावर्जनार्थम्, 'मनुष्यभूता अपि चैनां सिद्धिं गच्छन्ति' इति विनेयानामुत्साहार्थम् । **इतरथा** ह्यप्रज्ञायमानकुलगोत्रः कोऽप्ययं मायापुरुषः—इत्येवं परिकल्पयेयुः, देवः पिशाच इति वा । **यथाऽन्यतीर्थ्या अपभाषन्ते**—"कल्पशतस्यात्ययादेवंविधो मायावी लोके प्रादुर्भूय मायया लोकं भक्षयति" ( ) इति ।

अपरे त्वाहुः—'शरीरधातूनामवस्थापनार्थं येषु मनुष्या अन्ये च प्रजां

आयुष्मत इति विस्तरः । कथं गम्यते जरायुजत्वसिद्धयर्थमिति ? *रात्रौ पञ्चतां जनित्वेति* वचनात् । ननु च सुतरामुपपादुकत्वसिद्धयर्थमिति गम्यते, "पञ्च रात्रौ, दिवा पञ्च तथाऽपरान्......नास्ति तृप्तिस्तथापि मे" इति वचनात् ? जरायुजैर्हि भक्षितैस्तृप्तिर्भवेत् । जरायुजसिद्धयर्थमेव नोपपादुकसिद्धयर्थम् । रात्रौ पञ्चानां सकृज्जन्म दिवा चापरेषां पञ्चानां सकृज्जन्म दिवा चापरेषां पञ्चानां न विरुध्यते; तावत्कालेन तदात्मभावपरिपूरितः । क्रमेणापि च रात्रौ पञ्चानां दिवा परेषां पञ्चानां जन्म न विरुध्यते; सत्त्वजातिः सा तादृशी, कर्मणां चाचिन्त्यो विपाक इति । अभिप्रवृद्धजिघांसादोषत्वात्तु नापि तृप्तिरस्तीति ।

प्राप्तोपपत्तिवशित्वेऽपीति । अनेन जरायुजोपपत्तौ कर्मबलात्कारायोगं दर्शयति । *यथान्यतीर्थ्या अपभाषन्त* इति । अन्यतीर्थ्या *मस्करि*प्रभृतयः । यथोक्तं निर्ग्रन्थशास्त्रे—"ऋद्धिं भदन्त को दर्शयति, मायावी गौतमः" इति । तथा भगवन्तमेवोद्दिश्यान्यत्रोक्तम्—*कल्पशतस्यात्ययादेवंविधो लोके मायावी प्रादुर्भूय मायया लोकं भक्षयतीति* । उपजीवतीत्यर्थः ।

विधाय सहस्रशः स्वर्गं च प्राप्ता अपवर्गं चेति उपपादुकानां हि सत्त्वानां बाह्यबीजाभावान्मृतानां कायो नावतिष्ठते, निशान्त इव तैलप्रद्योतोऽन्तर्धीयते'। आधिष्ठानिकीमृद्धिं भगवत इच्छतां न युक्त एष परिहारः ॥

प्रश्नात् प्रश्नान्तरमुत्पद्यते[1]—

यद्युपपादुकानां[2] कायनिधनं न प्रज्ञायते, कथमुक्तं सूत्रे—"उपपादुकः सुपर्णी उपपादुकं नागमुद्धरति भक्षार्थम्" इति ? नोक्तं भक्षयतीति, अपि तूद्धरति भक्षार्थमज्ञत्वादित्यदोषः। भक्षयति वा यावन्न मृतो भवति, न पुनर्मृतस्यास्य तृप्यतीति ॥

कतमा योनिः सर्वबह्वी ? उपपादुकैव। सा हि द्वे[3] गती[3]—तिसृणां च प्रदेशः, सर्वे चान्तराभविका इति ॥ ९ ॥

---

*बाह्यबीजाभावा*दिति। बाह्यस्य शुक्रशोणितकर्दमादेरभावादित्यर्थः। *आधिष्ठानिकी*मिति। यदधितिष्ठति इदमेवं भवत्विति तदधिष्ठानम्, तत्प्रयोजनमस्याः, तत्र वा भवा ऋद्धिराधिष्ठानिकी। *तामिच्छतां* बौद्धानां *न युक्त एष परिहार* इति। कतमः ? य उक्तः—शरीरधातूनामवस्थापनार्थमिति।

प्रश्नात् प्रश्नान्तरमुत्पद्यत इति। अथ किमर्थं चरमभविको बोधिसत्व इति प्रश्न उक्तो विस्तरेण। तत्र चोक्तम्—शरीरधातूनामवस्थापनार्थमिति विस्तरः। तस्मात् प्रश्नादिदं प्रश्नान्तरमुत्पद्यते—*यद्युपपादुकाना*मिति। विस्तरः—*कायनिधनं* कायनाशः। उपपादुकः सुपर्णी उपपादुकं नागमिति विशेषणद्वयं किमर्थम्, किमनुपपादुका अपि सुपर्णिनो नागाश्च सन्ति ? सन्तीत्याहुः। चतुर्विधा हि गरुडा नागाश्च, अण्डजादिभेदात्; तेषामुपपादुका उत्तमाः, संस्वेदजा उपोत्तमाः, जरायुजा मध्याः, अण्डजा जघन्याः। तत्रोपपादुकः सुपर्णी सर्वानुपपादुकादीनुद्धरति भक्षार्थम्, संस्वेदजस्त्रीन् संस्वेदजादीन्, जरायुजो द्वौ जरायुजाण्डजौ, अण्डजोऽण्डजमेवेति वर्णयन्ति। *यावन्न मृत* इति। यदा जीवति तदा तन्मांसादि नान्तर्धीयत इति निर्दशितं भवति। *न पुनर्मृतस्यास्य तृप्यती*ति। न पुनर्मृतेनानेन तृप्यतीत्यर्थः। "तृपिपूरौ विभाषा" (   ) इति विभाषा पष्ठीष्यते। तस्य मृतस्याकाशस्येव भक्षितस्य मांसपिण्डान्तर्धानान्न तृप्यतीत्यवगन्तव्यम्।

सा हि द्वे गती इति। नरकगतिः, देवगतिश्च। *तिसृणां च प्रदेश* इति। तिर्यक्-प्रेत-मनुष्यगत्यन्तरालत्वात् ॥ ९ ॥

---

१. ०मुपजायते—का०। २. यद्यप्युप०—का०। ३—३. द्विगती—का०।

कोऽयमन्तराभवो नाम ?

मृत्यूपपत्तिभवयोरन्तरा भवतीह यः ।

मरणभवस्योपपत्तिभवस्य चान्तरा य आत्मभावोऽभिनिर्वर्त्तते देशान्तरोपपत्तिसम्प्राप्तये, सोऽन्तराभव इत्युच्यते; गत्योरन्तरालत्वात्[1] ।

कथमयं जातश्च नाम न चोपपन्नो भवति ?

गम्यदेशानुपेतत्वान्नोपपन्नोऽन्तराभवः ॥ १० ॥

उपपत्तिगतो हि 'उपपन्नः' इत्युच्यते; पदेर्गत्यर्थत्वात् । न चायं गम्यदेशमुपगतोऽन्तराभवः, तस्मान्नोपपन्नः ॥ १० ॥

कः पुनरसौ देशो गन्तव्यः ? यत्राक्षिप्तस्य विपाकस्याभिव्यक्तिः, समाप्तिश्च ।

विच्छिन्न एवोपपत्तिभवो मरणभवात् सम्भवतीति **निकायान्तरीयाः ।** तदेतन्नेष्यते । किं कारणम् ? युक्तितश्च, आगमतश्च ॥ १० ॥

तत्र तावत् युक्तिं निश्रित्योच्यते—

व्रीहिसन्तानसाधर्म्यादविच्छिन्नभवोद्भवः ।

गत्योरन्तरालत्वात् । ननु चाव्याकृतैव गतिरिष्यते, उपपत्तिभवश्चैकान्तेन क्लिष्टः, मरणभवोऽपि कदाचित् कुशलः क्लिष्टो वा भवति न गतिः, कथं तयोर्गतिशब्दमध्यारोप्य *गत्यन्तरालत्वादित्युच्यते ?* नैष दोषः; मरणोपपत्तिभवयोरनिवृताव्याकृतानां निकायसभागजीवितेन्द्रियजात्यादीनां गतिस्वभावानां तत्काले विद्यमानत्वात् । कामरूपधात्वोश्च कायेन्द्रियस्याप्यवश्यम्भावात् । न चोपपत्तिवन्मरणभवोऽवश्यं क्लिष्टो नाप्यवश्यं कुशलः । तस्मात्तेषु गतिशब्दमारोप्य गत्यन्तरालत्वादित्युक्तम् । *पदेर्गत्यर्थत्वादिति ।* "पद गतौ" (मा० धा० ४.६०) इति पठ्यते, तेनोपपन्नशब्दस्योपगतार्थं दर्शयति ।

"नोपपन्नोऽन्तराभवः" । किं तर्हि ? उपपद्यमान इति । *अभिव्यक्तिः समाप्तिश्चेति ।* आक्षेपकेण कर्मणा निकायसभागस्याभिव्यक्तिः, परिपूरकैः परिसमाप्तिः; सर्वस्मिन् जन्मनि कर्मद्वयस्य व्यापारात्, "एकं जन्माक्षिपत्येकमनेकं परिपूरकम्" (अभि० ४.९५) इति वचनात् । अथ वा—यत्र देशे आक्षिप्तस्य कर्मणा नामरूपस्य विपाकस्य प्रादुर्भावोऽभिव्यक्तिः, षडायतनपूरितश्च समाप्तिः, स देशोऽवगन्तव्यः ॥ १० ॥

"व्रीहिसन्तानसाधर्म्यात्" इति विस्तरः । संबध्नंस्तानः सन्तानः, व्रीहेः

---

१. गत्यन्तरा०—का० ।

सन्तानवर्त्तिनां हि धर्माणामविच्छेदेन देशान्तरेषु प्रादुर्भावो दृष्टः, तद्यथा व्रीहिसन्तानस्य। तस्मादस्यापि सत्त्वसन्तानस्याविच्छेदेन देशान्तरेषु प्रादुर्भावो भविष्णुः।

विच्छिन्नोऽपि दृष्टः प्रादुर्भावः, तद्यथा—आदर्शादिषु बिम्बात् प्रतिबिम्बम्[1]। एवं मरणभवादुपपत्तिभवस्य स्यात्।

प्रतिबिम्बमसिद्धत्वादसाम्याच्चानिदर्शनम् ॥ ११ ॥

प्रतिबिम्बं नामान्यदेवोत्पद्यते धर्मान्तरमित्यसिद्धमेतत्।

सन्तानो व्रीहिसन्तानः। तेन साधर्म्यादविच्छिन्नस्य भवस्योद्भवो भवति। यतोऽपैति, यत्र चोत्पद्यते, तदन्तरालसन्तानवर्त्तिरूपपूर्वकमुपपत्तिभवरूपम्; स्वोपादानरूपसन्तानरूपस्वभावत्वात्, व्रीहीसन्तानपश्चात्तररूपवत्।

सन्तानवर्त्तिनां हि धर्माणामविच्छेदेन देशान्तरोत्पत्त्या देशान्तरेषु प्रादुर्भावो दृष्टः। तद्यथा—व्रीहिसन्तानस्य। व्रीहिन्तानपश्चात्तररूपं हि यतो देशान्तरादपैति, यत्र च देशान्तर उत्पद्यते, तदन्तरालसन्तानवर्त्तिरूपपूर्वकमुत्पद्यते। क्षणिकवादिनां ह्ययमस्माकं सिद्धान्तः—यदा ग्रामाद्ग्रामान्तरं नीयते व्रीहिः, न स व्रीहिः पूर्वत्र ग्रामे निरुध्य तद्ग्रामान्तरालेऽनुत्पद्यमानोऽनेकयोजनान्तरितेऽपि ग्रामान्तर उत्पद्यते। किं तर्हि ? निरन्तराकाशदेशोत्पादनिरोधक्रमेणोत्पद्यते ग्रामान्तरे। तच्च स्वोपादानरूपसन्तानरूपस्वभावम्। तथोपपत्तिभवरूपमप्युत्पद्यत इति। अत्राचार्यगणमतिः सह शिष्येणाचार्यवसुमित्रेण स्वनिकायानुरागभावितमतिर्व्याख्यानव्यापारमपास्य प्रत्यवस्थानपर एव वर्त्तते। वयमिह शास्त्रार्थविवरणं प्रत्याद्रियामहे, न तद्दूषणम्; निःसारत्वात्, बहुवक्तव्यभयाच्च। *भविष्णुर्भवनशीलः।*

विच्छिन्नोऽपीति विस्तरः। *आदर्शादिषु बिम्बात् प्रतिबिम्बमिति।* आदर्शोदकादिषु बिम्बात् मुखात् प्रतिबिम्बं मुखच्छायारूपं विच्छिन्नमुत्पद्यमानं दृष्टमित्यनेनानैकान्तिकतामुद्ग्राहयति। प्रतिसाधनं वा करोति—'यतोऽपैति, यत्र चोत्पद्यते, न तदन्तरालसन्तानवर्त्तिरूपपूर्वकमुपपत्तिभवरूपम्; स्वोपादानरूपसन्तानरूपस्वभावत्वात्, प्रतिबिम्बरूपवत्' इति।

प्रतिबिम्बं नामान्यदेवोत्पद्यते धर्मान्तरमित्यसिद्धमेतदिति। बिम्बसामर्थ्यादेव तत्रादर्शादिषु प्रतिबिम्बाकारं भ्रान्तं विज्ञानमुत्पद्यत इत्याचार्यस्याभिप्रायः। *न तत्र प्रतिबिम्बं नाम किञ्चिदस्ति* इत्यनेन धर्म्यसिद्धिर्नाम दृष्टान्तदोषं

---

१. प्रतिबिम्बस्य—का०।

सिद्धावपि च सत्यामसाम्यादनिदर्शनं भवति ॥ ११ ॥

कथं तावदसिद्धम् ?

सहैकत्र द्वयाभावात्

तत्रैव हि देशे आदर्शरूपं दृश्यते प्रतिबिम्बकं[1] च। न चैकत्र देशे रूपद्वयस्यास्ति सहभावः; आश्रयभूतभेदात्।

तथा दिग्भेदव्यवस्थितैरेकस्मिन्[2] वाप्यम्बुदेशे स्वाभिमुखदेशस्थितानां[3] रूपाणामन्योऽन्यं प्रतिबिम्बकमुपलभ्यते, न त्वेकत्र रूपे द्वयोः पश्यतोः

दर्शयति। तस्मान्नानैकान्तिकतास्ति। न चैतत् प्रतिसाधनं साध्विति। *सिद्धावपि च सत्याम् असाम्यादनिदर्शन*मिति। प्रतिबिम्बस्य द्रव्यसत्त्वेन सिद्धावपि सत्यामसाम्याद् दार्ष्टान्तिकेन न निदर्शनमनुदाहरणं प्रतिबिम्बकमिति ॥ ११ ॥

कथं तावदसिद्धमिति। तावच्छब्दः क्रमे।

असिद्धतायुक्तिं तावत् दर्शयन्नाह—"*सहैकत्र द्वयाभावात्*" इति विस्तरः। तत्रैव हि आदर्शदेशे आदर्शरूपं दृश्यते पार्श्वस्थितेन, न प्रतिबिम्बकम्। प्रतिबिम्बकं च तत्रैव दृश्यतेऽभिमुखावस्थितेन, नादर्शरूपम्। न चैकत्र देशे उपादाय *रूपद्वयस्यास्ति सहभावः*। किं कारणम्? *आश्रयभूतभेदात्*। आश्रयभूतानि हि तयोर्भिन्नानीति। नास्त्यादर्शरूपाश्रयभूतैरवष्टब्धे देशे प्रतिबिम्बकरूपाश्रयभूतानां तत्रावकाशः। अतो नोपादायरूपद्वयस्यास्ति सम्भवः। तदेवं युगपद्विज्ञानद्वयस्याभावात्, उपादायरूपद्वयस्य चैकत्र सहभावाभावात्, न तत् किञ्चिदस्तीति दर्शयति। यत्रैव हि देशे आदर्शरूपं दृश्यत इति बिम्बकं च तत्रैव, न त्वन्यत्र। को दोषः? इत्याह—*न चैकत्र रूपद्वयस्यास्ति सहभाव* इति पूर्ववद् वाच्यम्।

अथवा सहैकत्र द्वयाभावादित्यस्य सूत्रस्यायमर्थः—एकत्र रूपे पुरुषद्वयस्य पश्यत एवाभावात्। सहदर्शनस्य प्रतिबिम्बमसिद्धमिति वाक्याध्याहारः। कथम्? इत्याह—*दिग्भेदव्यवस्थितैः* पुरुषैरेकैरुत्तरदिग्व्यवस्थितैः, इतरैर्दक्षिणदिग्व्यवस्थितैः। *एकस्मिन् वाप्यम्बुदेशे* एकस्मिंस्तटाकजलदेशे, *स्वाभिमुखदेशस्थितानां रूपाणाम्*। दक्षिणतटोर्ध्वस्थितानि रूपाण्युत्तरदिग्व्यवस्थितपुरुषस्याभिमुखस्थानि, उत्तरतटोर्ध्वस्थितान्यपि रूपाणि दक्षिणदिग्व्यवस्थितपुरुषस्याभिमुखस्थानि, तेषामुभयेषाम्। किम्? *प्रतिबिम्बकमन्योन्यमुपलभ्यते*।

---

१. प्रतिबिम्बं—का०।   २. ०व्यवस्थितेरे०—का०।

३. ०देशस्थानां—का०।

सहदर्शनं न भवतीति न तत्र रूपान्तरोपपत्तिर्युक्ता ।

छायातपयोश्च द्वयोः सहैकत्रभावो न दृष्टः । उपलभ्यते च छायास्थ आदर्शे सूर्यस्य प्रतिबिम्बकमिति न युक्तोऽस्य तत्र प्रादुर्भावः ।

अथ वा—सहैकत्र द्वयाभावात् इति । कतमस्य द्वयस्य ? आदर्शतलस्य, इन्दुप्रतिबिम्बकस्य च । अन्यत्रैव हि देशे आदर्शतलं भवति, अन्यत्रैवान्तर्गतं चन्द्रप्रतिबिम्बकं दृश्यते, कूप इवोदकम् । तच्च तत्रोपपद्यमानं नान्यत्रोपलभ्यते । अतो नास्त्येव तत् किञ्चित् । सामग्र्यास्तु स तस्याः[1] प्रभावो यत् तथा दर्शनं भवति । अचिन्त्यो हि धर्माणां शक्तिभेदः । एवं तावदसिद्धत्वात् ।

उत्तरदिग्व्यवस्थितैर्दक्षिणतटाधः प्रतिबिम्बकमुपलभ्यते, दक्षिणदिग्व्यवस्थितैरप्युत्तरतटाधः प्रतिबिम्बकमुपलभ्यते । एवमन्योन्यमुपलभ्यते, न तूभयं युगपदुपलभ्यत इति वाक्यार्थः । न हि स्वतटाधःप्रतिबिम्बकमेकतटस्थैः समन्ततोऽपि वापीजलं पश्यद्भिरुपलभ्यते । ततः किमिति चेद् ? अत आह—*न त्वेकत्र* रूपे घटे पटे वा *द्वयोः पश्यतोः* पुरुषयोः *सहदर्शनं न भवति* । भवेत्येवेत्यर्थः । इह तु न भवति सहदर्शनमित्यतो *न तत्र रूपान्तरोत्पत्तिर्युक्ते*ति ।

अथवा अस्यायमर्थः—*छायातपयोश्च द्वयोः सहैकत्र भावो न दृष्टो* लोके । यत्र छाया भवति मण्डपेऽन्यत्र वा, न तत्रातपः; यत्र वातपो भवत्यभ्यवकाशे, न तत्र छाया । *उपलभ्यते च छायास्थ आदर्शे सूर्यस्य प्रतिबिम्बकमिति* । कथम् ? तटाके सूर्यप्रतिबिम्बकमुत्पद्यते, तत्तटाकतटस्थे च छायावति मण्डपे आदर्शः स्थाप्यते । तत्रादर्शके तटाकस्थस्य सूर्यप्रतिबिम्बकस्यापरं प्रतिबिम्बकमुत्पद्यते, तटाके च यत् सूर्यप्रतिबिम्बकं तत् सूर्यसमुत्थमित्यवश्यमातपस्वभावमित्यभ्युपगन्तव्यम् । यच्चापरमादर्शे प्रतिबिम्बकं तदातपस्वभावप्रतिबिम्बकसमुत्थमित्येतदप्यवश्यं आतपस्वभावमभ्युपगन्तव्यम् । एवं सति छायातपयोः सहस्वभावः स्यात् । न चान्यत्र लोके छायातपयोः सहभाव इति । *न युक्तोऽस्य* प्रतिबिम्बकस्य *तत्र प्रादुर्भावः । कूप इवादेकमिति । यथा* कूपे दूरान्तर्गतमुदकं दृश्यते, तथा चन्द्रप्रतिबिम्बकमप्यत्रैवान्तर्गतं दृश्यते । न चादर्शस्तावत् वस्तुफलोऽस्ति । *तच्च तत्रोत्पद्यमानम्*, तच्च प्रतिबिम्बकमादर्श एवोत्पद्यमानम् । *नान्यत्राधस्तादुपलभ्यते* । उपलभ्यते च, *अतो नास्त्येव तत् किञ्चित्* । *सामग्र्यास्तु* । बिम्बादर्शादिलक्षणायाः । *स तस्याः प्रभावो यत्तथा दर्शनं भवति । अचिन्त्यो हि धर्माणां शक्तिभेदः* । अयसोऽयस्कान्ताभिगमनदर्श-

---

१. तस्यास्तादृशः—का० ।

कथमसाम्यादनिदर्शनं भवति ?

असन्तानाद्

नहि बिम्बस्य प्रतिबिम्बकं सन्तानभूतम्; आदर्शसन्तानसम्बद्धत्वात्, सह-भावाच्च। तदेवं[1] यथा मरणभवस्योपपत्तिभवः[2] सन्तानभूतः[3], नैवं बिम्बस्य प्रतिबिम्बकम्[3]। सन्तानं च प्रत्यविच्छेदेन देशान्तरेषु प्रादुर्भाव उदाहृतः, नासन्तानम्—इत्यसाम्यं दृष्टान्तस्य, प्रतिबिम्बस्य च।

द्वयोदयात्।

द्वाभ्यां हि कारणाभ्यां प्रतिबिम्बस्योदयो भवति—बिम्बाच्च, आदर्शाच्चेति। यत् प्रधानं कारणं तदाश्रित्योत्पद्यते। न चैवमुपपत्तिभवस्यापि द्वाभ्यां कारणाभ्यां सम्भवः—मरणभवाच्चान्यतश्च प्रधानभूताद्। इत्यतोऽप्ययमसमानो दृष्टान्तः। न च युक्तमुक्तम्—बाह्यमेव चेतनं शुक्रशोणितं प्रधानकारणमिति। यत्र चान्धकाण एव प्रादुर्भाव उपपादुकानां तत्र किं परिकल्प्यते !

नाम्न काष्ठादीनाम्; यथा चन्द्रकान्ताच्चन्द्रोदयेऽसम्भवप्रक्षरणदर्शनम्, नाङ्गारादीनामित्येवमादि वक्तव्यम्।

*आदर्शसन्तानसम्बद्धत्वादि*ति। न बिम्बसन्तानभूतं प्रतिबिम्बमादर्शसम्बन्धत्वादादर्शरूपवत्। *सहभावाच्च*। बिम्बसमानकालरूपान्तरवत्। *तदेवं यथा मरणभवस्योपपत्तिभवः सन्तानभूतो नैवं बिम्बस्य प्रतिबिम्बकमि*ति। साधनानन्वितः प्रतिबिम्बकदृष्टान्तः। व्रीहिसन्तानपश्चात्तररूपदृष्टान्तस्तु स्वसन्तानपूर्वरूपसन्तानभूत इति। तस्माद*साम्यं दृष्टान्तस्य प्रतिबिम्बस्य* चेति।

"*द्वयोदयात्*" इति विस्तरः। द्वयेनोदयो द्वयोदयः, *तस्माद् बिम्बाच्चादर्शाच्चे*त्यर्थः। *यत् प्रधानं कारण*मादर्शादि *तदाश्रित्योत्पद्यते प्रतिबिम्बम्*। आदर्शादि हि प्रतिबिम्बस्य प्रधानं कारणम्; तदनुविधानात्। तद् यथा यद्यसिस्तिर्यगवस्थितो भवति प्रतिबिम्बमपि तिर्यगायतं च दृश्यते। यद्यूर्ध्वमवस्थितो भवति प्रतिबिम्बमपि तथैव दृश्यते। *न चैवमुपपत्तिभवस्यापि द्वाभ्यां कारणाभ्यां सम्भवो मरणभवाच्चान्यतश्च प्रधानभूता*दादर्शस्थानीयात्। *बाह्यं शुक्रशोणितं प्रधानकारणमिति* चेत्, न; *अचेतनत्वात्*। *उपपादुकानां च* तदभावादतो*ऽप्ययमसमानो दृष्टान्तः*। किमनेन दर्शितं भवति ? उत्कालितविशेषणे हेतावयमतुल्यो दृष्टान्त इति।

---

१ का० पस्तके नास्ति।		२. मरणस्योप०--का०।

३-३. का० पुस्तके नास्ति।

एवं तावद्युक्तितो नेष्यते । न मरणभवाद्विच्छिन्न उपपत्तिभवप्रादुर्भावः । तस्मादस्त्येवान्तराभवः ।

कण्ठोक्तेश्चास्ति

सूत्र उक्तम्—"सप्त भवाः । नरकभवः, तिर्यग्भवः, प्रेतभवः, **देवभवः**, मनुष्यभवः, कर्मभवः, अन्तराभवः" इति ।

नैतत् सूत्रं तैराम्नायते ?

इतस्तर्हि—

गन्धर्वात्

"त्रयाणां स्थानानां सम्मुखीभावात् मातुः कुक्षौ गर्भस्यावक्रान्तिर्भवति । माता कल्याऽपि भवति, ऋतुमती च । मातापितरौ रक्तौ[1] सन्निपतितौ च । गन्धर्वश्च प्रत्युपस्थितो भवति" ( ) इति । अन्तराभवं हित्वा कोऽन्यो गन्धर्वः ?

एतदपि नैव तैराम्नायते । कथं तर्हि "स्कन्धभेदश्च प्रत्युपस्थितो भवति" ( ) इति ?

यद्येवम् ? आश्वलायनसूत्र कथं नीयते—"जानन्ति भवन्तो योऽसौ

कथमिति ? यतोऽपैति यत्र चोत्पद्यते तदन्तरालसन्तानवर्त्तिरूपपूर्वकमुपपत्ति-भवरूपम्; अद्वयोत्पन्नस्वोपादानरूपसन्तानरूपस्वभावत्वात्, व्रीहिसन्तानपश्चा-त्तररूपवदिति । तदेवं सति नास्य साधनस्यानैकान्तिकता शक्यमुद्ग्राहयितुम्, नापि प्रतिसाधनं कर्तुमित्युक्तं भवति ।

आगमेनान्तराभवस्यास्तित्वं साधयन्नाह—*"कण्ठोक्तेश्चास्ति"* इति । स्व-शब्दाभिधानादित्यर्थः । *नैतत् सूत्रं तैराम्नायत* इति । तैर्निकायान्तरीयैः । कस्मान्नाम्नायते ? तदागमेष्वभावात् । निकायान्तरागमप्रसिद्धं किमिति न प्रमाणं क्रियते ? मूलसंगीतिभ्रंशेन समारोपितसूत्राशंकितत्वात् ।

त्रयाणां *स्थानानामिति* । त्रयाणां हेतूनां *माता कल्या* माता नीरोगा, *ऋतुमती* रजस्वला, तदेतदुभयं प्रथमं स्थानं भवति । *रक्तौ सन्निपतिताविति* । मैथुनधर्मं कुर्वन्तौ, इदं द्वितीयं स्थानम् । *गन्धर्वश्च प्रत्युपस्थित* इति तृतीयम् । *स्कन्धभेदश्च प्रत्युपस्थित* इति मरणभवः ।

१. रक्तौ भवतः—का० ।

गन्धर्वः प्रत्युपस्थितः, क्षत्रियो वाऽसौ ब्राह्मणो वा वैश्यो वा शूद्रो वा । यदि वा पूर्वस्या दिश आगतः, यदि वा दक्षिणस्याः, पश्चिमायाः, उत्तरस्याः" (   ) इति । न हि स्कन्धभेदस्यागमनं युज्यते ।

अथैतदपि न पठ्यते ।

इतस्तर्हि—

पञ्चोक्तेः

"पञ्चानागामिनः" इत्युक्तं भगवता । अन्तरापरिनिर्वायी, उपपद्यपरिनिर्वायी, अनभिसंस्कारपरिनिर्वायी, साभिसंस्कारपरिनिर्वायी, ऊर्ध्वस्रोताश्चेति । असत्यन्तराभवे कथमन्तरापरिनिर्वायी नाम स्यात् !

अन्तरा नाम देवाः सन्तीत्येके । उपपद्यादयोऽपि हि नाम देवा एवं सति प्रसज्यन्ते । तस्मान्नेयं कल्पना साध्वी ।

इतश्च—

गतिसूत्रतः ॥ १२ ॥

"सप्त सत्पुरुषगतयः" (   ) इत्यत्र सूत्रे अन्तरापरिनिर्वायिणश्चय उक्ताः—काल-देश-प्रकर्षभेदेन । तद्यथा—परीत्तः शकलिकाग्नि-

---

पञ्चानागामिनः सप्त सत्पुरुषगतयः पुद्गलनिर्देशकोशस्थाने वक्ष्यन्ते ।

उपपद्यादयोऽपीति । उपपद्या नाम ते देवा इत्येवमादयः सम्प्रसज्यन्ते ।

सप्त सत्पुरुषगतय इति । एत एव पञ्चान्तरापरानिर्वायिणं त्रिधा भित्त्वा सप्त भवन्ति । तेनाह—*अन्तरापरिनिर्वायिणश्चय उक्ताः । कालदेशप्रकर्षभेदेनेति* । कालप्रकर्षभेदेन, देशप्रकर्षभेदेन च यथायोगम् ।

सूत्रं चात्र पठ्यते—"श्रावस्त्या निदानम् । तत्र भगवान् भिक्षूनामन्त्रयते स्म । सप्त वोऽहं भिक्षव. सत्पुरुषगतीर्देशयिष्याम्यनुपादाय च परिनिर्वाणम्, तच्छृणुत, साधु च सुष्ठु च मनसिकुरुत, भाषिष्ये । सप्त सत्पुरुषगतयः । कतमा ? इह भिक्षुरेवं प्रतिपन्नो भवति—नो च स्यां नो च मे स्यात् न भविष्यामि न मे भविष्यति यदस्ति यद् भूतं तत् प्रजहामीत्युपेक्षां प्रतिलभते । स भवेऽस्मिन्न रज्यते, स भवेऽस्मिन्न सज्यते ।

"अथोत्तरं पदं शान्तं प्रज्ञया प्रतिविध्यति । तच्चानेन पदं कायेन साक्षात्कृतं भवति । एवं प्रतिपन्नस्य भिक्षोः का गतिः स्यात्, कोपपत्तिः, कोऽभिसम्पराय इति स्युः प्रष्टारः । *तद् यथा* भिक्षवः *परीत्तशकलिकाग्निरभिनिवर्तमान*

रभिनिवर्त्तमान एव निर्वायादेवं[1] प्रथमः। तद्यथाऽयस्प्रपाटिका उत्पतन्त्येव निर्वायादेवं द्वितीयः। तद्यथाऽयःप्रपाटिका उत्प्लुत्य पृथिव्यामपतित्वैव[2] निर्वाया-देवं तृतीयः। न चैवमन्तरा नाम देवास्त्रिप्रकाराः काल-देश-प्रकर्षभिन्नाः सन्तीति कल्पनैवेयं केवला।

एव निर्वायात्, एवमेव तस्य तावन्मानावशेषमप्रहीणं भवत्यपरिज्ञातम्। तस्य तावन्मानावशेषस्याप्रहाणादपरिज्ञानात् पञ्चानामवरभागीयानां संयोजनानां प्रहाणादन्तरापरिनिर्वायी भवति। इयं प्रथमा सत्पुरुषगतिराख्याता।

"पुनरपरं भिक्षुरेवं प्रतिपन्नो भवति—नो च स्यामिति पूर्ववत् यावत् स्युः प्रष्टार इति। *तद् यथाऽयोगुडानां* वा अयस्फालानां वा प्रदीप्ताग्निसंप्रतप्तानाम-योघनेन हन्यमानानाम*यस्प्रपाटिका उत्पतन्त्येव निर्वायात्। एवमेव* तस्य पूर्ववत् यावत् पञ्चानामवरभागीयानां संयोजनानां प्रहाणादन्तरापरिनिर्वायी भवति। इयं द्वितीया सत्पुरुषगतिः।

"पुनरपरं भिक्षुरेवं प्रतिपन्नो भवति—पूर्ववद् यावदय*स्प्रपाटिका उत्प्लुत्या-पतित्वैव पृथिव्यां निर्वायात्। एवमेव* तस्य पूर्ववद् यावदन्तरापरिनिर्वायी भवति। इयं तृतीया सत्पुरुषगतिः।

"पुनरपरं भिक्षुरेवं प्रतिपन्नो भवतीति पूर्ववद् यावद् अयस्प्रपाटिका उत्प्लुत्य पतितमात्रैव पृथिव्यां निर्वायात्। एवमेव तस्य पूर्ववद् यावत् पञ्चानामवरभागीयानां संयोजनानां प्रहाणादुपपद्यपरिनिर्वायी भवति। इयं चतुर्थी सत्पुरुषगतिः।

"पुनरपरं भिक्षुरेवं प्रतिपन्न इति पूर्ववद् यावदयस्प्रपाटिका उत्प्लुत्य परीत्ते तृणकाष्ठे निपतेत्, सा तत्र धूममपि कुर्यादर्चिरपि सञ्जनयेत्। सा तत्र धूममपि कृत्वार्ऽचिरपि सञ्जनय्य तदेवं परीत्तं तृणकाष्ठं दग्ध्वा पर्यादाय निरुपा-दाना निर्वायात्। एवमेव तस्य पूर्ववद् यावत् पञ्चानामवरभागीयानां संयोज-नानां प्रहाणादनभिसंस्कारपरिनिर्वायी भवति। इयं पञ्चमी सत्पुरुषगतिः।

"पुनरपरं भिक्षुरेवं प्रतिपन्न इति पूर्ववद् यावदयस्प्रपाटिका उत्प्लुत्य महति विपुले तृणकाष्ठे निपतेत्, सा तत्र धूममपि कुर्यादर्चिरपि सञ्जनयेत्। सा तत्र धूममपि कृत्वार्ऽचिरपि सञ्जनय्य तदेव महद् विपुलं तृणकाष्ठं दग्ध्वा पर्यादाय निरुपादाना परिनिर्वायात्। एवमेव तस्य पूर्ववद् यावत् पञ्चानामवरभागी-यानां संयोजनानां प्रहाणात् साभिसंस्कारपरिनिर्वायी भवति। इयं षष्ठी सत्पुरुषगतिः।

---

१. परिनिर्वाया०—का०। २. मपतितैव—का०।

अन्ये पुनराहुः—आयुःप्रमाणान्तरे वा देवसमीपान्तरे वा यः क्लेशान् प्रजहाति सोऽन्तरापरिनिर्वायी। स पुनर्धातुगतो वा परिनिर्वाति, संज्ञागतो वा, वितर्कगतो वा । तेन त्रिविधो भवतीति। प्रथमो वा[1] निकायसभागपरिग्रहं कृत्वा परिनिर्वाति, द्वितीयो देवसमृद्धिं चानुभूय परिनिर्वाति[2], तृतीयो[3] धर्मसङ्गीतिमनुप्रविश्य परिनिर्वाति[2]।

"पुनरपरं भिक्षुरेवं प्रतिपन्न इति पूर्ववद् यावदयस्प्रपाटिका उत्प्लुत्य महति विपुले तृणकाष्ठे निपतेत्, सा तत्र धूममपि कुर्यादर्चिरपि सञ्जनयेत्, सा तत्र धूममपि कृत्वार्चिरपि सञ्जनय्य तदेव महद् विपुलं तृणकाष्ठं दग्ध्वा ग्राममपि दहेद् ग्रामप्रदेशमपि, नगरमपि नगरप्रदेशमपि, जनपदमपि जनप्रदेशमपि, कक्षमपि, दावमपि, द्वीपमपि, षण्डमपि दहेत्। ग्राममपि दग्ध्वा यावत् षण्डमपि दग्ध्वा मार्गं ह्यागम्य उदकान्तं वाऽल्पहरितकं वा पृथिवीप्रदेशमागम्य पर्यादाय निरुपादाना निर्वायात्। एवमेव तस्य यावत् पञ्चानामवरभागीयानां संयोजनानां प्रहाणादूर्ध्वंस्रोता भवति। इयं सप्तमी सत्पुरुषगतिराख्याता।

"अनुपादाय परिनिर्वाणं कतमत्? इह भिक्षुरेवं प्रतिपन्न इति पूर्ववद् यावत् स्युः प्रष्टार इति। तस्यैवम्प्रतिपन्नस्य भिक्षोर्न पूर्वस्यां दिशि गतिं वदामि, न पश्चिमायां नोत्तरस्यां नोर्ध्वं नाधो नानुविदुक्षु, नान्यत्र दृष्ट एव धर्मे निश्छायं परिनिर्वृत्तं शीतीभूतं ब्रह्मीभूतमिति। इदमुच्यते—अनुपादाय परिनिर्वाणम्। 'सप्त वोऽहं भिक्षवः सत्पुरुषगतीर्देशयिष्यामि, अनुपादाय च परिनिर्वाणम्' इति यदुक्तम्, इदमेतत् प्रत्युक्तम्" (   )।

*अन्ये पुनराहुरि*ति विस्तरः। आयुषः प्रमाणं तस्यान्तरं तस्मिन् *आयुःप्रमाणान्तरे*ऽपरिसमाप्त आयुषीत्यर्थः। *देवसमीपान्तरे* वा देवानामन्तिकं देवसमीपं गतस्यान्तरे *यः क्लेशान् प्रजहाति सोऽन्तरापरिनिर्वायी। स पुनर्धातुगतो वा परिनिर्वाति*। यः क्लेशबीजावस्थायामुपपन्नमात्र असमुदाचारक्लेश इत्यर्थः। *संज्ञागतो* विषयसंज्ञासमुदाचारावस्थायां यः परिनिर्वाति। धातुगताच्चिरतरेणायं परिनिर्वाति। *वितर्कगतो वा* वितर्कसमुदाचारावस्थायां यः परिनिर्वाति। अयमपि संज्ञागताच्चिरतरेण परिनिर्वाति। तेन त्रिविधो भवत्यन्तरापरिनिर्वायी यथोक्तेन दृष्टान्तत्रयेण। प्रथमो वा निकायसभागपरिग्रहं कृत्वा जातमात्र इत्यर्थः। यं प्रत्येष परीत्तः शकलिकाग्निरिति दृष्टान्तः। *द्वितीयो देवसमृद्धिं चानुभूय परिनिर्वातीति*। यं प्रत्येष दृष्टान्तः—तद्यथाऽयस्प्रपाटिकेति। *तृतीयो धर्मसङ्गीतिमनुप्रविश्य* धर्मसांकथ्यमनुप्रविश्य *परिनिर्वाति*। यं प्रत्येष दृष्टान्तः—तद्यथाऽयस्प्रपाटिका उत्प्लुत्य पृथिव्यामपतितैव परिनिर्वायात्।

१. वा रूपधातौ—का०। २. का० पुस्तके नास्ति। ३. ०देवानां—का०।

उपपद्यपरिनिर्वायी पुनः प्रकर्षयुक्तां सञ्चीतिमनुप्रविश्य परिनिर्वाति भूयसा वा आयुरुपहत्य[1] नोपपन्नमात्र एवेति त एते सर्वेऽपि शकलिकादिदृष्टान्तैर्न सम्बध्यन्ते; देशगतिविशेषाभावात् । आरूप्येष्वपि चान्तरापरिनिर्वायी पठ्येत; आयुःप्रमाणान्तरे परिनिर्वाणात् । न चैवं[2] पठ्यते ।

"ध्यानैश्चतस्रो दशिका आरूप्यैः सप्तिकात्रयम् ।
संज्ञया षट्‌किकां[3] कृत्वा वर्गो भवति समुदितः ॥"

इत्येतस्यायर्दानगाथायाम् । तस्मादेतदपि सर्वं कल्पनामात्रम् ।

तदेवं विनाप्यन्तराभावेन यथान्तरापरिनिर्वायी भवति, यथा च तस्य दृष्टान्तत्रयेण त्रिविधो भेदस्तथा साधितं निकायान्तरीयैः । तस्मिन् साधिते इदं चोद्येत—यदि धर्मसञ्चीतिमनुप्रविश्य यः परिनिर्वाति, सोऽन्तरापरिनिर्वायीष्यते; कीदृश उपपद्यपरिनिर्वायी भविष्यति ? इत्यत आह—*उपपद्यपरिनिर्वायी पुनः प्रकर्षयुक्तां सञ्चीतिमनुप्रविश्य परिनिर्वातीति ।* प्रकर्षयोगादुत्पत्त्यर्थो भवतीत्यभिप्रायः ।

सञ्चीत्यनुप्रवेशसामान्यान्नैष भेदो युज्यत इति वचनावकाशं मत्वा पुनराह—*भूयसा वायुरुपहत्येति ।* आयुषो बहु क्षयित्वा परिनिर्वातीत्यर्थः । *त एत इति* विस्तरः । त एते *सर्वेऽपि* धातुगतादयस्त्रयः *शकलिकादिभिर्दृष्टान्तैर्न सम्बध्यन्ते ।* कस्मात् ? *देशगतिविशेषाभावात् ।* देशगतेर्विशेषस्याभावात् । न ह्येषां देशगतिविशेषोऽस्ति, तत्रैव देशे परिनिर्वाणात् । सूत्रोक्तानां त्रयाणां दृष्टान्तानां देशगतिविशेषोऽस्तीति नैभिरेते सम्बध्यन्ते । *आरूप्येष्वपि चेति* विस्तरः । यदि चैवमुपपद्यपरिनिर्वायिण एवान्तरापरिनिर्वायित्वेन व्यवस्थाप्येरन्, आरूप्येष्वपि ते तथैव पठ्येरन्; *तत्रायुःप्रमाणान्तरे परिनिर्वाणात् । न चैवम्*, अतो नैवं सूत्रार्थः—आयुःप्रमाणान्तरे वेत्यादि ।

कथं पुनर्गम्यते—नारूप्येष्वन्तरापरिनिर्वायी पठ्यते ? इत्याह—*ध्यानैश्चतस्रो दशिका इति* विस्तरः । ध्यानैश्चतुर्भिश्चतस्रो दशिकाः सूत्रार्थानाम् । प्रथमस्य ध्यानस्यैका दशिका यावच्चतुर्थस्यैका दशिका, ताः कृत्वा । *आरूप्यैः सप्तिकात्रयम्*, आकाशविज्ञानाकिञ्चन्यायतनैस्तिस्रः सप्तिकाः, तासां त्रयम्; अन्तराभवाभावादुपपत्तिस्थानत्रयाभावेन च द्वयाभावात्, तत् कृत्वा । नैवसंज्ञानासंज्ञायतनेन *षट्‌किका ।* तेषामेव त्रयाणामूर्ध्वं स्रोतसश्चाभावात् । तां च कृत्वा *वर्गो भवति समुदितः ।* वध इत्यर्थः । कथम् ?

---

1. ०रुपहत्य—का० । 2. चैव—का० । 3. षट्टिकां—का० ।

अथैतान्यपि सूत्राणि तैर्नाम्नायन्ते ? किमिदानीं कुर्मो यच्छास्ता च परिनिर्वृतः, शासनं चेदमनायकं बहुधा भिन्नम्, भिद्यते चाद्यापि यथेच्छं ग्रन्थतश्चार्थतश्च । येषां तु तावदयमागमः प्रमाणं तेषामागमतोऽपि सिद्धोऽन्तराभवः ॥

---

१. "इह भिक्षुर्यैराकारैर्यैर्लिङ्गैर्यैनिमित्तैर्विविक्तं कामैर्विविक्तं पापकैरकुशलैर्धर्मैः सवितर्कं सविचारं विवेकजं प्रीतिसुखं प्रथमध्यानमुपसम्पद्य विहरति । स न हैव तानाकारान् तानि लिङ्गानि तानि निमित्तानि मनसिकरोति, अपि तु यत्तत्रोपलभते रूपगतं वा वेदनागतं वा संज्ञागतं वा संस्कारगतं वा विज्ञानगतं वा, स तान् धर्मान् रोगतो मनसिकरोति गण्डतः शल्यतोऽघतोऽनित्यतो दुःखतः शून्यतोऽनात्मतो मनसिकरोति । स तान् धर्मान् रोगतो मनसिकृत्य तेभ्यो धर्मेभ्यश्चित्तमुद्वेजयत्युत्त्रासयति प्रतिवारयति । स तेभ्यो धर्मेभ्यश्चित्तमुद्वेज्योत्त्रास्य प्रतिवार्यामृते धातावुपसंहरति—एतच्छान्तमेतत् प्रणीतम्, यदुत सर्वोपधिप्रतिनिसर्गस्तृष्णाक्षयो विरागो निरोधो निर्वाणम्" इति (१) ।

एतदेव च सूत्रमुक्त्वाऽयं विशेषः—"तस्यैवं जानत एवं पश्यतः कामास्रवाच्चित्तं विमुच्यते भवास्रवाद्, अविद्यास्रवाच्चित्तं विमुच्यते । विमुक्तस्य विमुक्तोऽस्मीति ज्ञानदर्शनं भवति, क्षीणा मे जातिरुषितं ब्रह्मचर्यं कृतं करणीयं नापरमस्माद् भवं प्रजानामीति (२) ।

एतदेव च सूत्रमुक्त्वा "नो तु विमुच्यते, अपि तु तेन धर्मच्छन्देन तेन धर्मस्नेहेन तेनैव धर्मप्रेम्णा तयैव धर्माभिरत्या अन्तरापरिनिर्वायी भवति (३) । न हैवान्तरापरिनिर्वायी भवत्यपि तूपपद्यपरिनिर्वायी भवति (४) । न हैवोपपद्यपरिनिर्वायी भवत्यपि त्वनभिसंस्कारपरिनिर्वायी भवति (५) । न हैवानभिसंस्कारपरिनिर्वायी भवति, अपि तु साभिसंस्कारपरिनिर्वायी भवति (६) । न हैव साभिसंस्कारपरिनिर्वायी भवति, अपि तूर्ध्वंस्रोता भवति (७) । न हैवोर्ध्वंस्रोता भवति, अपि तु तेनैव धर्मच्छन्देन पूर्ववद् यावत्तयैव धर्माभिरत्या महाब्रह्मणां देवानां सभागतायामुपपद्यते (८) । न हैव महाब्रह्मणां देवानां सभागतायामुपपद्यते, अपि तु तेनैव धर्मच्छन्देन पूर्ववद् यावत्तयैव धर्माभिरत्या ब्रह्मपुरोहितानां देवानां सभागतायामुपपद्यते (९) । न हैव ब्रह्मपुरोहितानां देवानां सभागतायामुपपद्यते, अपि तु तेनैव धर्मच्छन्देन पूर्ववद् यावत्तयैव धर्माभिरत्या ब्रह्मकायिकानां देवानां सभागतायामुपपद्यते (१०) ।

२. "इह भिक्षुर्यैराकारैर्यैर्लिङ्गैर्यैर्निमित्तैर्वितर्कविचाराणां व्युपशमादध्यात्मसम्प्रसादाच्चेतस एकोतीभावादवितर्कमविचारं समाधिजं प्रीतिसुखं द्वितीयं ध्यानमुपसम्पद्य विहरति । स न हैव तानाकारान् तानि लिङ्गानि तानि

निमित्तानि मनसिकरोति, अपि तु यत्तत्रोपलभते पूर्ववद् ग्रन्थो यावद्विरागो निरोधो निर्वाणम्" (१)।

एतदेव सूत्रमुक्त्वा "तस्यैवं जानत एवं पश्यतः कामास्रवाच्चित्तं विमुच्यते भवास्रवादविद्यास्रवात्, पूर्ववद् यावत् कृतं करणीयं नापरमस्माद् भवं प्रजानामीति (२)।

एतदेव सूत्रमुक्त्वा "नो तु विमुच्यत अपि तु तेनैव धर्मच्छन्देन पूर्ववद् यावत्तयैव धर्माभिरत्या अन्तरापरिनिर्वायी भवति (३)। न हैवान्तरापरिनिर्वायी भवत्यपि तूपपद्यनिर्वायी भवति (४)। न हैवोपपद्यपरिनिर्वायी भवत्यपि त्वनभिसंस्कारपरिनिर्वायी भवति (५)। न हैवानभिसंस्कारपरिनिर्वायी भवत्यपि तु साभिसंस्कारपरिनिर्वायी भवति (६)। न हैव साभिसंस्कारपरिनिर्वायी भवत्यपि तूर्ध्वंस्रोता भवति (७)। न हैवोर्ध्वंस्रोता भवत्यपि तु तेनैव धर्मच्छन्देन पूर्ववद् यावत्तयैव धर्माभिरत्याभास्वराणां देवानां सभागतायामुपपद्यते (८)। न हैवाभास्वराणां देवानां सभागतायामुपपद्यते, अपि तु तेनैव धर्मच्छन्देन यावत्तयैव धर्माभिरत्याप्रमाणाभानां देवानां सभागतायामुपपद्यते (९)। न हैवाप्रमाणाभानां देवानां सभागतायामुपपद्यते, अपि तु तेनैव धर्मच्छन्देन पूर्ववद् यावत्तयैव धर्माभिरत्या परीत्ताभानां देवानां सभागतायामुपपद्यते (१०)।

३. "इह भिक्षुर्यैराकारैर्यैर्लिङ्गैर्यैर्निमित्तैः प्रीतिविरागादुपेक्षको विहरति स्मृतः सम्प्रजानन् सुखं च कायेन प्रतिसंवेदयते। यत्तदार्या आचक्षते–उपेक्षकः स्मृतिमान् सुखविहारी, तृतीयं ध्यानमुपसम्पद्य विहरतीति, स न हैव तानाकारांस्तानि लिङ्गानि तानि निमित्तानि मनसिकरोति पूर्ववत् सर्वाणि सूत्राणि (१–७)। केवलं तु निकायसभागतायां विशेषः—न हैवोर्ध्वंस्रोता भवति, अपि तु तेनैव धर्मच्छन्देन पूर्ववद्यावच्छुभकृत्स्नानां देवानां सभागतायामुपपद्यते (८)। न हैव शुभकृत्स्नाना देवानां सभागतायामुपपद्यते, अपि तु तेनैव पूर्ववदप्रमाणशुभानां देवानां सभागतायामुपपद्यते (९)। न हैवाप्रमाणशुभानां देवानां सभागतायामुपपद्यत अपि तु तेनैव पूर्ववत् परीत्तशुभानां सभागतायामुपपद्यते (१०)।

४. "इह भिक्षुर्यैराकारैर्यैर्लिङ्गैर्यैर्निमित्तैः सुखस्य च प्रहाणात् दुःखस्य च प्रहाणात् पूर्वमेव सौमनस्यदौर्मनस्ययोरस्तङ्गमात् अदुःखासुखमुपेक्षास्मृतिपरिशुद्धं चतुर्थं ध्यानमुपसम्पद्य विहरति। स न हैव तानाकारांस्तानि लिङ्गानि विस्तरेण सर्वाणि सूत्राणि पूर्ववद् वक्तव्यानि (१–८)।

देवनिकायोपपत्तयस्तु विशेष्यन्ते—"यावत्तयैव धर्माभिरत्या बृहत्फलानां देवानां सभागतायामुपपद्यते (९)। न हैव पूर्ववत् पुण्यप्रसवानां देवानां सभागतायामुपपद्यते। न हैव पूर्ववदनभ्रकाणां देवानां सभागतायामुपपद्यते (१०)।

१. "इह भिक्षुर्यैराकारैर्यैर्लिङ्गैर्यैर्निमित्तैः सर्वशो रूपसंज्ञानां समतिक्रमात्, प्रतिघसंज्ञानामस्तङ्गमात्, नानात्वसंज्ञानाममनसिकारात्, अनन्तमाकाशमित्याकाशानन्त्यायतनमुपसम्पद्य विहरति। स न हैव तानाकारानिति पूर्ववत्, केवलं तु रूपगतमिति न पठितव्यम्; तत्र रूपाभावात्, यावन्निरोधो निर्वाणमिति (१)।

एतदेव सूत्रमुक्त्वायं विशेषः—"तस्यैवं जानत इति पूर्ववद् यावन्नापरमस्मादूर्ध्वं प्रजानामीति (२)। एतदेवोक्त्वा—"नो विमुच्यते, अपि तु तेनैव धर्मच्छन्देन यावत्तयैव धर्माभिरत्योपपद्यपरिनिर्वायी भवति (४)। न हैवोपपद्यपरिनिर्वायी भवति, तेनैव यावदनभिसंस्कारपरिनिर्वायी भवति (५)। न हैवानभिसंस्कारपरिनिर्वायी भवति, सर्वमुक्त्वा यावदूर्ध्वस्रोता न भवत्यपि तु तेनैव पूर्ववत्, यावत्तयैव धर्माभिरत्या आकाशानन्त्यायतनोपगानां देवानां सभागतायामुपपद्यते (६–७)।

२. "इह भिक्षुर्यैराकारैर्यैर्लिङ्गैर्यैर्निमित्तैः सर्वश आकाशानन्त्यायतनं समतिक्रम्यानन्तं विज्ञानमिति विज्ञानानन्त्यायतनमुपसम्पद्य विहरति। स न हैव तानाकारानित्याकाशानन्त्यायतनवत् सप्तसूत्राणि वक्तव्यानि। केवलं तु विज्ञानानन्त्यायतनोपगानां देवानां सभागतायामुपपद्यत इति विशेषः(१–७)।

३. "पुनरपरमिह भिक्षुर्यैराकारैर्यैर्लिङ्गैर्यैर्निमित्तैः सर्वशो विज्ञानानन्त्यायतनं समतिक्रम्य नास्ति किञ्चिदित्याकिञ्चन्यायतनमुपसम्पद्य विहरति, स न हैव तानाकारानिति पूर्ववत् सप्तसूत्राणि (१–७)।

१. "पुनरपरमिह भिक्षुर्यैरिति यावत् सर्वश आकिञ्चन्यायतनं समतिक्रम्य नैवसंज्ञानासंज्ञायतनमुपसम्पद्य विहरति"। पूर्ववत् सर्वाणि सूत्राणि वक्तव्यान्यूर्ध्वस्रोतसंज्ञात्वेकमपनीय (१–६)।

तदेवं चतुर्भिर्ध्यानैरमृतधातुचित्तोपसंहारचित्तविमुक्त्यन्तरोपपद्यानभिसंस्कारसाभिसंस्कारपरिनिर्वाणोर्ध्वगमनश्रुपपत्तिस्थानोपपत्तिस्वभावाश्चतस्रः सूत्रार्थदर्शिका उक्ताः।

त्रिभिस्त्वाद्यैरारूप्यैरमृतधातुचित्तोपसंहारचित्तविमुक्त्युपपद्यानभिसंस्कारसाभिसंस्कारपरिनिर्वाणोर्ध्वगमनोपपत्तिस्थानोपपत्तिस्वभावास्तिस्रः सूत्रार्थसप्तिकाः।

नैवसंज्ञानासंज्ञायतनेनोर्ध्वगमनं परिहाय षट्किका चोक्ताः।

अतो योऽसावन्तरापरिनिर्वायी नासावायुष्प्रमाणान्तरापरिनिर्वायीति युज्यते वक्तुम्। आरूप्येष्वपि ह्यन्तरामरणसम्भवः; "कुरुवर्ज्योऽन्तरामृत्युः" (अभि० को० ३.८५) इति वचनात्।

तस्मात् आगमतोऽपि सिद्धोऽन्तराभवः, न केवलं युक्तित इत्यपि-शब्दः।

यत्तर्हि सूत्र उक्तम्—"अथ च पुनर्दूषी मारः स्वशरीरेणावीचौ महानरके प्रपतितः" ( ) इति, तत् कथमिति ? स हि जीवन्नेव नारकीभिर्ज्वालाभिरालिङ्गितत्वात्[1] कालं कृत्वाऽन्तराभवेनावीचिं प्राप्त इत्ययं तत्राभिप्रायः। अत्युदीर्णपरिपूर्णानि हि कर्माणि कायस्य निक्षेपं न प्रतीक्षन्ते। अतोऽस्य दृष्टधर्मवेदनीयं कर्म पूर्वं विपक्वम्, पश्चादुपपद्यवेदनीयमिति।

इदमिदानीं कथं नीयते—"पञ्चानन्तर्याणि कर्माणि यानि कृत्वोपचित्य समनन्तरं नरकेषूपपद्यते" ( ) इति ? अन्यां गतिमगत्वेत्यभिप्रायः। उपपद्यवेदनीयत्वं तत्र कर्मणो द्योतितम्। अथ यथारुतं कल्प्यते[2] ? पञ्चैव कृत्वा नैकमिति एतत्[3] प्राप्नोति, क्रियानन्तरं च। न कालान्तरं जीवित्वा को वाऽन्तराभवस्योपपद्यमानत्वं नेच्छति। अन्तराभवेनैव ह्यसौ मरणान्तरं नरकेषूपपद्यते; अभिमुखत्वात्। न तु[4] ब्रूमः—उपपन्नो भवतीति।

दूषीमार इति। क्रकुच्छन्दस्य तथागतस्य विदुरं नाम श्रावकं दूषी नाम मारस्तदानीं शिरसि मुष्टिनाऽभिघ्नन् तेनाङ्गीकृतस्तल्लक्षण एव च *स्वशरीरेणावीचौ महानरके प्रपतित* इति। स्वशरीरेणैवेति वचनान्नास्त्यन्तराभव इत्यभिप्रायः। *स हि जीवन्नेव नारकीभिर्ज्वालाभिरिति।* जीवन्नेवासौ मारो नरकोत्थिताभिरग्निज्वालाभिरालिङ्गितत्वात् स्वशरीरावस्थादुःखोत्पत्तेः स्वशरीरेणैव प्रपतित इत्युक्तः, न तु कालमकृत्वा अन्तराभवावस्थां नरकोपपत्तिभवावस्थां च न गतवानित्यभिप्रायः। *अत्युदीर्णपरिपूर्णानीति।* क्षेत्राशयविक्षेपयोगादत्युदीर्णानि, उपचितत्वात् परिपूर्णानि।

समनन्तरं नरकेषूपपद्यत इति। समनन्तरवचनान्नास्त्यन्तराभव इत्यभिप्रायः। *अन्यां गतिमगत्वेति।* उपपत्त्यन्तरप्रतिषेधपरमेतद्वाक्यम्, नान्तराभवप्रतिषेधपरमित्यभिप्रायः। *पञ्चैवेति।* यदि *यथारुतं कल्प्यते*, पञ्चभिरेवानन्तर्यैः कृतैः, न त्वेकेन द्वाभ्यां वा नरकगमनं भवतीत्येतत् *प्राप्नोति।* पञ्चेति रुतात् *क्रियानन्तरं* चानन्तर्यक्रियानन्तरं च नरकेषूपपन्न इति प्राप्नोति। यानि कृत्वोपचित्य समनन्तरं नरकेषूपपद्यत इति रुतान्न *कालान्तरं जीवित्वा को वान्तराभवस्योपपद्यमानत्वं नेच्छतीति।* विप्रकृतावस्थवचनादुपपत्त्यभिमुखो ह्युपपद्यमानः इत्यभिप्रायः। *न तु ब्रूम उपपन्नो भवतीति।* न तूपपद्यत इत्येतत् पदमुपपन्नार्थमिति ब्रूमः। तस्माददोष एषः।

---

१. ०रालिङ्गितः—का०। २. कल्पयते—जा०।
३. का० पुस्तके नास्ति। ४. च—का०।

इयं तर्हि गाथा कथं नीयते—

"उपनीतवया[1] जरातुरः सम्प्राप्तो हि यमान्तिकं[2] द्विज ।
वासोऽपि हि नास्ति तेऽन्तरा पाथेयं च न विद्यते तव" ॥

(　　　　) इति ?

अत्रापि मनुष्येष्वन्तरावासो नास्तीत्यभिप्रायः । अथ वाऽन्तराभवेऽप्यस्य वासो नास्ति; उपपत्तिदेशसम्प्राप्तिगमनाधिष्ठानादिति[3] । अयमत्राभिप्रायः, नायमभिप्रायः—इति कुत एतत्[4] ! तुल्य एष भवतोऽप्यनुयोगः ।

तस्मादुभयस्मिन्नपि पक्षे यथोक्तसूत्राविरोधान्न भवत्येतदन्तराभवस्याभावे ज्ञापकम् । ज्ञापकं हि नाम अगतिका गतिरिति ॥ १२ ॥

अथ कां गतिं गमिष्यतः किमाकृतिरन्तराभवोऽभिनिर्वर्तते ?

एकाक्षेपादसावैष्यत्पूर्वकालभवाकृतिः　　।

उपनीतवया इति । विस्तरः—मृत्युसमीपमुपनीतं वयोऽनेन सोऽयमुपनीतवयाः । *द्विजे*त्यामन्त्रणम् । कश्चिद् जीर्णो ब्राह्मण आमन्त्रितः । *वासोऽपि हि नास्ति तेऽन्तरेति* । इदमत्र ज्ञापकम् । अन्तराभवाभावः इत्यभिप्रायः । *पाथेयं* पथ्योदनं च *न विद्यते तव* पारलौकिकः कुशलसम्भारस्तव नास्तीत्यभिप्रायः ।

*मनुष्येष्वन्तरा*वासो नास्तीति । मरणगतस्य ते सतो मनुष्येष्वन्तरावासो नास्ति । यथेह कस्यचित् प्रतिष्ठमानस्येत्यभिप्रायः । *गमनाधिष्ठानादि*ति । गमनाविरामात् । *अयमत्राभि*प्रायः । यथा त्वया वर्ण्यतेऽस्त्यन्तराभव इति । *नायमभिप्रायः* । यथा मया वर्ण्यते नास्त्यन्तराभव इति । *कुत एतत्* । कुतो हेतोरेतद्भवति । *तुल्य एष भवतोऽप्यनुयोगः* । समान एष भवतोऽपि प्रश्न इत्यर्थः ।

*यथोक्तसूत्राविरोधा*दिति । दूषीमारसूत्राद्यविरोधात् । न भवत्येतत् सूत्र*मन्तराभवस्याभावे ज्ञापकम्* । *ज्ञापकं हि नामागतिका गति*रिति । यस्यागतेरन्या गतिर्नास्त्यसावगतिका गतिः । एतदुक्तं भवति—यदि यज्ज्ञापकं सूत्रं गाथा वा यस्यार्थस्य द्योतनार्थमुच्यते, यदि तमेवार्थं द्योतयति नान्यदप्यर्थान्तरं तद्विरुद्धम्, तज्ज्ञापकमनन्यगतिकमिति ॥ १२ ॥

---

१. उपनीततया—का० ।　　२. ममान्तिकं—का० ।
३. ०संप्राप्तिप्रतिगम०—का० ।　　४. एवैतत्—का० ।

येनैव कर्मणा गतिराक्षिप्यते तेनैवान्तराभवस्तत्प्राप्तये । अतो यां गतिं गन्ता भवति, तस्यां गतौ य आगमिष्यत्पूर्वकालभवस्तस्यैवास्याकृतिर्भवति ।

एवं तर्हि शुनीप्रभृतीनामेकस्मिन् कुक्षौ पञ्चगतिकोऽन्तराभवोऽभिनिर्वर्त्तेत[1] इति नारकोऽन्तराभवः मातुः[2] कुक्षिं निर्दहेत् ? पूर्वकालभवेऽपि तावन्नारका न नित्यं प्रज्वलिता भवन्त्युत्सदेषु भ्रमन्तः, किं पुनरन्तराभविकाः !

अस्तु वा प्रज्वलितः । स तु यथा न द्रष्टुं शक्यते तथा न स्प्रष्टुमपि; अच्छत्वादात्मभावस्येत्यचोद्यमेतत् । अन्तराभवानामप्यन्योन्यं कुक्षावसंश्लेषात् कर्मप्रतिबन्धाच्च न दाहः ।

प्रमाणं तु यथा पञ्चषड्वर्षस्य दारकस्य, स तु पटिवन्द्रियो भवति ।

बोधिसत्त्वस्य पुनर्यथा सम्पूर्णयूनः, सलक्षणानुव्यञ्जनश्च ।

अत एवान्तराभवस्थेन मातुः कुक्षिं प्रविशता कोटीशतं चातुर्द्वीपिकानामवभासितम्[3] ।

"*ऐष्यत्पूर्वकालभवाकृतिः*" इति । आ एष्यदैष्यत्, ऐष्यतः पूर्वकालभवस्येवाकृतिरस्येति ऐष्यत्पूर्वकालभवाकृतिः । कस्मात् ? *एकाक्षेपात्* । यस्मादैष्यन्ती गतिस्तत्प्रापकश्चान्तराभवस्तेनैवैकेन कर्मणाक्षिप्यते ।

शुनीप्रभृतीनामिति शुनीशूकरीप्रभृतीनाम् । *पञ्चगतिक* इति । पञ्चगतिगामीत्यर्थः । यदि गर्भस्थोऽपि म्रियेत तस्य *नारकोऽन्तराभवो मातुः कुक्षिं निर्दहेत्* । नारको हि प्रदीप्तो भवति, तद्रूपं चान्तराभव इति । *पूर्वकालभवेऽपीति* विस्तरः । नारकपूर्वकालभवावस्था अपि *नारका न नित्यं प्रज्वलिता भवन्त्युत्सदेषु* कुकूलादिषु *भ्रमन्तः, किमङ्गान्तराभविकाः* ।

अस्तु वा प्रज्वलित । इति नारकोऽन्तराभवः । *कुक्षावसंश्लेषादिति* । अन्तराभवानामच्छत्वादात्मभावस्यान्योन्यमसंश्लेषान्न दाहः । *कर्मप्रतिबन्धाच्च* । तत्कर्मप्रतिबन्धान्न दाह इति कृत्वा । अत एव शुनीप्रभृतीनां कुक्षेरदाहः ।

कोटीशतं चातुर्द्वीपिकानामवभासितमिति । यतः पूर्णयून इव बोधिसत्त्वस्यान्तराभवः सलक्षणानुव्यञ्जनश्च, अतोऽन्तराभवस्थेन तेन मातुः कुक्षिं प्रवेष्टुमिच्छता त्रिसाहस्रमहासाहस्रो लोकधातुः स्वक्षेत्रमिति कृत्वाऽवभासितः ।

---

१ पाञ्च०—का० । २. का० पुस्तके नास्ति ।

३. ०मवभासितः—का० ।

यत्तर्हि माता बोधिसत्त्वस्य स्वप्ने गजपोतं पाण्डरं कुक्षिं प्रविशन्तमद्राक्षीत् ? निमित्तमात्रं तत्; तिर्यग्योनेश्चिरव्यावर्त्तितत्वात्[1] । तद्यथा—कृकी राजा दश स्वप्नानद्राक्षीदिति ।

पाण्डरं गजपोतमिति । यद्येष्यत्पूर्वकालभवाकृतिरन्तराभवः, कस्माद् बोधिसत्त्वस्य माता गजपोतमेवंरूपमद्राक्षीत् ? *निमित्तमात्रं* तत् । तस्य बोधिसत्त्वस्य । *तिर्यग्योनेश्चिरव्यावर्त्तितत्वात्* । यतः प्रभृति लक्षणविपाकानि कर्माण्यारभते कर्तुं कल्पशते शेषे ततः प्रभृति तस्य सर्वा दुर्गतयो व्यावृत्ताः । *तद् यथा कृकी राजा दश स्वप्नानद्राक्षीत्* । भविष्यतोऽर्थस्य निमित्तमात्रमिति ।

दश स्वप्ना *विनये* पठ्यन्ते । कृकिना किल राज्ञा दश स्वप्ना दृष्टाः—हस्ती वातायनेन निर्गत्य पुच्छे सक्तः, कूपस्तृषितस्य पृष्ठतोऽनुधावति, सक्तुप्रस्थेन मुक्ताप्रस्थो लभ्यते, चन्दनं काष्ठार्घेण विक्रीयते, आरामाः पुष्पफलसम्पन्नाः, सर्वश्च पुष्पफलमदत्तादायिभिर्ह्रियते, कलभैर्गन्धहस्तिनश्चास्यन्ते, अशुचिम्रक्षितो मर्कटः परानुपलिम्पति, मर्कटाभिषेको वर्त्तते, पटकोऽष्टादशभिर्जनैराकृष्यते, महाजनकाय एकत्र कलहभण्डनविग्रहविवादेनान्योन्यविघातमापन्न इति । तेन च ते भगवते काश्यपाय तथागताय निवेदिताः, भगवता च व्याकृताः— भविष्यत्यनागतेऽध्वनि शाक्यमुनिर्नाम तथागतः । तस्य श्रावका विस्तीर्णस्वजनबन्धुवर्गं प्रहाय प्रव्रजिता विहारेषु गृहसंज्ञामुत्पाद्य सङ्गं करिष्यन्ति, हस्तिनो वातायननिर्गमनपुच्छलग्नवत् । कूपस्वप्नेन तच्छ्रावका एव ब्राह्मणगृहपतीनामभ्युपेत्य धर्मं देशयिष्यन्ति, तेषां श्रोतुकामता न संस्थास्यत इत्येतद्दर्शयति । सक्तुमुक्ताप्रस्थस्वप्नेन तच्छ्रावका एव सक्तुभिक्षाया अप्यर्थायेन्द्रियबलबोध्यङ्गादीनि प्रकाशयिष्यन्ति । चन्दनस्वप्नेन तच्छ्रावका एवाभावितकायशीलप्रज्ञास्तीर्थ्यमतानि गृहीत्वा बुद्धवचनेन समानीकरिष्यन्तीत्येतद्दर्शयति । आरामस्वप्नेन तच्छ्रावका एवावासमाश्रयं कृत्वा यत्तद् भविष्यति सङ्घस्य पुष्पं वा फलं वाधिकं वा तद्विक्रीय विक्रीय जीविकां कल्पयिष्यन्ति, तेन च गृहिणः प्रतिसंस्तरिष्यन्तीत्येतद्दर्शयति । कलभस्वप्नेन तच्छ्रावका एव दुःशीला पापधर्माणो भविष्यन्ति, ये ते भिक्षवः स्थविराः शीलवन्तः कल्याणधर्माणस्तानावासेभ्यः प्रवासयिष्यन्तीत्येतद्दर्शयति । अशुचिम्रक्षितमर्कटस्वप्नेन तच्छ्रावका एव दुःशीला पापधर्माणः सन्तो ये ते भिक्षवः कल्याणास्तानसद्भिर्दोषैश्चोदयिष्यन्तीत्येतद्दर्शयति । मर्कटाभिषेकस्वप्नेन तच्छ्रावका एव सामन्तिकाभिषेकं विहारेषु करिष्यन्ति, लोकेऽपि च पण्डका अधिराज्यं कार-

---

1. ०व्यावृत्तत्वात्—का० ।

"करिकूपसक्तुचन्दनकलभारामास्तथा कपेरभिषेकः ।
अशुचिकपिः पटकलहाविति दश दृष्टा नृपेण कृकिणा स्वप्नाः" ॥
नैव चान्तराभविकः कुक्षिं भित्त्वा प्रविशति, अपि तु मातुर्योनिद्वारेण ।
अत एव यमलयोर्यः पश्चात् प्रजायते स ज्यायानुच्यते, यः पूर्वं स कनीयानिति ।

धर्मसूत्रविभाष्यं कथं नीयते—

"वारण त्वमुपगम्य पाण्डरं षड्विषाणरुचिरं चतुष्कमम् ।
मातृगर्भशयनं विशेषसम्प्रजानन् ऋषिराश्रमं यथा" ॥

( ) इति ?

नैतदवश्यनेतव्यम् । न ह्येतत् सूत्रम्, न विनयः, नाभिधर्मः; काव्यमेतत् । कवीनां च काव्यं समायोजयतां केचिद् भावाः समारोपिता गच्छन्ति ।

अथवा—नेतव्यमेव । यथा अस्य माता स्वप्ने तं प्रविशन्तमद्राक्षीत्, तथा सोऽपि मायामकार्षीदिति ।

रूपावचरोऽप्यन्तराभवः सम्पूर्णप्रमाणः सवस्त्रश्च प्रादुर्भवति; अपत्राप्योत्सदत्वात् बोधिसत्त्वस्य सवस्त्रः । शुक्लायाश्च भिक्षुण्याः प्रणिधानवशाद् यावन्तमेव परिवेष्टिता निर्दग्धा । अन्यो नग्नः; कामधातोरनपत्राप्योत्सदत्वात् ॥

अथ कोऽयं पूर्वकालभवो नाम ?

स पुनर्मरणात् पूर्वं उपपत्तिक्षणात् परः ॥ १३ ॥

भवो हि नामाविशेषेण पञ्चोपादानस्कन्धाः । स एव चतुर्धा भिद्यते—

यिष्यन्ति इत्येतद्दर्शयति । पटस्वप्नेन तच्छासनमेवाष्टादशधाभेदं गमिष्यति, न च विमुक्तिपटः स्फाटयिष्यत इत्येतद्दर्शयति । कलहस्वप्नेन तच्छ्रावका एव निकायपरिग्रहात् परस्परं विवादमापत्स्यन्त इत्येतद्दर्शयतीति । संग्रहश्लोकः—

"करिकूपसक्तुचन्दनकलभारामास्तथा कपेरभिषेकः ।
अशुचिकपिः पटकलहाविति दश दृष्टा नृपेण कृकिणा स्वप्नाः ॥"

( )

अपत्राप्योत्सदत्वात् । अपत्राप्योत्कटत्वात् ।

अन्तराभवो यथोक्तः, उपपत्तिभवो प्रतिसन्धिक्षण एव[1], तस्मात् परेण मरणक्षणं मुक्त्वान्यः सर्वो भवः पूर्वकालभवः, चरमक्षणो मरणभवः, यत ऊर्ध्वमन्तराभवो भवति रूपिषु चेत् सत्त्वेषूपपद्यते ॥ १३ ॥

स चायमन्तराभवः—

सजातिशुद्धदिव्याक्षिदृश्यः

समानजातीयैरेवान्तराभवैर्दृश्यते[2]। येषां च दिव्यं चक्षुः सुविशुद्धमभिज्ञामयं त एनं पश्यन्ति। उपपत्तिचक्षुषा तु न दृश्यते; अत्यर्थमच्छत्वात्[3]। देवान्तराभविकः सर्वान् पश्यति। मनुष्यप्रेततिर्यङ्नारकान्तराभविकाः पूर्वं पूर्वमपास्येत्यपरे।

कर्मर्द्धिवेगवान्।

उपपत्तिभवः प्रतिसन्धिक्षण एव। तस्मात् परेण प्रतिसन्धिक्षणादन्यो भवः *पूर्वकालभवः। रूपिषु चेत् सत्त्वेषूपपद्यत* इति। आरूप्यधातावन्तराभवादिदं विशेषवचनम् ॥ १३ ॥

*समानजातीयैरि*ति। नारकोऽन्तराभवो नारकैरेवान्तराभवैर्दृश्यते। एवं यावद्देवान्तराभवः देवान्तराभवैरेवेति। *सुविशुद्धमि*ति। एकादशदिव्यचक्षुरपक्षालवर्जितम्। ते पुनरपक्षाला विचिकित्साऽमनसिकारो कायदौष्ठुल्यं स्त्यानमिद्धमौद्धत्यमभ्यारभ्य वीर्यमौद्विल्यं छम्भितत्वं नानात्वसंज्ञा अभिजल्पः अभिध्यायितत्वं ज्ञेयेषु यथासूत्रम्। *अभिज्ञामयमि*ति। अभिज्ञास्वभावभावनामयमित्यर्थः। *उपपत्तिप्रतिलम्भिकमपि* देवादीनां दिव्यमिष्यते, न तु सुविशुद्धम्।

*देवान्तराभविकमि*ति विस्तरः। *अपर आहुः*। न समानजातीयैवान्तराभवो दृश्यते, किं तर्हि? देवान्तराभविकः *सर्वान्* देवान्तराभविकादीन् *पश्यति। मनुष्यप्रेततिर्यङ्नारकान्तराभविकाः पूर्वं पूर्वमपास्य*। कथम्? मनुष्यान्तराभविको देवान्तराभविकं पूर्वमपास्य मनुष्यप्रेततिर्यङ्नारकान्तराभविकान् पश्यति, प्रेतान्तराभविको देवमनुष्यान्तराभविकौ पूर्वावपास्य प्रेततिर्यङ्नारकान्तराभविकान् पश्यति, एवं यावन्नारकान्तराभविको देवान्तराभविकादीन् पूर्वानपास्य नारकान्तराभविकानेव पश्यति। गतीनामुत्तरोत्तरनिकृष्टत्वादिति।

---

१. गतिषु प्रतिसन्धिक्षणः—का०। २. ०भविकै०—का०। ३. आत्यर्थम०—का०।

ऋद्धिः = आकाशगमनम्, कर्मणा ऋद्धिः कर्मर्द्धिः, तस्या वेगः **कर्मर्द्धिवेगः** = शीघ्रता, सोऽस्यास्तीति **कर्मर्द्धिवेगवान्** । येनासौ न शक्यो बुद्धैरपि प्रतिबन्धुम्; कर्मणोऽस्य बलीयस्त्वात् ।

सकलाक्षः

समग्रपञ्चेन्द्रियः ।

अप्रतिघवान्

प्रतिघातः = प्रतिघः, सोऽस्यास्तीति प्रतिघवान्, न प्रतिघवानप्रतिघवान् । वज्रादिभिरप्यनिवार्यत्वात् । तथा हि—प्रदीप्तायःपिण्डभेदे तन्मध्यसम्भूतः क्रिमिरुपलब्धः श्रूयते ।

यस्यां च गतौ स उत्पत्स्यमानस्तस्याः सर्वथा—

अनिवर्त्यः,

न हि कदाचिन्मनुष्यान्तराभवोऽन्तर्धाय देवान्तराभवो भवति, अन्यो वा । नियतमनेन—यामेव गतिमधिकृत्याभिनिर्वृत्तस्तस्यामेवोपपत्तव्यम्, नान्यस्यामिति ।

किं पुनरन्तराभवोऽपि कामावचरः कवडीकारमाहारं भुङ्क्ते ? ओमित्याह । न त्वौदारिकम्, किं तर्हि ?

स गन्धभुक् ॥ १४ ॥

अत एव 'गन्धर्वः' इत्युच्यते, धातूनामनेकार्थत्वात् । ह्रस्वत्वं शकन्धुकर्कन्धुवत् । अल्पेशाख्यस्तु दुर्गन्धाहारः, महेशाख्यः सुगन्धाहारः ।

अत एव गन्धर्व इति । यतो गन्धगतो गन्धर्वः । गन्धमर्वति भक्षयति गन्धर्व इत्यर्थः । *धातूनामनेकार्थत्वात्* । अयमर्वतिर्न केवलं गत्यर्थे वर्त्तते, किं तर्हि ? भोजनार्थेऽपीति । गत्यर्थपरिग्रहेऽप्यदोषः । गन्धमर्वति गच्छति भोक्तुमिति गन्धर्व इति । *ह्रस्वत्वं शकन्धुकर्कन्धुवदिति* । कृदन्त इति पररूपनिपातनात् शकन्धुकर्कन्धुरिति पररूपसिद्धिर्यथा तथेहापि गन्धर्व इति ।

अल्पेशाख्यः । अनुदारो हीनजातीय इत्यर्थः । ईष्ट इतीशः, अल्प ईशोऽल्पेशः । अल्पेश इत्याख्या यस्य सोऽल्पेशाख्यः । विपर्ययान्*महेशाख्यः* ।

कियन्तं कालमवतिष्ठते ?

१. नास्ति नियम इति भदन्तः। यावदुपपत्तिसामग्रीं न लभते नहि तस्यायुषः पृथगेवाक्षेपः, एकनिकायसभागत्वात्। इतरथा हि तस्यायुषः क्षयान्मरणभवः प्रसज्येत।

यद्यासुमेरोः स्थलं मांसस्य स्यात् तत् सर्वं वर्षासु क्रिमीणां पूर्येत, क्रिमिदानीं तत्प्रतीक्षा एव तेषामन्तराभवा आसन्, कुतो वा तदा तेभ्यो गता इति वक्तव्यम् ? नैतदागतं सूत्रे शास्त्रे वा।

एवं तु युज्यते—गन्धरसाभिगृद्धानामल्पायुषां जन्तूनामन्तो नास्ति। ते तं गन्धं घ्रात्वा गन्धरसाभिगृद्धाः कालं कुर्वन्तः क्रिमिनिकायसभागोत्पादकं[1] कर्म विबोध्य[2] तया तृष्णया क्रिमिषूपजायन्त[3] इति।

अथ वा—नूनं तत्प्रत्ययप्रचुर एव काले तत्संवर्त्तनीयानि कर्माणि विपाकाभिनिर्वृत्तौ वृत्तिं लभन्ते, नान्यत्र। तथा हि चक्रवर्त्तिसंवर्त्तनीये कर्मणि अशीतिवर्षसहस्रायुषि प्रजायां बहुतरायुषि वा चक्रवर्त्तिनो जायन्ते, नान्यस्याम्।

एकनिकायसभागत्वादिति। यश्च पूर्वकालभवो यश्चान्तराभवस्तत् प्राणकः, तयोरेक एव निकायसभागः। अत एकनिकायसभागत्वात्। येनैव कर्मणायुष्येण पूर्वकालभवस्यायुराक्षिप्यते, तेनैवान्तराभवस्य। *इतरथा हि*। यदि तस्यान्तराभवायुषः पृथगाक्षेपः स्यात्, तस्याप्यायुषः अन्तराभविकस्य क्षयान्मरणभवः प्रसज्येत, पूर्वकालभववत्। *तस्मान्नास्ति नियम* इति *भदन्तः*।

ते तं गन्धं घ्रात्वा गन्धरसाभिगृद्धा इति विस्तरः। ते क्षुद्रजन्तवस्तं गन्धं घ्रात्वा तत्सहचरं चानुभूतं रसमनुस्मृत्य *गन्धरसाभिगृद्धाः कालं कुर्वन्तः क्रिमिनिकायसभागोत्पादकं कर्म विबोध्य तया* गन्धरस*तृष्णया* विपाकाभिमुखं कृत्वाऽन्तराभवसन्तत्या *क्रिमिषूपजायन्त* इति। *तत्प्रत्ययप्रचुर एव काल* इति। क्रिमिप्रत्ययप्रचुरे काले *तत्संवर्तनीयानि कर्माणि* क्रिमिसंवर्त्तनीयानि *विपाकाभिनिर्वृत्तौ वृत्तिं लभन्ते*। विपाकदानायाभिमुखीभवन्तीत्यर्थः। "सामग्रीं प्राप्य कालं च फलन्ति खलु देहिनाम्" ( ) इति वचनात्। *नान्यत्र*। न तत्प्रचुरे काले। *नान्यस्यामिति*। नाल्पायुषि "चक्रवर्त्तिसमुत्पत्तिर्नाधोऽशीतिसहस्रकात्" ( ) इति वचनात्। *अत एवेति*। यस्माद् विद्यमानान्यपि चक्रवर्त्ति-

१. क्रिमिभावसंवर्तनीयं—का०। २. प्रबोध्य—का०।
३. ०पूपपद्यन्ते—का०।

अत एव चोक्तं भगवता—"अचिन्त्यः सत्त्वानां कर्मविपाकः" ( ) इति ।

२. सप्ताहं तिष्ठतीति भदन्तवसुमित्रः । यदि तावता सामग्रीं न लभते तत्रैव पुनश्च्युत्वा जायन्ते ।

३. सप्ताहानीत्यपरे ।

४. अल्पं कालमिति वैभाषिकाः । स हि सम्भवैषित्वात् सम्भावगत्वा सन्धिं बध्नातीति यथात्वसमग्राः प्रत्यया भवन्ति । नियतं चानेन—तस्मिन् देशे तस्यां जातौ जनितव्यं भवति, तदा कर्माण्येव प्रत्ययानां सामग्रीमावहन्ति । अथानियतं ततोऽन्यत्र देशे तस्यां जातौ जायते सदृश्यामिति ।

५. अपरे तद्यथा—गवामूष्मसु मैथुनस्य प्राचुर्यम्, शरदि शुनाम्, ऋक्षाणां हेमन्ते, वसन्ते चाश्वानाम् । गवयशृगालखरतरक्षाणां पुनः कालो नास्तीति येनान्यत्र काले गोषूपपत्तव्यं स गवयेषूपपद्यते, येन श्वसु स शृगालेषु, येनाश्वेषु स गर्दभेषु, येन ऋक्षेषु स तरक्षेषूपपद्यत इति ।

न त्वस्य निकायसभागान्तराभवो नान्यत्र निकायसभागे शक्यमुत्पत्तुमेककर्माक्षेपादिति[1] वक्तव्यमेतत् ॥ १४ ॥

स खल्वेष गतिदेशसम्प्राप्त्यर्थं प्रादुर्भूतोऽन्तराभवः—

विपर्यस्तमतिर्याति गतिदेशं रिरंसया ।

संवर्त्तनीयानि कर्माणि विपाकाभिनिवृत्तौ कदाचिदेव वृत्तिं लभन्ते, बहुप्रत्ययापेक्षित्वात्, सम्भवैषित्वादुपपत्त्यभिलाषित्वात् ।

कर्माण्येव प्रत्ययानां सामग्रीमावहन्तीति । कर्माधिपत्येनाश्वादीनां प्रसिद्धं कालमतिक्रम्य कालान्तरेऽपि मैथुनं भवतीति । *एककर्माक्षेपादिति ।* येनैव कर्मणा गवादिनिकायसभाग आक्षिप्यते, तेनैव कर्मणा तदन्तराभव आक्षिप्यत इत्यतो *वक्तव्यमेतत् ।* यदुक्तं येनान्यत्र काले गोषूपपत्तव्यं स गवयेषूपपद्यत इति विस्तरेण । न निकायभेदादेकाक्षेपकत्वं हीयते, तत्कर्मण एकजातीयत्वात्, गत्याकृतिसंस्थानान्तरापरित्यागाच्च । गतिनियतानां हि कर्मणामुपपत्तिवैचित्र्यं दृष्टम्, कल्माषपादादिवदिति । नास्त्येष दोष इत्या*चार्यसङ्घभद्रः* ॥ १४ ॥

"विपर्यस्तमतिः" इति । अनुनयसहगतेन वा चित्तेन यथा विपर्यस्तमति-

---

१. ०मेककामा०—का० ।

स हि कर्मप्रभावसम्भूतेन चक्षुषा सुदूरस्थोऽपि स्वमुपपत्तिदेशं प्रेक्षते। तत्रास्य पित्रोस्तां[1] विप्रतिपत्तिं दृष्ट्वा पुंसः सतः पौंस्नो राग उत्पद्यते मातरि, स्त्रियाः सत्याः स्त्रैणो राग उत्पद्यते पितरि। विपर्ययात् प्रतिघः। एवं पठ्यते प्रज्ञप्तौ—"गन्धर्वस्य तस्मिन् समये द्वयोश्चित्तयोरन्यतरान्यतरच्चित्तं सम्मुखीभूतं भवत्यनुनयसहगतं वा प्रतिघसहगतं वा" (   ) इति।

स ताभ्यां विपर्यस्तो रन्तुकामतया तं देशमाश्लिष्य तामवस्थामात्मन्य-धिमुच्यते। तस्मिंश्चाशुचौ गर्भस्थानसम्प्राप्ते जातहर्षोऽभिनिविशते। ततोऽस्य स्कन्धा घनीभवन्ति, अन्तराभवस्कन्धाश्चान्तर्धीयन्ते इत्युपपन्नो भवति। स चेत् पुमान् भवति मातुर्दक्षिणकुक्षिमाश्रित्य पृष्ठाभिमुख उत्कुटुकः[2] सम्भवति; अथ स्त्री ततो वामकुक्षिमाश्रित्योदराभिमुखी; अथेदानीं नपुंसकं तद्येन रागेणाश्लिष्टं तथा तिष्ठति। न चास्त्यन्तराभवो व्यन्तरः; सकलेन्द्रियत्वात्। अतः स्त्रीभूतः पुरुषभूतो वाऽनुप्रविश्य यथास्थानं तिष्ठति पश्चात् गर्भे आप्यायमानो नपुंसकं भवतीति।

इदं विचार्यते—किमस्य शुक्रशोणितमहाभूतान्येवेन्द्रियाश्रयभावमापद्यन्ते कर्मवशाद्, आहोस्वित् भूतान्तराण्येव कर्मभिर्जायन्ते तान्युपश्रित्येति?

भवति, तद् दर्शयन्नाह—*तत्रास्य पित्रोरिति* विस्तरः। मातापित्रोस्तां *विप्रतिपत्तिं* द्विन्द्रियसमापत्तिलक्षणाम्। *पुंसः सतः* पुरुषस्यान्तराभवस्य पुंसोऽयं *पौंस्नो राग उत्पद्यते* मातरि भार्यायामिव। *स्त्रिया* अयं *स्त्रैणो राग उत्पद्यते पितरि* भर्त्तरीव। *विपर्ययात् प्रतिघ* इति। पुंसः सतः पौंस्नः प्रतिघ ईर्ष्योत्थानभूत उत्पद्यते पितरि प्रतिसपत्नपुरुष इव, स्त्रियाः सत्याः स्त्रैणः प्रतिघ उत्पद्यते मातरि प्रतिसपत्न्यामिव। *स ताभ्यामेव* विपर्यस्ताभ्यां चित्ताभ्यां *विपर्यस्तो रन्तुकामतया* मैथुनकर्मकामतया *तं* देशमिन्द्रियद्वयस्थान*माश्लिष्य तामवस्थां* विप्रतिपत्त्यवस्थामात्मन्य*धिमुच्यते*—मयैतत् कर्म क्रियत इति। *तस्मिंश्चाशुचौ* शुक्रशोणिते *गर्भस्थानसम्प्राप्ते* आमाशयपक्वाशयान्तरस्थानसम्प्राप्ते, *अभिनिविशते* प्रतितिष्ठतीत्यर्थः। *पृष्ठाभिमुख उत्कुटुक* इति। मैथुनक्रियात्माभिमानक्रिया-योगात्। *आप्यायमानो* वर्धमानः। *एतान्येवेति*। शुक्रशोणितमहाभूतानि। *भूतान्तराण्येवेति*। शुक्रशोणितव्यतिरिक्तानि बीजाङ्कुरनिरोधोत्पादन्यायेनैक-

१. मातापित्रो०—का०।   २. उत्केटुकः—का०।

अभि० को० २ : ४

तान्येवेत्येके। अनिन्द्रियं हि शुक्रशोणितमन्तराभवेन सार्धं निरुध्यते, सेन्द्रियं प्रादुर्भवति। बीजाङ्कुरनिरोधोत्पादन्यायेन यत्तत् कललमित्याख्यायते। एवं च कृत्वा[1] सूत्रपदं सूत्रे सुनीतं भवति–"मातापित्रशुचिकललसम्भूतस्य" ( ) इति। तथा "दीर्घरात्रं युष्माभिर्भिक्षवः कटसिः संवर्द्धिता रुधिरबिन्दुरुपात्तः" ( ) इति।

भूतान्तराण्येवेत्यपरे। तद्यथा पर्णक्रिमेः। अशुचिसन्निश्रयोत्पत्त्यभिसन्धि-वचनात्[2] तु कललस्य सूत्राविरोध इति। एवं तावदण्डजां च योनिं प्रतिपद्यते। अन्यत्र तु यथायोगं वक्तव्यमित्याहुः।

स्मिन्नेव क्षणे बीजं निरुध्यतेऽङ्कुरश्चोत्पद्यते; तुलादण्डनामोन्नामवन्नाशोत्पादयोः समकालत्वात्।

यत्तत् कललमित्याख्यायत इति। "कललं प्रथमं भवति कललाज्जायतेऽर्बुदः" इत्यादिवचनात्। *एवं च कृत्वा सूत्रपद*मिति। "वल्मीक इति भिक्षो अस्य कायस्यैतदधिवचनम्। रूपिण औदारिकस्य चातुर्महाभूतस्य ओदनकुल्माषोपचितस्य मातापित्रशुचिकललसम्भूतस्य" इति विस्तरः। मातापित्रशुच्येव कललम्, ततः सम्भूतस्येत्यर्थः। *कटसि*रिति। श्मशानम्। *रुधिरबिन्दुरुपात्त* इति। इदमुदाहरणम्। अस्य कायेन्द्रियभावापत्तितः।

भूतान्तराण्येव शुक्रशोणितव्यतिरिक्तानि। *तद् यथा पर्णक्रिमे*रिति। यथा पर्णक्रिमेः पर्णमहाभूतान्युपनिश्रित्य भूतान्तराणि कर्मभिर्जायन्ते, यानीन्द्रियस्वभावमापद्यन्ते, न पर्णमहाभूतानि; बहुत्वात् तु क्रिमीणाम्, खण्डशः पत्रस्यादर्शनाच्च। सूत्रपदं कथं तर्हि नीयते–मात्रापित्रशुचिकललसम्भूतस्येति ? अत आह–*अशुचिसंनिश्रयोत्पत्त्यभिसन्धिवचनात् तु कललस्य सूत्राविरोध* इति। अशुचिसंनिश्रयेणोत्पत्तिर्भूतान्तराणाम्, तत्राभिसन्धिरभिप्रायः, तेन वचनं कललस्य। तस्मान्मातापित्रशुचिकललसम्भूतस्येत्यस्य सूत्रस्याविरोधः। एतदुक्तं भवति–शुक्रशोणितसन्निश्रयेण कललाख्यानि भूतान्तराणि शुक्रशोणितसमकालान्युत्पद्यते सेन्द्रियाणि। यथा पर्णसन्निश्रयेण पर्णसमानकालानि सेन्द्रियाणि क्रिमिमहाभूतान्युत्पद्यन्त इति।

*अन्यत्र तु यथायोगं वक्तव्यमित्याहु*रिति। अन्यत्र संस्वेदजौपपादुकयोरन्ययोर्यथायोगं व्याख्येयमित्याहुरभिधर्माचार्याः।

---

१. कृत्वेदं—का०। २. ०भिसम्बन्धि०—का०।

तत्र चायं योगो दृश्यते—

गन्धस्थानाभिकामोऽन्यः

संस्वेदजां योनिं प्रतिपद्यमान उपपत्तिस्थानं गन्धाभिलाषात्[1] गच्छत्यमेध्यम्, मेध्यं वा यथाक्रमम्। उपपादुकां तु योनिं प्रपद्यमानः स्थानाभिलाषात्।

कथं नरकेषु स्थानाभिलाषः? विपर्यस्तबुद्धित्वात्। स हि शीतवातवर्षाभिषेकैरात्मानं बाध्यमानं पश्यति, नरकेषु चाग्निं दीप्यमानम्। तत्र उष्णाभिलाषाद् धावति। पुनस्तसवातातपाग्निसन्तापैरात्मानं बाध्यमानमनुपश्यन् शैत्यं च नरकेषु शीताभिलाषाद्धावति। यदवस्थस्तदुपपत्तिसंवर्तनीयं कर्माकार्षीत्, तदवस्थ[2] आत्मानं[2] तांश्च सत्त्वान् पश्यन् धावतीति **पूर्वाचार्याः**।

तत्र पुनर्देवान्तराभव ऊर्ध्वं गच्छत्यासनादिवोत्तिष्ठन्, मनुष्यतिर्यक्प्रेतानां मनुष्यादिवत्।

ऊर्ध्वपादस्तु नारकः ॥ १५ ॥

"ते वै पतन्ति नरकादूर्ध्वपादा अवाङ्मुखाः।
ऋषीणामतिवक्तारः[3] संयतानां तपस्विनाम् ॥" ( )

इति **गाथाभिधानात्** ॥ १५ ॥

यदुक्तम्—"विपर्यस्तमतिर्याति" इति, किमवश्यं सर्वोऽन्तराभवस्तथा मातुः कुक्षिमवक्रामति? नेत्याह। किं तर्हि? चतस्रो गर्भावक्रान्तयः सूत्र उक्ताः। कतमाश्चतस्रः?

सम्प्रजानन् विशत्येकः

तत्र चायं योगो दृश्येत इति। आचार्यो ब्रवीति। *शैत्यञ्च नरकेष्विति*। शीत नरकोपपत्तिकाले। *यदवस्थ* इति। औरभ्रिकाद्यवस्थः। *यथाभूतेन* तद्वेद्यं कृतं प्राक्कर्म तादृशान् सत्त्वान् स्वप्न इव प्रेक्ष्य नरके स धावति। *पूर्वाचार्याः*। योगाचारा *आर्यासङ्ग*प्रभृतयः।

आसनादिवोत्तिष्ठन्निति। ऊर्ध्वोपपत्तिस्थानगमनात्। *मनुष्यादिवदिति*। यथा मनुष्यस्तिर्यक् प्रेतश्च गच्छति, तद्वत्।

ऋषीणामतिवक्तार इति। अधिक्षेप्तारः अपवदितार इत्यर्थः ॥ १५ ॥

---

१. गत्वाभि०—का०। २–२. तदवस्था०—का०। ३. ०मभिवक्तारः—का०।

तिष्ठति निष्कामति वा सम्प्रजानन् ।

तिष्ठत्यपरः

सम्प्रजानन्निति वर्त्तते । प्रविशत्यपीत्यपिशब्दात् ।

अपरः ।

निष्क्रामत्यपि

सम्प्रजानन् प्रविशति तिष्ठत्यपि ।

सर्वाणि मूढोऽन्यः

कश्चित पुनः सर्वाण्येवासम्प्रजानन् करोति प्रविशत्यसम्प्रजानन् तिष्ठति निष्कामत्यपि । एताश्चतस्रो गर्भावक्रान्तयः प्रतिलोमं निर्दिष्टाः श्लोकबन्धानुगुण्यतः ।

नित्यमण्डजः ॥ १६ ॥

अण्डजः सत्त्वो नित्यं मूढ एव सर्वाणि करोति ।

कथमण्डाज्जातो गर्भं प्रविशति ? योऽपि जनिष्यते सोऽप्यण्डजः ।

अथ वा भाविन्यापि संज्ञया निर्देशः क्रियते । तद्यथा—"संस्कृतमभिसंस्करोति" (   ) इति सूत्रे, ओदनं पचतीति सक्तुं पिनष्टीति लोके । तस्मान्नैष दोषः ।

"*नित्यमण्डजः*" इति नित्यग्रहणात् । "*सर्वाणि मूढः*" इत्यत्र नास्ति नियमः । भवति तु सम्प्रजानन्नपि । *प्रतिलोमं निर्दिष्टा* इति । सूत्रे हि यः सर्वाण्यसम्प्रजानन् करोति । एषा प्रथमा गर्भावक्रान्तिरुक्ता । तिस्रस्तु यथानिर्दिष्टानुपूर्विका एवेति ।

योऽपि जनिष्यते सोऽप्यण्डज इति । अण्डाज्जनिष्यते अण्डज इत्यभिप्रायः । आवश्यको ह्यभूतार्थो भूतवदुच्यते तथा, "वर्त्तमानसामीप्ये वर्त्तमानवद्वा" (पा० सू० ३.३.१३१), "आशंसायां भूतवच्च" (पा० सू० ३.३.१३२)। कश्चित् कस्मैचिद्वक्ता भवेत्—आगच्छन्तमेव तथा आगतमेव मां विद्धीति । तस्माददोष एषः । अण्डाज्जातो जनिष्यते जायते चेत्यण्डजः; "*अन्येभ्योऽपि दृश्यते*" (पा० सू० ३.३.१३०) इति वचनात् । तस्माददुष्टमेतदित्या*चार्यसङ्घभद्रः* ।

अथवा भाविन्यापि संज्ञयेति । भविष्यन्त्यापि संज्ञया निर्देशः क्रियते । *तद्यथा संस्कृतमभिसंस्करोतीति* । जनितावस्थायां संस्कृतं भवति, न जन्यमानावस्थायाम् । नहि संस्कृतस्य पुनः संस्कारो युज्यते । भविष्यन्त्या तु संज्ञया तथा निर्देशः क्रियते । एवमोदनं पचतीत्यादि योज्यम् ।

कथं पुनरसम्प्रजानन् मातुः कुक्षिं प्रविशति यावन्निष्कामति, कथं वा सम्प्रजानन् ?

अल्पेशाख्यस्य तावत् सत्त्वस्य मातुः कुक्षिं प्रविशतः एवं विपरीतौ संज्ञाधिमोक्षौ प्रवर्त्तेते—वातो वाति, देवो वर्षति, शीतं दुर्दिनं महतो वा जनकायस्य कोलाहलम्, हन्त तृणगहणं वा प्रविशामि वनगहनं वा पर्णकुटीं वा, वृक्षमूलं वा चोपसर्पामि[1] कुड्यमूलं वेति, तिष्ठतोऽप्येषु तिष्ठामीति निष्कामतोऽप्येभ्यो निर्यामीति। महेशाख्यस्य तु सत्त्वस्य—आरामं वा प्रविशाम्युद्यानं च[2], प्रसादं वाऽभिरोहामि कूटागारं वा पर्यङ्कं वेति, तथा तिष्ठामि निर्यामीति। एवं तावदसम्प्रजानन् प्रविशति यावन्निष्कामति।

सम्प्रजानँस्तु सम्यक् प्रजानाति—मातुः कुक्षिं प्रविशामि, अत्रैव तिष्ठामि, अत एव निर्यामीति। नास्य विपरीतौ संज्ञाधिमोक्षौ प्रवर्त्तेते ॥ १६ ॥

अत्र पुनरपदिश्यते—

गर्भावक्रान्तयस्तिस्रश्चक्रवर्त्तिस्वयम्भुवाम् ।

चक्रवर्त्तिनश्च स्वयम्भुवोश्च प्रत्येकबुद्धसम्बुद्धयोश्च। यथाक्रममित्यन्ते वक्ष्यति।

कथं पुनरसम्प्रजानन् मातुः कुक्षिं प्रविशतीति विस्तरः। सन्निकृष्टावस्था उपपत्तिदेशस्य। "विपर्यस्तमतिर्याति" (अभि० ३.१५) इति। विप्रकृष्टावस्था अधिमोक्षोऽधिमुक्तिः। तथा *तिष्ठामि निर्यामीति*। कथम्? तथा तिष्ठतोऽप्येषु तिष्ठामीति, निष्कामतोऽप्येभ्यो निर्यामीति। *अयमनयोर्विपर्यासयोर्विशेष इति*।

अपरे पुनराहुः—न केवलं रागद्वेषाभ्यामेव विपर्यस्तमतिरुत्पत्तिदेशं गच्छति, किं तर्हि? अन्यथापि। कथमिति? *वातो वाति, देवो वर्षतीत्यादि*। तथा *आरामं प्रविशाम्युद्यानं चेत्यादि*। सम्प्रजानंस्तु सम्यक् चित्तेन प्रजानाति—मातुः कुक्षिं प्रविशामीत्येवमादिः। यदि सम्यक् प्रजानाति, कथं क्लिष्टेनैव प्रतिसन्धबन्धो व्यवस्थाप्यते? मातृस्नेहादियोगात् क्लिष्टं चित्तं भवति।

अपर आह—*मातुः कुक्षिं प्रविशत एवं विपरीतौ संज्ञाधिमोक्षाविति*। उपपन्नमात्रावस्थायामेतद् भवति—वातो *वाति यावद्वृक्षमूलं चोपसर्पामि, कुड्यमूलं* वेति, तिष्ठतोऽप्येषु तिष्ठामीति, निष्कामतोऽप्येभ्यो निर्यामीत्येवमादि।

---

१. सर्पामि—का०। २. वा—का०।

तत्र प्रथमा चक्रवर्तिनः। स हि प्रविशत्येव सम्प्रजानन् न तिष्ठति नापि निष्कामति। प्रत्येकबुद्धस्तिष्ठत्यपि। बुद्धो निष्कामत्यपि। अत्रापि भाविन्या संज्ञया निर्देशः।

कर्मज्ञानोभयेषां वा विशदत्वाद् यथाक्रमम् ॥ १७ ॥

विशदकर्मणामुदारपुण्यक्रियाणां प्रथमा। विशदज्ञानानां बाहुश्रुत्यकृतप्रविचयानां द्वितीया। विशदपुण्यकर्मज्ञानानां तृतीया। त एव त्वेते चक्रवर्त्यादय एवम्भूता युज्यन्ते **यथाक्रमम्**। शेषाणां चतुर्थीति सिद्धं भवति ॥ १७ ॥

अत्रेदानीं बाह्यका आत्मवादं परिगृह्योत्तिष्ठन्ते—यदि सत्त्वो लोकान्तरं सञ्चरतीति प्रतिज्ञायते सिद्ध आत्मा भवतीति? स एष प्रतिषिध्यते—

नात्मास्ति,

कीदृश आत्मा? य इमान् निक्षिपत्यन्यांश्च स्कन्धान् प्रतिसन्दधातीति परिकल्प्यते, स तादृशो **नास्त्यन्तर्व्यापारपुरुषः**। एवं तूक्तं **भगवता**—"अस्ति कर्मास्ति विपाकः, कारकस्तु नोपलभ्यते य इमांश्च स्कन्धान्निक्षिपति अन्यांश्च स्कन्धान् प्रतिसन्दधात्यन्यत्र धर्मसंकेतात्। तत्रायं धर्मसंकेतो यदुतास्मिन् सतीदं भवतीति विस्तरेण प्रतीत्यसमुत्पादः" ( )।

कीदृशस्तर्ह्यात्मा न प्रतिषिध्यते?

स्कन्धमात्रं तु

यदि **तु स्कन्धमात्रमे**वात्मेति उपचर्यते, तस्याप्रतिषेधः। एवं तर्हि स्कन्धा एव लोकान्तरं सञ्चरन्तीति प्राप्तम्, स्कन्धमात्रं तु नात्र सञ्चरतीति।

क्लेशकर्माभिसंस्कृतम्।

तत्र प्रथमेति विस्तरः। चक्रवर्तिनः, येयं "सम्प्रजानन् विशत्येकः" इति। द्वितीया प्रत्येकबुद्धस्य, येयं "तिष्ठत्यपरः" इति। तृतीया बुद्धस्य, येयं "निष्कामत्यपि" इति। *अत्रापि भाविन्येति*। ते न चक्रवर्त्यादयस्तदानीमिति कृत्वा। त एवं त्वेते चक्रवर्त्यादय इति। पर्यायमात्रमेतदुक्तम्। अर्थस्तु स एवेत्यभिप्रायः ॥ १६-१७ ॥

सङ्केतो हेतुफलसम्बन्धव्यवस्था।

"*क्लेशकर्माभिसंस्कृतम्*" इति क्लेशकर्मपरिभावितमित्यर्थः।

अन्तराभवसन्तत्या कुक्षिमेति प्रदीपवत् ॥ १८ ॥

क्षणिका हि स्कन्धाः, तेषां सञ्चरितुं नास्ति शक्तिः । क्लेशैस्तु परिभावितं कर्मभिश्च क्लेशमात्रमन्तराभवसंज्ञिकया सन्तत्या मातुः कुक्षिमायाति । तद्यथा—प्रदीपः क्षणिकोऽपि सन्तत्या देशान्तरमिति नास्त्येष दोषः ।

तस्मात् सिद्धमेतद्—सत्यप्यात्मनि क्लेशकर्मभिसंस्कृतः स्कन्धानां सन्तानो मातुः कुक्षिमापद्यत इति ॥ १८ ॥

स पुनः—

यथाक्षेपं क्रमाद् वृद्धः सन्तानः क्लेशकर्मभिः ।
परलोकं पुनर्याति

न हि सर्वस्य स्कन्धसन्तानस्याक्षेपस्तुल्यो भवति; आयुष्यस्य कर्मणो भेदात् । अतो यस्य यावानाक्षेपस्तस्य तावती वृद्धिः क्रमेण भवति ।

केन क्रमेण ?

"कललं प्रथमं भवति कललाज्जायतेऽर्बुदः ।
अर्बुदाज्जायते पेशी पेशीतो जायते घनः ॥
घनात् प्रशाखा जायन्ते केशरोमनखादयः ।
इन्द्रियाणि च रूपीणि व्यञ्जनान्यनुपूर्वशः ॥ (　　　)

इत्यार्याः । एताः पञ्च गर्भावस्थाः कललार्बुदपेशीघनप्रशाखावस्थाः ।

तस्य खलु कालान्तरेण परिपाकप्राप्तस्य गर्भशल्यस्याभ्यन्तरात् मातुः कुक्षौ कर्मविपाकजा वायवो वान्ति, ये तं गर्भशल्यं सम्परिवर्त्य मातुः कायादधरद्वाराभिमुखमवस्थापयन्ति । स क्रूरपुरीषपिण्ड इवातिमात्रं स्थानात् प्रच्युतो दुःखं सम्परिवर्त्यते ।

"प्रदीपवत्" इति । 'सन्ततिन्यायसञ्चारि स्कन्धपञ्चकम्, क्षणिकत्वात्, प्रदीपवत्' इति दर्शयति ।

"यथाक्षेपम्" इति । आक्षेपस्तावत् कालप्रबन्धः । एतच्च विशेषणमायुष्यस्यायुःसंवर्त्तनीयस्य *कर्मणो भेदात्* ।

व्यञ्जनान्यनुपूर्वश इति । व्यञ्जनानि चक्षुराद्यधिष्ठानानि, तैर्हि चक्षुरादीन्यभिव्यज्यन्ते ।

यदि पुनः कदाचिन्मातुराहारविहारक्रियापचारेण च पूर्वकर्मापराधेन गर्भ एव व्यापादं प्राप्नोति, तत एनं तज्ज्ञाः स्त्रियः कुमारभृत्यका वा सुखोष्णेन सर्पिस्तैलेन सुपिष्टेन शाल्मलीकल्केनान्येन वा हस्तमभ्यज्य तीक्ष्णं तनुकं चात्र शस्त्रकमुपनिबध्य तस्मिन् वर्चस्कूप इवोग्रदुर्गन्धान्धकारसमलपल्वले सुबहुक्रिमिकुलसहस्रावासे नित्यस्राविणि सततप्रतिक्रिये शुक्रशोणितलसिकामलसंक्लिन्नकथितपिच्छिले परमबीभत्सदर्शने छिद्रतनुचर्मावच्छादिते पूर्वकर्मविपाकजे तस्मिन्[1] कायनाडीव्रणे[1] हस्तं प्रवेश्याङ्गमङ्गं निकृत्याभ्याहरन्ति । स चाप्यपरपर्यायवेदनीयेन कर्मणा पूर्वकेण कामपि गतिं नीयते ।

अथ पुनः स्वस्ति प्रजायते, तत एनं माता पुत्राभिलाषिणी तत्परिचारिका[2] वा स्त्रियः सद्योजातकं तरुणव्रणायमानात्मानं शस्त्रक्षारायमाणसंस्पर्शाभ्यां पाणिभ्यां परिगृह्य स्नापयन्ति, स्तन्येन सर्पिषा वाप्याययन्ति, औदारिकं चाहारमाहर्तुं क्रमेणाभ्यासयन्ति । तस्य वृद्धेरन्वयादिन्द्रियाणां परिपाकात् पुनरपि क्लेशाः समुदाचरन्ति, कर्मणि चोपचयं गच्छन्ति । स तैः कायस्य भेदादन्तराभवसन्तत्या पूर्ववत् परलोकं पुनर्याति ।

इत्यनादिभवचक्रकम् ॥ १९ ॥

तस्मिन् वर्चः कूप इवेति । तस्मिन् *कायनाडीव्रणे* । निन्दावचनमेतत् । नाडीव्रण इव नाडीव्रण इति । उग्रो दुर्गन्धः *उग्रदुर्गन्धः* । *अन्धकारश्चासावालोकरहि*तत्वात् । समलानां च पल्वलोऽसौ पल्वल इवेति कृत्वा, तस्मिन् *सततप्रतिक्रिये* नित्यकर्त्तव्यशौचे । *शुक्रेण* पौंस्नेन । *शोणितेन* स्त्रैणेन । *लसीकया* द्रवविशेषलक्षणया, मलेन च संक्लिन्ने समन्तात् क्लिन्ने । विक्लिन्ने विशेषेण क्लिन्ने कथिते पूतौ पिच्छिले च तस्मिन् *हस्तौ सम्प्रवेश्याङ्गमङ्गं* हस्तपादादिकं *निकृत्य* छित्वा *अभ्याहरन्ति* अभ्याकर्षयन्ति ।

तरुणं व्रणं सरुजम्, तरुणव्रणमिवात्मानमाचरंस्तरुणव्रणायमानः, तरुणव्रणायमान आत्माऽस्येति *तरुणव्रणायमानात्मानं बालकम्*, शस्त्रं च क्षारं च शस्त्रक्षारम्, तदिवात्मानमाचरन् शस्त्रक्षारायमाणः, शस्त्रक्षारायमाणः संस्पर्शोऽनयोरिति *शस्त्रक्षारायमाणसंस्पर्शौ* पाणी, ताभ्यां *परिगृह्य स्नापयन्ति*; तस्य वृद्धेरन्वयादनुगमात् ।

१-१. महति कामनाडी०—का० । २. तत्परिका—का० ।

एतेन प्रकारेण क्लेशकर्महेतुकं जन्म तद्धेतुकानि पुनः क्लेशकर्माणि तेभ्यः पुनर्जन्मेत्यनादिभवचक्रकं वेदितव्यम् ।

आदौ हि परिकल्प्यमाने तस्याहेतुकत्वमेतेषु सज्येत । सति चास्याहेतुकत्वे[1] सर्वमेवेदमहेतुकं प्रादुःस्यात् । दृष्टं चाङ्कुरादिषु बीजादीनां सामर्थ्यं देशकालप्रतिनियमादग्न्यादीनां वा[2] पाकजादिष्विति नास्ति निर्हेतुकः प्रादुर्भावः ।

नित्यकारणास्तित्ववादः[3] प्रागेव पर्युदस्तः । तस्मान्नास्त्येव संसारस्यादिः ।

अन्तस्तु हेतुक्षयाद् युक्तः । हेत्वधीनत्वाज्जन्मनो बीजक्षयादिवाङ्कुरस्येति ॥ १९ ॥

य एष स्कन्धसन्तानो जन्मत्रयावस्थ उपदिष्टः,

स प्रतीत्यसमुत्पादो द्वादशाङ्गस्त्रिकाण्डकः ।

तत्र द्वादशाङ्गानि—अविद्या, संस्काराः, विज्ञानम्, नामरूपम्, षडायतनम्, स्पर्शः, वेदना, तृष्णा, उपादानम्, भवः, जातिः, जरामरणं च ।

त्रीणि काण्डानि पूर्वापरान्तमध्यान्यतीतानागतप्रत्युत्पन्नानि जन्मानि ।

कथमेषु त्रिकाण्डेषु द्वादशाङ्गानि व्यवस्थाप्यन्ते ?

पूर्वापरान्तयोर्द्वे द्वे, मध्येऽष्टौ

तस्याहेतुकमिति । आदेरहेतुकत्वम् । *सति चास्याहेतुकत्वे* । तद्वदेव *सर्वमहेतुकं प्रादुः स्यात्* । *दृष्टं चांकुरादिषु बीजादीनां सामर्थ्यम्* । अङ्कुरनालकाण्डपत्रादिषु बीजाङ्कुरनालकाण्डादीनां सामर्थ्यमुत्पादनाय । कस्मात् ? *देशकालप्रतिनियमात्* । देशकालयोस्तु प्रतिनियमात् । तत्र देशप्रतिनियमो बीजादिसम्बद्ध एव देश उत्पत्तेः । कालप्रतिनियमो बीजानन्तरमुत्पत्तेः । *अग्न्यादीनां वाग्नि*शीतोष्णाभिघातचक्षुरादीनां *पाकजादिषु* पाकजसुखदुःखशब्दचक्षुर्विज्ञानादिषु दृष्टं सामर्थ्यम्; देशकालप्रतिनियमात् । यदि हि निर्हेतुकः प्रादुर्भावः स्यात्, बीजादीनामङ्कुरादिषु अग्न्यादीनाञ्च पाकजादिषु देशकालप्रतिनियमेनोत्पत्तिं प्रति सामर्थ्यं न स्यात् । सर्वं सर्वत्र सर्वदोत्पद्येत । न चैवं दृष्टम्, इत्यतो *नास्ति निर्हेतुकः प्रादुर्भावः । नित्यकारणास्तित्ववादः प्रागेव पर्युदस्तः*; "नेश्वरादेः क्रमादिभिः" (अभि० को० २.६४) इति वचनात् ॥ १८–१९ ॥

१. चाहेतुकत्वे—का० । २. च—का० ।

३. ०वादश्च—का० ।

अविद्या संस्काराश्च पूर्वान्ते, जातिर्जरामरणं चापरान्ते। शेषाण्यष्टौ मध्ये।
किं पुनरेतान्यष्टाङ्गानि सर्वस्यां जातौ भवन्ति? नेत्याह। कस्य तर्हि?

परिपूरिणः ॥ २० ॥

परिपूरोऽस्यास्तीति परिपूरी, य एतानि सर्वाण्येवावस्थान्तराणि स्पृशति सोऽत्र पुद्गलोऽभिप्रेतः, न तु योऽन्तराल एव म्रियते। नापि रूपारूप्यावचरः। तथा हि महानिदानपर्यायसूत्रे[1] कामावचर एव पुद्गलो निर्दिष्टः; "विज्ञानं चेदानन्द मातुः कुक्षिं नावक्रामेत्" (   ) इति वचनात्।

यदा तु द्विविधः प्रतीत्यसमुत्पाद उच्यते—पौर्वान्तिकश्च, अपरान्तिकश्चेति; तदा सप्ताङ्गानि पौर्वान्तिको यावद्वेदनान्तः, पश्चापरान्तिकः; सफलहेतुकयोः पूर्वापरान्तयोर्ग्रहणात् ॥ २० ॥

अथ क इमेऽविद्यादयः?

पूर्वक्लेशा दशाऽविद्या

या पूर्वके जन्मनि क्लेशावस्था, सेहाविद्येत्युच्यते; साहचर्यात्, तद्वशेन तेषां

शेषाण्यष्टौ मध्य इति। विज्ञाननामरूपषडायतनस्पर्शवेदनातृष्णोपादानभवाङ्गानि।

नापि रूपारूप्यावचर इति। रूपावचरस्य विज्ञानाङ्गकाल एव नामरूपषडायतनाङ्गयोः सद्भावात्। न मध्येऽष्टावङ्गानि; आरूप्यावचरस्य च नामरूपषडायतनाङ्गयोरभावात्। *महानिदानपर्यायसूत्रे "विज्ञानं चेदानन्द मातुः कुक्षिं नावक्रामेद*पि तु तन्नामरूपं *कललत्वायाभिसम्मूर्छेत्, नो भदन्त"* इत्यादि तत् *सूत्रं पठ्यते*। मातुः कुक्ष्यवक्रमणं हि कामधातावेवेति। *सफलहेतुकयोः पूर्वापरान्तयोर्ग्रहणादिति*। यथाक्रममेतत्—पूर्वान्तस्य सफलस्य ग्रहणाद्, अपरान्तस्य च सहेतुकस्य ग्रहणादिति। तत्र पूर्वान्ते हेतुरविद्या संस्काराश्च, तस्य फलं पञ्चाङ्गानि—विज्ञानं यावद्वेदनेति। अपरान्ते जातिर्जरामरणं चेति, फलम् तस्य त्रीण्यङ्गानि हेतवस्तृष्णोपादानभवाः। तदेवं सप्ताङ्गानि पौर्वान्तिकः, पञ्चाङ्गान्यपरान्तिक इति व्याख्यातं भवति ॥ २० ॥

अथ क इमेऽविद्यादय इति। किमविद्यैव केवला, उताहो सर्वे क्लेशाः, आहोस्वित् क्लेशावस्था—इति सन्देहे पृच्छति। *साहचर्यादिति*। यस्मादविद्यासह-

---

१. ०पर्याये—का०।

समुदाचाराच्च । राजागमनवचने तदनुयातृकागमनसिद्धवत्[1] ।

संस्काराः पूर्वकर्मणः ।

'दश' इति वर्त्तते । पूर्वजन्मन्येव या पुण्यादिकर्मावस्था सेह संस्कारा इत्युच्यन्ते, यस्य कर्मण इह विपाकः ।

सन्धिस्कन्धास्तु विज्ञानम्,

मातुः कुक्षौ प्रतिसन्धिक्षणे पञ्च स्कन्धा विज्ञानम् ।

नामरूपमतः परम् ॥ २१ ॥

प्राक् षडायतनोत्पादात्

सन्धिचित्तात् परेण यावत् षडायतनं नोत्पद्यते साऽवस्था नामरूप तावत् षडायतनमित्युच्यते । प्राक्चतुरायतनोत्पादादिति वक्तव्ये षडायतनवचनं तदा तद्व्यवस्थापनात् ॥ २१ ॥

तत्पूर्वं त्रिकसङ्गमात् ।

उत्पन्ने षडायतने सावस्था तावत् षडायतनमित्युच्यते यावदिन्द्रिय-विषय-विज्ञानत्रिकसन्निपातः ।

चारिणः क्लेशाः । *तद्वशेन तेषां समुदाचाराच्च ।* यस्माच्चाविद्यावशेन तेषां क्लेशानां समुदाचारः स पुनस्तदनुवृत्तिः । मूढस्य हि क्लेशसमुदाचारः, नामूढस्य । *राजागमनवचन* इति विस्तरः । साहचर्यात् तद्वशेन तेषां समुदाचारात्, तद्वदेतत् । तदेवमविद्यावशादविद्याङ्गः क्लेशदशेत्यर्थः । तस्मादुक्तम्—"पूर्वक्लेशदशाविद्या" इति, न तूक्तम्—पूर्वाविद्यादशाविद्येति ।

पुण्यादिकर्मावस्थेति । पुण्यापुण्यकर्मावस्थेत्यर्थः ॥ २१ ॥

प्राक् चतुरायतनोत्पादादिति वक्तव्य इति । मनःकायायतनयोरुपपत्तिभव एवोत्पादात् । *तदा तद्व्यवस्थापनादि*ति । चक्षुराद्यायतनोत्पत्तिकाले कायमन-आयतनयोर्व्यवस्थापनादित्यर्थः ।

"तत्पूर्वं त्रिकसङ्गमात्" इति । तत् षडायतनाङ्गं प्राक् त्रिकसङ्गमात्, प्रागिन्द्रियविषयविज्ञानत्रिकसङ्गमात् । प्रागिन्द्रियविषयविज्ञानत्रिकसन्निपातादित्यर्थः ॥

---

१. तदनुयात्रिक०—का० ।

स्पर्शः प्राक् सुखदुःखादिकारणज्ञानशक्तितः ॥ २२ ॥

त्रयाणां सन्निपातात् स्पर्शो भवति । स यावद्वेदनात्रयकारणपरिच्छेदेन भवति साऽवस्था स्पर्श इत्युच्यते ॥ २२ ॥

परिच्छेदसामर्थ्ये सति—

वित्तिः प्राङ् मैथुनात्,

वेदनावस्था यावन्मैथुनरागो न समुदाचरति ।

तृष्णा भोगमैथुनरागिणः ।

कामगुणमैथुनरागसमुदाचारावस्था तृष्णेत्युच्यते, यावन्न तद्विषयपर्येष्टिमापद्यते ।

उपादानं तु भोगानां प्राप्तये परिधावतः ॥ २३ ॥

यस्यामवस्थायां विषयप्राप्तये पर्येष्टिमापन्नः सर्वतो धावति, असाववस्था उपादानमित्युच्यते ॥ २३ ॥

तथा च परिधावन्—

स भविष्यद्भवफलं कुरुते कर्म तद् भवः ।

"स्पर्शः प्राक्" इति । षडिन्द्रियविषयविज्ञानसन्निपातः स्पर्शो जातावस्थायां व्यवस्थाप्यते; परिपूर्णषडायतनसन्निपातसद्भावात् । आ कुतः ? प्राक् *सुखदुःखा*सुखवेदनाकारणेषु । *"ज्ञानशक्तितः"* । स बालो यावत् सुखाया वेदनाया एतत् कारणम्, अदुःखासुखायाश्चैतत् कारणम्–इति परिच्छेदे न शक्तो भवति *सावस्था स्पर्श इत्युच्यते* । तथा हि बालकोऽग्निमपि स्पृशेद्—दुःखस्यैतत् कारणमित्यपरिच्छिन्दन् ॥ २२ ॥

परिच्छेदे सामर्थ्ये सति *"वित्तिः"* वेदनेत्यर्थः । आ कुतः ? *"प्राङ्मैथुनात्"*। *यावत् मैथुनरागो न समुदाचरति* सावस्था वेदनेत्युच्यते । वेदनाप्रकर्षिणी हि सावस्था वेदना; कारणवेदनात् ।

"तृष्णा भोगमैथुनरागिणः" इति । भोगेषु रूपादिकामगुणलक्षणेषु मैथुने च लोकप्रतीते रागिणः पुद्गलस्य *तद्रागसमुदाचारावस्था तृष्णेत्युच्यते । पर्येष्टिमापन्न* इति । 'एष' (मा० धा० १.३९९) इत्येतस्य धातोरेतद्रूपम् ।

उपादीयते विषय आत्मभावोऽनेनेत्युपादानम्, चतुर्विधः क्लेशः सावस्थोपादानमित्युच्यते ॥ २३ ॥

"स भविष्यद्भवफलम्" इति । *स* परिधावतो निर्देशः, भविष्यद्भवः फलम-

स विषयाणां प्राप्तिहेतोः परिधावन् पौनर्भविकं कर्मोपचिनोति सोऽस्य भवः । तेन हि कर्मणा पुनरितः प्रच्युतस्यायत्यां प्रतिसन्धिर्भवति ।

योऽसौ

प्रतिसन्धिः पुनर्जातिः

यदेवेह विज्ञानाङ्गं तदेवास्यान्यत्र जन्मनि जातिः ।

तत ऊर्ध्वम्—

जरामरणमा विदः ॥ २४ ॥

जातेः परेण यावद्वेदनावस्था **जरामरणम्** । यान्येवेह चत्वार्यङ्गानि—नामरूपषडायतनस्पर्शवेदनाः, तान्येवान्यत्र जरामरणमित्येतानि द्वादशाङ्गानि ॥

स चैव प्रतीत्यमुत्पादश्चतुर्विध उच्यते—क्षणिकः, प्राकर्षिकः, साम्बन्धिकः, आवस्थिकश्च ।

कथं क्षणिकः ? एकस्मिन् खल्वपि क्षणे द्वादशाङ्गानि भवन्ति । तद्यथा—लोभवशेन प्राणिनं जीविताद् व्यपरोपयेत्, यो मोहः साऽविद्या, या चेतना ते संस्काराः, वस्तुप्रतिविज्ञप्तिर्विज्ञानम्, विज्ञानसहभुवश्चत्वारः स्कन्धा नामरूपम्, नामरूपे व्यवस्थापितानि इन्द्रियाणि षडायतनम् । षडायतनाभिनिपातः स्पर्शः, स्पर्शानुभवनं वेदना, यो लोभः स तृष्णा, तत्सम्प्रयुक्तानि

स्येति भविष्यद्भवफलम् । "*कर्म*" पौनर्भविकमित्यर्थः । "*तद्भवः*" इति । भवत्यनेनेति भवः कर्मपर्यायः ।

"*जरामरणमा विदः*" इति । आ विदः आ वेदनाङ्गात् । जरामरणं नामरूपादिचतुरङ्गस्वभावम् । विनेयजनोद्वेजनार्थं *भगवता* जरामरणशब्देन चत्वार्यङ्गान्युक्तानि—"यो भिक्षवो रूपस्योत्पादः । एवं यावद् विज्ञानस्य" (　　　) इति ॥ २४ ॥

क्षणिकः । क्षणे भवः, क्षणोऽस्यास्तीति वा क्षणिकः । प्रकर्षेण दीव्यति चरति वा *प्राकर्षिकः* प्रबन्धयुक्त इत्यर्थः । एवं *साम्बन्धिकः* हेतुफलसम्बन्धयुक्त इत्यर्थः । एवम*आवस्थिकः* द्वादशपञ्चस्कन्धिका अवस्था इत्यर्थः । *विज्ञानसहभुव* इति विस्तरः । रूपमत्र सहभूर्विज्ञप्त्यविज्ञप्त्यादि । संज्ञादिस्कन्धत्रयं नाम । *नामरूपव्यवस्थितानि इन्द्रियाणि* तत्प्रतिबद्धवृत्तित्वादिन्द्रियाणाम् । आश्रयत्वेन वा तानि नाम्नि व्यवस्थितानि इति । *षडायतनाभिनिपातः स्पर्श* इति । चक्षुरादीनां स्वस्मिन् विषये प्रवृत्तिरभिनिपातः । स तु सम्भवतः । यस्य

पर्यवस्थानि उपादानम्, तत्समुत्थितं कायवाक्कर्म भवः, तेषा धर्माणामुन्मज्जनं जातिः, परिपाको जरा, भङ्गो मरणमिति ।

पुनराहुः—क्षणिकः साम्बन्धिकश्च यथा **प्रकरणेषु**—"प्रतीत्यसमुत्पादः कतमः ? सर्वे संस्कृता धर्माः" इति ।

आवस्थिको द्वादश पञ्चस्कन्धिका अवस्था निरन्तरजन्मत्रयसम्बद्धाः । स एव प्राकर्षिकः ।

एषां कतमोऽयमभिप्रेतो भगवतः ?

आवस्थिकः किलेष्टोऽयं

यद्यङ्गमङ्गं पञ्च स्कन्धाः किं कारणमविद्यादीनेव धर्मान् कीर्त्तयति स्म ?

प्राधान्यात्त्वङ्गकीर्तनम् ।

अविद्याप्रधानामवस्थामविद्यां जगाद संस्कारप्रधानां संस्कारान् यावज्जरामरणमित्यदोषः ।

किं पुनः कारणं **सूत्रे** द्वादशाङ्ग उक्तः, **प्रकरणे**ष्वन्यथा "प्रतीत्यनुत्पादः कतमः ? सर्वे संस्कृता धर्माः" इति ? आभिप्रायिकः **सूत्रे**, लाक्षणिकोऽभिधर्मे । तथावस्थिकः क्षणिकः प्राकर्षिकः साम्बन्धिकः सत्त्वाख्योऽसत्त्वाख्यश्चेति भेदः ।

तदानीमभिनिपातः सम्भवति स तस्य स्पर्श इति वेदितव्यः । *तत्सम्प्रयुक्तानि पर्यवस्थानान्युपादानम्* । तया तृष्णया सम्प्रयुक्तान्याह्रीक्यानपत्राप्यादीनि पर्यवस्थानानि तदुपादानम् । *तत्समुत्थमिति* । तृष्णासमुत्थम् । चेतनासमुत्थमित्यपरे । *उन्मज्जनमुत्पादः परिपाको जरेति* । फलाक्षेपसामर्थ्योपघातः । पूर्वक्षणापेक्षया वा । *भङ्गो मरणमिति* । तत्क्षणविनाशः । भङ्गाभिमुख्यं भङ्ग इत्यपरे । *क्षणिकः साम्बन्धिकश्च यथाप्रकरणेष्विति* । कथं प्रकरणेषु—"प्रतीत्यसमुत्पादः कतमः ? *सर्वे संस्कृता धर्माः*" इति ? तत्र संस्कृतानां धर्माणां प्रतिक्षणं विनाशयोगात् क्षणिकः प्रतीत्यसमुत्पादः । हेतुफलभूतोभयक्षणसम्बन्धात् साम्बन्धिकः। *निरन्तरजन्मत्रयसम्बद्धा* इति । *द्वादशपञ्चस्कन्धिका अवस्था* अतीतानागतप्रत्युत्पन्नजन्मसम्बद्धाः आवस्थिकः प्रतीत्यसमुत्पादः । निरन्तरग्रहणं त्रिकाण्डप्रसिद्धयर्थम् । *स एव प्राकर्षिक* इति । स एवावस्थिकः प्रकर्षयोगात् प्राकर्षिकः अनेकक्षणिकत्वादनेकजन्मिकत्वाद्वा ।

आभिप्रायिक इति । अभिप्राये भव आभिप्रायिकः । विनेयाभिप्रायवशात् तथा देशित इत्यर्थः । *लाक्षणिकोऽभिधर्मे* लक्षणप्रधानत्वात् । प्रकरणेषु हि

किमर्थं पुनः सूत्रे सत्त्वाख्य एव ?

पूर्वापरान्तमध्येषु सम्मोहविनिवृत्तये ॥ २५ ॥

अत एव च त्रिकाण्डः । तत्र **पूर्वान्तसंमोहो** यत इयं विचिकित्सा—'को न्वहमभूवमतीतेऽध्वनि, आहोस्विन्नाभूवं कथं न्वहमभूवम्' इति । **अपरान्तसंमोहो** यत इयं विचिकित्सा—'किं नु भविष्याम्यनागतेऽध्वनि' इति विस्तरः । **मध्यसंमोहो** यत इयं विचिकित्सा—'किंस्विदिदं के सन्तः के भविष्यामः' इति ।

एतस्य त्रिविधस्य सम्मोहस्य व्यावर्त्तनार्थं सत्त्वाख्य एव त्रिकाण्डश्च प्रतीत्यसमुत्पाद उपदिष्टः सूत्रे यथाक्रममविद्या संस्काराश्च जातिर्जरामरणं च विज्ञानं यावद् भवश्च । तथा हि सूत्रे एवोक्तम्—"यतश्च भिक्षवो भिक्षुणा प्रतीत्यसमुत्पादश्च प्रतीत्यसमुत्पन्नाश्च धर्मा एवं यथाभूतं सम्यक् प्रज्ञया दृष्टा भवन्ति । स न पूर्वान्तं प्रतिसरति—किं न्वहमभूवमतीतेऽध्वनि" इति विस्तरः ।

सर्वसंस्कृतग्रहणात् सत्त्वासत्त्वाख्यः प्रतीत्यसमुत्पादः उक्तः; सर्वसंस्कृतहेतुत्वयोगात् ।

विनेयसम्मोहविनिवृत्तिहेतुः सत्त्वाख्य एव द्वादशाङ्गः प्रतीत्यसमुत्पादो देशितः । अत आह—"*पूर्वापरान्तमध्येषु सम्मोहविनिवृत्तये*" इति । *अत एव च त्रिकाण्ड* इति । काण्ड इति भागः । *कोन्वहमभूवमिति* । देवो मनुष्य इति वा । *कथं न्वहमभूवमिति* । केन प्रकारेण कया युक्त्येत्यर्थः । *किं नु भविष्याम्यनागतेऽध्वनी*ति विस्तरः । किं नु भविष्याम्यनागतेऽध्वनि, आहोस्विन्न भविष्यामि, को नु भविष्यामि, कथं नु भविष्यामीति । केन प्रकारेण कया युक्त्येत्यर्थः । *किंस्विदिदमिति* । आत्मभावद्रव्यमन्वेषते, कथंस्विदिदमिति, केन प्रकारेण कया युक्त्येति, तदेवात्मभावद्रव्यं नावधारयति । के *सन्त* इति । के वयमिदानीं विद्यमानाः । के *भविष्याम* इति एवं नावधारयति ।

सूत्रे यथाक्रममिति । *अविद्या संस्काराश्च* पूर्वान्तसम्मोहव्यावर्त्तनार्थम् । *जातिर्जरामरणं* चापरान्तसम्मोहव्यावर्त्तनार्थम् । *विज्ञानं यावद्भवश्च* मध्यसम्मोहव्यावर्त्तनार्थमिति । *तथा हि सूत्र एवोक्तमि*ति विस्तरः । सूत्रेऽप्येवमेवं दर्शितमिति । सूत्रेण स्वव्याख्यानं समर्थयति । *स न पूर्वान्तं प्रतिसरति, किं न्वहमभूवमतीतेऽध्वनीति विस्तरः* । स न पूर्वान्तं प्रतिधावति । किं न्वहमभूवमतीतेऽध्वनीति प्रतीत्यसमुत्पादयथाभूतदर्शनेन नैवमतीतेऽध्वनि सम्मुह्यत इत्यर्थः । विस्तरशब्देन स नापरान्तं प्रतिसरति, किं नु भविष्याम्यनागतेऽध्वनीति विस्तरः । तथा न स मध्यान्तं प्रतिसरति, किंस्विदिदमिति विस्तरः ।

तृष्णोपादानभवा अप्यपरान्तसम्मोहव्यावर्तनार्थमित्यपरे । तस्यैव ह्येते हेतव इति ॥ २५ ॥

स पुनरेष द्वादशाङ्गः प्रतीत्यसमुत्पादस्त्रिस्वभावो वेदितव्यः क्लेशकर्मवस्तूनि । तत्र—

क्लेशास्त्रीणि

त्रीण्यङ्गानि क्लेशस्वभावानि—अविद्यातृष्णोपादानानि ।

द्वयं कर्म

अङ्गद्वयं कर्मस्वभावम्—संस्काराः, भवश्च ।

सप्त वस्तु

सप्ताङ्गानि वस्तुस्वभावानि—विज्ञाननामरूपषडायतनस्पर्शवेदनाजातिजरामरणानि; क्लेशकर्माश्रयत्वात् । यथा च वस्तु सप्ताङ्गानि,

फलं तथा ।

सप्तैवाङ्गानि फलभूतानि । शेषाणि पञ्च हेतुभूतानि; कर्मक्लेशस्वभावत्वात्[1] ।

किं पुनः कारणं मध्ये फलहेतू विशाल्तितौ ? वस्तुनः पञ्चधा भेदात् । क्लेशस्य च[2] द्विधा । अनागतेऽध्वनि फलं संक्षिप्तं द्विधा भेदात् । अतीतेऽध्वनि

तृष्णोपादानभवा अपीति । सर्वे तृष्णोपादानभवा अपरान्तसम्मोहव्यावर्त्तनार्थम्, न मध्यसम्मोहव्यावर्त्तनार्थम् । यथा पूर्वमुपदिष्टं विज्ञानं यावद्भवश्चेति । का पुनरत्र युक्तिः ? इत्याह—*तस्यैव ह्येते हेतव* इति । यस्मादपरान्तस्यैवैते हेतव इति ॥ २५ ॥

क्लेशकर्माश्रयत्वादिति । विज्ञानादीनि सप्ताङ्गानि वस्तून्यधिष्ठानानि क्लेशकर्मणामित्यर्थः ।

"फलं तथा" इति । सप्तैवाङ्गानि विज्ञाननामरूपषडायतनस्पर्शवेदनाङ्गान्यविद्यासंस्काराणां फलानि । जातिर्जरामरणं च तृष्णोपादानभवानां फलानि । *पञ्च हेतुभूतानीति* । अविद्यासंस्कारतृष्णोपादानभवाः । *कर्मक्लेशस्वभावत्वादिति* । अविद्यातृष्णोपादानानि क्लेशस्वभावानि, संस्काराः भवाश्च कर्मस्वभावाः ।

वस्तुनः पञ्चधा भेदादिति । विज्ञाननामरूपषडायतनस्पर्शवेदना इति । *क्लेशस्य च द्विधेति* । तृष्णोपादानमिति । *अनागतेऽध्वनि फलं संक्षिप्तं द्विधा भेदादिति* ।

---

१. ०स्वभावभूतत्वात्—का० । २. का० पुस्तके नास्ति ।

हेतुः संक्षिप्तः[1]; एकमुखक्लेशोपदेशादिति ।

फलहेत्वभिसंक्षेपो द्वयोर्मध्यानुमानतः ॥ २६ ॥

मध्येनैव हि पूर्वान्तापरान्तयोरपि हेतुफलविस्तरः शक्योऽनुमातुमिति नोक्तः । पुनरुक्तात्मकं हि यत्नं मा कार्यमिति ॥ २६ ॥

यदि खलु द्वादशाङ्ग एव प्रतीत्यसमुत्पादः, एवं सत्यविद्याया अनुपदिष्ट-हेतुकत्वादादिमान् संसारः प्राप्नोति, जरामरणस्य चानुपदिष्टफलत्वादन्तवान् । अङ्गान्तरं वा पुनरुपसंख्यातव्यं तस्याप्यन्यस्मादित्यनवस्थाप्रसङ्गः ? नोपसंख्या-तव्यम्; यस्मादुपदर्शितोऽत्र भगवता—

क्लेशात् क्लेशः क्रिया चैव ततो वस्तु ततः पुनः ।
वस्तु क्लेशाश्च जायन्ते भवाङ्गानामयं नयः ॥ २७ ॥

क्लेशात् क्लेशो जायते—तृष्णाया उपादानम् ।

क्लेशात् कर्म—उपादानाद् भवः, अविद्यायाश्च संस्काराः । कर्मवस्तु—संस्कारेभ्यो विज्ञानम्, भवाच्च जातिः । वस्तुनो वस्तु—विज्ञानान्नामरूपं यावत् स्पर्शाद् वेदना, जातेश्च जरामरणम् । वस्तुनः क्लेशः—वेदनायास्तृष्णेति ।

यस्मादेष नयो व्यवस्थितो भवाङ्गानाम्, तस्मादविद्यापि क्लेशस्वभावा वस्तुनः क्लेशाद्वेति ज्ञापितं भवति । वेदनावशाच्च जरामरणवस्तुनः पुनः क्लेशो भावीति

जातिर्जरामरणमिति । *अतीतेऽध्वनि हेतुः संक्षिप्त एकमुखक्लेशोपदेशात्* । अविद्यामुखक्लेशोपदेशादित्यर्थः । न पुनरनागतेऽध्वनि फलमेव पञ्चधा विशालितम्, अतीते चाध्वनि नैवं द्विधा हेतुर्विशालित इति ॥ २६ ॥

यस्मादुपदर्शितोऽत्र भगवतेति । कः ? *"क्लेशात् क्लेशः"* इत्येवमादिकः *"भवाङ्गानामयं नयः"* ।

"ततो वस्तु" इति । ततः क्रियायाः । *"ततः पुनः वस्तु"* इति । ततो वस्तुनः वस्तु । *"क्लेशाश्च जायन्ते"* इति । वस्तुन इत्यधिकृतम् । जायन्त इत्यत्रे-तिकरणोऽध्याहार्यः । वस्तुनः *क्लेशाद्वेति ज्ञापितमिति* । इति क्लेशो वस्तुन उत्पद्यमानो दृष्टः—वेदनायास्तृष्णेति । क्लेशादपि तथा दृष्टः—तृष्णाया उपा-दानमिति । अविद्या च पूर्वान्तिसर्वक्लेशस्वभावाख्याता । तद् यद्युपादानम्, तृष्णायास्तदुत्पद्यत इति गम्यते । अथ तृष्णा, तद्वस्तुन उत्पद्यत इति गम्यते ।

---

१. हेतुरेक०—का० ।
अभि० को० २ : ५

नात्र पुनः किञ्चिदुपसंख्येयम् ; "एवमस्य केवलस्य महतो दुःखस्कन्धस्य समुदयो भवति" ( ) इति **वचनात्** । अन्यथा हि किमस्य सामर्थ्यं स्यात् ।

अयोनिशोमनस्कारहेतुकाऽविद्योक्ता सूत्रान्तरे ।

अविद्याहेतुकश्चायोनिशोमनस्कारः । स चेहाप्युपादानान्तर्भूतत्वादुक्तो भवतीति अपरे ।

तस्मादविद्या क्लेशस्वभावा सती वस्तुनः क्लेशाद्वेति ज्ञापितं भवति। जरामरणं चतुरङ्गस्वभावं वस्त्विति व्याख्यातम् । वस्तुनश्चेह क्लेश उत्पद्यमानो दृष्टः—वेदनाप्रत्यया तृष्णेति । *तस्मात् ततः क्लेशो भावी* भविष्यतीति ज्ञापितं भवति, *नात्र पुनः किञ्चिदुपसंख्येयमेवं* ज्ञापितत्वात् । कथं पुनरेवं नयो दर्शित इति गम्यते ? इत्याह—*एवमस्य केवलस्य महतो दुःखस्कन्धस्य समुदयो भवतीति वचनात् । अन्यथा हि किमस्य सामर्थ्यं स्यादिति* । यद्ययं यथोक्तो नयो न स्यात्—"क्लेशात् क्लेशः क्रिया चैव ततो वस्तु ततः पुनः वस्तु क्लेशाश्च जायन्ते" इति, एतावदेव ब्रूयात्—अविद्याप्रत्ययाः संस्कारा यावज्जातिप्रत्यया जरामरणशोकपरिदेवदुःखदौर्मनस्योपायासाः सम्भवन्तीति । इदं न ब्रूयात्—"एवमस्य केवलस्य महतो दुःखस्कन्धस्य समुदयो भवति" इति । समुदयः, उत्पाद इत्यनर्थान्तरम् । तस्माद् यथोक्तप्रकाराभिद्योतकस्य सामर्थ्यमिति गम्यते ।

अयोनिशोमनस्कारहेतुकाऽविद्योक्ता सूत्रान्तर इति । *सहेतुसप्रत्ययसनिदान*-सूत्रे । कथम्—"अविद्या भिक्षवः सहेतुका सप्रत्यया सनिदाना । कश्च भिक्षवोऽविद्याया हेतुः, कः प्रत्ययः, किं निदानम् ? अविद्याया भिक्षवोऽयोनिशोमनस्कारो हेतुः, अयोनिशोमनस्कारः प्रत्ययः, अयोनिशोमनस्कारो निदानम्" ( ) इति सूत्रे वचनात् । *अविद्याहेतुकश्चायोनिशोमनस्कार* इति । सूत्रान्तर उक्त इत्यधिकृतम् । "चक्षुः प्रतीत्य रूपाणि चोत्पद्यते, आविलो मनस्कारो मोहजः" ( ) इति सूत्रे वचनात् । किमर्थं तस्येहावचनम् ? कथं च नाङ्गान्तरं भवति ? इत्यत आह—*स चेहाप्युपादानान्तर्भूतत्वादुक्तो भवतीति* । स इत्याविलो मनस्कारः । इहेति प्रतीत्यसमुत्पादसूत्रे । कथमुक्तः ? उपादानान्तर्भूतत्वात् । तथा हि उपादानं भोगानां प्राप्तये क्लेशसमुदाचारावस्थाः । तत्र चायोनिशोमनस्कारो विपरीतचेतस आभागोऽन्तर्भूत इत्युक्तो भवति, अतो नास्त्यहेतुकत्वमविद्यायाः। न चाङ्गान्तरमुपसंख्यातव्यं द्वादशभ्योऽविद्यादिभ्यः । न चानवस्थाप्रसङ्गः; अविद्याहेतुकत्वादयोनिशोमनस्कारस्येति ।

अपर इति । स्थविरो *वसुबन्धोराचार्यो मनोरथोपाध्याय* एवमाह ।

कथमयोनिशोमनस्कारस्योपादानेऽन्तर्भावः ? यदि सम्प्रयोगतः, तृष्णाऽविद्ययोरपि तस्यान्तर्भावः[1] प्राप्नोति[1]। सत्यपि चान्तर्भावे [2]कथमयोनिशोमनस्कारो हेतुरविद्याया इति विज्ञापितं भवति[2]। यदि ह्यन्तर्भावेनैव[3] हेतुफलभावो विज्ञायते, तृष्णाऽविद्ययोरपि तर्हि तत्रान्तर्भावादङ्गान्तरत्वं शक्यमकर्तुम्।

अन्यः पुनराह—अयोनिशोमनस्कारो हेतुरविद्याया उक्तः सूत्रान्तरे। स चापि स्पर्शकाले निर्दिष्टः, "चक्षुः प्रतीत्य रूपाणि चोत्पद्यते आविलो मनस्कारो मोहजः" इति। वेदनाकाले चावश्यमविद्यया भवितव्यम्; "अविद्या-

आचार्य आह—*कथमिति* विस्तरः। *कथमयोनिशोमनस्कारस्योपादानेऽन्तर्भावः।* न ह्ययोनिशोमनस्कार उपादानस्वभावः। *यदि सम्प्रयोगतः।* यद्ययोनिशोमनस्कार उपादानेन सम्प्रयुज्यते इत्यतो भगवतोऽस्योपादानेऽन्तर्भाव इष्यते। *तृष्णाविद्ययोरपि* प्रतीत्यसमुत्पादाङ्गयोस्त*स्यायोनिशोमस्कारस्यान्तर्भावः प्राप्नोति।* तृष्णाविद्याभ्यामपि ह्यसौ सम्प्रयुज्यत इति। ततश्चैवं वक्तव्यं स्यात्—स चेहाप्यविद्यातृष्णोपादानान्तर्भूतत्वादुक्तो भवतीति। न त्वेवं वक्तव्यम्—स चेहाप्युपादानान्तर्भूतत्वादुक्तो भवतीति। नैवमुपादानान्तर्भावावधारणं कर्तव्यमित्यभिप्रायः। *सत्यपि चान्तर्भाव* इति। असम्भवं तमप्यन्तर्भावमभ्युपेत्य ब्रूमः। *कथमयोनिशोमनस्कारो हेतुरविद्याया इति विज्ञापितं भवति।* नहि तथा सूत्रे वचनमस्ति। *यदि ह्यन्तर्भावेनेति* विस्तरः। यदि यस्मादुपादानेऽन्तर्भवत्ययोनिशोमनस्कारः, तस्मादयोनिशोमनस्कारो हेतुरविद्याया इति विज्ञापितं भवति, न च तदङ्गान्तरं वक्तव्यम्; उपादानवचनादेव तत्सिद्धेः। *तृष्णाविद्ये अपि तर्ह्युपादानेऽन्तर्भवतः।* अतस्तयोरपि तत्रान्तर्भावादङ्गान्तरत्वं शक्यमकर्तुम्। उपादानवचनादेव तत्सिद्धेः। उक्ते च पृथक् तृष्णाविद्याङ्गे। तस्मादपरिहार एषः।

अन्यः पुनराहेति। भदन्तश्रीलाभः। *अयोनिशोमनस्कारो हेतुरविद्याया उक्तः सूत्रान्तर* इति। सहेतुसप्रत्ययसनिदानसूत्रे। "अविद्यापि भिक्षवः सहेतुका सप्रत्यया सनिदाना" इति विस्तरेण। *स चापि* इति विस्तरः। स चाप्ययोनिशोमनस्कारः *स्पर्शकाले निर्दिष्टः।* कथम् ? इत्याह—*चक्षुः प्रतीत्य रूपाणि चोत्पद्यते आविलो मनस्कारो मोहज* इति। स्पर्शकालो योऽयं चक्षुर्विज्ञानोत्पत्तिकालः। आविलो मनस्कारः, अयोनिशः प्रवृत्तत्वान्मोहजत्वाद्वा। मोहाज्जातो

१-१. ०र्भावप्रसङ्गः। २-२. कथमेवं ज्ञापितं भवत्ययोनिशोमनस्कारहेतुका अविद्येति—का०।
३. तर्ह्य—का०।

संस्पर्शजं वेदितं प्रतीत्योत्पन्ना तृष्णा" (   ) इति सूत्रान्तरात् । तदेवं[1] स्पर्शकाले भवन्नयोनिशोमनस्कारो वेदनासहवर्त्तिन्या अविद्यायाः प्रत्ययभावेन सिद्ध इति नास्त्यहेतुकत्वमविद्यायाः । न चाङ्गान्तरमुपसंख्येयम् । न चाप्यनवस्थाप्रसङ्गः; तस्याप्ययोनिशोमनस्कारस्य पुनर्मोहजवचनादाविलो मनस्कारो मोहज इति ।

तत्तर्ह्येतदन्यत्रोक्तमिह पुनर्वक्तव्यम् ? न वक्तव्यम् । कथमनुच्यमानं गम्यते ? युक्तितः । कया युक्त्या ? न हि निरविद्या वेदना तृष्णायाः प्रत्ययीभवत्यर्हताम्, न चाविपरीतः स्पर्शः क्लिष्टाया वेदनायाः, न च पुनर्निरविद्यस्यार्हतः[2] विपरीतः स्पर्शः[3] इत्यनया युक्त्या ।

मोहज इति । *अविद्यासंस्पर्शजं वेदितमिति* । अविद्यासम्प्रयुक्तात् संस्पर्शाज्जातमविद्यासंस्पर्शजं वेदितम् । यत्र वेदितमविद्यासंस्पर्शजम्, अवश्यं तत्राविद्या सम्प्रयुज्यते । न हि वेदितमसम्प्रयुक्तमविद्यया तृष्णाहेतुर्भवति । *तदेवं स्पर्शकाले भवन्नयोनिशोमनस्कारो वेदनासहवर्तिन्या अविद्यायाः प्रत्ययभावेन सिद्ध* इति । ज्ञापितमिदं भवति—अयोनिशोमनस्कारहेतुकाऽविद्येति । अतो *नास्त्यहेतुकत्वमविद्यायाः* । अयोनिशोमनस्कारहेतुकत्वात् । *न चाङ्गान्तरमुपसंख्येयं* द्वादशभ्योऽन्यत्, यस्मात् स्पर्शकाले भवन्नयोनिशोमनस्कारो वेदनासहवर्त्तिन्या अविद्यायाः प्रत्ययभावेन सिद्ध इति । *न चाप्यनवस्थाप्रसङ्गः, तस्याप्ययोनिशोमनस्कारस्य पुनर्मोहजवचनात् आविलो मनस्कारो मोहज* इति । तदेतच्चक्रकमुक्तं भवति—अयोनिशोमनस्कारादविद्या, अविद्यायाश्चायोनिशोमनस्कार इति ।

एवं पुनः परिहारमाचार्यः सदोषं पश्यँस्तस्य दोषस्याभिव्यक्त्यर्थं प्रसङ्गमारभते—*तत्तर्हीति विस्तरः* । तद्यथोक्तमयोनिशोमनस्कारो हेतुरविद्याया इति विस्तरेण सूत्रतो युक्त्या वा, तर्हीत्यर्थान्तरविवक्षायाम्, इदानीमर्थं इति *भगवद्विशेषः* । एतदन्यत्र सूत्र उक्तमिह पुनः प्रतीत्यसमुत्पादसूत्रे *वक्तव्यम्* । *न वक्तव्यं* इति *भदन्तश्रीलाभः* । कया युक्त्या ? इति पृष्टो *भदन्तश्रीलाभ* आह—*न हीति* विस्तरः । *अर्हतामस्ति* वेदना । न च सा *तृष्णायाः प्रत्ययीभवतीति* । सा विद्यैव वेदना तृष्णाप्रत्यय इति गम्यते । *न चाविपरीतस्पर्शः क्लिष्टाया वेदनायाः* । प्रत्ययीभवति इति प्रकृतम् । *न च पुनर्निरविद्यस्यार्हतो विपरीतः स्पर्श* इति । स्पर्शोऽपि साविद्य एवेति गम्यते यो वेदनायाः प्रत्यय उक्तः प्रतीत्यसमुत्पादसूत्रे, अविद्या चास्य स्पर्शस्य हेतुरिति गम्यते—इत्यनया युक्त्या प्रतीत्य-

१. अतः—का० । २. अर्हतः स्पर्शो—का० । ३. का० पुस्तके नास्ति ।

अतिप्रसङ्ग एवं प्राप्नोति, यावद् युक्त्या सम्भवति तावदनुक्तं गम्यत इति तस्मान्न भवत्ययं परिहारः ?

अचोद्यमेव त्वेतद् । अविद्याजरामरणयोः परेणाङ्गान्तरानभिधानात् संसारस्याद्यन्तवत्त्वप्रसङ्गः । न चापरिपूर्णो निर्देश इति । किं कारणम् ? प्रवृत्तिसम्मूढेभ्यो विनेयेभ्यः कथं परलोकादिहलोकः, इहलोकाच्च पुनः परलोकः सम्बध्यत इत्येतावतोऽर्थस्यात्र[1] विवक्षितत्वात् । एतस्य चार्थस्य[2] पूर्वमेवोक्तत्वात्—

समुत्पादसूत्रे साविद्यस्पर्शप्रत्यया वेदना साविद्यवेदनाप्रत्यया च तृष्णेति गम्यते। *अतो युक्त्या* यथोक्तया । स चापि स्पर्शकाले निर्दिष्ट इति विस्तरेणात्र प्रतीत्य समुत्पादे सिद्धं भवति—अयोनिशोमनस्कारो हेतुरविद्याया इति ।

अत्र चोद्यते—यदि तर्हि निरविद्या वेदना तृष्णायाः प्रत्ययो न भवतीत्यादिवचनेन स्वगतयैव युक्त्या अयोनिशोमनस्कारो हेतुरविद्यायाः, अविद्या चायोनिशोमनस्कारस्य हेतुरिति गम्यते; किं सूत्रान्तरापाश्रयेणाविद्यायोनिशोमनस्कारयोरन्योन्यहेतुकत्वप्रदर्शनेन प्रयोजनमिति ? अत्रोच्यते—सत्यमस्त्येतत्; किन्तु युक्तिमात्रमिदं प्रतीत्यसमुत्पादसूत्रे, न कण्ठोक्तिः । अतः सूत्रान्तरे कण्ठोक्त्येयं युक्तिर्व्यवस्थाप्यत इति तत् सूत्रान्तरोपन्यासप्रयोजनमवगन्तव्यम् ।

*अतिप्रसङ्ग एवं प्राप्नोती*ति शास्त्रकारः। कथमतिप्रसङ्गः ? इत्याह—"अविद्यासंस्पर्शजं वेदितम् प्रतीत्योत्पन्ना तृष्णा" इति सूत्रान्तरे निर्दिष्टम् । न च निरविद्यवेदितस्यार्हतो वेदना तृष्णायाः प्रत्ययो भवति, न चाविपरीतः स्पर्शः क्लिष्टायाः वेदनायाः, न च निरविद्यस्यार्हतो विपरीतः स्पर्शः—इत्यनया युक्त्या एतदप्यङ्गद्वयं स्पर्शवेदनाख्यमिह प्रतीत्यसमुत्पादसूत्रेऽनुच्यमानमप्यन्यत्रोपदिष्टत्वाद्गम्यते इत्येतस्याप्यङ्गद्वयस्यावचनं प्राप्तम् । तथा सूत्रान्तर उपदिष्टम्—"स पुण्यांश्चेत् संस्कारानभिसंस्करोति पुण्योपगमस्य विज्ञानं भवति । एवमपुण्योपगम्, आनिञ्ज्योपगं च । न च निरविद्यसंस्कारस्यार्हतः पुण्योपगं विज्ञानं यावदानिञ्ज्योपगं विज्ञानमिति । एतदपि संस्काराङ्गं युक्त्या सिद्धम्, न वक्तव्यमत्रेति प्राप्तम् । तथा जातिमन्तरेण जरामरणं न भवतीति युक्त्या गम्यत इति जात्यङ्गं न वक्तव्यं स्यादित्यादिप्रसङ्गः प्राप्नोति ।

*अचोद्यमेव त्वेतदि*ति विस्तरेणाचार्यः स्वमतमाह—*कथं परलोकादिहलोक* इति विस्तरः । तत्राविद्यासंस्काराभ्यामिहलोकः सम्बध्यते । स चेहलोको विज्ञाननामरूपषडायतनस्पर्शवेदनाङ्गानि । तृष्णोपादानभवैः परलोकः सम्ब-

---

१. ०तोऽत्रार्थस्य—का० ।　　२. च—का० ।

"पूर्वापरान्तमध्येषु सम्मोहविनिवृत्तये" (अभि० को० ३.२५)।

उक्तं भगवता—"प्रतीत्यसमुत्पादं वो भिक्षवो देशयिष्यामि प्रतीत्यसमुत्पन्नांश्च धर्मान्" (   ) इति। अथ क एषां विशेषः ? शास्त्रतस्तावन्न कश्चित्; उभयं हि सर्वे संस्कृता धर्मा इति।

कथमिदानीमनुत्पन्ना एवानागताः प्रतीत्यसमुत्पन्ना इत्युच्यन्ते, कथं तावदकृता एवानागताः संस्कृता उच्यन्ते ? आभिसंस्कारिकया चेतनया चेतितत्वात्। अनास्रवाः कथम् ? तेऽपि चेतिताः कुशलया चेतनया प्राप्तिं प्रति। निर्वाणेऽपि प्रसङ्गः ? तज्जातीयत्वाच्चु[1] तत्रैवातिदेशः[1]। यथा न च तावद्रूप्यते रूपं

ध्यते। स च परलोको जातिर्जरामरणं च। *इत्येतावतोऽर्थस्यात्र* प्रतीत्यसमुत्पादसूत्रे विनेयेभ्यो *विवक्षितत्वात्। एतस्य चार्थस्य पूर्वमेवोक्तत्वात्।* 'पूर्वापरान्तमध्येषु सम्मोहविनिवृत्तये' (अभि० को० ३.२५) इत्यनेन उक्तत्वात्। अचोद्यमेव त्वेतद् विस्तरेण यावत् न चापरिपूर्णो निर्देश इत्यभिसम्बन्धः।

उभयं हि सर्वे संस्कृता धर्मा इति। त्रैयध्विकाः सर्वे संस्कृता धर्माः प्रतीत्यसमुत्पादः। अत एव च प्रतीत्यसमुत्पन्ना इति न कश्चिद्विशेषः।

कथं तावदकृता इति। भाविन्या संज्ञया यथानागताः संस्कृता उच्यन्ते, तथा प्रतीत्यसमुत्पन्ना इत्यभिप्रायः। *आभिसंस्कारिकया चेतनयेति*। सर्वचेतनानां स्वलक्षणमभिद्योतयन्नाभिसंस्कारिकयेत्याह्। सा हि विपाकाभिसंस्करणादाभिसंस्कारिका, तया *चेतितत्वात्* प्रणिहितत्वात्। देवो भविष्यामि, मनुष्यो भविष्यामीत्येवमादि। अतोऽनागता *संस्कृताः उच्यन्ते*। न तु भाविन्या संज्ञयेति तमभिप्रायं विहन्ति। *अनास्रवाः कथमिति*। ये सास्रवा अनागता त एवं चेतयितुं युज्यन्ते, ये त्वनास्रवा अनागतास्ते कथं चेतयितुं युज्यन्ते। चोदक आह—*तेऽपि चेतिताः कुशलया चेतनया प्राप्तिं प्रति*। अनास्रवा धर्माः प्राप्येरन्निति। *निर्वाणेऽपि प्रसङ्ग* इति। निर्वाणमपि संस्कृतत्वं प्रसज्यते। प्राप्तिं प्रति चेतितत्वान्निर्वाणं प्राप्येतेति। तदेवमनेनार्थेनानागतानां संस्कृतत्वव्यवस्थापने दोष इति विध्यन्तरमुपन्यस्यते। *तज्जातीयत्वात्त्विति* विस्तरः। यथा न च तावद्रूप्यते यदनागतं रूपं रूप्यमाणरूपजातीयत्वाद्रूपमित्यतिदेशः। तथा प्रतीत्यसमुत्पन्नधर्मजातीयत्वादनागता अपि धर्माः प्रतीत्यसमुत्पन्ना इत्यतिदेश एषामनागतानां भवतीति ॥ २७ ॥

१–१. ०यत्वात्तत्रै०—का०।

चोच्यते तज्जातीयत्वादित्यदोषः ॥ २७ ॥

सूत्राभिप्रायस्त्वयमुच्यते—

हेतुरत्र समुत्पादः समुत्पन्नं फलं मतम् ।

हेतुभूतमङ्गं प्रतीत्यसमुत्पादः, समुत्पद्यतेऽस्मादिति कृत्वा । फलभूतमङ्गं प्रतीत्यसमुत्पन्नम् । एवं सर्वाण्यङ्गान्युभयथा सिध्यन्ति; हेतुफलभावात् । न चैवं सत्यव्यवस्थानं[1] भवति, भिन्नापेक्षत्वात्[1] । यदपेक्ष्य प्रतीत्यसमुत्पादो न तदेवापेक्ष्य प्रतीत्यसमुत्पन्नम्, हेतुफलवत् पितृपुत्रवच्च ।

स्थविरपूर्णाशः किलाह—स्यात् प्रतीत्यसमुत्पादो न प्रतीत्यसमुत्पन्ना धर्मा इति । चतुष्कोटिकः । प्रथमा कोटिरनागता धर्माः । द्वितीयाऽर्हतश्चरमाः । तृतीया तदन्येऽतीतप्रत्युत्पन्ना धर्माः । चतुर्थ्यसंस्कृता धर्मा इति ।

अत्र तु **सौत्रान्तिका** विज्ञापयन्ति—किं खल्वेता इष्टय उच्यन्ते या यस्येष्टिः, आहोस्वित् सूत्रार्थः ? सूत्रार्थ इत्याह । यदि सूत्रार्थः ? नैष सूत्रार्थः । कथं कृत्वा ? यत्तावदुक्तम्—"आवस्थिक एष प्रतीत्यसमुत्पादो द्वादश पञ्च-

---

हेतुफलभावादिति । यस्मात्तदेवाङ्गं हेतुस्तदेव फलम् । *न चैवं सत्यव्यवस्थानं भवतीति* । पारापारवत् । हेतुफलवदिति । नाव्यवस्थितः प्रतीत्यसमुत्पादः प्रतीत्यसमुत्पन्नो *भिन्नापेक्षत्वात्* । *हेतुफलवत् पितृपुत्रवद्वा* । तत्र हेतुफलम्, तद् यथा—बीजाङ्कुरादि। यथा यदपेक्ष्य हेतुर्व्यवस्थाप्यते न तदपेक्ष्य फलम्, यदपेक्ष्य फलं व्यवस्थाप्यते न तदपेक्ष्य हेतुः । किं तर्हि ? फलमपेक्ष्य हेतुर्व्यवस्थाप्यते, हेतुञ्चापेक्ष्य फलमिति । यथा च यमपेक्ष्य पिता न तमपेक्ष्य पुत्रः, यमपेक्ष्य पुत्रो न तमपेक्ष्य पिता, किं तर्हि ? तत्पुत्रमपेक्ष्य पितेति, पितरं चापेक्ष्य पुत्र इति । न च तदव्यवस्थितम्, तद्वदेतत् ।

किलेत्यसम्भावनायाम् । *प्रथमा कोटिरनागता* धर्मा इति । अन्यधर्म-हेतुत्वात् प्रतीत्यसमुत्पादः समुत्पद्यतेऽस्मादिति कृत्वा । न प्रतीत्यसमुत्पन्नाः, अनुत्पन्नत्वात् । *द्वितीयार्हतश्चरमा* इति । उत्पन्नत्वात्ततः फलानुत्पत्तेश्च । *तृतीया तदन्य इति* । अर्हतश्चरमेभ्योऽन्येऽतीतप्रत्युत्पन्ना धर्माः । *चतुर्थ्यसंस्कृता* इति । तत्फलाभावादनुत्पत्तिमत्त्वाच्च ।

किं खल्वेता इष्टय उच्यन्त इति । आवस्थिकः प्रतीत्यसमुत्पादः स्यात्

१-१. ०वस्था भवन्त्यपेक्षाभेदात्—का० ।

स्कन्धिका अवस्था द्वादशाङ्गानि" इति। एतदुत्सूत्रम्। सूत्रेऽन्यथानिर्देशाद्—"अविद्या कतमा? यत्तत् पूर्वान्तेऽज्ञानम्" (   ) इति विस्तरेण।

यच्च नीतार्थं न तत् पुनर्नेयं भवतीति नैष सूत्रार्थः। न वै सर्वं निर्देशतो नीतार्थं भवति। यथाप्रधानं चापि निर्देशाः क्रियन्ते। तद्यथा हस्तिपदोपमे—"पृथिवीधातुः कतमः?" इत्यधिकृत्याह—"केशा रोमाणि" (   ) इति। सन्ति च तत्रान्येऽपि रूपादयः। एवमत्रापि यथाप्रधानं निर्देशः स्यात्।

अनुपसंहार एषः। न हि तत्र केशादयः पृथिवीधातुना निर्दिश्यन्ते, यत एषामपरिपूर्णो निर्देशः स्याद्; अपि तु केशादिभिरेव पृथिवीधातुः[१] निर्दिश्यते। न च केशादीनभ्यतीत्याप्यस्ति पृथिवीधातुरिति सम्पूर्ण एवास्य निर्देशः। एवमिहाप्यविद्यादीनां परिपूर्ण एव निर्देशः, न सावशेषः।

प्रतीत्यसमुत्पादो न प्रतीत्यसमुत्पन्ना इत्येवमाद्याः। *पूर्वान्तेऽज्ञानमि*ति। यस्मादविद्यैवोक्ता नान्ये स्कन्धास्तस्मादविद्यैवाङ्गमिति।

*नीतार्थमेतदि*ति दर्शयति। नीतार्थमिति विभक्तार्थम्। *हस्तिपदोपमे* सूत्रे। *सन्ति च तत्रान्येऽपि रूपादय* इति। तेषु केशरोमादिषु। न पृथिवीधातुमेवेति। *एवमत्रापि यथाप्रधानं निर्देशः स्यादि*ति। एवमत्रापि प्रतीत्यसमुत्पादसूत्रे द्वादशसु पञ्चस्कन्धिकास्ववस्थासु यत्र यस्य प्राधान्यं तत्र तस्य निर्देशः स्यात्। अविद्याप्रधानायामविद्येति निर्देशः स्यात्, संस्कारादिप्रधानास्ववस्थासु संस्कारादीनां निर्देशः स्यात्। सन्ति च तत्रान्येऽपि रूपवेदनादयो धर्मा इति।

*नहि तत्रे*ति विस्तरः। नहि तत्र सूत्रे केशादयः पृथिवीधातुना निर्दिश्यन्ते—केशादयः कतमे? पृथिवीधातुरिति। *यत एषां* केशादीनाम*परिपूर्णो निर्देशः स्यात्।* सन्ति हि तत्रान्येऽपि रूपादय इति। रूपादिस्वभावा अपि केशादयो न केवलं पृथिवीधातुस्वभावा इति। *अपि तु केशादिभिरेव पृथिवीधातुर्निर्दिश्यते*—पृथिवीधातुः कतमः? केशरोमाणीति। *न च केशादीनभ्यतीत्या*प्यतिक्रम्या*प्यस्ति पृथिवीधातु*राध्यात्मिक *इति सम्पूर्ण एवास्य पृथिवीधातोर्निर्देशः। एवमिहाप्यविद्यादीनाम्।* एवमिहापि सूत्रेऽविद्यासंस्कारविज्ञानादीनां *परिपूर्ण एव निर्देशोऽयम्, न सावशेषः।*

---

१. ०तत्र—का०।

ननु चाध्यात्मिकेऽपि केशादीनश्रुसिङ्घाणिकादिष्वस्ति[1] पृथिवीधातुः। सोऽपि निर्दिष्ट एवेति। यद्वा "पुनरन्यदप्यस्मिन् काये खक्खटं खरगतम्" ( ) इति वचनात् भवतु वा तथैवाविद्यावशेषः, यदि शक्यते दर्शयितुम्, जात्यन्तरस्य त्वविद्यायां किंकृतः प्रक्षेपः ! यद्यपि च तास्ववस्थासु पञ्च स्कन्धा विद्यन्ते, यस्य तु भावाभावयोर्यस्य भावाभावनियमः तदेवाङ्गं व्यवस्थापयितुम्। सत्यपि च पञ्चस्कन्धके[2] संस्कारा न भवन्ति पञ्चस्कन्धहेतुकाः। किं तर्हि ! अविद्याहेतुका एव। तथा पुण्यापुण्यानेञ्ज्योपगं च विज्ञानं न भवति, तृष्णोपादानादयश्चेति[3]। यथानिर्देश[4] एव सूत्रार्थः।

यदप्युक्तम्—"हेतुरत्र समुत्पादः समुत्पन्नं फलं यावच्चतुष्कोटिकः"

अश्रुसिङ्घाणकादिष्विति। अश्रुसिङ्घाणकादीनि न तत्र सूत्रे पठ्यन्ते, तस्मान्न तद्गतः पृथिवीधातुरुक्तः इति सावशेष एवेति दर्शयति। *भवतु वा तथैवेति* विस्तरः। यथा पृथिवीधातोरश्रुसिङ्घाणकादिष्ववशेषमनुक्तत्वात् *तथैवाविद्यावशेषमस्तु यदि शक्यते दर्शयितुम्।* न शक्यते दर्शयितुमिति मन्यमानो यदिशब्दं प्रयुङ्क्ते; पूर्वान्तेऽज्ञानमपरान्तेऽज्ञानं मध्यान्तेऽज्ञानं बुद्धेऽज्ञानं धर्मेऽज्ञानं संघेऽज्ञानं इत्येवमादीनां सर्वेषामज्ञानस्थानानामुक्तत्वात्। *जात्यन्तरस्य तु* वेदनादेर*विद्यायां किङ्कृतः प्रक्षेपः।* पञ्चस्कन्धिकावस्थाविद्येति। न हि वेदनादीनामविद्यात्वं युज्यत इति। *भावाभावनियम* इति। यस्य भावाभावयोर्यस्य भावाभावौ यथासंख्येन नियतौ *तदेवाङ्गम्।* अविद्याभावे संस्काराणां भावः, तदभावे तेषामभाव इत्यविद्यैवाङ्गं न वेदनादि। न हि वेदनादिसद्भावेऽर्हतां संस्कारा भवन्ति, ये विज्ञानाङ्गजनका इत्यर्थः। तस्मादाह—*सत्यपि च पञ्चस्कन्धके संस्कारा न भवन्तीति* विस्तरः। सत्यपि च पञ्चस्कन्धके अर्हत्त्वावस्थायाम्। *पुण्योपगं यावदानिञ्ज्योपगं च विज्ञानं न भवति।* प्रतिसन्धिविज्ञानं न भवतीत्यर्थः। अन्तामुपपत्तिं गच्छतीत्युपगम्, पुण्योपगं विज्ञानं पुण्योपगम्, एवं यावदानिञ्ज्योपगम्। तथा सत्यपि पञ्चस्कन्धके निरविद्यावस्थायां तृष्णोपादानादयश्च न भवन्तीति। *यथानिर्देश एव सूत्रार्थः।* यथा संकीर्त्तितानामेवाविद्यादीनां ग्रहणमित्यर्थः। अतो विद्यमाना अप्यन्ये स्कन्धा न प्रत्ययाः संस्कारादीनामिति न तेऽङ्गम्।

एवं मया श्रुतमित्यादि। भगवान् राजगृहे विहरति गृध्रकूटे पर्वते महता

---

१. ०श्रुखेटशिङ्घाणका०—का०। २. ०केऽर्हतः—का०।
३. तृष्णादय०—का०। ४. ०निर्देशमेव—का०।

इति । एतदप्युत्सूत्रम् ; सूत्रेऽन्यथा निर्देशात् । "प्रतीत्यसमुत्पादः कतमः ? यदुतास्मिन् सतीदं भवति" इति विस्तरेणोक्त्वा "इति याऽत्र धर्मता धर्मस्थितिता यावदविपर्यस्तता अयमुच्यते प्रतीत्यसमुत्पादः" इति । धर्मजातिः धर्माणां शैलिः । अतो येयं धर्मता य एष नियमः । अविद्यायामेव सत्यां संस्कारा भवन्ति, नान्यथा । एष प्रतीत्यसमुत्पादो न हेतुरेव । यदपि चतुष्कोटिकमुक्तम्, तत्र यद्यनागताः धर्मा न प्रतीत्यसमुत्पन्नाः, सूत्रं विरुध्यते—"प्रतीत्यसमुत्पन्ना धर्माः कतमे ? अविद्या, यावज्जातिर्जरामरणम् ।"

अथ वा—तयोरनागताध्वव्यवस्थानं नैष्टव्यमिति त्रिकाण्डव्यवस्था भिद्यते ।

'असंस्कृतः प्रतीत्यसमुत्पादः' इति **निकायान्तरीयाः** । "उत्पादाद्वा तथागतानामनुत्पादाद्वा तथा .तानां[1] स्थितैवेयं धर्मता" इति वचनात् । तदेतद-भिप्रायवशादेवं च न चैवम् ।

कथं तावदेवम्, कथं वा नैवम् ?

भिक्षुसङ्घेन सार्धमर्धत्रयोदशभिर्भिक्षुशतैः सम्बहुलैश्च बोधिसत्त्वैरिति । आयुष्मान् शारिपुत्रो मैत्रेयं बोधिसत्त्वमेतदवोचत् । शालिस्तम्बमवलोक्य भिक्षुभ्यः सूत्रमिदमुक्तम्—यो भिक्षवः प्रतीत्यसमुत्पादं पश्यति स धर्मं पश्यति, यो धर्मं पश्यति स बुद्धं पश्यति, इत्युक्त्वा भगवांस्तूष्णीम्बभूव । तदस्य भगवता भाषितस्य सूत्रस्य कोऽर्थः ? प्रतीत्यसमुत्पादः कतमः ? धर्मः कतमः ? बुद्धः कतमः ? कथं च प्रतीत्यसमुत्पादं पश्यन् धर्मं पश्यतीत्यादि ? तत्र प्रतीत्यसमुत्पादो नाम यदिदमविद्येत्यादि । इदं चाभिसन्धायेदमुक्तं -तत्र सूत्रे—*उत्पादाद्वा तथागतानामनुत्पादाद् वा तथागतानां स्थितैवेयं धर्मता* धर्म-*स्थितिता* धर्मनियामता तथता अवितथता अनन्यतथता भूतता सत्यता तत्त्वमविपरीतता *अविपर्यस्ततेत्येवमादि* भगवन्मैत्रेयवचनम् । *यद्यनागता न प्रतीत्यसमुत्पन्ना* इति । यदुक्तं प्रथमा कोटिरनागता धर्मा इति, *सूत्रं विरुध्यत* इति । जातिर्जरामरणयोः प्रतीत्यसमुत्पन्नत्वं न स्यात् । उक्तं च—*अविद्या यावज्जातिजरामरणमिति* ।

अथ वेति विस्तरः । अथ जातिजरामरणाङ्गेऽपि प्रतीत्यसमुत्पन्ने इष्टे । *तयोरनागताध्वव्यवस्थानं नैष्टव्यमिति* कृत्वा *त्रिकाण्डव्यवस्था भिद्यते* । "पूर्वा-परान्तयोर्द्वे द्वे मध्येऽष्टौ" (अभि० को० ३.२०) इति ।

निकायान्तरीया इति । आर्यमहीशासकाः ।

---

१. का० पुस्तके नास्ति ।

यद्ययमभिप्रायः—उत्पादाद्वा तथागतानामनुत्पादाद्वा नित्यमविद्यादीन् प्रतीत्य संस्कारादीनामनुत्पादः, न कदाचिदप्रतीत्यान्यद्वा प्रतीत्यातो नित्य इति; एवमेतदिति प्रतिग्राह्यम्। अथायमभिप्रायः—प्रतीत्यसमुत्पादो नाम किञ्चित् भावान्तरं नित्यमस्तीति; नैतदेवमिति प्रतिषेद्धव्यम्। किं कारणम्? उत्पादस्य संस्कृतलक्षणत्वात्। न च नित्यं भावान्तरमनित्यस्य लक्षणं युज्यते। उत्पादश्च नामोत्पत्तुर्भवतीति कोऽस्याविद्यादिभिरभिसम्बन्धः, यतस्तेषां प्रतीत्यसमुत्पाद इत्युच्येत। पदार्थश्चासम्बन्धो[1] भवतीति नित्यश्च नाम प्रतीत्यसमुत्पादश्चेति।

अथ प्रतीत्यसमुत्पाद इति कः पदार्थः? प्रतिः प्राप्त्यर्थः, एतिः गत्यर्थः। उपसर्गवशेन धात्वर्थपरिणामात् प्राप्येति योऽर्थः सोऽर्थः प्रतीत्येति।

यदि सत्तार्थः, समुत्पूर्वः प्रादुर्भावार्थः। तेन प्रत्ययं प्राप्य समुद्भवः प्रतीत्यसमुत्पादः।

उत्पादस्य संस्कृतलक्षणत्वादिति। योऽयमुत्पादः प्रतीत्यसमुत्पाद इति निकायान्तरीयैर्नित्यः परिकल्प्यते स संस्कृतलक्षणमुक्तम्—"त्रीणि इमानि संस्कृतस्य संस्कृतलक्षणानि, संस्कृतस्योत्पादोऽपि प्रज्ञायते, व्ययोऽपि, स्थित्यन्यथात्वमपि" इति। संस्कृतलक्षणत्वाच्चानित्यमित्यभिप्रायः। ब्रूयास्त्वं लक्षणमपि नित्यं भवतीति? अत आह—*न च नित्यं भावान्तरमनित्यस्य लक्षणं युज्यत* इति। न हि निर्वाणमाकाशं वा कस्यचिदनित्यस्य लक्षणं भवति। प्रागुत्पत्तेर्हि लक्ष्यस्य तदस्तीति कस्य लक्षणम्, विनष्टे च लक्ष्ये कस्य—इति न युज्यते। *उत्पादश्चेति* विस्तरः। उत्पादश्च नामाभूत्वा भावलक्षणः। *सौत्रान्तिक*नयेनोत्पत्तिर्धर्मस्य तदानीमेव भवतीति। *कोऽस्यो*त्पादस्यासंस्कृतस्य तन्मतेना-*विद्यादिभिरभिसम्बन्धः*। यथौदनेन पाकस्यास्ति सम्बन्धः कर्तृक्रियालक्षण इत्योदनस्य पाक इत्युच्यते। न ह्याकाशरूपयोरभिसम्बन्ध उत्पत्त्युत्पत्तृलक्षणोऽस्ति, येन रूपस्याकाशमित्युच्यते। एवं कोऽस्याविद्यादिभिरभिसम्बन्धः। *यतस्तेषामविद्यादीनां प्रतीत्यसमुत्पाद इत्युच्यते। पदार्थश्चासम्बन्धो भवतीति*। प्रत्ययं प्राप्य समुद्भवः प्रतीत्यसमुत्पाद इति पदार्थः, स कथं *नित्यश्च नाम प्रतीत्यसमुत्पादश्चेति*।

प्रतिः प्राप्त्यर्थ इति। प्राप्तिद्योतक इत्यर्थः। "इ गतौ" (मा० धा० १.२१५) इति *धात्वर्थपरिणामा*दिति। अनेकार्था हि धातवः। प्रतिश्चोपसर्गः प्राप्तिद्योतक इत्ययमिः गत्यर्थमुज्झित्वा प्राप्त्यर्थमापद्यते। *पदिः सत्तार्थ* इति। "पद

---

१. ०श्चासमर्थो—का०।

न युक्त एष पदार्थः । किं कारणम् ? एकस्य हि कर्तुर्द्वयोः क्रिययोः पूर्वकालायां क्रियायां क्त्वाविधिर्भवति । तद्यथा—स्नात्वा भुङ्क्त इति । न चासौ पूर्वमुत्पादात् कश्चिदस्ति, यः पूर्वं प्रतीत्योत्तरकालमुत्पद्यते । न चाप्यकर्तृकाऽस्ति क्रियेति । आह चात्र—

"प्रत्येति पूर्वमुत्पादाद् यद्यसत्त्वान्न युज्यते ।
सह चेत् क्त्वा न सिद्धोऽत्र पूर्वकालविधानतः" ॥ इति ?

नैष दोषः । इदं तावदयं प्रष्टव्यः शाब्दिकः—किमवस्थो धर्मः उत्पद्यते वर्त्तमानः, उताहोऽनागत इति ? किं चातः ? यदि वर्त्तमान उत्पद्यते, कथं वर्त्तमानो यदि नोत्पन्नः । उत्पन्नस्य वा पुनरुत्पत्तावनवस्थाप्रसङ्गः । अथानागत उत्पद्यते, कथमसतः कर्तृत्वं सिद्धत्यकर्तृका वा क्रियेति ? अतो यदवस्थ उत्पद्यते तदवस्थ एव प्रत्येति । किमवस्थश्चोत्पद्यते ? उत्पादाभिमुखोऽनागतः । तदवस्थ एव प्रत्ययं प्रत्येतीत्युच्यते । अनिष्पन्नं चेदं यदुत शाब्दिकीयं कर्तृक्रिया

सत्तायाम्" (   ) इति । *तेनेति* कारणेन । *पूर्वकालायां क्रियायां क्त्वाविधेरिति* । "समानकर्तृकयोः पूर्वकाले" (पा० सू० ३.४.२१) इति वचनात् । न चासौ पूर्वमुत्पादात् कश्चिदस्तीति *सौत्रान्तिक*मतेन । *न चाप्यकर्तृकास्ति क्रियेति* । कर्तरि सति क्रियाया व्यवस्थापनात् ।

आह चात्रेति । एतद्वैयाकरणचोद्यं श्लोकेनोपनिबध्नात्या*चार्यः* । *यदि पूर्वमुत्पादात् प्रत्येति* प्राप्नोति । *असत्त्वान्न युज्यते* । न ह्यविद्यमानः कर्त्ता स्नानादिक्रियां कुर्वन् दृष्ट इति । *सह चेत्* । अथ मन्यसे प्रतीत्यक्रियां समुत्पादक्रियां च सहकरोतीत्येवम् । *क्त्वा न सिद्धोऽत्र* प्रत्ययः । कस्मात् ? *पूर्वकालविधानतः* । पूर्वस्मिन् काले विधानं क्त्वाप्रत्ययस्य; "समानकर्तृकयोः पूर्वकाले" इति वचनात् । अतः क्त्वाप्रत्ययो न सिद्धो भवेत् ।

पुनरुत्पत्ताविति । उत्पन्नस्य पुनरुत्पत्तौ कल्प्यमानाया*मनवस्थाप्रसङ्गः* । द्वितीये तृतीये क्षणे पुनः पुनरुत्पद्यत इत्यनिष्ठाप्रसङ्गः । *अथानागत* इति विस्तरः । अलब्धात्मकोऽनागत इति *कथमसतो*ऽलब्धात्मलाभस्य कर्तृत्वं सिध्यति, अकर्तृका वा क्रिया कथं सिध्यति; यत एवमतो यदवस्थ उत्पद्यते शाब्दिकस्य शब्दविदः, तदवस्थ एव मम प्रत्येति । *किमवस्थश्चेति* । कावस्थास्येति किमवस्थः । *उत्पादाभिमुखोऽनागत* इति । न सर्वोऽनागत उत्पद्यते, किं तर्हि ? उपपादाभिमुखः । उत्पादेऽभिमुखे उत्पित्सुरित्यर्थः । *तदवस्थ एव* । उत्पादा-

व्यवस्थानं भवतीत्येष कर्ता, भूतिरित्येषा क्रिया । न चात्र भवितुरर्थात् भूतिमन्यां क्रियां पश्यामः । तस्माद्‍च्छलं व्यवहारेषु ।

एष तु वाक्यार्थः—'अस्मिन् सत्यस्य भावः, अस्योत्पादादिदमुत्पद्यत इति योऽर्थः सोऽर्थः प्रतीत्यसमुत्पादः' इति । आह चात्र—

"असन्नुत्पद्यते यद्वत् प्रत्येत्यपि तथाऽथ सन् ।
उत्पन्न उत्पद्यत इत्यनिष्ठाऽसन् पुरापि वा ॥
सहभावे[1]ऽपि च क्त्वाऽस्ति दीपं प्राप्य तमो गतम् ।
आस्यं व्यादाय शेते वा[2], पश्चाच्चेत् किं न संवृते ॥"

भिमुखावस्थ एव प्रत्येतीत्युच्यते । *अनिष्पन्नं* चेदमिति विस्तरः । शाब्दिकानामिदं *शाब्दिकीयम्* । कर्तुः क्रियायाश्च व्यवस्थानम् । कस्मात् ? भवितुः, कर्तृरूपकल्पितादर्थात् क्रियारूपकल्पिताया भूतेरन्यत्वा नात् । *तस्मादच्छलं* भवत्युत्पद्यते प्रत्येतीत्येवमादिषु ।

आह चात्रेति । तत्सिद्धान्तेन प्रक्रियां दर्शयति । *असन्नुत्पद्यते यद्वदिति* विस्तरः । असन्नभावोऽलब्धात्मक उत्पद्यते *यथा प्रत्येत्यपि तथा* । असन्नित्यर्थः । *अथ सन्*, अथ लब्धात्मक उत्पद्यत इति कल्प्यते । *उत्पन्न उत्पद्यते इत्यनिष्ठा* । उत्पन्नोऽपि पुनरुत्पद्यत इत्यनवस्थानादन्यदनिष्ठा प्राप्नोति । तथा हि—*सांख्यमतानु*सारेण सत एवोत्पादो नासत इति तदेतदधिकृत्य ब्रवीति । *सन् पुरापि* वेति । वा-शब्दो मतविकल्पार्थः । यदि भवतां सन्नुत्पद्यते इति पक्षः, अस्माकमपि सन्नुत्पद्यते; *वैभाषिकनयेनानागतानामस्तित्वात् सौत्रान्तिकनयेन* च जनकधर्मबीजसद्भावात् । ततः किमिदमुच्यते—न चासौ पूर्वमुत्पादात् कश्चिदस्ति यः प्रतीत्योत्तरकालमुत्पद्यत इति । अथ वा यदि तर्हि सन्नेवोत्पद्यते, पूर्वमेव घटो मृतपिण्डादीननपेक्ष्य स्वतः प्रसिद्धोऽस्तीति प्राप्नोति ।

अपरे पुनर्व्याचक्षते—*अनिष्ठाऽसन् पुरापि* वेति । अथ मा भूदनिष्ठेति, असन्नुत्पद्यत इति प्रतिपद्यसे । पुनस्तदेव वोपतिष्ठते, *असन्नुत्पद्यते यद्वत्* प्रत्येत्यपि तथेति सिद्धो नः पक्ष इति पूर्ववद्वाच्यम् । यदप्युक्तम्—एकस्य हि कर्तुर्द्वयोः क्रिययोः पूर्वकालायां क्रियायां क्त्वाविधिर्भवतीति, तद्व्यभिचारयन्नाह—*सहभावेऽपि च क्त्वास्ताति* विस्तरः । समानकालायामपि क्रियायां क्त्वाविधिर्दृष्टः, तद्यथा *दीपं प्राप्य तमोगतमिति* । अत्र न पूर्वं तमो दीपं प्राप्नोति, पश्चाद्गच्छति विनश्यतीत्यर्थः । किं तर्हि ? तस्मिन्नेव काले तमो दीपं प्राप्नुवद्

---

[1] सहकाले—का० । [2] च—का० ।

अन्ये पुनरस्य चोद्यस्य परिहारार्थमन्यथा परिकल्पयन्ति—प्रतिर्वीप्सार्थः, इतौ साधव इत्याः = अनवस्थायिनः, उत्पूर्वः पदिः प्रादुर्भावार्थः; तां तां कारण-सामग्रीं प्रति इत्यानां समवायेनोत्पादः प्रतीत्यसमुत्पाद इति ।

एषा तु कल्पनाऽत्रैव युज्यते । इह कथं भविष्यति—"चक्षुः प्रतीत्य रूपाणि चोत्पद्यते चक्षुर्विज्ञानम्" (   ) इति ॥

किमर्थं पुनर्भगवान् पर्यायद्वयमाह—"अस्मिन् सतीदं भवति, अस्योत्पा-

---

विनश्यति । अथ मतम्—समनन्तरमेव तन्न युगपदिति । अतः पुनरिदमुच्यते—*आस्यं व्यादाय शेते वेति ।* न ह्यसौ पूर्वं मुखं व्याददाति विदारयति पश्चाच्छेते, किं तर्हि ? यो मुखं व्याददच्छेते स मुखं व्यादाय शेते इत्युच्यते । अथ मतम्—पूर्वमसौ मुखं व्याददाति पश्चाच्छेते इति ? अत आह—*पश्चाच्चेत् किं न संवृते ।* यः कश्चिन्मुखं व्यादानानन्तरं च संवृत्य शेते स मुखं व्यादाय शेते इत्युच्येत, न चोच्यते; तेन ज्ञायते यो मुखं व्याददच्छेते स मुखं व्यादाय शेते इत्युच्यते इति ।

अन्ये पुनरिति । भदन्त*श्रीलाभः । प्रतिर्वीप्सार्थ* इति । नानावाचिनामधिकरणानां सर्वेषां क्रियागुणाभ्यां व्याप्तुमिच्छा वीप्सा, तामयं प्रतिर्द्योतयति । इतौ गतौ *साधव इत्याः,* "तत्र साधुः" (पा० सू० ४.४.९८) इति यत्प्रत्ययः, इतौ विनष्टौ साधवः । अनवस्थायिन इत्यर्थः । समुपसर्गः *समवायार्थं* द्योतयति । *उत्पूर्वः पदिः प्रादुर्भावार्थः;* धात्वर्थपरिणामात् । *तां तां सामग्रीं प्रतीति ।* प्रतेर्वीप्सार्थतां दर्शयति । *इत्यानां* विनश्वराणां *समवायेनोत्पादः प्रतीत्यसमुत्पादः ।* न कश्चिद्धर्म एक उत्पद्यते; सहोत्पादनियमात्, रूपादीनाम् । "कामेऽष्टद्रव्य-कोऽशब्दः परमाणुः" (अभि० को० २.२२) यावत् "चित्तचैत्ताः सहावश्यम्" (अभि० को० २.२४) इति नियमात् ।

एषा तु कल्पनेति विस्तरः । प्रतिर्वीप्सार्थ इत्येवमादिका । कल्पनाऽत्रैव प्रतीत्यसमुत्पादसूत्रे *युज्यते । इह कथं भविष्यति* चक्षुः प्रतीत्य रूपाणि चोत्पद्यते चक्षुर्विज्ञानमिति । न हि प्रतीत्यानां चक्षूंषि प्रतीत्यचक्षूंषीति समासः सम्भवति; अर्थायोगात् । चक्षुर्हि प्रतीत्य प्राप्य रूपाणि चोत्पद्यते चक्षुर्विज्ञानमित्ययमर्थो गम्यते । तेन तदवस्थमेव तच्चोद्यं 'न युक्त एष पदार्थः' इति विस्तरेण यदुक्तम् । कथम् ? एकस्य हि कर्तुर्द्वयोः क्रिययोः पूर्वकालायां क्रियायां क्त्वाविधिर्भवति—स्नात्वा भुङ्क्त इति । न च पूर्वमुत्पादाच्चक्षुर्विज्ञानमस्ति यच्चक्षुः पूर्वं प्रतीत्य रूपाणि चोत्तरकालमुत्पद्यते, न चाप्यकर्तृका क्रियेति ।

अवधारणार्थं पर्यायद्वयमाह । अस्मिन् सतीति । एतावत्युच्यमाने न केवलमविद्यायां सत्यां संस्कारा भवन्ति, अन्यस्मिन्नपि सतीति गम्येत, यथा चक्षुषि

वादिदमुत्पद्यते" इति ? अवधारणार्थम् । यथाऽन्यत्राह—"अविद्यायां सत्यां संस्कारा भवन्ति नान्यत्राविद्यायाः संस्काराः" इति । अङ्गपरम्परां वा दर्शयितुम्—अस्मिन्नङ्गे सतीदं भवति, अस्य पुनरङ्गस्योत्पादादिदमुत्पद्यत इति । जन्मपरम्परां वा—पूर्वान्ते सति मध्यान्तो भवति, मध्यान्तस्योत्पादादपरान्त उत्पद्यत इति । साक्षात् पारम्पर्येण च प्रत्ययभावं दर्शयति—कदाचिद्धि समनन्तरमविद्यायाः संस्कारा भवन्ति, कदाचित् पारम्पर्येणेति ।

अहेतुनित्यहेतुवादप्रतिषेधार्थमित्यपरे । नासति हेतौ भावो भवति, न चानुत्पत्तिमतो नित्यात् प्रकृतिपुरुषादिकात् किञ्चिदुत्पद्यत इति ।

अस्यां तु कल्पनायां पूर्वपदस्य ग्रहणमनर्थकं प्राप्नोति; 'अस्योत्पादादिदमुत्पद्यते' इत्यनेनैवोभयवादप्रतिषेधसिद्धेः ।

सति चक्षुर्विज्ञानं भवत्विति । न चक्षुष्येव सतीत्यवधार्यते । तेन रूपेऽपि सतीत्यवगम्यते । द्वितीयेन तु पर्यायेणास्योत्पादादिदमुत्पद्यत इत्यनेन पूर्वपर्यायमेवावधारयति । अस्यैवोत्पादादिदमुत्पद्यते, नान्यस्मादिति । *अङ्गपरम्परां वा दर्शयितुमिति* । *अस्मिन्नङ्गे सति* । अविद्याङ्गे सति संस्काराङ्गं *भवति*, *अस्य पुनरङ्गस्य* संस्कारस्योत्पादादिदं विज्ञानाङ्गमुत्पद्यत इति । एवमितरेषामप्यङ्गानां परम्परा वक्तव्या । *जन्मपरम्परां वा* । 'किं दर्शयितुं पर्यायद्वयमाह' इति वर्त्तते । *साक्षादिति* विस्तरः । साक्षात् *पारम्पर्येण* च सन्तत्याऽविद्यादीनां *प्रत्ययभावं* दर्शयितुं पर्यायद्वयमाह । 'अस्मिन् सतीदं भवति' इति साक्षात् प्रत्ययभावं दर्शयति, 'अस्योत्पादादिदमुत्पद्यते' इति पारम्पर्येण । तत्र साक्षाद् यदा अविद्यायाः समनन्तरं क्लिष्टाः संस्कारा उत्पद्यन्ते; पारम्पर्येण तु यदा कुशला उत्पद्यन्ते, कुशलावस्थायामविद्याया अभावात् । किञ्च—अविद्या संस्काराणां साक्षात् प्रत्ययः, विज्ञानादीनां पारम्पर्येण । तदुक्तं भवति—अविद्याङ्गे सति संस्काराङ्गं भवति, अस्य संस्काराङ्गस्योत्पादादिदमुत्पद्यते विज्ञानाङ्गं साक्षादविद्याप्रत्ययं पारम्पर्येणेति । एतत् सर्वमाचार्यमतम् ।

प्रतिषेधार्थमित्यपर इति स्थविरवसुवर्मा । *नासति हेतौ भावो भवतीत्यहेतुवादप्रतिषेधार्थं* प्रथमेन पर्यायेण । नित्यहेतुवादप्रतिषेधार्थम्—*न चानुत्पत्तिमतो नित्यात् प्रकृतिपुरुषादिकात् किञ्चिदुत्पद्यत* इति द्वितीयेन ।

आचार्य आह—*अस्यां तु कल्पनायामिति* विस्तरः । *पूर्वपदस्य ग्रहणमनर्थकमिति* । अस्मिन् सतीदं भवतीत्यस्य । *उभयवादप्रतिषेधसिद्धेरिति* । अस्योत्पादादिदमुत्पद्यत इत्यनेनैव पर्यायेण । हेतोरस्तित्वमुत्पत्तिमतश्च हेतुत्वमित्युभयस्या-

सन्ति तर्हि केचिद् ये आत्मनि सत्याश्रयभूते संस्कारादीनां भावं परिकल्पयन्ति, अविद्यादीनां चोत्पादात्तदुत्पत्तिम् । अतस्तेषां कल्पनां पर्युदासयितुमिदं निर्धारयाम्बभूव—"यस्यैवोत्पादाद्यदुत्पद्यते तस्मिन्नेव सति तद् भवति, नान्यस्मिन्। यदुत अविद्याप्रत्ययाः संस्काराः, यावदेवमस्य केवलस्य महतो दुःखस्कन्धस्य समुदयो भवति" ( ) इति ।

अप्रहीणोत्पत्तिज्ञापनार्थमित्याचार्याः । अविद्यायामप्रहीणायां संस्कारा न प्रहीयन्ते । तस्या एवोत्पादादुत्पद्यन्त इति विस्तरः ।

हेतुत्वनित्यहेतुत्वलक्षणस्य वादस्य प्रतिषेधसिद्धितः पूर्वपर्यायस्यानर्थक्यं प्राप्नोति ।

सन्ति तर्हि केचिदिति विस्तरः । सन्ति केचिद् वादिनः । *य आत्मनि सत्याश्रयभूते* । अविद्याया आश्रयभूते । *संस्कारादीनां* संस्कारविज्ञाननामरूपादीनां भावमुत्पादं *कल्पयन्ति* । *अविद्यादीनां* चाविद्यासंस्कारादीनामुत्पादात्तदुत्पत्तिम् । संस्काराद्युत्पत्तिं कल्पयन्ति इत्यधिकृतम् । *अतः* कारणात्तेषां वादिनां *कल्पनां पर्युदासयितुं* प्रतिपेदधुमिदं *निर्धारयाम्बभूवा*म्रे डयाम्बभूव । किम् ? इत्याह—*यस्यैवोत्पादात् यावत् स्कन्धस्य समुदयो भवतीति* । यस्यैवोत्पादाद् यदुत्पद्यते, तस्मिन्नेव सति तद् भवति, नान्यस्मिन्नात्मनि । *यदुताविद्याप्रत्ययाः संस्काराः* । अविद्यायामेव सत्यां संस्कारा भवन्ति, नान्यस्मिन् । *यावदेवमस्य केवलस्य महतो दुःखस्कन्धस्य समुदयो भवति* । कथम् ? जातिप्रत्यया जरामरणशोकपरिदेवदुःखदौर्मनस्योपायासाः सम्भवन्ति । एवमस्य केवलस्य महतो दुःखस्कन्धस्य समुदयो भवति । जात्यामेव सत्यां जरामरणादयः सम्भवन्ति, नान्यस्मिन्नात्मनि । अन्यथा हि 'अस्मिन् सतीदं भवति' इत्युच्यमाने वक्तारः स्युः—आत्मनि सत्याश्रयभूते अविद्यादिषु सत्सु संस्कारादयो भवन्तीति । अथ पुनर्द्वितीयमेव पर्यायं ब्रूयात्—अस्योत्पादादिदमुत्पद्यत इति । एवमपि तथैव कल्पेयुः—सत्यमविद्यादीनामुत्पादात् संस्कारादय उत्पद्यन्ते, आत्मनि तु सत्याश्रयभूत इति । अतः पर्यायद्वयेन निर्धारयति—यस्योत्पादाद् यदुत्पद्यते तस्मिन्नेव सति तद्भवति, नान्यस्मिन्नात्मनि सत्याश्रयभूत इति ।

आचार्या इति । पूर्वाचार्याः । *अप्रहीणज्ञापनार्थमुत्पत्तिज्ञापनार्थं* च । *अविद्यायां सत्यामप्रहीणायां संस्कारा भवन्ति, न प्रहीयन्त* इति प्रथमेन पर्यायेण दर्शयति । *तस्या एवोत्पादादुत्पद्यन्त* इति द्वितीयेन दर्शयति । एवं यावज्जात्यां सत्यामप्रहीणायां जरामरणादयो भवन्ति, न प्रहीयन्ते ; तस्या एवोत्पादादुत्पद्यन्त इति ।

स्थित्युत्पत्तिसन्दर्शनार्थमित्यपरे। यावत् कारणस्रोतस्तावत् कार्यस्रोतो भवति। कारणस्यैव चोत्पादात् कार्यमुत्पद्यत इति। उत्पादे त्वधिकृते कः प्रसङ्गः स्थितिवचनस्य, भिन्नक्रमं च भगवान् किमर्थमाचक्षीत प्राक् स्थितिं पश्चादुत्पादम्।

पुनराह—"अस्मिन् सतीदं भवति" इति "कार्ये सति कारणस्य विनाशो भवति" इति। स्यान्मतम्—अहेतुकं तर्हि कार्यमुत्पद्यत इति? अत आह नाहेतुकम्; यस्मादस्योत्पादादिदमुत्पद्यत इति।

एष चेत् सूत्रार्थोऽभविष्यद् 'अस्मिन् सतीदं न भवति' इत्येवावक्ष्यत्। पूर्वं च तावत् कार्यस्योत्पादानेवावक्ष्यत्, पश्चाद् 'अस्मिन् सतीदं न भवति' इति। एवं हि साधुः क्रमो भवति। इतरथा तु 'प्रतीत्यसमुत्पादः कतमः' इत्यादेरर्थे कः प्रक्रमो विनाशवचनस्य। तस्मान्नैष सूत्रार्थः।

स्थित्युत्पत्तिसन्दर्शनार्थमित्यपर इति *भदन्तश्रीलाभः।* तदर्थं *पर्यायद्वयमाहेति।* *यावत् कारणस्रोतस्तावत् कार्यस्रोतो भवतीति* प्रथमेन पर्यायेण। *कारणस्यैवोत्पादात् कार्यमुत्पद्यत* इति द्वितीयेन। *उत्पादे त्वधिकृत* इति। प्रतीत्यसमुत्पादं वो भिक्षवो देशयिष्यामीत्यधिकृते। *कः प्रसङ्गः* कः प्रस्तावः *स्थितिवचनस्य,* अस्मिन् सतीदं भवतीत्यनेन यावत् कारणस्रोतस्तिष्ठति तावत् कार्यस्रोतस्तिष्ठतीति। एवमस्य स्थित्यर्थो वर्ण्यते इति। *भिन्नक्रमं च भगवान् किमर्थमाचक्षीत।* उत्पत्तिर्हि प्रथमं भवति, पश्चात् स्थितिः। उत्पत्तिप्रतिबद्धा स्थितिरिति कृत्वा 'अस्योत्पादादिदमुत्पद्यते' इति पूर्वं वक्तव्यं स्यात्, पश्चाद् 'इदमस्मिन् सतीदं भवति'। न त्वेवम्, अतो नायमर्थ इति।

पुनराहेति। स एव *भदन्तश्रीलाभः।*

आचार्य प्रत्याह—*एष चेद्* इति विस्तरः। *अस्मिन् सतीदं न भवतीत्येवावक्ष्यदिति।* नञैवाभावनिर्देशो युक्तरूप इति दर्शयति। *पूर्वं च कार्यस्योत्पादमिति।* अस्योत्पादादिदमुत्पद्यते इति पूर्वमवक्ष्यत्; उत्पादपूर्वकत्वाद्विनाशस्य।

सूत्र उक्तम्—जातिप्रत्यया जरामरणशोकपरिदेवदुःखदौर्मनस्योपायासाः सम्भवन्तीति। जरामरणसंगृहीता एवं ते, नाङ्गान्तरमित्यवगन्तव्यम्। तत्र सत्त्वासत्त्वसंख्यातस्य विषयस्य परिणामादात्मभावपरिणामाच्चैते भवन्ति। दौर्मनस्यसम्प्रयुक्तो वितर्कः शोकः। शोकसमुत्थितः प्रलापः परिदेवः। दुःखदौर्मनस्ये व्याख्याते। विच्छिन्नवेगं दौर्मनस्यमुपायासः। शोकपरिदेवपूर्वकः श्रम उपायास इत्यपरे।

कथं पुनः "अविद्याप्रत्ययाः संस्कारा यावत् जातिप्रत्ययं जरामरणम्" ( ) इति ? अभिसम्बन्धमात्रं दर्शयिष्यामः। बालो हि प्रतीत्यसमुत्पन्नं संस्कारमात्रमिदमिति अप्रजानन् आत्मदृष्ट्यस्मिमानाभिनिविष्ट आत्मनः सुखार्थमदुःखार्थं वा कायादिभिस्त्रिविधं कर्मारभते—आयतिसुखार्थं पुण्यम्, सुखादुःखासुखार्थमानिञ्ज्यम्, ऐहिकसुखार्थमपुण्यम्। तस्याविद्याप्रत्ययाः संस्काराः कर्माक्षेपवशाच्च विज्ञानसन्ततिस्तां तां गतिं गच्छति; ज्वालागमनयोगेनान्तराभवसम्बन्धात्। तदन्यसंस्काराप्रत्ययं विज्ञानम्। एवं च कृत्वा तदुपपन्नं भवति विज्ञानाङ्गनिर्देशे—"विज्ञानं कतमत्? षड्विज्ञानकायाः" ( ) इति।

बालो हीति विस्तरः। बालः पृथग्जनः। *संस्कारमात्रमिति*। मात्रग्रहणमात्मप्रतिषेधार्थम्। *अप्रजानन्निति*। आवेणिकीमविद्यां दर्शयति। *आत्मदृष्ट्यस्मिमानाभिनिविष्टः* प्रतिष्ठितः *कायादिभिः* कायवाङ्मनोभिस्त्रिविधं *कर्मारभते* पुण्यापुण्यानिञ्ज्यलक्षणमारभते। *आनिञ्ज्यमिति* इगिः प्रकृत्यन्तरम्, तस्यैवैतद्रूपम्। एजतेरेतद्रूपमानेञ्ज्यमिति वा पाठः। *आयतिसुखार्थं पुण्यमिति*। अनागतजन्मसुखार्थम्। किम्? कामावचरं कुशलं कर्म। *सुखादुःखासुखार्थमानिञ्ज्यमिति*। रूपारूप्यावचरं कुशलम्। सुखार्थमा तृतीयाद्ध्यानात्, तस्मादूर्ध्वमदुःखासुखार्थम्। *ऐहिकसुखार्थमिति*। इहसुखापेक्षया तत् कृतम्, नायतिसुखापेक्षयेत्यर्थः। *कर्माक्षेपवशाद्* यथोक्तं कर्मावेधवशात्। *तां तां* गतिं नरकादीनां *गच्छति*। *ज्वालागमनयोगेन*। यथा दीर्घा तृणानुषक्ता ज्वाला गच्छतीत्युच्यते, तथा विज्ञानसन्ततिभिरन्तराभवसम्बन्धादन्तराभवसम्बन्धेनातिविप्रकृष्टदेशामपि तां तां गतिं गच्छति। *एवञ्च कृत्वेति*। यदि संस्कारप्रत्ययमन्तराभवप्रतिसन्धिचित्तमुपादाय यावदुपपत्तिक्षणः, सर्वासौ विज्ञानसन्ततिः षण्णां विज्ञानकायानां संस्कारप्रत्ययं विज्ञानमभिप्रेतं *तदुपपन्नं भवति*। *विज्ञानाङ्गनिर्देशे*। विज्ञानाङ्गस्य तृतीयस्य निर्देशे। *"विज्ञानं कतमत्? षड्विज्ञानकायाः"* इति। अन्यथा हि यदि षण्णां विज्ञानकायानां सन्ततिर्नाभिप्रेता स्यात्, संस्कारप्रत्ययं विज्ञानं प्रतिसन्धिचित्तमेवाभिप्रेतं स्यात्, अत्र षड्विज्ञानकाया इति नोक्तं स्यात्। एवं तु वक्तव्यं स्यात्—'विज्ञानं कतमत्? मनोविज्ञानम्' इति। न हि प्रतिसन्धिक्षणे प्रतिविज्ञानकायसम्भवोऽस्ति; मनोविज्ञानेनैव प्रतिसन्धिबन्धात्। "छेदसन्धानवैराग्यहानिच्युत्युपपत्तयः, मनोविज्ञान एवेष्टाः" (अभि० को० ३.४२) इति वचनात्।

विज्ञानपूर्वकं पुनस्तस्यां तस्यां गतौ नामरूपं जायते पञ्चस्कन्धकं कृत्स्न-जन्मानुगतम्; विभङ्गे, महानिदानपर्याये चैवं निर्देशात्—"तथा नामरूप-परिपाकात् क्रमेण षडायतनम्। ततो विषयसम्प्राप्तौ सत्यां विज्ञानसम्भवः" (　　　　) इति। त्रयाणां सन्निपातः स्पर्शः सुखादिवेदनीयः। तत-स्त्रिविधा वेदना। ततस्तृष्णा। दुःखोत्पीडितस्य सुखायां वेदनायां कामतृष्णा। सुखायामदुःखासुखायां च रूपतृष्णा। अदुःखासुखायामारूप्यतृष्णा। तत इष्टवेदनातृष्णायाः कामादीनामुत्पादनम्।

तत्र कामाः पञ्च कामगुणाः। दृष्टयो द्वाषष्टिर्यथा ब्रह्मजालसूत्रे। शीलं दौःशील्यविरतिः। व्रतं कुक्कुरगोव्रतादीनि। यथा च निर्ग्रन्थादीनां नग्नो भवत्यचेलक इति विस्तरः। ब्राह्मण-पाशुपत-परिव्राजकादीनां च दण्डाजिन-भस्म-जटा-त्रिदण्डमौण्ड्यादिसमादानम्।

आत्मवादः पुनरात्मभावः। आत्मेति वादोऽस्मिन्नित्यात्मवादः। आत्म-

---

विभङ्ग एवं निर्देशादिति। प्रतीत्यसमुत्पादसूत्रे नामरूपविभङ्ग एवं निर्दे-शात्—"नाम कतमत्? चत्वारोऽरूपिणः स्कन्धा इति। रूपं कतमत्? यत्किञ्चिद्रूपमिति विस्तरेण। यावद्यच्चेदं रूपं यच्च नाम तदुभयं नामरूप-मित्युच्यते" इति। *कामतृष्णेति।* कामावचरी तृष्णा। *रूपतृष्णेति। या सुखायां* त्रिषु ध्यानेषु। *अदुःखासुखायां* चतुर्थे। *अदुःखासुखायामारूप्यतृष्णेति।* आरूप्या-वचरी। *कामादीनामुपादानमिति।* कामदृष्टिशीलव्रतात्मवादानामुपादान-मित्यर्थः। *पञ्च कामगुणा इति।* काम्यन्त इति कामाः, गुण्यन्त इति गुणाः, कामा एव गुणाः कामगुणाः। के पुनस्ते? रूपशब्दगन्धरसस्प्रष्टव्यानि।

दृष्टयो द्वाषष्टिर्यथा ब्रह्मजाल इति। ब्रह्मजालसूत्रदर्शनेन ता दृष्टयो बोद्धव्याः। *कुक्कुरगोव्रतादीनीति।* आदिशब्देन मृगव्रतादीनि गृह्यन्ते। *निर्ग्रन्थादीनामिति।* आदिशब्देन पाण्डरभिक्ष्वादीनां ग्रहणम्। *ब्राह्मणेत्यादि।* विस्तरः—ब्राह्मणानां *दण्डाजिनम्। पाशुपतानां जटाभस्म। परिव्राजकानां त्रिदण्डमौण्ड्यम्।* आदि-शब्दद्वयेन कापालिकादीनां कपालधारणादीनि गृह्यन्ते। *तत्समादानं* शीलव्रतो-पादानम्।

आत्मेतिवादोऽस्मिन्नित्यात्मवादः। यथोक्तम्—"ये केचिच्छ्रमणा ब्राह्मणा वा आत्मेति समनुपश्यन्तः, समनुपश्यन्ति सर्वे त इमानेव पञ्चोपादानस्कन्धान्"

दृष्ट्यस्मिमानावित्यपरे । कथमनयोरात्मवादत्वम् ? "आभ्यामात्मा" (   ) इति वचनात् । आत्मनो ह्यसत्त्वादात्मवादोपादानमित्युच्यते ; प्रज्ञप्तिमात्रकस्योपादानात्। यथोक्तम्—"आत्मा आत्मेति भिक्षवो बालोऽश्रुतवान् पृथग्जनः प्रज्ञप्तिमनुपतितः, न त्वत्रात्मा वा आत्मीयं वा" इति । तेषामुपादानं तेषु यश्छन्दरागः । एवं हि भगवता सर्वत्राख्यातम्—"उपादानं कतमत् ? योऽत्र च्छन्दरागः" (   ) इति । उपादानप्रत्ययं पुनः पौनर्भविकं कर्मोपचीयते । तद् भवः । "यदप्यानन्द कर्मायत्यां पुनर्भवाभिनिर्वर्तकमिदमत्र भवस्य" (   ) इति सूत्रात् । भवप्रत्ययं पुनर्विज्ञानावक्रान्तियोगेन । अनागतं जन्म जातिः पञ्चस्कन्धिका । जातौ सत्यां जरामरणम् । यथा निर्दिष्टं सूत्रे—"एवमस्य केवलस्य महतो दुःखस्कन्धस्य समुदयो भवति" (   ) इति । केवलस्येति, आत्मीयरहितस्य । महतो दुःखस्कन्धस्येति, अनाद्यन्तस्य दुःखसमूहस्य । समुदयो भवतीति प्रादुर्भावः । स एव तु वैभाषिकन्यायो यः पूर्वमुक्तः ॥

इति विस्तरः । *आत्मदृष्ट्यस्मिमानावित्यपरे* आत्मवादमाहुः । *आत्मनो ह्यसत्त्वादात्मवादोपादानमिति* । वादशब्दोपन्यासे प्रयोजनं दर्शयति । *बालोऽश्रुतवान् पृथग्जन इति* । यस्य पूर्वाभ्यासवासनानिर्जातोपपत्तिलाभिका प्रज्ञा नास्ति स बालः, यस्यागमजा नास्ति सोऽश्रुतवान्, यस्याधिगमजा सत्याभिसमयजा नास्ति स पृथग्जनः । *प्रज्ञप्तिमनुपतित इति* । यथा संज्ञा यथा च व्यवहारस्तथानुगत इत्यर्थः । *तेषामिति* । कामादीनाम् । *छन्दराग इति* । अप्राप्तेषु विषयेषु प्रार्थना छन्दः, प्राप्तेषु रागः । तेषु कामादिषु यश्छन्दरागस्तदुपादानम् । न तु "यथोक्ता एव सा विद्या द्विधा दृष्टिविवेचनात्, उपादानानि" (अभि० ५.३८) इत्यभिप्रायः । *पौनर्भविकमिति* । पुनर्भवफलम् । *इदमत्र भवस्येति* । इदमत्र भवस्य स्वलक्षणं स्वभाव इत्यर्थः । *विज्ञानावक्रान्तियोगेनेति* । ज्वालागमनयोगेनान्तराभवसम्बन्धाद् । *अनागतं जन्म जातिः पञ्चस्कन्धिका* नामरूपस्वभावत्वात् । *जरामरणं यथानिर्दिष्टं सूत्र इति* । "जरा कतमा ? यत्तत् खालित्यं पालित्यम्" इति विस्तरः। "मरणं कतमत्, या तेषां तेषां सत्त्वानां तस्मात्तस्माच्च्युतिश्च्यवनम्" इति विस्तरः। *केवलस्यात्मरहितस्येत्यर्थं* दर्शयति। *महत इत्यनाद्यन्तस्य। दुःखस्कन्धस्येति* । दुःखसमूहस्य । *स एव तु वैभाषिकन्यायो यः पूर्वमुक्त इति* । द्वादश पञ्चस्कन्धिका अवस्था द्वादशाङ्गानीति ।

अथाविद्येति कोऽर्थः ? या न विद्या । चक्षुरादिष्वपि प्रसङ्गः ? विद्याया अभावस्तर्हि । एवं सति न किंचित् स्यात् ? नचैतद् युक्तम् । तस्मात्—

विद्याविपक्षो धर्मोऽन्योऽविद्याऽमित्रानृतादिवत् ॥ २८ ॥

यथा मित्रविपर्ययेण तद्विपक्षः तः कश्चिदमित्रो भवति, न तु यः कश्चिदन्यो मित्रात्, नापि मित्राभावः । ऋतं चोच्यते सत्यम्, तद्विपक्षभूतं वाक्यमनृतं भवति । अधर्मानर्थाकार्यादयश्च धर्मादिमतिद्वन्द्वभूताः । एवमविद्यापि विद्यायाः प्रतिद्वन्द्वभूतधर्मान्तरमिति द्रष्टव्यम् ॥ २८ ॥

कुत एतत् ? प्रत्ययभावेनोपदेशात् । अपि च—

संयोजनादिवचनात्

संयोजनं बन्धनमनुशय ओघो योगश्चाविद्योच्यते सूत्रेषु । न चाभावमात्रं तथा भवितुमर्हति । न चापि चक्षुरादयः । तस्माद् धर्मान्तरमेवाविद्या ।

यथा तर्हि कुभार्या अभार्येत्युच्यते, कुपुत्रश्चापुत्रः, एवमविद्याऽप्यस्तु ?

कुप्रज्ञा चेन्न दर्शनात् ।

कुत्सिता हि प्रज्ञा क्लिष्टा । सा च दृष्टिस्वभावा इति नाविद्या युज्यते ।

या न विद्या । चक्षुरादिष्वपि प्रसङ्ग इति । चक्षुःश्रोत्रादीन्यविद्या प्रसज्यन्ते, तान्यपि हि न विद्येति कृत्वा । *न किञ्चित् स्यादिति* । यदि विद्याया अभावोऽविद्या, अद्रव्यं स्यादित्यर्थः । *न चैतद् युक्तमिति* । प्रत्यभावेनोपदेशात् । *तद्विपक्ष* इति । विरोधे नञिति दर्शयति । *न तु यः कश्चिदन्यो मित्रादिति* । न पर्युदासमात्र इति दर्शयति । *नापि मित्राभाव* इति । नाभावार्थ इति दर्शयति । *अधर्मानर्थाकार्यादयश्चेति* । आदिशब्देनायुक्तव्यवहारा मनुष्यादयो गृह्यन्ते । *धर्मादिप्रतिद्वन्द्वभूता* इति । धर्मार्थकार्ययुक्तिव्यवहारमनुष्यादिप्रतिद्वन्द्वभूताः । न तु ये केचिदन्ये धर्मादिभ्यश्चक्षुरादयः । *नापि धर्मादयभावः । एवमविद्यापीति* विस्तरः ॥ २८ ॥

कुत एतत्, प्रत्ययभावेनोपदेशात् । अविद्याप्रत्ययाः संस्कारा इति । न चाविद्याया अन्येषां चक्षुरादीनां प्रत्ययभावेनोपदेशो युक्तः; अर्हतां संस्काराऽसम्भवात् । न चाभावस्य; शशविषाणादीनां प्रत्ययत्वात् ।

संयोजनं यावद्योगश्चाविद्योच्यत इति । अविद्यासंयोजनं यावदविद्यायोग इति *सूत्रेष्वुच्यते । न चाभावमात्रं तथा भवितुमर्हतीति* । न संयोजनादि भवितुमर्हतीत्यर्थः । *न चापि चक्षुरादयः* । तथा भवितुमर्हन्तीत्यधिकृतम् । *सा च दृष्टिस्वभावेति नाविद्या युज्यत* इति । दृष्टयविद्ययोः संयोजनादित्वेन पृथक् पाठात् ।

या तर्हि न दृष्टिः सा भविष्यति ? सापि भवितुं नार्हति । किं कारणम् ?

दृष्टेस्तत्सम्प्रयुक्तत्वात्

अविद्या चेत् प्रज्ञाऽभविष्यन्न दृष्टिस्तया युज्यते सम्प्रायोक्ष्यत; द्वयोः प्रज्ञाद्रव्ययोरसम्प्रयोगात् ।

इतश्च—

प्रज्ञोपक्लेशदेशनात् ॥ २९ ॥

"रागोपक्लिष्टं चित्तं नावमुच्यते, अविद्योपक्लिष्टा प्रज्ञा न विशुध्यति" (   ) इत्युक्तं सूत्रे । न च सैव प्रज्ञा तस्याः प्रज्ञाया उपक्लेशो युक्त इति । यथा चित्तस्यान्यो भिन्नजातीय उपक्लेशो रागः, एवं प्रज्ञाया अविद्या । किं पुनरेवं नेष्यते ?

क्लिष्टया प्रज्ञया कुशला प्रज्ञा व्यवकीर्यमाणा न विशुध्यति, अतोऽसौ तस्या उपक्लेश इति । यद्यपि रागोपक्लिष्टं चित्तं न विमुच्यते । किं तदवश्यं रागपर्यवस्थितं भवति । उपहतं तु तत्तथा रागेण भवति यन्न विमुच्यते । तां भावनां[1] व्यावर्तयतो विमुच्यते ।

या तर्हि न दृष्टिरिति । या क्लिष्टा प्रज्ञा रागादिसम्प्रयुक्ता ।

"दृष्टेस्तत् सम्प्रयुक्तत्वात्" इति । अविद्यासम्प्रयुक्तत्वादित्यर्थः । कथञ्च दृष्टिरविद्यया सम्प्रयुक्ता ? यस्मादविद्यालक्षणो मोहः क्लेशमहाभूमौ पठ्यते, क्लेशमहाभूमिकाश्च सर्वेऽपि महाभूमिकैः सह सम्प्रयुज्यन्त इति दृष्टया सत्कायदृष्ट्यादिकया प्रज्ञास्वभावया अविद्या सम्प्रयुज्यत इति गम्यते । तस्मान्नाविद्या प्रज्ञा, *द्वयोः प्रज्ञाद्रव्ययोरसम्प्रयोगात्* ।

अविद्योपक्लिष्टा प्रज्ञा न विशुध्यतीति । एतदुदाहरणम् । येन विद्या प्रज्ञाया अर्थान्तरभूतेति । *न च सैव प्रज्ञा तस्याः प्रज्ञाया उपक्लेशो युक्त इति* । प्रज्ञोपक्लेशदेशनायां प्रज्ञाया अर्थान्तरभूता अविद्या; उपक्लेशत्वेन निर्दिष्टत्वात् । रागवत् । अत आह—*यथा चित्तस्यान्य* इति विस्तरः ।

व्यवकीर्यमाणा न विशुध्यतीति । अन्तरान्तरोत्पद्यमानाया क्लिष्टया प्रज्ञया व्यवकीर्यमाणा क्षणान्तरोत्पन्ना कुशला प्रज्ञा न विशुध्यतीत्यर्थः । *किं तदवश्यं रागपर्यवस्थितमिति* । रागसम्प्रयुक्तमित्यर्थः । *उपहतं तु तत्तथा रागेणेति* । समुदाचरता रागेण वासनाधानेन तदुपहतं भवति । *तां भावनां* तद् दौष्ठुल्यं

1. पुनर्भावनां—का० ।

एवमविद्योपहता[1] क्लिष्टा[1] प्रज्ञा न शुध्यतीत्यविद्योपहतां[2] परिकल्पयामः । को हि परिकल्पयन् वार्यते ! जात्यन्तरमेव त्वविद्यां वर्णयन्ति ।

योऽपि मन्यते—"सर्वक्लेशा अविद्या" इति, तस्याप्यत एव व्युदासः । सर्वक्लेशस्वभावा हि[3] सती संयोजनादिषु पृथग्नोच्येत, दृष्ट्या च न सम्प्रयुज्येत । अन्येन वा क्लेशेन दृष्ट्यादीनां परम्परासम्प्रयोगात् चित्तमपि चाविद्योपक्लिष्टमेवोक्तं भवेत् ।

अथ मतम्—विशेषणार्थं तथोक्तमिति ? प्रज्ञायामपि[4] विशेषणं[4] कर्त्तव्यं स्यात्[5] । भवत्वविद्या धर्मान्तरम्, कस्तु तस्याः स्वभावः ? सत्यवत्न कर्मफला-

---

व्यावर्त्तयतो योगिनस्तच्चित्तं विमुच्यते । एवमविद्योपहता क्लिष्टा प्रज्ञा न शुध्यतीति । अतः प्रज्ञा चाविद्या, न च दोष इति दर्शयति ।

को हि परिकल्पयन् वार्यत इति । परिकल्पनामात्रमेतदागमनिरपेक्षमिति कथयति ।

योऽपि मन्यते सर्वक्लेशाविद्येति । *भदन्तश्रीलाभः* एवं मन्यते—अविद्येति सर्वक्लेशानामियं सामान्यसंज्ञा, न रागादिक्लेशव्यतिरिक्ताऽविद्या नास्तीति । कस्मात् स एवं मन्यते ? बुद्धसूत्रात् । "न प्रजानाति न प्रजानातीत्यायुष्मन् महाकौष्ठिल, तस्मादविद्योच्यते" इति । सत्कायदृष्ट्यादयोऽपि क्लेशा अज्ञानस्वरूपा विपरीतग्रहणत इति । *तस्याप्यत एवेति* विस्तरः । तस्य *भदन्तस्यात एव* प्रतिषेधवचनाद् *व्युदासः*। प्रतिषेधस्तन्मतस्येत्यध्याहार्यम् । कथम् ? इत्याह—*सर्वक्लेशस्वभावा हि सती संयोजनादिषु पृथग् नोच्येत* । अनुशयसंयोजनादिष्वविद्यासंयोजनमिति पृथग् नोच्येत, शेषसंयोजनाव्यतिरेकात् । 'रागो बन्धनं द्वेषो बन्धनम्' इत्युक्त्वा मोहो बन्धनमिति, 'कामारागानुशयः' इत्याद्युक्त्वा अविद्यानुशय इति, ओघेष्वविद्योघ इति, योगेष्वविद्यायोग इति पृथग्नैवोच्यते; कस्मात् ? परस्परासम्प्रयोगात् । न हि दृष्टिर्दृष्ट्या संप्रयुज्यते, रागो वा रागेण । दृष्ट्यादिसम्प्रयुक्ता चाविद्योक्ता, क्लेशमहाभूमिकत्वेन महाभूमिकसम्प्रयोगनियमात् । *चित्तमपि चाविद्योपक्लिष्टमेवोक्तं भवेत्* । रागोपक्लिष्टं चित्तं न विमुच्यत इति नोक्तं भवेत्; अविद्योपक्लिष्टत्ववचनेनैव रागाद्युपक्लिष्टत्वसिद्धेः ।

अथ मतम्—विशेषणार्थं तथोक्तमिति । रागलक्षणयाविद्ययोपक्लिष्टचित्तं न विमुच्यत इति । *प्रज्ञायामपि विशेषणं कर्त्तव्यं स्यात्* । रागेण प्रतिघेन मानेन

१–१. ०पक्लिष्टा—का० । २. विशुध्यती०—का० । ३. अपि—का० ।
४–४. मप्यविद्याविशेषणं—का० । ५. भवेत्—का० ।

नामसम्प्रख्यानम् ।

एतच्चैव न ज्ञायते किमिदमसम्प्रख्यानं नामेति ?

यदि यन्न सम्प्रख्यानम् ? सम्प्रख्यानाभावेऽपि तथैव दोषो यथा अविद्यायाम् ।

अथ सम्प्रख्यानविपक्षभूतं धर्मान्तरम् ? तदिदं तथैव न ज्ञायते किं तदिति ।

एवञ्जातीयकोऽपि धर्माणां निर्देशो भवति, तद्यथा—"चक्षुः कतमत् ? यो रूपप्रसादश्चक्षुर्विज्ञानस्याश्रयः" (   ) इति ॥

अस्मीति सत्त्वमयताऽविद्येति भदन्तधर्मत्रातः । का पुनरस्मिमानादन्या मयता ? याऽसौ सूत्र उक्ता—"सोऽहमेवं ज्ञात्वा एवं दृष्ट्वा सर्वासां तृष्णानां सर्वासां दृष्टीनां सर्वासां मयतानां सर्वेषामहङ्कारममकारास्मिमानाभिनिवेशानुशयानां प्रहाणात् परिज्ञानान्निरुछायो निर्वृतः" (   ) इति ।

अस्त्येषा मयता, सा त्वियमविद्येति कुत एतत् ?

वेति, मा भूत् सर्वक्लेशग्रहणप्रसङ्ग इति। इष्ट इति चेत् ? चित्तेऽपि न विशेषणं कर्त्तव्यं स्यात्। अविद्योपक्लिष्टं चित्तं न विमुच्यत इत्येवमेव तु वक्तव्यं स्यात्।

सम्प्रख्यानम् । प्रज्ञानमित्येकोऽर्थः। *तथैव दोषो यथाविद्यायामिति* । अथा-*सम्प्रख्यानमिति* कोऽर्थः ? यन्न संप्रख्यानम्। चक्षुरादिष्वपि प्रसङ्गः। सम्प्रख्याना-भावस्तर्हि ? एवं सति न किञ्चित् स्यात्। न चैतद् युक्तमिति। *अथ सम्प्रख्यान-विपक्षभूतं धर्मान्तरम्। तदिदं तथैव न ज्ञायते* यथैवाविद्या, *किं तदिति*।

एवञ्जातीयकोऽपीति विस्तरः। एवञ्जातीयकः, कर्मप्रभावित इत्यर्थः। तस्मादविद्यायाः कर्मणा कारित्रेण स्वभावो विज्ञातव्यः—अस्त्यसौ कश्चिद्धर्मो यो विद्याविपक्ष इति। विद्याविपक्षत्वं तस्याः कर्मेति। *तद्यथा चक्षुः कतमत् ? यो रूपप्रसादश्चक्षुर्विज्ञानस्याश्रय* इति। ननु च रूपप्रसाद इति स्वभावप्रभावि-तोऽस्य निर्देश इति ? न; अप्रत्यक्षत्वान्नित्यं चक्षुर्विज्ञानमेयत्वाच्च।

अस्मीति सत्त्वमयतेति। अविज्ञातार्थमेतत्। न तेन *स्थविरेणास्याभिधेय*-मवधारितम्। मयता पुनः *सौत्रान्तिकै*रविद्या प्रकारभिन्ना वर्ण्यते, मानो वा। *यासौ सूत्र उक्तेति* विस्तरः। मयतानामित्यविद्यानां प्रकारभिन्नानां नामेति ग्रहणम्। तृष्णादीनां पृथगुपदेशादिति *भदन्तधर्मत्रातस्याभिप्रायः*। *आचार्य* आह—*अस्त्येषा मयता*, अस्ति सूत्रे उक्ता मयता, तत्र जातिनिर्देशादेकवचनम्, *सा त्वविद्येति*। *कुतः* कारणादेतत् परिच्छिद्यते—*साविद्येति ? भदन्तधर्मत्रातः*

यत एषा नान्यः क्लेशः शक्यते वक्तुम् ।

ननु चान्यो मान एव स्यात् । अत्र तु[1] पुनर्विचार्यमाणे बहु वक्तव्यं जायते । तस्मात् तिष्ठत्वेतत् ॥ २९ ॥

अथ नामरूपमिति कोऽर्थः ? रूपं विस्तरेणोक्तम्[2] ।

नाम त्वरूपिणः स्कन्धाः

किं कारणम् ? नामेन्द्रियार्थवशेनार्थेषु नमतीति नाम ।

कतमस्य नाम्नो वशेन ? यदिदं लोके प्रतीतं तेषां तेषामर्थानां प्रत्यायकम्—गौः, अश्वः, रूपम्, रस इत्येवमादि ।

स्वाभिप्रायं विवृणोति—*यत एषा नान्यः क्लेशः शक्यते वक्तुमिति* । कस्मान्न शक्यते ? तृष्णादृष्ट्यस्मिमानानां पृथगुक्तेः ।

आचार्य आह—*ननु चान्यो मान एव स्यादिति* । अस्मिमानादन्यः षण्णामन्यतमः । स च मयता, नाविद्येत्यभिप्रायः । *अत्र तु पुनर्विचार्यमाणे बहु वक्तव्यं जायत* इति । अत्र पुनर्विचार्यमाणेऽविद्याङ्गे बहुरयं ग्रन्थो जायते, यथोक्तमिति । *तस्मात्तिष्ठत्वेतत्* । एतावदेवास्त्विति । अथवा—अन्यो मान एव स्यात्, न पुनरविद्येति, कुत एतदित्येवमादिके पुनर्विचारे क्रियमाणे उत्तरप्रत्युत्तरवचनेन बहु वक्तव्यं जायते । तस्मात्तिष्ठत्वेतदलं विचारान्तरेणेत्यर्थः ॥ २९ ॥

अथ नामरूपमिति । अविद्याङ्गनिर्देशानन्तरं संस्काराङ्गं निर्देष्टव्यम् । तदनु-विज्ञानाङ्गम्, किमित्येतदतिक्रम्योपन्यस्यते ? एतदर्थमत्र वक्ष्यत्याचार्यः—"उक्तं च वक्ष्यते चान्यत्" (अभि० ३.३६) इति ।

रूपं विस्तरेणोक्तमिति । "रूपं पञ्चेन्द्रियाण्यर्थाः पञ्चाविज्ञप्तिरेव च" (अभि० को० १.९) इत्यत्र । *नामेन्द्रियार्थवशेनेति* विस्तरः । नामवशेन इन्द्रियवशेन अर्थवशेन चार्थेषु रूपादिषु *नमतीति नाम* । *कतमस्य नाम्नो वशेनेति* । नामद्वैविध्यात् पृच्छति । *आचार्यस्त्वाचष्टे—यदिदं लोके प्रतीतमिति* विस्तरः । *गौरश्व* इति, समुदायप्रत्यायकम् । रूपं रस इति, एकार्थप्रत्यायकम् । तदेतद् वेदनादिस्कन्धचतुष्कं नामशब्देनोच्यते । यस्मात्तन्नामवशेन संज्ञाकरण-वशेनार्थेष्वप्रत्यक्षेषु प्रत्यक्षेष्वपि वा नमति प्रवर्त्तते—अस्य नाम्नोऽयमर्थ इति । इन्द्रियार्थवशेन तु प्रत्यक्षेषु रूपादिषु नमति, उत्पद्यत इत्यर्थः । नाम्नि वाच्यार्थ-

---

१. का० पुस्तके नास्ति ।

२. विस्तरेण यथोक्तम्—का० ।

एतस्य पुनः केन नामत्वम् ? तेषु तेष्वर्थेषु तस्य नाम्नो नमनात् ।
इह निक्षिप्ते काय उपपत्त्यन्तरे नमनान्नामारूपिणः स्कन्धा इत्यपरे ॥

षडायतनमुक्तम् ॥

स्पर्शो वक्तव्यः ?

स्पर्शाः षट्

चक्षुःसंस्पर्शः, यावन्मनःसंस्पर्श इति । ते पुनः—

सन्निपातजाः ।

त्रयाणां सन्निपाताज्जाता इन्द्रियार्थविज्ञानानाम् । युक्तं तावत् पञ्चाना-मिन्द्रियाणामर्थविज्ञानाभ्यां सन्निपातः; सहजत्वात् ।

मनइन्द्रियस्य पुनर्निरुद्धस्यानागतवर्त्तमानाभ्यां धर्ममनोविज्ञानाभ्यां कथं सन्निपातः ? अयमेव तेषां सन्निपातो यः कार्यकारणभावः । एककार्यार्थो वा सन्निपातार्थः । सर्वे च ते त्रयोऽपि स्पर्शोत्पत्तौ प्रगुणा भवन्तीति ।

वशेन नमति—अस्यार्थस्येदं नामेति । *एतस्य पुनः केन नामत्वमिति ।* एतस्य संज्ञाकरणलक्षणस्य नाम्नः केन कारणेन नामत्वम् । *तेषु तेष्वर्थेषु तस्य नाम्नो नमनादिति ।* यस्मात्तेष्वर्थेषु चतुस्कन्धलक्षणं नाम, तन्नाम नमयति प्रवर्त्तयति, तस्मात् एतस्य नामत्वम्, नमयतीति नामेति कृत्वा । *इह निक्षिप्त* इति विस्तरः । मरणकाले निक्षिप्ते *काय उपपत्त्यन्तरे नमनाद्* गमनादरूपिणो वेदनादयः *स्कन्धा नामेच्युच्यन्ते ।* यथोक्तम्—मृतस्य खलु कालं गतस्य ज्ञातय इमं पूतिकायमग्निना वा दहन्ति, उदके वा प्लावयन्ति, भूमौ वा निखनन्ति, वातातपाभ्यां वा परिशोषं परिक्षयं पर्यादानं गच्छति । यत्पुनरिदमुच्यते—चित्तमिति वा मन इति वा विज्ञानमिति वा श्रद्धापरिभावितं तदूर्ध्वगामि भवति, विशेषगाम्यायत्यां स्वर्गोपगमिति ।

षडायतनमुक्तमिति । "तद्विज्ञानाश्रया रूपप्रसादाश्चक्षुरादयः" (अभि० १.९), "विज्ञानं प्रतिविज्ञप्तिर्मनआयतनं च तत्" (अभि० को० १.१६) इत्यत्र । *मनइन्द्रियस्य पुनर्निरुद्धस्यानागतेन धर्मेण* रूपादिनोत्पत्स्यमानेन *वर्त्तमानेन मनोविज्ञानेन कथं सन्निपातः । यः कार्यकारणभावः ।* कार्यं मनोविज्ञानम्, कारणं मनइन्द्रियम्, धर्मश्च रूपादिः । *एककार्यार्थो वेति ।* एककार्यमेवार्थ एककार्यार्थः, एककार्यत्वमित्यर्थः । कथमेककार्यार्थः ? इत्याह—*सर्वे च ते त्रयोऽपि* मनइन्द्रियादयः *स्पर्शोत्पत्तौ प्रगुणा* अनुकूला *भवन्तीति ।*

अत्र पुनराचार्याणां भेदं गता बुद्धयः ।

केचिद्धि सङ्गतिपातमेव स्पर्शं व्याचक्षते । सूत्रं चात्र ज्ञापकमानयन्ति—"इति य एषां त्रयाणां धर्माणां सङ्गतिः सन्निपातः समवायः स स्पर्शः" (　　　) इति ।

केचित् पुनश्चित्तसम्प्रयुक्तं धर्मान्तरमेव स्पर्शं व्याचक्षते, सूत्रं चात्र ज्ञापकमानयन्ति—"षट्षट्को धर्मपर्यायः कतमः ? षडाध्यात्मिकान्यायतनानि, षट् बाह्यान्यायतनानि, षट् विज्ञानकायाः, षट् स्पर्शकायाः, षट् वेदनाकायाः, षट् तृष्णाकायाः" (　　　) इति । अत्र हीन्द्रियार्थविज्ञानेभ्यः स्पर्शकायाः पृथग् देशिताः ।

तत्र ये सन्निपातमेव स्पर्शमाहुस्त एवं परिहारमाहुः—न वै पृथग्निर्देशात् पृथग्भावो भवति । मा भूद्धर्मायतनाद्वेदनातृष्णयोः पृथग्भाव इति । नैष दोषः; तद्व्यतिरिक्तस्यापि धर्मायतनस्य भावात् । न चैवं स्पर्शभूतात् त्रयादन्यत् त्रयमस्ति, यस्य शेषस्यात्र ग्रहणं स्यात् ।

षट्षट्को धर्मपर्याय इति । षट् षट्कान्यस्मिन्निति षट्षट्कः । *आध्यात्मिकबाह्यविज्ञानस्पर्शवेदनातृष्णाषट्कसम्भवात् । षट्स्पर्शकाया* इति ज्ञापकम् । अनन्यत्वे हि सतीन्द्रियार्थविज्ञानेषूक्तेषु स्पर्शकायवचनं पुनरुक्तं स्यात् । ततश्च षट्षट्कत्वं हीयते ।

मा भूद् धर्मायतनाद्वेदनातृष्णयोः पृथग्भाव इति । यदि पृथङ्निर्देशात् पृथग्भावो भवेत्, वेदनातृष्णे अपि धर्मायतनात् पृथङ्निर्दिष्टे, तयोरपि वेदनातृष्णयोर्धर्मायतनात् पृथग्भावः स्यात् । न च तयोः पृथग्भावः इष्यते; धर्मायतनान्तर्भावात् । नैष दोष इति विस्तरः । नैष दोष इति यथोक्तः । *तद्व्यतिरिक्तस्यापि* वेदनातृष्णाव्यतिरिक्तस्यापि *धर्मायतनस्य* तज्ञादिस्वभावस्य *भावा*दस्तित्वात् । *न चैवमि*ति विस्तरः । न चैवं भवतः 'त्रयाणां सन्निपातः स्पर्शः' इत्येवं ब्रुवाणस्य, *स्पर्शभूता*दिन्द्रियार्थविज्ञानत्र*यादन्य*दस्पर्शभूतं　त्रयमिन्द्रियार्थविज्ञान*त्रयमस्ति, यस्य शेषस्यात्र* सूत्रे *ग्रहणं स्यात्* । 'षट् स्पर्शकायाः' इति प्रयोजनवशादपृथग्भावेऽपि स्पर्शभूतात् त्रयात् । तस्मादपृथग्भावेऽपि वेदनातृष्णयोः पृथङ्निर्देशो युक्तः; विनेयकार्यवशात् । न तु भवतः सन्निपातमात्रस्पर्शवादिनः केनचिदपि प्रयोजनेन 'षट् स्पर्शकायाः' इति पृथङ्निर्देशो युक्तः; यस्मात् 'षट् स्पर्शकायाः' इति वचनेनेन्द्रियार्थविज्ञानत्रयमुक्तमिति तद्वचनं प्राप्तमित्यतः 'षट्षट्को धर्मपर्यायः' इति न सिध्येत् । मम तु सिध्यति; स्पर्शवेदनातृष्णाषट्कवचनेऽपि तद्व्यति-

यद्यपीन्द्रियार्थौ[1] स्यातामविज्ञानकौ, न तु पुनर्विज्ञानमनिन्द्रियार्थकम्। तस्मात्त्रिषु निर्दिष्टेषु पुनः स्पर्शग्रहणमनर्थकं[2] प्राप्नोति।

न खलु सर्वे चक्षूरूपे सर्वस्य चक्षुर्विज्ञानस्य कारणम्, नापि सर्वं चक्षुर्विज्ञानं पूर्वयोश्चक्षूरूपयोः कार्यम्। अतो येषां कार्यकारणभावस्ते स्पर्शभावेन[3] व्यवस्थिता[4] इत्येके।

ये पुनः सन्निपातादन्यं स्पर्शमाहुः, त एतत् सूत्रं कथं परिहरन्ति—"इति य एषां त्रयाणां सङ्गतिः सन्निपातः समवायः स स्पर्शः" इति ? न वा एवं पठन्ति। किं तर्हि ? "सङ्गतेः सन्निपातात् समवायात्" इति पठन्ति। कारणे वा कार्योपचारोऽयमिति ब्रुवन्ति।

रिक्तधर्मायतनाद्यर्थेन्द्रियविज्ञानषट्कसम्भवात्। तस्मात् 'षट् स्पर्शकायाः' इति पृथङ्निर्देशाद् 'अस्ति चित्तसम्प्रयुक्तं स्पर्शाख्यं धर्मान्तरम्' इति सिद्धम्।

अथ ब्रूयादसौ—इन्द्रियार्थावविज्ञानकौ निर्दिष्टावस्मिन् सूत्रे, षडाध्यात्मिकानि, षड् बाह्यानीति वचनात्; अत इन्द्रियविषयविज्ञानत्रयं स्पर्शभूतमित्यस्य शेषस्य ज्ञापनार्थमत्र ग्रहणं स्यात्—षट् स्पर्शकाया इति ? अस्य समाधेः प्रतिषेधार्थमिदमारभ्यते—*यद्यपीन्द्रियार्थौ स्यातामविज्ञानकौ*। तत्सभागावित्यर्थः। *न तु पुनर्विज्ञानमनिन्द्रियार्थकम्*। अवश्यं हि विज्ञानं सेन्द्रियार्थकं भवति। तच्च विज्ञानमपदिष्टमत्र—षड्विज्ञानकाया इति। *तस्मात्त्रिषु निर्दिष्टेषु* इन्द्रियार्थविज्ञानेषु षड्विज्ञानकायवचनेन *पुनः स्पर्शग्रहणमनर्थकं प्राप्नोति*—षट् स्पर्शकाया इति। अतः 'सन्निपातादन्यः स्पर्शः' इति सिद्धम्।

अत्र *भदन्तश्रीलाभ* आह—*न खल्विति* विस्तरः। पूर्वोत्पन्ने चक्षूरूपे *कारणम्*, न तु विज्ञानसहोत्पन्ने। *नापि सर्वचक्षुर्विज्ञानमिति*। पश्चादुत्पन्नं पूर्वयोश्चक्षूरूपयोर्न सहोत्पन्नयोः। *अतो येषां कार्यकारणभावस्ते* विज्ञानेन्द्रियविषयाः *स्पर्शभावेन व्यवस्थिताः*, 'षट् स्पर्शकायाः' इत्यस्मिन् सूत्रे, तदिदमन्यथा न ज्ञापितं स्यात्।

न वा एवं पठन्ति। वै इति निपातः। न वै एवं पठन्तीत्यर्थः। कथं पुनः पठन्ति ? "य एषां धर्माणां संगतिः सन्निपातः समवायः स स्पर्शः" इति पठन्ति। *कारणे वा कार्योपचारोऽयमिति*। सङ्गतौ सन्निपाते समवाये कारणे कार्योपचारः स्पर्श इति। यथा—'सुखो बुद्धानामुत्पादः' इति।

---

१. यद्यपि हीन्द्रिया०—का०। २. स्पर्शस्य ग्रहण०—का०।
३. स्पर्शभावे—का०। ४. व्यवस्थापिता—का०।

अतिबहुविस्तरप्रकारविसारिणी[1] त्वेषा कथेत्यलं प्रसङ्गेन ।
अन्यमेव स्पर्शं वर्णयन्त्याभिधार्मिकाः ॥

तेषां पुनः षण्णां स्पर्शानाम्—

पञ्च प्रतिघसंस्पर्शाः षष्ठोऽधिवचनाह्वयः ॥ ३० ॥

चक्षुःश्रोत्रघ्राणजिह्वाकायसंस्पर्शाः **पञ्च प्रतिघसंस्पर्श** इत्युच्यते ; सप्रतिघेन्द्रियाश्रयत्वात् । मनःसंस्पर्शः **षष्ठः** सोऽधिवचनस्पर्श इत्युच्यते ।

किं कारणम्—अधिवचनमुच्यते नाम । तत्किलास्याधिकमालम्बनम्, अतोऽधिवचनं[2] संस्पर्श[2] इति । यथोक्तम्—"चक्षुर्विज्ञानेन नीलं विजानाति नो तु नीलम्, मनोविज्ञानेन नीलं विजानाति नीलमिति च विजानाति" (   ) इति । एक आश्रयप्रभावितः, द्वितीय आलम्बनप्रभावितः ।

अपरे पुनराहुः—वचनमधिकृत्यार्थेषु मनोविज्ञानस्य प्रवृत्तिः, न पञ्चानाम् । अतस्तदेवाधिवचनम् । तेन सम्प्रयुक्तः स्पर्शोऽधिवचनसंस्पर्श इति । एक आश्रयप्रभावितः, द्वितीयः सम्प्रयोगप्रभावितः ॥ ३० ॥

अतिबहुविस्तरेण प्रकारेण विसर्तुं शीलमस्या इति *अतिबहुविस्तरप्रकारविसारिणी* ।

अधिवचनमुच्यते नामेति । अध्युच्यतेऽनेनेत्यधिवचनम् । वाङ्नाम्नि प्रवर्तते, नामार्थं द्योतयति इत्यधिवचनं नाम । *तत् किल* । नामार्थं । मनोविज्ञानसम्प्रयुक्तस्याधिकं बाहुल्येनालम्बनम् । *अतोऽधिवचनं संस्पर्श* इति । स्पर्शः संस्पर्श इत्येकोऽर्थः । *मनोविज्ञानेन नीलं विजानातीति* । अभिधेयं विजानातीत्यर्थः । *नीलमिति च विजानातीति* । अस्यार्थस्येदं नामेति विजानाति । *एक आश्रयप्रभावित* इति । प्रथम आश्रयेण प्रभावितः प्रतिघाश्रयः संस्पर्शः, प्रतिघस्य वा संस्पर्शः *प्रतिघसंस्पर्शः* । *आलम्बनप्रभावित* इति । अधिवचनादालम्बनसंस्पर्शः, अधिवचने वा संस्पर्शः अधिवचनसंस्पर्श इति ।

वचनमधिकृत्येति । वचनमवधार्य । अर्थेषु रूपादिषु *मनोविज्ञानस्य प्रवृत्तिः* । *न पञ्चानां* चक्षुर्विज्ञानादीनां वचनमधिकृत्यार्थेषु प्रवृत्तिः । *अतस्तदेवाधिवचनं* मनोविज्ञानं वचने प्रवर्ततेऽधिवचनमिति । *तेन सम्प्रयुक्त*स्तस्य वा संस्पर्शस्या*धिवचनसंस्पर्शः* । तेन चायं *द्वितीयः* संस्पर्शः *सम्प्रयोगप्रभावित* इत्युच्यते ॥ ३० ॥

---

१. ०विस्तरप्रसारिणी—का० ।

२–२. ०वचनसंस्पर्शः—का० ।

पुनस्त एव षट् स्पर्शास्त्रयो भवन्ति—

विद्याविद्येतरस्पर्शाः,

विद्यासंस्पर्शः, अविद्यासंस्पर्शः, ताभ्यां चान्यो नैवविद्यानाविद्यासंस्पर्श इति।

एते पुनर्यथाक्रमं वेदितव्याः—

अमलक्लिष्टशेषिताः।

अनास्रवः स्पर्शो विद्यासंस्पर्शः, क्लिष्टोऽविद्यासंस्पर्शः; विद्याऽविद्याभ्यां सम्प्रयुक्तत्वात्। शेषो नैवविद्यानाविद्यासंस्पर्शः; उभाभ्यामसम्प्रयोगात्।

कः पुन शेषः? कुशलसास्रवोऽनिवृताव्याकृतश्च।

पुनरविद्यासंम्पर्शस्याभीक्ष्णसमुदाचारिण एकदेशस्य ग्रहणाद् द्वौ स्पर्शौ भवतः—

व्यापादानुनयस्पर्शौ

व्यापादानुनयाभ्यां सम्प्रयोगात्। पुनः सर्वसंग्रहेण—

सुखवेद्यादयस्त्रयः ॥ ३१ ॥

सुखवेदनीयः स्पर्शः, दुःखवेदनीयः, अदुःखासुखवेदनीयश्च; सुखवेदनाद्विहितत्वात्।

अथ वा—वेद्यते तद्, वेदयितुं वा शक्यमिति वेदनीयम्। किं तत्? वेदि-•

"विद्याविद्येतरस्पर्शाः" इति। विद्या अविद्या इतरश्च विद्याविद्येतरे, त एव स्पर्शा विद्याविद्येतरस्पर्शाः। विद्या चाविद्या चेति, विद्याह्वः अविद्याह्वः, ताभ्यामितरश्चेत्यर्थः। *विद्येत्यनास्रवा प्रज्ञा*। *अविद्या* क्लिष्टमज्ञानम्। *नैवविद्यानाविद्या* कुशलसास्रवा प्रज्ञा, तत्सम्प्रयुक्ता एते यथाक्रमं संस्पर्शा वेदितव्याः।

पुनरविद्यासंस्पर्शस्येति विस्तरः। अविद्यासंस्पर्शस्य सर्वक्लेशसम्प्रयुक्तस्य *अभीक्ष्णसमुदाचारी* नित्यसमुदाचारी *एकदेशः, तस्य ग्रहणाद् द्वौ स्पर्शौ भवतः—"व्यापादानुनयस्पर्शौ*।

सुखवेद्यादयस्त्रयः" इति। सुखस्य वेदः, सुखेवेदे साधुः सुखवेद्यः, सुखं वा वेद्यमस्मिन्निति सुखवेदनादौ हितः सुखवेदनीयः, "प्राक्क्रीताच्छः" (पा० सू० ५.१.१)। *वेद्यते तद्वेदयितुं वा शक्यमिति*। वेद्यत इति कर्ममात्रे कृत्य इति दर्शयति। वेदयितुं शक्यमिति—"अर्हे कृत्यतृचश्च"

तम् । सुखं वेदनीयमस्मिन्निति सुखवेदनीयः स्पर्शो यत्र सुखं वेदितमस्ति । एवं दुःखादुःखासुखवेदनीयावपि योज्यौ ।

त एते षोडश स्पर्शा भवन्ति ॥ ३१ ॥

उक्तः स्पर्शः ॥

वेदना वक्तव्या । तत्र यः पूर्वं षड्विधः स्पर्श उक्तः—

तज्जाः षड्वेदनाः,

चक्षुःसंस्पर्शजा वेदना, श्रोत्र-घ्राण-जिह्वा-काय-मनःसंस्पर्शजा वेदनाः ।

तासां पुनः—

पञ्च कायिकी चैतसी परा ।

चक्षुःश्रोत्रघ्राणजिह्वाकायसंस्पर्शजाः पञ्च वेदनाः कायिकी वेदनेत्युच्यते; रूपीन्द्रियाश्रितत्वात् । मनःसंस्पर्शजा पुनर्वेदना चैतसिकीत्युच्यते; चित्तमात्राश्रितत्वात् ।

अथ किं स्पर्शादुत्तरकालं वेदना भवति, आहोस्वित् समानकालम् ?

समानकालमिति **वैभाषिकाः;** अन्योन्यं सहभूहेतुत्वात् ।

कथं सहोत्पन्नयोर्जन्यजनकभावः सिध्यति ?

कथं च न सिध्यति ?

असामर्थ्यात् । जाते हि धर्मे धर्मस्य नास्ति सामर्थ्यं प्रतिज्ञाऽविशिष्टम् ?

(पा० सू० ३.३.१६९) इत्यस्मिन्नर्थे कृत्य इति दर्शयति ।

त एते षोडशेति । चक्षुःसंस्पर्शो यावन्मनःसंस्पर्श इति षट् । पुनः—प्रतिघसंस्पर्शः, अधिवचनसंस्पर्शः, विद्यासंस्पर्शः, अविद्यासंस्पर्शः, नैवविद्यानाविद्यासंस्पर्शः, व्यापादसंस्पर्शः, अनुनयसंस्पर्शः, सुखवेदनीयः, दुःखवेदनीयः, अदुःखासुखवेदनीयश्च स्पर्श इति षोडश ॥ ३१ ॥

उक्तः स्पर्शः । वेदना वक्तव्येति । ननु च वेदनाप्युक्ता "वेदनानुभवः" (अभि० १.१४) इति । अन्यथोक्तमप्युच्यते, न तर्हीदं वक्तव्यम्—यच्चोक्तं यच्च वक्ष्यमाणम्, तत्र वक्ष्यामीति । "उक्तं च वक्ष्यते चान्यत्" इति (अभि० को० ३.३६) वचनात् ? प्रकारनिर्देशाददोषः । पूर्वं लक्षणमुक्तम्, इदानीं प्रकार इति ।

जाते हीति विस्तरः । जाते हि जन्ये धर्मे धर्मस्य जनकस्य नास्ति सामर्थ्यं सहोत्पन्नत्वात् । *प्रतिज्ञाविशिष्टमिति ।* प्रतिज्ञाया अविशिष्टमेतत् साधनमित्यर्थः,

यदेव हीदं सहोत्पन्नयोर्जन्यजनकभावो नास्तीति तदेवेदं जाते धर्मे धर्मस्य नास्तीति ।

अन्योन्यजनकप्रसङ्गात्तर्हि ?

इष्टत्वाददोषः । इष्टमेव हि सहभूहेतोरन्योन्यफलत्वम् ।

इष्टमिदम्, सूत्रे त्वनिष्टं स्पर्शवेदनयोरन्योन्यफलत्वम्; "चक्षुःसंस्पर्शं प्रतीत्य उत्पद्यते चक्षुःसंस्पर्शजा वेदना, न तु चक्षुःसंस्पर्शजां वेदनां प्रतीत्योत्पद्यते चक्षुःसंस्पर्शः" इति वचनात् ।

जनकधर्मातिक्रमाच्चायुक्तम् । यो हि धर्मो यस्य धर्मस्य जनकः प्रसिद्धः, स तस्मात् भिन्नकालः प्रसिद्धः । तद्यथा—पूर्वं बीजं पश्चादङ्कुरः, पूर्वं क्षीरं पश्चाद्दधि, पूर्वमभिघातः पश्चाच्छब्दः, पूर्वं मनः पश्चात् मनोविज्ञानमित्येवमादि ।

अन्यथा परम्परापेक्षत्वात् कार्यकारणयोः सर्वं वा युगपदुत्पद्यते, न वा कदाचित्; पश्चाद्विशेषाभावात् ।

नहि न सिद्धः कार्यकारणयोः पूर्वापरभावः ।

सहभावोऽपि तु सिद्धः । तद्यथा चक्षुर्विज्ञानादीनां चक्षूरूपादिभिर्भूत-भौतिकानां च तत्रापि पूर्वमिन्द्रियार्थौ पश्चाद्विज्ञानम् । पूर्वकाच्च भूतभौतिकसमुदायादुत्तर उत्पद्यत इतीष्यमाणे कः प्रतिषेधः ।

यदि प्रतिज्ञाविशिष्टं साधनं नेष्यते । *अन्योन्यजनकप्रसङ्गात्तर्हि* । किम्? कथं सहोत्पन्नयोर्जन्यजनकभावः सिध्यतीत्यधिकृतम् । अनेन प्रतिज्ञादोष उद्ग्राह्यते—अस्ति सहोत्पन्नयोर्जन्यजनकभाव इति प्रतिज्ञा पूर्वाभ्युपगमविरोधिनीति ।

इष्टत्वाददोष इति । पूर्वाभ्युपगमं दर्शयति ।

इष्टमिदं सूत्रे त्वनिष्टमिति । इष्टमिदमभिधर्मे—"सहभूर्ये मिथःफलाः" (अभि० को० २.५०) इति । सूत्रे त्वनिष्टम् । तत् प्रतिपादयन्नाह—*चक्षुःसंस्पर्शं प्रतीत्योत्पद्यते चक्षुःसंस्पर्शजा वेदेनेति* । सूत्रप्रामाण्येनान्योन्यफलत्वं भङ्क्त्वा सहोत्पन्नकार्यकारणभावविभंक्षया आह–*जनकधर्मातिक्रमाच्चायुक्तमिति*। जनकस्यायं धर्मः प्रसिद्धो या भिन्नकालता, *तद्यथा पूर्वं बीजं पश्चादङ्कुर इत्यादि* ।

तत्रापि पूर्वमिन्द्रियार्थौ पश्चाद् विज्ञानमिति । प्रथमक्षणोत्पन्नाविन्द्रियार्थौ, विज्ञानं तु द्वितीये क्षण इति ।

यथा तर्हि च्छायाङ्कुरयोरेवं स्पर्शवेदनयोपीति वैभाषिकाः ।

स्पर्शादुत्तरकालं वेदनेत्यपरे । इन्द्रियार्थो हि पूर्वान्तो विज्ञानम् । सोऽसौ त्रयाणां सन्निपातः स्पर्शः, स्पर्शप्रत्ययात् पश्चाद्वेदना तृतीये[1] क्षण[1] इति ।

एवं तर्हि न सर्वत्र विज्ञाने वेदना प्राप्नोति, न च सर्वविज्ञानं[2] स्पर्शः ?

नैष दोषः; पूर्वस्पर्शहेतुका ह्युत्तरत्र स्पर्शे वेदना, सर्वे च स्पर्शाः सवेदनकाः[3], सर्वं च विज्ञानं स्पर्श इति ।

इदमयुक्तं वर्त्तते ।

किमत्रायुक्तम् ?

यदुत भिन्नालम्बनयोरपि स्पर्शवेदनयोः पूर्वस्पर्शहेतुकोत्तरत्र[4] वेदनेति ।

कथं हि नामान्यजातीयालम्बनस्पर्शसम्भूता वेदनाऽन्यालम्बना भविष्यति ?

यथा तर्हि छायांकुरयोरिति । किम् ? सहोत्पन्नयोर्जन्यजनकभावः । उत्पन्न एव ह्यङ्कुरश्छायां जनयति । न प्रथमे क्षणेऽङ्कुरो निश्छायो भवति, द्वितीये सच्छाय इति ।

एवं स्पर्शवेदनयोरपीति । अनयोरपि छायाङ्कुरयोः पूर्वसामग्रीहेतुरिति शक्यं वक्तुम् । *सहभूहेतुनिर्देशे* त्वयमर्थं उक्त इति न पुनरुच्यते ।

स्पर्शादुत्तरकालं वेदनेत्यपर इति । *भदन्तश्रीलाभः । सोऽसौ त्रयाणां सन्निपातः स्पर्श* इति । योऽयं जनकजनितभावः । *वेदना तृतीये क्षणे* इति । इन्द्रियार्थक्षणः प्रथमः, विज्ञानोत्पत्तिक्षणो द्वितीयः, वेदनोत्पत्तिक्षणस्तृतीय इति । *न सर्वत्र विज्ञाने वेदना प्राप्नोतीति* । विज्ञानक्षणे द्वितीये वेदनाया अभावात् । *न च सर्वविज्ञानं स्पर्शः ।* वेदनाक्षणे तृतीये विज्ञानं न स्पर्शः । पूर्वद्वितीयक्षणयोः स्पर्श एव विधीयते । *पूर्वस्पर्शहेतुका ह्युत्तरत्र स्पर्शे वेदना ।* योऽयमिदानीं द्वितीयः क्षणः स्पर्शभावेनोक्तः, तत्र पूर्वस्पर्शहेतुका प्रथमक्षणविज्ञानहेतुका वेदनोत्पद्यते, तत्स्पर्शपूर्विकाप्यन्यस्मिन्नित्येवं सर्वत्र विज्ञाने वेदना प्राप्नोति ।

सर्वं च विज्ञानं स्पर्श इति । ते च स्पर्शाः सवेदनका इति ।

भिन्नालम्बयोरिति विस्तरः । भिन्नमालम्बनमनयोस्तौ भिन्नालम्बनौ । पूर्वस्य रूपमालम्बनम्, उत्तरस्य शब्दः । तयोर्भिन्नालम्बनयोः *पूर्वस्पर्शहेतुका* रूपालम्बनस्पर्शहेतुका *उत्तरत्र स्पर्शे* शब्दालम्बने यद् वेदनोत्पद्यते, इत्येतदयुक्तम् । *कथं हि नामेति* दोषमाविष्करोति । *अन्यजातीयालम्बनस्पर्शसम्भू ।*

१–१. तृतीयक्षणे—का० ।　　२. सर्वं विज्ञानं—का० ।

३. सर्ववेदनकाः—का० ।　　४. ०हेतुकोत्तरस्य—का०

येन वा चित्तेन सम्प्रयुक्ता ततो भिन्नालम्बनेति ।

अस्तु तर्हि तस्मिन् काले स्पर्शभूतं विज्ञानमवेदनकम् । तस्माच्च यत् पूर्वं विज्ञानं सवेदनकं तत्र स्पर्शः; प्रत्ययवैधुर्यादित्येवं सति को दोषः ?

महाभूमिकनियमो भिद्यते—"सर्वत्र चित्ते दशमहाभूमिकाः" (   ) इति।

क्व चैष नियमः सिद्धः ? शास्त्रे ।

रूपप्रकारलम्बनात् स्पर्शात् सम्भूता वेदना *अन्यालम्बना भविष्यति ।* शब्दालम्बना भविष्यति । विधुरकारणत्वात् कार्यस्यासम्भावना । यदा हि रूपालम्बनात् स्पर्शात् सम्भूता वेदना रूपालम्बनेनैव वेदना भविष्यति, तदा पूर्वस्पर्शहेतुकोत्तरत्र स्पर्शे वेदनेति युक्तम् । यदा तु रूपालम्बनात् स्पर्शात् शब्दालम्बना वेदनोत्पद्यते, तदा *कथमेतद्योक्ष्यते ।* कारणानुरूपं हि लोके कार्यं दृश्यते ।

अथ मतम्—रूपालम्बनात् स्पर्शात् सम्भूता वेदना शब्दालम्बनस्पर्शसम्प्रयुक्तापि रूपालम्बना भवतीति ? अत इदमाह—*येन वा चित्तेन सम्प्रयुक्ता ततो भिन्नालम्बनेति ।* ततः शब्दालम्बनाच्चित्ताद्भिन्नालम्बना यत उत्पन्ना रूपालम्बना, तेन समालम्बनेत्यर्थः । कथं चासौ तेन सम्प्रयुक्तेत्युच्यते ? समं प्रयुक्ता हि सम्प्रयुक्ता । यद्यभिन्नाश्रयत्वात्, कथं श्रोत्राश्रयोत्पन्ना सती रूपालम्बना भविष्यति ? कथं न भविष्यति ? चित्तचैत्तानामाश्रयेणैकविषयप्रवृत्तत्वात् । तस्मादन्यतरालम्बनत्वेऽपि वेदनाया दोषः । स दोषः प्रदर्श्यते—यदि तावद् रूपालम्बनात् स्पर्शादुत्पन्ना वेदना शब्दाद्यालम्बनान्तरमालम्बते, स रूपालम्बनः स्पर्शः सुखवेदनीयो यावद् दुःखासुखवेदनीय इति न प्राप्नोति । एकालम्बनस्य तु वेदनया तथा निर्देशो युक्त इति ।

अस्तु तर्हीति विस्तरः । यद्येवं दोषः, अस्तु तर्हि *तस्मिन् काले । कस्मिन् काले ?* शब्दालम्बनकाले । *स्पर्शभूतं विज्ञानमवेदनकम् । तस्माच्च* शब्दालम्बनाद् *यत् पूर्वं विज्ञानं सवेदनकं तत्र स्पर्शः ।* एवं हि निर्दोषं भवतीति । अन्यथा हि यदि पूर्वोत्पन्नं सवेदनकं विज्ञानं स्पर्शः स्यात्, तदेवं स्पर्शप्रत्यया वेदनेति यथोक्तो दोषः स्यात् । किं पुनः कारणम्—किञ्चिदविज्ञानमवेदनकम्, किञ्चिच्च न स्पर्शः ? *प्रत्ययवैधुर्यात् ।* विधुरा हि प्रत्यया विप्रतिबन्धेनावस्थिताः । न हि सर्वः समनन्तरप्रत्ययो वेदनाप्रत्ययं स्पर्शभूतं विज्ञानं जनयितुं समर्थ इति । तदेवं तस्य भिन्नालम्बनं विज्ञानमेकान्तेनावेदनकम्, तदुत्पादकं चास्पर्शभूतम् । यदि तु रूपालम्बनाच्चक्षुर्विज्ञानादनन्तरं रूपालम्बनमेव चक्षुर्विज्ञानमेवमुत्पद्यते—मनोविज्ञानं तत्सवेदनकं पूर्वोत्पन्नं स्पर्श इति । *एवं सतीति । महाभूमिकनियमो भिद्यत* इति । स्पर्शवेदनयोः पर्यायेण नियमात् ।

सूत्रप्रमाणका वयम्, न शास्त्रप्रमाणकाः ।

उक्तं हि भगवता—"सूत्रान्तप्रतिशरणैर्भवितव्यम्" (   ) इति ।

न वा एष महाभूमिकार्थः—सर्वत्र चित्ते दश महाभूमिकाः सम्भवन्तीति ।

कस्तर्हि महाभूमिकार्थः ?

तिस्रो भूमयः—सवितर्का सविचारा भूमिः, अवितर्का विचारमात्रा, अवितर्काऽविचारा भूमिः । पुनस्तिस्रः—कुशला भूमिः, अकुशला, अव्याकृता भूमिः । पुनस्तिस्रः—शैक्षी भूमिः, अशैक्षी, नैवशैक्षीनाशैक्षी भूमिः । तद्य एतस्यां सर्वस्यां भूमौ भवन्ति ते महाभूमिकाः, ये कुशलायामेव भूमौ[1] ते कुशलमहाभूमिकाः, ये क्लिष्टायामेव ते क्लेशमहाभूमिकाः ।

ते पुनर्यथासम्भवं पर्यायेण, न तु सर्वे युगपदित्यपरे ।

तिस्रो भूमय इति । *सवितर्का सविचारा* कामधातुः प्रथमं च ध्यानम् । *अवितर्का विचारमात्रा* ध्यानान्तरम् । *अवितर्का अविचारा* द्वितीयाद्ध्यानात् प्रभृति यावद्भवाग्रम् । *कुशला भूमिः* कुशला धर्माः । *एवमकुशला अव्याकृताः ।* *शैक्षी भूमिः* शैक्षस्यानास्रवा धर्माः । *अशैक्षी* अशैक्षस्यानास्रवा धर्माः । *नैवशैक्षीनाशैक्षी* भूमिः सास्रवा धर्माः । असंस्कृता इह नोच्यन्ते, चैत्तसम्बन्धात् । *तद् य एतस्यामिति* विस्तरः । *तदिति* वाक्योपन्यासे । *य* इति ये चैतसिकाः । *एतस्यां सर्वस्यां भूमाविति* । सवितर्कसविचारायां भूमौ, यावन्नैवशैक्षीनाशैक्ष्यां भूमौ । *ते महाभूमिकाः* । वेदनाचेतनादयो यथोक्ताः । *ये कुशलायामेव भूमौ ते कुशलमहाभूमिकाः* । श्रद्धादयः । *ये क्लिष्टायामेव ते क्लेशमहाभूमिकाः* । अविद्यादयो यथोक्ता एव ।

ते पुनर्यथासम्भवमिति विस्तरः । ते पुनर्महाभूमिकादयो ये यस्यां सम्भवन्ति ते तस्यां *पर्यायेण* । *न तु सर्वे युगपदित्यपरे* । तद् यथा वेदना सर्वासु भूमिषु भवन्त्यपि न युगपत् संज्ञाचेतनास्पर्शमनस्कारादिभिर्भवति, तथा स्पर्शो वेदनादिभिः । यथा कुशलायां वितर्कादय इत्येवमादिकम् ।

अपरे पुनरेवं व्याचक्षते—यथा पञ्चस्कन्धके लिखितं तथेदं ग्रहीतव्यमिति । तद्यथा—"छन्दः कतमः, अभिप्रेतवस्तुन्यभिलाषः, अनभिप्रेते नास्ति छन्द इत्यभिप्रायः । अधिमोक्षः कतमः ? निश्चिते वस्तुनि तथैवावधारणम् । स्मृतिः कतमा ? संस्तुते वस्तुन्यसम्प्रमोषश्चेतसोऽभिलपनता । समाधिः कतमः ?

---

१. का० पुस्तके नास्ति ।

अकुशलमहाभूमिकास्तु पाठप्रसङ्गेनासंहिताः[1] इदानीम् । पूर्वं न पठ्यन्ते स्म ।

यदि तर्हि स्पर्शादुत्तरकालं वेदना, सूत्रं परिहार्यम्—"चक्षुः प्रतीत्य रूपाणि चोत्पद्यते चक्षुर्विज्ञानं त्रयाणां सन्निपातः स्पर्शः सहजाता वेदना संज्ञा चेतना" ( ) इति ।

सहजाता इत्युच्यन्ते, न स्पर्शसहजाता इति किमत्र परिहार्यम् ! समनन्तरेऽपि चायं सहशब्दो दृष्टः, तद्यथा—"मैत्रीसहगतं स्मृतिसम्बोध्यङ्गं भावयति" ( ) इत्यज्ञापकमेतत् ।

यत्तर्हि सूत्र उक्तम्—"या च वेदना या च संज्ञा या च चेतना यच्च विज्ञानं संसृष्टा इमे धर्मा नासंसृष्टाः" इत्यतो नास्ति वेदनाभिरसंसृष्टं विज्ञानम् ?

सम्प्रधार्यं तावदेतत्—एक एष संसृष्टार्थः ? तत्र हि सूत्र एवमुक्तम्—"यद्वेदयते तच्चेतयते, यच्चेतयते तत्सम्प्रजानीते, यत्सम्प्रजानीते तद्विजानाति"

उपपरीक्ष्ये वस्तुनि चित्तस्यैकाग्रता । प्रज्ञा कतमा ? तत्रैव प्रविचयः, योगायोगविहितोऽन्यथा च"—इत्येवमादिः *पञ्चस्कन्धकग्रन्थो द्रष्टव्यः* । तत्र ह्युक्तम्—"पञ्च सर्वत्रगा वेदनासंज्ञास्पर्शमनस्कारचेतनाः । पञ्च प्रतिनियतविषयाश्छन्दाधिमोक्षस्मृतिसमाधिप्रज्ञाः[2]" इत्येवमादि । *अकुशलमहाभूमिकास्तु पाठप्रसङ्गेनासंहिता* इति । सूत्रादिषु पाठात् । कुशलमकुशलमव्याकृतमित्येवं पाठप्रसङ्गेनासंहिताः, अध्यारोपिताः पश्चादित्यर्थः । *पूर्वं न पठ्यन्ते स्म । प्रकरणपादे* महाभूमिकाः, कुशलमहाभूमिकाः, क्लेशकुशलमहाभूमिकाः, परीत्तक्लेशमहाभूमिकाश्चेति चतुर्विधाः पठ्यन्ते ।

सहजाता इत्युच्यन्ते, न स्पर्शसहजाता इति । अविशेषत्वादेते वेदनादयः परस्परसहजाताः । न तु स्पर्शेनेत्यर्थपरिग्रहेण परिहर्तव्यं सूत्रमित्यर्थः । *मैत्रीसहगतमिति* । अयं सहशब्दो नावश्यं युगपद्भावे, *समनन्तरेऽपि दृष्टः* । न हि मैत्र्याः स्मृतिसम्बोध्यङ्गस्य च समवधानमस्ति; मैत्र्या एकान्तसास्रवत्वात् । स्मृतिसम्बोध्यङ्गस्य चैकान्तानास्रवत्वात् । तस्मादज्ञापकमेतत् ।

संसृष्टा इति । सहोत्पन्ना इत्यभिप्रायः ।

तत्र हि सूत्र इति । यत्रैवोक्तम् । *या वेदना या चेतना या च संज्ञेति*

---

१. ०नासंहिताः—का० । २. ०विषयाया०—मुद्रितः पाठः ।

इति । तत्र विज्ञायते—किं तावदयमेषामालम्बननियम उक्तः, उताहो क्षणनियम इति ।

आयुरूष्मणोः सहभाव्ये[1] संसृष्टवचनात् सिद्धः क्षणनियमः । यच्चापि सूत्र उक्तम्—"त्रयाणां सन्निपातः स्पर्शः" इति, तत् कथं विज्ञानं चास्ति, न च त्रयाणां सन्निपातो न च स्पर्श इति । तस्मादवश्यं सर्वत्र विज्ञाने स्पर्शः, स्पर्शसहजा च वेदनैष्टव्या । अलमतिप्रसङ्गिन्या कथया । प्रकृतमेवानुक्रम्यताम् ॥

उक्ता समासेन चैतसिकी वेदना ॥

पुनश्चाष्टादशविधा सा मनोपविचारतः ॥ ३२ ॥

सैव चैतसिकी वेदना पुनरष्टादश मनोपविचारव्यवस्थानादष्टादशधा भिद्यते ।

पुनः सन्धिकरणं चात्र द्रष्टव्यम् ।

विस्तरेण । तत्र सूत्र इत्यर्थः । *तत्र विज्ञायत* इति विस्तरः । *किं तावदयमेषां* वेदनादी*नामालम्बननियमः* । आलम्बने नियमः—यदेवालम्बनं वेदयते, तदेव चेतयते यावद्विज्ञानं *विजानातीति* । *उताहो क्षणनियमः*—यस्मिन्नेव क्षणे वेदयते तस्मिन्नेव यावद् विजानातीति । वयं ब्रूमः—आलम्बननियमोऽयमिति । तस्मान्न सूत्रविरोध इत्यभिप्रायः ।

आचार्य आह—तत्रैव सूत्रे *आयुरूष्मणोः सहभाव्ये संसृष्टवचनात् सिद्धः क्षणनियम* इति । आयुरूष्मा च संसृष्टौ, इमौ धर्मौ न विसंसृष्टावित्यायुरूष्मणोः सहोत्पन्नतोक्ता भवति; तयोरनालम्बनत्वात् । तदेवं साधितं भवति—अवश्यं सहोत्पन्नानि वेदनासंज्ञाचेतनाविज्ञानानि; तत्र सूत्रे संसृष्टवचनेनोक्तत्वात्, आयुरूष्मवदिति । *तत् कथमिति* विस्तरः । *तत् कथं विज्ञानं चास्ति । न च त्रयाणा*मिन्द्रियविषयविज्ञानानां *सन्निपातः* । तस्मादवश्यं विज्ञानास्तित्वे सन्निपातोऽभ्युपगन्तव्यः । सन्निपातश्च ते स्पर्श इति । तेनेदं ते विरुध्यते *न सर्वविज्ञानं स्पर्श* इति । *सन्निपातो वा न स्पर्श इति* ।

पुनः सन्धिकरणं चात्र द्रष्टव्यमिति । "पूर्वत्रासिद्धम्" (पा० सू० ७.२.१) इति सकारलोपस्यासिद्धत्वाद् गुणो न प्राप्नोति ? परिहारस्तु, ईषदर्थेऽयं नञ् द्रष्टव्यः; ईषत् सिद्धमसिद्धमित्यतः सिद्धत्वात् सकारलोपस्य गुणो भवति, 'सैष दाशरथी रामः' इति यथा ।

---

[1]. साहभाव्ये—का० ।

अष्टादश मनोपविचाराः कतमे ? षट् सौमनस्योपविचाराः, षट् दौर्मनस्योपविचाराः, षडुपेक्षोपविचाराः ।

कथमेषां व्यवस्थानम् ? यदि स्वभावतः, त्रयो भविष्यन्ति—सौमनस्यदौर्मनस्योपेक्षाविचाराः । अथ सम्प्रयोगतः, एको भविष्यति; सर्वेषां मनःसम्प्रयुक्तत्वात् । अथालम्बनतः, षड् भविष्यन्ति; रूपादिषड्विषयालम्बनत्वात् ?

त्रिभिरपि स्थापना ।

तेषां पञ्चदश रूपाद्युपविचारा असम्भिन्नालम्बनाः; प्रतिनियतरूपाद्यालम्बनत्वात् । त्रयो धर्मोपविचारा उभयथा ।

मनोपविचारा इति कोऽर्थ ? मनः किल प्रतीत्यैते सौमनस्यादयो विषयानुपविचरन्तीति । विषयेषु वा मन उपविचारयन्तीत्यपरे । वेदनावशेन मनसो विषयेषु पुनः पुनर्विचारणात्[1] ।

षट् सौमनस्योपविचारा इति विस्तरः । चक्षुषा रूपाणि दृष्ट्वा सौमनस्यस्थानीयानि रूपाण्युपविचरति, श्रोत्रेण शब्दान् श्रुत्वा सौमनस्यस्थानीयान् शब्दानुपविचरति, एवं यावन्मनसा धर्मान् विज्ञाय सौमनस्यस्थानीयान् धर्मान् उपविचरति । एवं चक्षुषा रूपाणि दृष्ट्वा दौर्मनस्यस्थानीयान्युपेक्षास्थानीयानि चेति विस्तरेण योज्यम् । *त्रयो भविष्यन्तीति* । सौमनस्यदौर्मनस्योपेक्षास्वभावत्रैविध्यात् । एक इति । मनोविज्ञानमात्रसम्प्रयोगात् । *षडिति* । रूपादिविषयषट्कभेदात् । *त्रिभिरपि स्थापनेति* । यद्वेदनाद्रव्यं मनोविज्ञानमात्रसम्प्रयुक्तमेकम्, तत् सौमनस्यादिस्वभावत्रयभेदात् त्रिधा भिद्यते, तत् पुनः प्रत्येकं विषयषट्कभेदात् षोढा भिद्यते—इत्यष्टादश भवन्ति । स्वभावव्यवस्थापनायामसत्यां मनोपविचारा इत्येव न स्याद्, अष्टादशव्यतिरिक्ताश्च स्युः । रूपादिविषयषट्कालम्बनव्यवस्थापनायामसत्यां प्रत्येकं सौमनस्यादिषोढाभेदेनाष्टादश मनोपविचारा इति न स्यात् । तस्मात् त्रिभिरपि व्यवस्थापनेति सिद्धम् ।

असम्भिन्नालम्बना इति । असम्मिश्रालम्बनाः । *त्रयो धर्मोपविचारा उभयथेति* । ये रूपादिविषयपञ्चकव्यतिरिक्तधर्मालम्बनास्ते धर्मोपविचारा असम्भिन्नालम्बनाः । ये तु रूपादीनां षण्णां विषयाणां द्वौ त्रीन् यावत् षडपि विषयानालम्बन्ते ते सम्भिन्नालम्बनाः ।

मनः किलेति । किलशब्दः परमतद्योतकः । मनः किल *प्रतीत्या*श्रित्य *विषयानुपविचरन्ति* आलम्बन्त इत्यर्थः । *उपविचारयन्तीति* प्रवर्त्तयन्ति । कथम् ? इत्याह—*वेदनावशेन मनसो विषयेषु पुनः पुनर्विचारणा*दिति । पुनःपुनरित्युपशब्दस्यार्थः ।

---

1. °विचरणात्—का० ।

१. कस्मात् कायिकी वेदना न मनोपविचारः । नैव ह्यसौ मन एवाश्रिता, नाप्युपविचारिका, अविकल्पकत्वादित्ययोगः ?

२. तृतीयध्यानसुखस्य कस्मान्मनोपविचारेष्वग्रहणम् । आदितः किल कामधातौ मनोभूमिकसुखेन्द्रियाभावात् तत्प्रतिद्वन्द्वेन दुःखोपविचाराभावाच्चेति ?

३. यदि मनोभूमिका एवैते, यत्तर्हि सूत्र उक्तम्—"चक्षुषा रूपाणि दृष्ट्वा सौमनस्यस्थानीयानि रूपाण्युपविचरन्तीत्येवमादिः, कथम् ?

पञ्चविज्ञानकायाभिनिर्हृतत्वमभिसन्धायैतदुक्तम्—"मनोभूमिकास्त्वेते[1] । तद्यथा—अशुभा चक्षुर्विज्ञानाभिनिर्हृता च मनोभूमिका च" इति । अपि तु "दृष्ट्वा यावत् स्पृष्ट्वा" इति वचनात् अचोद्यमेतत् । योऽप्यदृष्ट्वा[2] यावदस्पृष्ट्वोपविचरति[3] तेऽपि मनोपविचाराः । इतरथा हि कामधातौ रूपधात्वालम्बना

नाप्युपविचारिकेति । असन्तीरिकेत्यर्थः । *अयोग* इत्यसम्भवः ।

यदि मन एवाश्रिता वेदना मनोपविचारः, तृतीये ध्याने यत् सुखं तन्मन एवाश्रितम्, न चक्षुरिन्द्रियाद्याश्रितमिति तस्य *कस्मान्मनोपविचारेष्वग्रहणम्* । *आदितः किलेति* विस्तरः । आदावादितः । किलेति परमते । *कामधातौ मनोभूमिकं सुखं नास्ति*, तस्मान्न तन्मनोपविचारः । अतः पश्चादपि तृतीये ध्याने सुखेन्द्रियस्य मनआश्रितत्वेऽपि मनोपविचारेष्वग्रहणम् । यथा चास्योपविचारप्रतिद्वन्द्वेन दौर्मनस्योपविचारः, नैवं सुखोपविचारस्य *प्रतिद्वन्द्वेन दुःखोपविचारो*ऽस्ति; मनोविज्ञानाश्रित्वाद् दुःखस्य । अतः सर्वत्र तत् सुखं न मनोपविचार इति ।

सौमनस्यस्थानीयानीति । सौमनस्यजनकानि । पञ्चेति विस्तरः। पञ्चभिर्विज्ञानकायैरभिनिर्हृतत्वमुत्पादितत्वमभिसन्धाय चेतसिकृत्वा एतदुक्तं *चक्षुषा रूपाणीति* विस्तरेण । *मनोभूमिकास्त्वेते*, तद् यथा—*अशुभा चक्षुर्विज्ञानाभिनिर्हृता च*, विलीनकादिदर्शनात् । *मनोभूमिका च* । समाहितत्वात् । *अपि त्विति* । *चक्षुषा रूपाणि दृष्ट्वा यावत्* कायेन स्प्रष्टव्यानि *स्पृष्ट्वेति वचनादचोद्यमेतत्* । यदि चक्षुषा रूपाणि पश्यन् सौमनस्यस्थानीयानि रूपाण्युपविचरतीत्युक्तं स्यात्, यावत् कायेन स्प्रष्टव्यानि स्पृशन्निति स्याच्चोद्यम् । न त्वेवमुक्तमित्यचोद्यमेवैतत् । *योऽप्यदृष्ट्वेति* विस्तरः । योऽपि श्रुत्वा परतो मनसोपविचरत्यालम्बते, तेऽपि तस्य *मनोपविचाराः* । *इतरथा हीति* विस्तरः । *रूपधात्वालम्बना* रूपाण्युप-

१. ०का ह्येते—का० । २. येऽप्य०—का० ।
३. ०विचरन्ति—का० ।

रूपानुपविचारा न स्युः, कामधात्वालम्बनाश्च रूपधातौ गन्धरसस्प्रष्टव्योपविचाराः । यथा तु व्यक्ततरं तथोक्तम्—योऽपि रूपाणि दृष्ट्वा शब्दानुपविचरति सोऽपि मनोपविचारः । यथा त्वनाकुलं तथोक्तमिन्द्रियार्थव्यवच्छेदतः[१] ।

किमस्ति रूपं यत् सौमनस्यस्थानीयमेव स्यात् यावदुपेक्षास्थानीयमेव ? अस्ति सन्तानं नियम्य[२], न त्वालम्बनम् ॥ ३२ ॥

अथैषां मनोपविचाराणां कति कामप्रतिसंयुक्ताः, तेषां च कति किमालम्बनाः, एवं यावदारूप्यप्रतिसंयुक्ताः वक्तव्याः ? आह—

कामे स्वालम्बनाः सर्वे

कामधातौ सर्वेऽष्टादश सन्ति, स एव[३] च तेषां सर्वेषामालम्बनम् । तेषामेव—

विचारा न स्युः । कामधातूपपन्नेन रूपावचराणां रूपादीनामप्रत्यक्षीकृतत्वात् । *कामधात्वालम्बनाश्च गन्धरसस्प्रष्टव्योपविचारा* रूपधातूपपन्नस्य *न स्युः;* तस्य गन्धादीनामविषयत्वात् । *यथा तु व्यक्ततरं तथोक्तमिति ।* प्रत्यक्षीकृतरूपाद्यालम्बनानां मनोपविचाराणां व्यक्ततरत्वात् । *योऽपि रूपाणि दृष्ट्वा* तत्सहचरान् *शब्दानुपविचरति सोऽपि तस्य मनोपविचारः । यथा त्वनाकुलं तथोक्तम् ।* कथं चानाकुलम् ? इत्याह—*इन्द्रियार्थव्यवच्छेदत* इति । चक्षुरादीन्द्रियव्यवच्छेदेन, रूपाद्यर्थव्यवच्छेदेन चोक्तमिति । अन्यथा ह्याकुलं स्यात्—चक्षुषा रूपाणि दृष्ट्वा सौमनस्यस्थानीयाञ्छब्दानुपविचरतीत्येवमादि ।

अस्ति सन्तानं नियम्येति कस्यचित् सत्त्वस्य सन्तानमवेक्ष्य । यदस्य किञ्चित् *सौमनस्यस्थानीयमेव, यावदुपेक्षास्थानीयमेव । न त्वालम्बनम् ।* किम् ? नियम्य, किम् कारणम् ? तदेव ह्यालम्बनं कस्यचित् सौमनस्यस्थानीयम्, कस्यचिन्नेति ॥ ३२ ॥

एवं यावदारूप्यप्रतिसंयुक्ता इति । कति रूपप्रतिसंयुक्तास्तेषां च कति रूपालम्बनाः, कत्यारूप्यप्रतिसंयुक्तास्तेषां च कति किमालम्बना इति ।

"कामे स्वालम्बनाः सर्वे" इति । कामे कामावचरा मनोपविचाराः । *सर्वे अष्टादश सन्ति । स एव च कामधातुस्तेषां सर्वेषामालम्बनम् ।* स्वो धातुरालम्बनमेषामिति स्वालम्बना इति कारिकापदविग्रहः ।

---

१. ०र्थस्य व्यव०—का० ।
२. नियमय्य—का० ।
३. का० पुस्तके नास्ति ।

रूपी द्वादशगोचरः ।

रूपी[1] धातुर्द्वादशानामालम्बनम्[1], षट् गन्धरसोपविचारानपास्य; तत्र तयोरभावात् ।

त्रयाणामुत्तरः

गोचर इति वर्त्तते । आरूप्यधातुस्त्रयाणां धर्मोपविचाराणामालम्बनम्; तत्र रूपाद्यभावात् ॥

उक्ताः कामप्रतिसंयुक्ताः ॥

रूपप्रतिसंयुक्ता वक्तव्याः ? तत्र तावत्

ध्यानद्वये द्वादश

दौर्मनस्योपविचारानपास्य । ते च **द्वादश**

कामगाः ॥ ३३ ॥

कामान् गच्छन्तीति **कामगाः** । कामधातुमालम्बन्त इत्यर्थः । दृष्टो हि विषयाणां ग्रहणार्थे गमिप्रयोगः—'कथमेतद् गम्यते ? एवमेतद् गम्यते' इति ॥३३॥

स्वोऽष्टालम्बनम्

स एव रूपधातुस्तेषां **स्वः** । **स्वोऽ**ष्टानां मनोपविचाराणा**मालम्बनम्**, गन्धरसोपविचारांश्चतुरो हित्वा ।

"रूपी द्वादशगोचरः" इति । रूपी धातुः कामावचराणां द्वादशानां मनोपविचाराणां गोचरः । षड्गन्धरसोपविचारानपास्येति । द्वौ गन्धरसावालम्बनौ सौमनस्योपविचारौ हित्वा, द्वौ गन्धरसालम्बनौ दौर्मनस्योपविचारौ हित्वा, द्वौ तदालम्बनावेव चोपेक्षोपविचारौ हित्वा, द्वौ तदालम्बनावेव चोपेक्षोपविचारौ हित्वेति । कस्मात् ? तत्र रूपधातौ तयोर्गन्धरसयोरभावात् । "विना गन्धरसघ्राणजिह्वाविज्ञानधातुभिः" (अभि० को० १.३०) इति वचनात् ।

"त्रयाणामुत्तरः" इति । *त्रयाणां* सौमनस्यदौर्मनस्योपेक्षाधर्मोपविचाराणां कामावचराणा*मुत्तरो* धातु*रारूप्यधातुरालम्बनम्, तत्र रूपाद्यभावात्* ।

"ध्यानद्वये द्वादश" इति । दौर्मनस्योपविचाराणां षण्णामभावात् ॥ ३३ ॥

"स्वोऽष्टालम्बनम्" इति । अष्टानामालम्बनमष्टालम्बनम् । *गन्धरसोपविचारांश्चतुरो हित्वेति* । सौमनस्योपेक्षोपविचारौ गन्धालम्बनौ द्वौ रसालम्बनौ

१-१. रूपधातु०—का० ।

आरूप्या[1] द्वयोः

धर्मोपविचारयोरालम्बनम् ।

ध्यानद्वये तु षट् ।

तृतीयचतुर्थयोर्ध्यानयोः षडुपेक्षोपविचारा एव सन्ति, नान्ये ।

तेषां पुनरालम्बनम्—

कामाः षण्णां

कामधातुः षण्णामप्यालम्बनम् ।

चतुर्णां स्वः

रूपधातुश्चतुर्णाम्; तत्र गन्धरसाभावात् ।

एकस्यालम्बनं परः ॥ ३४ ॥

आरूप्यधातुरेकस्यैव धर्मोपविचारस्यालम्बनम् ॥ ३४ ॥

उक्ता रूपप्रतिसंयुक्ताः ॥

आरूप्यप्रतिसंयुक्ता इदानीमुच्यन्ते—

चत्वारोऽरूपिसामन्ते

आकाशानन्त्यायतनसामन्तकमत्रारूपिसामन्तकम् । तत्र चत्वारो रूप-शब्द-स्प्रष्टव्य-धर्मोपविचाराः । ते च—

रूपगाः

चतुर्थं हि ध्यानमेषामालम्बनम् । येषां तद् व्यवच्छिन्नालम्बनमस्ति, येषां

च द्वौ हित्वेत्यर्थः, तत्र तयोरभावात् ।

"आरूप्यं द्वयोः" इति । सौमनस्योपेक्षाधर्मोपविचारयोः । प्रथमद्वितीय-ध्यानभूमिकयोरारूप्यधातुरालम्बनम्; रूपाद्यभावात् । *षडुपेक्षोपविचारा एव सन्ति, नान्य* इति । रूपशब्दगन्धरसस्प्रष्टव्यधर्मालम्बना उपेक्षोपविचारा एव सन्ति; सौमनस्योपविचाराणामपि तृतीये चतुर्थे चाभावात् । गन्धरसा-लम्बनौ तु तत्र कामावचरगन्धरसालम्बनावित्यवगन्तव्यम् ॥ ३४ ॥

तत्र चत्वार इति । आकाशानन्त्यायतनसामन्तकानन्तर्यमार्गस्य चतुर्थ-ध्यानालम्बनत्वात् । तत्र च रूपशब्दस्प्रष्टव्यधर्मसद्भावात् ।

येषां तद्व्यवच्छिन्नालम्बनमस्तीति । येषामचार्याणां मतेन तदाकाशानन्त्या-

---

१. आरूप्यो—का० ।

पुनः परिपिण्डितालम्बनम्, तेषां तत्रैक एव सम्मिश्रालम्बनो[1] धर्मोपविचारः।

एक ऊर्ध्वगः।

एक एव धर्मोपविचारस्तत्रारूप्यधात्वालम्बनः।

एको मौले

मौले पुनरारूप्ये धर्मोपविचार एवैकोऽस्ति, नान्यः। स चापि—

स्वविषयः

आरूप्यधात्वालम्बन एव। नहि मौलानामारूप्याणामधरो धातुरालम्बनमिति पश्चात् प्रतिवेदयिष्यामि[2]।

एते च मनोपविचाराः—

सर्वेऽष्टादश सास्रवाः ॥ ३५ ॥

नास्ति कश्चिदनास्रवः।

कः कतिभिः समन्वागतः? कामधातूपपन्नो रूपावचरस्य कुशलस्य चित्तस्यालाभी कामावचरैः सर्वैः प्रथमद्वितीयध्यानभूमिकैरष्टाभिः तृतीयचतुर्थध्यानभूमिकैश्चतुर्भिः क्लिष्टैर्गन्धरसालम्बनान् पर्युदस्य आरूप्यावचरेणैकेन क्लिष्टे-

यतनसामन्तकं व्यवच्छिन्नालम्बनम्, पृथक् पृथग्रूपाद्यालम्बनमसमस्तालम्बनमित्यर्थः। औदारिकादिभिराकारैस्तच्चतुर्थध्यानमालम्बत इत्येकेषामाचार्याणां मतम्। *येषामाचार्याणां मतेन परिपिण्डितालम्बनमेव* तदाकाशानन्त्यायतनसामन्तकं चतुर्थध्यानभूमिकस्कन्धपञ्चकालम्बनमिति मतम्, *तेषामाचार्याणां तत्रैक एव सम्मिश्रालम्बनो धर्मोपविचार* इति।

"एक ऊर्ध्वगः" इति। केषां पक्षे? येषाम् "चत्वारोऽरूपिसामन्ते" इति पक्षः। *न हि मौलानामिति* विस्तरः। *मौलानामारूप्याणामधरो धातुर्नालम्बनमधर*भूमिकं सास्रवं वस्तु नालम्बनमित्यर्थः। *पश्चात् प्रवेदयिष्यामीति*। "न मौलाः कुशलारूप्याः सास्रवाधरगोचराः" (अभि० को० ८. २१) इति।

प्रथमेति विस्तरः। *प्रथमद्वितीयध्यानभूमिकैरष्टाभिः* समन्वागतस्*तृतीयचतुर्थध्यानभूमिकैश्चतुर्भिः*। कतमैः? इत्याह—*क्लिष्टैः, गन्धरसालम्बनान् पर्युदस्य*। तत्र गन्धरसाभावात्। कथम्? प्रथमद्वितीयोर्ध्यानयोर्द्वादशोपविचाराः सन्तीत्युक्तम्। सौमनस्योपेक्षोपविचाराणां षड्विषयालम्बनव्यवस्थापनात्। तत्र स्वभूम्या-

१. संमिश्रा०—का०। २. प्रतिवेदयिष्यामः—का०।

नैवालाभी रूपावचरस्य कुशलस्य चित्तस्यावीतरागः सर्वैः कामावचरैः प्रथमध्यानभूमिकैर्दशभिः । चतुर्भिः सौमनस्योपविचारैः क्लिष्टैर्गन्धरसालम्बनावपास्य[1] षड्भिरुपेक्षोपविचारैरनागम्यभूमिकैः । द्वितीयतृतीयचतुर्थध्यानारूप्यजैः[2] पूर्ववत् ।

अनया वर्त्तन्या शेषमनुगन्तव्यम् ।

लम्बना रूपशब्दस्प्रष्टव्यधर्मालम्बनाः सौमनस्योपविचाराश्चत्वारः क्लिष्टाः । ये चोपेक्षोपविचाराः क्लिष्टा एव चत्वारः । तैः कामधातूपपन्नो रूपावचरकुशलालाभी समन्वागतः । अधरभूम्युपपन्नो ह्यूर्ध्वभूमिकैः क्लिष्टैः समन्वागतो भवति । न तु विशिष्टैश्चतुर्भिर्गन्धरसालम्बनैः; तेषामक्लिष्टत्वात् । रूपावचरकुशलालाभित्वाच्च । नास्त्यक्लिष्टरूपावचर धर्मलाभ इति न तैः समन्वागतः । तृतीयचतुर्थध्यानभूमिका अपि षडेवोपेक्षोपविचारा उक्ताः । तेषां ये स्वभूम्यालम्बनाः क्लिष्टाः, तैः समन्वागतस्तथा, यौ तु गन्धरसालम्बनौ न तौ क्लिष्टौ । अतः पूर्वोक्तेनैव न्यायेन न ताभ्यां समन्वागतः । *क्लिष्टैनैवेति* । नाक्लिष्टेन; कुशलस्याभावात् । *लाभी रूपावचरस्येति* विस्तरः । कामधातूपपन्न एव लाभी *रूपावचरस्य* कुशलस्य चित्तस्यानागम्यसंगृहीतस्या*वीतरागः कामधातोः सर्वैः* कामावचरैरष्टादशभिरपि *समन्वागतः । प्रथमध्यानभूमिकैर्दशभिरिति* । कथं दशभिः ? इत्याह—*सौमनस्योपविचारैः क्लिष्टैर्गन्धरसालम्बनावपास्येति* । सौमनस्योविचाराः सामन्तकेषु न भवन्ति; सामन्तकानामुपेक्षेन्द्रियसम्प्रयोगित्वात् । अतो मौलसंगृहीतैरेव सौमनस्योपविचारैः क्लिष्टैः स्वभूम्यालम्बनैश्चतुर्भिः समन्वागतः, *न तु गन्धरसालम्बनाभ्याम्*; मौलकुशलालाभेनाक्लिष्टलाभाभावात् । न हि क्लिष्टं ध्यानमधरालम्बनमस्ति । *षड्भिरुपेक्षोपविचारैरनागम्यभूमिकैरिति* । अत्राविशेषाभिधानादुपेक्षोपविचारैः क्लिष्टैरपि चतुर्भिः समन्वागतः सामन्तकसंगृहीतैः, षड्भिश्चोपेक्षोपविचारैः कुशलैः कामधात्वालम्बनैः स्वभूम्यालम्बनैरपि । *द्वितीयतृतीयचतुर्थध्यानारूप्यजैः पूर्ववदिति* । कथम् ? स एव धातूपपन्नो लाभी रूपावचरस्य कुशलस्य चित्तस्यावीतरागो द्वितीयध्यानभूमिकैरष्टाभिर्येरेवालाभी गन्धरसालम्बनानपास्य । तृतीयचतुर्थध्यानभूमिकैश्चतुर्भिः क्लिष्टैरेव गन्धरसालम्बनौ पर्युदस्यारूप्यावचरेणैकेन क्लिष्टेनैव ।

अनया वर्तन्या मार्गेण *शेषमनुगन्तव्यम्* । कथम् ? प्रथमध्यानोपपन्नो द्वितीयध्यानभूमिकस्य कुशलस्य चित्तस्यालाभी प्रथमध्यानभूमिकैः सर्वैं समन्वागतः । द्वितीयध्यानभूमिकैः क्लिष्टैरष्टाभिस्तृतीयचतुर्थध्यानारूप्यजैः पूर्ववत् । लाभी

---

१. लम्बनौ व्युदस्य—का० ।

२. द्वितीयध्यानभूमिकैरष्टाभिः । तृतीयचतुर्थध्यानारूप्यभूमिकैः—का० ।

ध्यानोपपन्नस्तु कामावचरेणैकेनोपेक्षाधर्मोपविचारेण निर्माणचित्तसम्प्रयुक्तेन समन्वागतो वेदितव्यः ।

अपर आह—अस्त्येवं मनोपविचाराणां **वैभाषिकीयोऽर्थः**, सूत्रार्थस्त्वन्यथा दृश्यते । नहि यो यस्माद्वीतरागः स तदालम्बनमुपविचरतीति युक्तम् । अतः सास्रवा अपि न सर्वे सौमनस्यादयो मनोपविचाराः । किं तर्हि ? सांक्लेशिकाः, यैर्मनो विषयानुपविचरतीति । कथमुपविचरति[1] तत्र[2] ? अनुनीयते वा[3], प्रतिहन्यते वा[4], अप्रतिसंख्याय[4] वोपेक्षते[5] । येषां प्रतिपक्षेण षट् सातता विहारा

द्वितीयध्यानभूमिकस्य कुशलचित्तस्य तद्भूम्यवीतरागः सर्वैः प्रथमध्यानभूमिकैः, द्वितीयध्यानभूमिकैरष्टाभिः । चतुर्भिः सौमनस्योपविचारैः क्लिष्टैः, गन्धरसालम्बनावपास्य । चतुर्भिश्चोपेक्षोपविचारैर्द्वितीयध्यानसामन्तकसंगृहीतः । तृतीयध्यानभूमिकैश्चतुर्भिः क्लिष्टैः, गन्धरसालम्बनौ पर्युदस्य । एवं चतुर्थध्यानभूमिकैरारूप्यावचरेणैकेन विलिष्टेनैव । द्वितीयध्यानोपपन्नस्तृतीयध्यानभूमिकस्य कुशलस्य चित्तस्यालाभी द्वितीयध्यानभूमिकैः सर्वैः समन्वागतः । तृतीयध्यानभूमिकैश्चतुर्भिः क्लिष्टैः । चतुर्थध्यानारूप्यजैः पूर्ववत् । लाभी तृतीयध्यानभूमिकस्य कुशलचित्तस्य तद्भूम्यवीतरागः सर्वैर्द्वितीयध्यानभूमिकैः । तृतीयध्यानभूमिकैश्चतुर्भिरुपेक्षोपविचारैः क्लिष्टैर्गन्धरसालम्बनावपास्य । चतुर्भिश्चोपेक्षोपविचारैः तृतीयध्यानसामन्तकसंगृहीतैश्चतुर्थध्यानारूप्यजैः पूर्ववत् । एषा दिक् । अनया दिशा तृतीयादिष्वपि ध्यानेषूपपन्नस्य स्वभूम्यूर्ध्वभूमिकैरुपक्षेपोपविचारैरेव क्लिष्टैः कुशलैश्च समन्वागमो यथासम्भवं योज्यः ।

उपेक्षाधर्मोपविचारेणेति । कामावचरस्य निर्माणचित्तस्योपेक्षासम्प्रयोगित्वात् ।

अपर आहेति । अयमेव शास्त्रकारः । *न हि यो यस्मादिति* विस्तरः । *यः* पुद्गलः *यस्माद्रूपादेर्वीतरागो न स तद्रूपाद्यालम्बनमुपविचरति* । कथमुपविचरति ? तत्रानुनीयते वा, प्रतिहन्यते वा, अप्रतिसंख्याय वोपेक्षत इत्येवम् । यदा प्रतिसंख्यायोपेक्षते नाभुजति, तदाकुशलत्वम्, अतोऽप्रतिसंख्यायेति विशेषणम् । *अतः सास्रवा अपि न सर्वे । किं तर्हि ? सांक्लेशिकाः ।* संक्लेशे भवाः सांक्लेशिकाः संक्लेशानुकूलाः । *यैः सौमनस्यादिभिर्मनो विषयानुपविचरति* । *येषां प्रतिपक्षेण षट् सातता विहारा* इति ।- येषां सांक्लेशिकानां प्रतिव्यूहेन

---

१. कथं चोप०—का० ।   २. का० पुस्तके नास्ति ।
३. च—का० ।   ४-४. चाप्रति०—का० ।
५. चोपेक्षते—का० ।

भवन्ति—चक्षुषा रूपाणि दृष्ट्वा नैव सुमना भवति न दुर्मनाः, उपेक्षको भवति[1] स्मृतिमान् सम्प्रजानन् एवं यावन्मनसा धर्मान् विज्ञायेति । न ह्यर्हतो लौकिकं नास्ति कुशलं धर्मालम्बनं सौमनस्यम् । यत्तु तत्सांक्लेशिकं मनस उपविचारभूतम्, तस्यैव प्रतिषेधो लक्ष्यत इति ।

सततं भवाः सातता विहारा योगविशेषा भवन्ति। ते च षट्। कथम्? इत्याह–चक्षुषा *रूपाणि दृष्ट्वा नैव सुमना भवति*, नानुनीयते। न दुर्मनाः, न प्रतिहन्यते। *उपेक्षको भवति*, नाभुजति। कथं नाभुजति, किमप्रतिसंख्यायाहोस्वित् प्रतिसंख्यायेति ? विशेषयन्नाह–*स्मृतिमान् सम्प्रजानन्निति* । स्मृतिसम्प्रयुक्तया प्रज्ञया प्रतिसमीक्ष्यमाण इत्यर्थः। एवं *यावन्मनसा धर्मान् विज्ञायेति* । विषयषट्कभेदात् षट् सातता इति। *न ह्यर्हत* इति विस्तरः। अर्हतो लौकिकं कुशलं सास्रवं धर्मालम्बनं धर्मायतनालम्बनमधिगमधर्मालम्बनं वा सौमनस्यमस्ति। तस्य हि बुद्धसान्तानिकान् गुणान् सम्मुखीकुर्वतः कुशलं सौमनस्यमुत्पद्यते। न तस्यैव प्रतिषेधो युज्यते। कस्य तर्हि ? यत्तु तत् सांक्लेशिकं मनस *उपविचारभूतम्* । तस्यैव प्रतिषेधो लक्ष्यते। तस्मात् सास्रवा अपि न सर्वे सौमनस्यादय उपविचारा इति।

अत्र *भदन्तानन्तवर्माह*—अयुक्तमेतत्। कस्मात् ? सूत्रेऽन्यथा निर्देशात्। सूत्रे हि भगवता न सांक्लेशिका एवोपविचारा उक्ताः। एवं ह्याह—"तत्र भिक्षवो य इमे षट् सौमनस्योपविचारास्तानाश्रित्य तान् प्रतिष्ठाय य इमे षट् सौमनस्योपविचारास्तान् प्रजहीत। तत्र भिक्षवो य इमे षडुपेक्षोपविचारास्तानाश्रित्य तान् प्रतिष्ठाय य इमे षडुपेक्षोपविचारास्तान् प्रजहीत। द्वे भिक्षवो उपेक्षे—नानात्वसन्निश्रिता, एकत्वसन्निश्रिता च। तत्र भिक्षवो येयमेकत्वसन्निश्रितोपेक्षा, तामागम्य तामधिष्ठाय येयं नानात्वसन्निश्रितोपेक्षा तां प्रजहीत" (   ) इति। एतस्मात् सूत्राज्ज्ञायते—न सांक्लेशिका एव सौमनस्यादय उपविचारा इति। तदेतज्ज्ञापकम्; प्रहाणवचनेऽपि सांक्लेशिकत्वाविनिवृत्तेः। न हीतरेणेतरस्य सन्निश्रयप्रहाणवचनेऽपि सत्येषां मनोपविचाराणां सांक्लेशिकत्वं विनिवर्त्तते; अन्यथासम्भवात्। एवमाह—"मानं निश्रित्य मान एव प्रहातव्यः" इति। न तु जातु कश्चिन्मानो व्यवदानिकः सम्भवति। तस्मात् क्लेशानां परस्परविरोधेन वृत्तेर्वृत्त्यन्तरस्य चापेक्षया गुणवत्त्वात्, गुरुलाघवमभिसन्धाय सूत्रे वचनाददोषः। नन्दादयोऽत्र निदर्शनम्।

---

१. विहरति—का०।

· पुनस्त एव सौमनस्यादयः षट्त्रिंशच्छास्तृपदानि भवन्ति गर्धनैष्कम्याश्रितभेदेन; तद्भेदस्य शास्त्रा गमितत्वात् । तत्र गर्धाश्रिताः क्लिष्टाः, नैष्कम्याश्रिताः कुशलाः ।

एवमेतद् वेदनाख्यं भवाङ्गमनेकप्रकारभेदं वेदितव्यम् ॥ ३५ ॥

शेषाण्यङ्गानि पुनर्नोच्यन्ते । किं कारणम् ? यस्मात्

, उक्तं च, वक्ष्यते चान्यत्,

किञ्चिदत्राङ्गमुक्तम्, किञ्चित् पश्चाद् वक्ष्यते । तत्र विज्ञानं तावदुक्तम्—

"विज्ञानं प्रतिविज्ञप्तिर्मनआयतनं च तद्" (अभि० को० १.१६) इति ।

षडायतनमप्युक्तम्—

"तद्विज्ञानाश्रया रूपप्रसादाश्चक्षुरादयः" (अभि० को० १.९) इति ।

संस्काराः, भवश्च कर्मकोशस्थाने व्याख्यास्यन्ते । तृष्णोपादानानि क्लेशकोशस्थाने ।

स चैष प्रतीत्यसमुत्पादः समासतः क्लेश-कर्म-वस्तूनीति प्रज्ञापितम्[1] ।

अत्र तु क्लेश इष्यते ।

बीजवन्नागवन्मूलवृक्षवत् तुषवत् तथा ॥ ३६ ॥

अतश्चैतदेवं यदुपेक्षोपविचाराणामुपेक्षोपविचारानेव प्रहाणाय सन्निश्रयत्वेन दिदेश भगवान्—'द्वे भिक्षव उपेक्षे' इत्यादिवचनात् ।

ननु च *गर्धाश्रितनैष्कम्याश्रितभेदेन षट्त्रिंशच्छास्तृपदानी*ति वचनात् सिद्धमेषां सांक्लेशिकव्यवदानिकत्वं *वैभाषिक*मतानुसारात् ? अदोषः; *आचार्य*स्यापि मनोपविचारव्यतिरिक्तास्तत्र सौमनस्यादयः सन्ति ।

पुनस्त एवेति विस्तरः । त एवाष्टादशोपविचाराः केचिद् भवाश्रिता अभिष्वङ्गाश्रिताः, केचिन्नैष्कम्याश्रिताः । नैष्कम्यम् = निष्कमभावः संक्लेशात् संसारदुःखाद् वा । *गर्धनैष्कम्याश्रितभेदेन* द्वावष्टादशकौ षट्त्रिंशच्छास्तृपदानि । *तद्भेदस्य* तेषां मनोपविचाराणां द्विधाभेदस्य । *शास्त्रा* बुद्धेन । *गमितत्वाद्* देशितत्वाद् यथासूत्रम् ॥ ३५ ॥

क्लेशकर्मवस्तूनीति प्रज्ञापितमिति । "क्लेशास्त्रीणि द्वयं कर्म सप्त वस्तु" (अभि० को० ३. २६) इति वचनात् ॥ ३६ ॥

---

१. प्राक् ज्ञापि०—का० ।

किमस्य बीजादिभिः साधर्म्यम् ?

तद्यथा—बीजादङ्कुरकाण्डपत्रादीनां प्रभवो भवति, एवं क्लेशात् क्लेशकर्मवस्तूनाम् ।

यथा—नागाधिष्ठितं सरो न शुष्यति, एवं क्लेशनागाधिष्ठितं जन्मसरः ।

यथा च—अनपोद्धृतमूला वनस्पतयश्छिन्नाश्छिन्नाः पुनरपि प्ररोहन्ति, एवमनपोद्धृतक्लेशमूला गतयः ।

यथा च—वृक्षाः कालेन कालं पुष्पफलानां प्रसोतारो भवन्ति, एवं क्लेशा अप्यसकृत् क्लेशकर्मवस्तूनां हेतुर्भवन्ति ।

यथा च—तुषावनद्धास्तण्डुलाः प्ररोहणसमर्था भवन्ति न केवलाः, एवं क्लेशप्राप्ततुषावनद्धं कर्म जन्मान्तरविरोहणे समर्थं भवति न केवलमिति । एवं तावत् क्लेशो बीजादिवद् वेदितव्यः ॥ ३६ ॥

तुषितण्डुलवत् कर्म तथैवौषधिपुष्पवत् ।

तुषोऽस्यास्तीति तुषी । तुषस्थानीयः क्लेश उक्तः । इदानीं तुषितण्डुलस्थानीयं कर्मोच्यते । सन्त्योषधयः फलपाकान्ताः, एवं कर्माणि विपच्य पुनर्विपाकानभिनिर्वर्त्तयन्ते ।

यथा च पुष्पं फलोत्पत्तावासन्नं कारणम्, एवं कर्माणि विपाकोत्पत्तौ वेदितव्यानि ।

सिद्धान्नपानवद् वस्तु

यथा सिद्धमन्नं पानं च केवलं परिभोगाय कल्प्यते, न पुनर्विरोहाय; एवं विपाकाख्यं वस्तु । न हि पुनर्विपाकाद्विपाकान्तरं जन्मान्तरेषु प्रवर्धते । यदि हि प्रवर्धेत, मोक्षो न स्यात् । न खल्वेष जन्मसन्तान एवं प्रतीत्यसमुत्पद्यमानो भवचतुष्टयं नातिक्रामति, यदुत—अन्तराभवमुपपत्तिभवं पूर्वकालभवं मरणभवं च । ते च व्याख्याताः ।

एवं कर्माणि विपाकोत्पत्ताविति । आसन्नं कारणमित्यधिकृतम् । क्लेशोऽपि हि कारणं विपाकस्य, तत्तु विप्रकृष्टम् ।

ते च व्याख्याता इति । 'मृत्यूपपत्तिभवयोरन्तराभवतीह यः । (अभि० को० ३.१०) । "स पुनर्मरणात् पूर्वमुपपत्तिक्षणात् परः" (अभि० को० ३.१३) इति वचनाद् व्याख्याताः ।

तस्मिन् भवचतुष्टये ॥ ३७ ॥

उपपत्तिभवः क्लिष्टः,

एकान्तेन । कतमेन क्लेशेन ?

सर्वक्लेशैः स्वभूमिकैः ।

यद्भूमिक उपपत्तिभवस्तद्भूमिकैरेव सर्वक्लेशैः । नहि स क्लेशोऽस्ति येन प्रतिसन्धिबन्धः प्रतिविध्यत इत्याभिधार्मिकाः । क्लेशैरेव तु, न पर्यवस्थानैः स्वतन्त्रैः । यद्यपि साऽवस्था मन्दिका, यस्तु यत्राभीक्ष्णं चरित आसन्नश्च, तस्य तदानीं स एव क्लेश उपतिष्ठते; पूर्वावेधात् ।

अन्तराभवप्रतिसन्धिरप्येवमवश्यं क्लिष्टो वेदितव्यः ।

त्रिधाऽन्ये,

अन्ये त्रयो भवास्त्रिप्रकाराः अन्तराभवादयः कुशलक्लिष्टाव्याकृताः ।

अथैषां भवानां कतमः किंप्रतिसंयुक्तः ?

त्रय आरूप्ये

अन्तराभवं वर्जयित्वा । न ह्यारूप्यधातुः स्थानान्तरपरिच्छिन्नः, यस्य प्राप्त्यर्थमन्तराभवोऽभिनिर्वर्तेत । कामरूपधात्वोरपरिसंख्यानात् सर्व एव चत्वारो भवाः सन्तीत्यनुज्ञापितं भवति ।

उक्तो यथा सत्त्वानां प्रतीत्यसमुत्पादो विस्तरेण ॥

न पर्यवस्थानैः स्वतन्त्रैरिति । ईर्ष्यामात्सर्यक्रोधम्रक्षैः स्वातन्त्र्यमेषाम् । अविद्यानिर्मुक्तैरन्यक्लेशैरसम्प्रयोगात्, अविद्या हि सर्वत्रैव विद्यत इति न तत्संप्रयोगेनास्वातन्त्र्यम् । आह्रीक्यादिभिस्त्वन्यक्लेशसम्प्रयुक्तैः प्रतिसन्धिबन्धो न प्रतिषिध्यते । *यद्यपि सावस्था मन्दिकेति* विस्तरः । यद्यपि सा मरणावस्था मन्दिका; चित्तचैत्तसमुदाचारस्यापटुत्वात् । 'उपेक्षायां च्युतोद्भवौ' (अभि० को० ३.४२) इति वेदनामान्द्यात् । *यस्तु* पुद्गलो *यत्र* क्लेशे*ऽभीक्ष्णं* सततं *चरितः* प्रवृत्तः । *आसन्नश्च* मरणकालस्य पुद्गलस्य । *तदानीं* मरणकाले *स एव क्लेशः* समुदाचरति, समुत्थाय मिथ्यादृष्ट्यादिरपि, *पूर्वावेधात्* पूर्वाक्षेपात् । पूर्वाभ्यासादित्यर्थः । अथ वा—योऽसौ तदानी क्लेश *उपतिष्ठते*, तस्य पूर्वं फलभावेन परिग्रहावेधात् आक्षेपात् स तदानीमुपतिष्ठत इति ।

कामरूपधात्वोरपरिसंख्यानात्, सर्व एव चत्वारो भवाः सन्तीति । त्रय एवारूप्येषु, आरूप्येष्वेव च त्रय इत्यवधारणात् । अनयोरितरयोर्धात्वोर्भवचतुष्टयं तु ज्ञातं भवति ।

अथ कथं सत्त्वानां स्थितिर्भवति ? इत्याह—

आहारस्थितिकं जगत् ॥ ३८ ॥

एको धर्मो भगवता स्वयमभिज्ञायाभिसम्बुध्याख्यातः—"यदुत सर्वसत्त्वा आहारस्थितिकाः" (   ) इति सूत्रपदम् ।

के पुनराहाराः ? चत्वार आहाराः । १. कवडीकाराहारः प्रथमः । औदारिकः, सूक्ष्मश्च । सूक्ष्मोऽन्तराभविकानां गन्धाहारत्वात् ; देवानां प्राथमकल्पिकानां च निःष्यन्दाभावात् ; तैलमिव सिकतास्वङ्गेष्वनुप्रवेशात् । सूक्ष्माणां वा सूक्ष्मो बालकसंस्वेदजन्तुकादीनाम् । २. स्पर्शो द्वितीयः । ३. मनःसञ्चेतना तृतीयः । ४. विज्ञानमाहारश्चतुर्थः ॥ ३८ ॥

तत्र पुनः—

कवडीकार आहारः कामे

न रूपारूप्यधात्वोस्तद्वीतरागाणां[1] तत्रोपपत्तेः । स च—

त्र्यायतनात्मकः ।

कामावचराणि गन्धरसस्प्रष्टव्यायतनानि सर्वाण्येव कवडीकार आहारः; कवडीकृत्याभ्यवहरणात्, मुखनासिकाग्रासत्र्यवच्छेदतः ।

छायातपज्वालाप्रभासु तेषां कथमाहारत्वम् ? बाहुल्येन किलैष निर्देशः ।

निःष्यन्दाभावादिति । मूत्रपुरीषाभावादित्यर्थः । *सूक्ष्माणां वा सूक्ष्म* इति । सूक्ष्माणां स सूक्ष्माहारः । बालका जातमात्राः । *स्वेदजन्तुकादयो* यूकादयः ; आदिशब्देन गर्भस्थाः ॥ ३६ ३८ ॥

कवडीकाराहार इति । कामधातावेव कवडीकाराहार इत्यवधारणात् । कस्मात् ? इत्याह—*तद्वीतरागाणाम्* । कवडीकाराहारवीतरागाणाम् । तत्र *रूपारूप्यधात्वोरुपपत्तेः* । *कवडीकृत्याभ्यवहरणात्* । पिण्डीकृत्य गिलनात् कवडीकारः । कवडीकृत्याभ्यवहरणं पुनर्मुखेन नासिकया ग्रासत्र्यवच्छेदादिति ।

गन्धरसस्प्रष्टव्यायतनानि सर्वाण्येव कवडीकार इत्युक्ते पृच्छति—*छायातपज्वालाप्रभासु तेषां गन्धादीनां कथमाहारत्वम्* । न हि तत्रस्थानां गन्धादीनां कवडीकृत्याभ्यवहरणमस्तीति । *बाहुल्येन किलैष निर्देश* इति । न तत्रस्थानां गन्धादीनां कवडीकारत्वमिति प्रतिपद्यते । बाहुलिकस्तु निर्देशः—"कामे त्र्याय-

---

१. तद्वीतरागस्य—का० ।

यान्यपि तु नाभ्यवह्रियन्ते स्थितिं यापनां[1] चाहरन्ति, तान्यपि सूक्ष्म आहारः, स्नानाभ्यङ्गवदिति ।

कस्मान्न रूपायतनमाहारः, तदपि कवडीकृत्याभ्यवह्रियते ?

न रूपायतनं तेन स्वाक्षमुक्तानुग्रहात् ॥ ३९ ॥

आहारो हि नाम य इन्द्रियमहाभूतानामनुग्रहाय संवर्त्तते । **रूपायतनं** चाभ्यवहारकाले स्वमिन्द्रियं तन्महाभूतानि च[2] नानुगृह्णाति । कुत एवान्यानि इन्द्रियाण्यनुग्रहीष्यति[1]; अविषयत्वात् ।

यदापि च दृश्यमाने सुखसौमनस्ये आदधाति, तदापि तदालम्बनः सुखवेदनीयः स्पर्श आहारः[3], न रूपम्; मुक्तानामनागाम्यर्हतां सुमनोज्ञमप्याहारं पश्यतामनुग्रहाभावात् ॥ ३९ ॥

तनात्मकः" इति । किलशब्दः परमतेन स्वाभिप्रायोऽधिक्रियते । *यान्यपि त्विति* विस्तरः । यान्यपि तु *नाभ्यवह्रियन्ते* छायादिषु *स्थितिं चाहरन्ति यापनां चाहरन्ति तान्यपि सूक्ष्म आहारः स्नानाभ्यङ्गवत्* । यथा स्नानं चाभ्यङ्गश्च न कवडीकृत्याभ्यवह्रियते, आहारश्च तद्वदिति ।

"*स्वाक्षमुक्तानुग्रहात्*" इति । स्वाक्षस्य स्वेन्द्रियस्य तेनानुग्रहात् मुक्तानाञ्च कामधातोरनागाम्यर्हतामननुग्रहात् । न रूपायतनमाहारः । *रूपायतनं चाभ्यवहारकाल* इति । यस्मिन् काले अन्तर्मुखप्रविष्ट आहारो भुज्यते चक्षुर्विषयातीतः, तस्मिन् काले । *स्वमिन्द्रियं* चक्षुरिन्द्रियम्, *तन्महाभूतानि* च तस्येन्द्रियस्य यानि महाभूतान्याश्रयस्तानि *नानुगृह्णाति* तद्रूपायतनम् । कुत *एवान्यानीन्द्रियाणि* श्रोत्रादीन्यनुग्रहीष्यति ? *अविषयत्वात्* । अविषयो हि श्रोत्रादीनां रूपायतनम् ।

दृश्यमानं तर्हि भोजनकालेऽनुग्रहीष्यति ? इत्यत आह–*यदापि च दृश्यमान* इति विस्तरः । अथ कथमिदं गम्यते ? *तदापि तदालम्बनः सुखवेदनीयः स्पर्श आहारो न रूपमिति* । अत आह–*मुक्तानामिति* विस्तरः । यदि तद् दृश्यमानमाहारकृत्यं कुर्यात्, मुक्ता*नामनागाम्यर्हतां* कवडीकाराहारवीतरागाणां *सुमनोज्ञमप्याहारं पश्यतामनुग्रहं* कुर्यात् । यथा गन्धरसस्प्रष्टव्यायतनानीन्द्रियमहाभूतानामनुग्रहं कुर्वन्त्यभ्यवहारकाले, तस्मात्तदालम्बनः सुखवेदनीयः स्पर्श आहारो भवतीति सिद्धम् ॥ ३९ ॥

---

१. का० पुस्तके नास्ति । २. वा—का० । ३. आहारो भवति—का० ।

स्पर्शसञ्चेतनाविज्ञा आहाराः सास्रवास्त्रिषु ।

स्पर्शस्त्रिकसन्निपातजः । चेतना, मनस्कर्म, विज्ञानं च सास्रवाण्येवाहाराः **त्रिष्वपि** धातुषु संविद्यन्ते ।

किमर्थं नानास्रवाणि ? यस्मात् भवापोषणार्थं आहारार्थः । तानि च भवक्षयायोत्थितानीति वैभाषिकाः । अपि तु सूत्र उक्तम्—"चत्वार इमे आहारा भूतानां सत्त्वानां स्थितये यापनायै सम्भवैषिणां चानुग्रहाय" (   ) इति । न चैवमनास्रवा धर्मा इति नाहाराः ।

भूता हि तावत् सत्त्वा उपपन्ना इति विज्ञायन्ते ।

अथ सम्भवैषिणः कतमे ?

मनोमयः सम्भवैषी गन्धर्वश्चान्तराभवः ॥ ४० ॥
निर्वृत्तिश्च

अन्तराभवो ह्येभिरभिधानैरुक्तो **भगवता**—१. स एव मनोनिर्जातत्वात् **मनोमय** उक्तः; शुक्रशोणितादिकं किञ्चिद् बाह्यमनुपादाय भावात् । २. सम्भवैषणशीलत्वात् **सम्भवैषी** । ३. गन्धर्वणात् **गन्धर्वः** । ४. उपपत्त्यभिमुखत्वादभि**निर्वृत्तिः** । "अव्याबाधमात्मभावमभिनिर्वर्त्य सव्याबाधे लोके उपपद्यते" इति सूत्रपदात् ।

तथा "अस्ति पुद्गलो यस्याभिनिर्वृत्तिसंयोजनं प्रहीणं नोपपत्तिसंयोजनम्"

"*स्पर्शसञ्चेतनाविज्ञा*" इति । विज्ञेत्यादन्तमेतत्, प्रज्ञेति यथा । विज्ञानमित्यर्थः । कवडीकाराहारस्त्र्यायतनात्मकत्वात् सास्रव इति सिद्धः । त्रयस्तु स्पर्शादयः सास्रवाः अनास्रवाश्च सम्भवन्तीत्यतस्त एव विशेषिताः ।

"*सास्रवाः*" इति । *न चैवमनास्रवा धर्मा* इति । न चैवं ते भूतानां स्थितये यापनायै सम्भवैषिणां चानुग्रहायेति ।

मनोनिर्जातत्वादिति । "*निर्वृत्तिः*" इति । उपपत्त्यभिमुखावधारणम् । अत एव ब्रवीति—*शुक्रशोणितादिकं किञ्चिद् बाह्यमनुपादायभावादि*ति । आदिशब्देन कर्दमपुष्पादीनां ग्रहणम् । *उपपत्त्यभिमुखत्वादभिनिर्वृत्तिरि*ति । उपपत्त्यभिमुखी निर्वृत्तिर्जन्मास्येत्यभिनिर्वृत्तिः । *सव्याबाधमि*ति । सदुःखम् । *अव्याबाधमभिनिर्वर्त्येति* । इदमत्र ज्ञापकम्—भवोऽभिनिर्वृत्तिरिति ।

तथास्ति पुद्गल इति विस्तरः । अस्मात् सूत्राच्चतुष्कोटिकादभिनिर्वृत्तिरन्तराभव इति—अस्ति पुद्गलो *यस्याभिनिर्वृत्तिसंयोजनं प्रहीणं नोपपत्तिसंयोजनम्,*

इति सूत्रे चतुःकोटिकात् । प्रथमा कोटिर्द्विधातुवीतरागस्योर्ध्वस्रोतसोऽनागामिनः । द्वितीयान्तरापरिनिर्वायिणः । तृतीयाऽर्हतः[1] । चतुर्थ्येतानाकारान् स्थापयित्वा ।

भूता वाऽर्हन्तः सम्भवैषिण सतृष्णाः ।

अथ कत्याहाराः सत्त्वानां स्थितये ? कति सम्भवैषिणामनुग्रहाय ?

सर्वेऽप्युभयथेति वैभाषिकाः । कवडीकाराहारोऽपि हि तद्रागिणां पुनर्भवाय संवर्तते । उक्तं हि भगवता—"चत्वार इमे आहारा रोगस्य मूलं गण्डस्य शल्यस्य, जरामरणस्य प्रत्ययः" (　　　) इति ।

अस्ति यस्योपपत्तिसंयोजनं प्रहीणं नाभिनिर्वृत्तिसंयोजनम्, अस्ति यस्याभिनिर्वृत्तिसंयोजनं च प्रहीणमुपपत्तिसंयोजनं च, अस्ति यस्य न वाभिनिर्वृत्तिसंयोजनं प्रहीणं नोपपत्तिसंयोजनम् । *द्विधातुवीतरागस्येति* । काम-रूपधातुवीतरागस्येति । *अनागामिन* इति विशेषणं पृथग्जनानामन्तराभवसंयोजनस्यात्यन्ताप्रहाणात् । "तद्धि भिक्षवः प्रहीणं यदार्यया प्रज्ञया प्रहीणम्" (　　　) इति वचनात् । तस्य च पुनर्भावित्वात् । तत्र प्रथमा कोटिर्द्विधातुवीतरागस्यानागामिनः, *द्वितीयान्तरापरिनिर्वायिणः, तृतीयार्हतः, चतुर्थी* तदन्येषामस्मदादेः पृथग्जनस्यार्यस्य चावीतरागस्य कामधातुवीतरागस्य रूपधातावुपपद्यमानस्य चेति ।

भूता वार्हन्त इति । पूर्वमेवोक्तः पर्यायः । भूताः उत्पन्नाः सम्भवैषिणोऽन्तराभविका इति इदानीमयमपरः पर्यायः । भूता अर्हन्तस्त्रैधातुकवीतरागत्वात् । *सम्भवैषिणः सतृष्णाः*, त्रैधातुके सम्भवैषित्वात् ।

स्थितय इति । अवस्थापनाय । *अनुग्रहायेति* । पुनर्भवाय, सम्भवायेत्यर्थः ।

सर्वेऽप्युभयथेति । सर्वेऽपि चत्वार आहारा भूतानां सत्त्वानां स्थितयेऽनुग्रहाय च । तथा सम्भवैषिणामिति । युक्तं तावन्मनःसञ्चेतना कर्मस्वभावत्वात्; तत्प्रभावितं च विज्ञानं बीजम्; स्पर्शोऽपि तत्सम्प्रयुक्तो भवत्यनुग्रहायेति; कवडीकारस्तु कथं सम्भवैषिणामनुग्रहायेति ? अत उच्यते—*कवडीकारोऽपि हीति* विस्तरः । *तद्रागिणामिति* । कवडीकाररागिणाम् । *पुनर्भवाय संवर्तत* इति । अस्य ज्ञापनार्थमिदं सूत्रपदमुपन्यस्यते—*उक्तं हि भगवतेति* विस्तरः । तत्र रोगादिभिः पञ्च उपादानस्कन्धा उक्ताः । तस्य *रोगस्य चत्वार आहारा मूलम्* । मूलं च हेतुरित्यनेन कवडीकारोऽपि तद्रागिणां पुनर्भवाय संवर्तत इति सिद्धम् । अन्ये पुनः *जरामरणस्य प्रत्यय* इत्येतदेवोदाहरणं ब्रुवते । अस्माज्जन्मनः परेण

---

१. अर्हताम्—का० ।

मनःसञ्चेतनापि चेह स्थितये दृश्यते। एवं हि वर्णयन्ति—दुर्भिक्षाभ्याहतेन किल पित्रा पुत्रकौ सक्तव इति भस्मना भस्त्रां परिपूर्य कीलके आसज्याश्वासितौ। तौ च तां परिकल्पयन्तौ चिरमप्यासितौ केनापि चोद्घाटितायां भस्मेति नैराश्यमापन्नौ व्यापन्नाविति। पुनश्च महासमुद्रे भग्नयानपात्राः पुरुषाः स्थलमिति महान्तं फेनपिण्डं प्रद्रुताः, आमृश्य चैनं निराशा उपरेमुरिति। सङ्गीतिपर्याये चोक्तम्—महासमुद्रादौदारिकाः प्राणिनो जलात् स्थलमभिरुह्य सिकतास्थलेऽण्डानि स्थापयित्वा सिकताभिरवष्टभ्य पुनरपि महासमुद्रेऽवतरन्ति। तत्र यासां मातॄणामण्डान्यारभ्य स्मृतिर्न मुष्यते तान्यण्डानि न पूतीभवन्ति, यासां तु मुष्यते तानि पूतीभवन्ति।

तदेतन्न वर्णयन्ति सौत्रान्तिकाः—मा भूत् परकीयेणाहारेणाहार इति। एवं तु वर्णयन्ति—येषामण्डानां मातरमारभ्य स्मृतिर्न मुष्यते तानि न पूतीभवन्ति, येषां तु मुष्यते तानि पूतीभवन्ति। तस्याः स्पर्शावस्थायाः स्मरन्तीति।

अथ कस्माच्चत्वार एवाहाराः, ननु च सर्व एव सास्रवा धर्मा भवानां पोषकाः? यद्यप्येतदेवम्, तथापि प्राधान्येनोक्तम्—

इह पुष्ट्यर्थमाश्रयाश्रितयोर्द्वयम्।
द्वयमन्यभवाक्षेपनिवृत्त्यर्थं यथाक्रमम्॥ ४१॥

आश्रयो हि सेन्द्रियः कायः, तस्य पुष्ट्ये कवडीकाराहारः। आश्रिताश्चित्तचैत्ताः, तेषां पुष्ट्ये स्पर्शः। अनयोस्तावदिहोत्पन्नस्य भवस्य पोषणे प्राधान्यम्। मनःसञ्चेतनया पुनर्भवस्याक्षेपः। आक्षिप्तस्य पुनः कर्मपरिभाविताद्

जरामरणं व्यवस्थापितमित्यभिप्रायः। कवडीकारोऽपि भूतानां सत्त्वानामिह स्थितय इति युक्तम्; प्रत्यक्षत्वात्। तथा सुखवेदनीयः स्पर्शो विज्ञानं चानुग्राहकमित्युक्तम्।

अथ मनःसञ्चेतना कथमिति? अत इदमुच्यते—*मनःसञ्चेतनापि चेति* विस्तरः। अत एव मनःसञ्चेतनाग्रहणेन स्पर्शविज्ञाने अपि गृहीते भवतः; तत्सम्प्रयोगित्वात्। *प्रद्रुता* इति प्रसृताः। *सङ्गीतिपर्याय* इत्यभिधर्मशास्त्रे। *तेषां पुष्ट्ये स्पर्श* इति। सुखवेदनीयेनानुग्रहात्। "*यः* कश्चिद् वेदनास्कन्धः संज्ञास्कन्धः, सर्वः स स्पर्शं प्रतीत्य" इति वचनात्। *मनःसञ्चेतनायाः पुनर्भवस्य*

विज्ञानबीजादभिनिर्वृत्तिरित्यनयोरनुत्पन्नस्य भवस्याकरणे प्राधान्यम् । अतश्चत्वार उक्ताः । पूर्वकौ हि द्वौ धात्रीस्थानीयौ; जातस्य पोषकत्वात् । उत्तरौ मातृ-स्थानीयौ; जनकत्वादिति ।

यः[1] कवडीकारः सर्वः स आहारः ? स्यात् कवडीकारो नाहार इति चतुष्कोटिकम् । प्रथमा कोटिः—यं कवडीकारं प्रतीत्येन्द्रियाणामपचयो भवति महाभूतानां च परिभेदः । द्वितीया कोटिः—त्रय आहाराः । तृतीया—यं कवडीकारं प्रतीत्येन्द्रियाणामुपचयो भवति महाभूतानां च वृद्धिः । चतुर्थी—एतानाकारान् स्थापयित्वा ।

एवं स्पर्शादिभिरपि यथायोगं चतुःकोटिकानि कर्त्तव्यानि ।

आक्षेप इति । तस्याः कर्मस्वभावत्वात् । कथञ्च पुनस्तयोः पुनर्भव आक्षिप्यते ? तदुत्पत्तिप्रत्ययपरस्परानुकूल्यावस्थानात् । *कर्मपरिभाविताद् विज्ञानबीजादभि-निर्वृत्तिरिति* । बीजादिवाङ्कुरस्य पुनर्भवस्योत्पाद इत्यर्थः ।

यः कवडीकारः सर्वः स आहार इति प्रश्ने आह—*स्यात् कवडीकारो नाहारः*, स्यादाहारो न कवडीकारः, स्यादुभयम्, स्यान्नोभयम् *इति चतुष्कोटिकम्* । *द्वितीया कोटिस्त्रय आहारा* इति । मनःसञ्चेतनास्पर्शविज्ञानानि । चतुर्थ्येताना-*कारान् स्थापयित्वेति* । शब्दो दुःखवेदनासम्प्रयुक्ताश्च सर्वे चित्तचैत्ताः ।

एवं स्पर्शादिभिरपि यथायोगं चतुष्कोटिकानि कर्त्तव्यानीति । यः कश्चित् स्पर्शः सर्वः स आहारः । स्यात् स्पर्शो नाहर इति चतुष्कोटिकम् । एवं या काचिन्मनःसञ्चेतना सर्वा सा आहारः । स्यान्मनःसञ्चेतना नाहार इति चतुष्कोटिकम् । तथा यत् किञ्चिद् विज्ञानं सर्वं तदाहारः । स्याद्विज्ञानं नाहार इति चतुष्कोटिकम् । स्पर्शस्य तावत् प्रथमा कोटिः—यं स्पर्शं प्रतीत्येन्द्रियाणा-मुपचयो भवति महाभूतानां च परिभेदः, द्वितीया—त्रय आहाराः, तृतीया—यं स्पर्शं प्रतीत्येन्द्रियाणामपचयो भवति महाभूतानाञ्च वृद्धिः, चतुर्थी—एताना-कारान् स्थापयित्वेति । एवं यावद्विज्ञानं चतुष्कोटिकम् । प्रथमा कोटिः—यद्विज्ञानं प्रतीत्येन्द्रियाणामपचयो भवति महाभूतानां परिभेदः, द्वितीया कोटिः—त्रय आहारा विज्ञानवर्ज्याः, तृतीया—यद्विज्ञानं प्रतीत्येन्द्रियाणा-मुपचयो भवति महाभूतानां च वृद्धिः, चतुर्थी—एतानाकारान् स्थापयित्वा ।

---

१. यः कश्चित्—का० ।

स्यात् स्पर्शादीन् प्रतीत्येन्द्रियाणामुपचयो महाभूतानां च वृद्धिः, न च त आहाराः ? स्यादन्यभूमिकाननास्रवांश्च । योऽपि हि परिभुक्तो भोक्तुर्बाधामादधाति सोऽप्याहारः[1]; आपातेऽनुग्रहात् । द्वयोर्हि कालयोराहार आहारकृत्यं करोति—परिभुज्यमानः, जीर्यंश्चेति वैभाषिकाः ॥

अथ कस्यां गतौ कत्याहाराः ? सर्वासु सर्वे । एवं योनिष्वपि ।

कथं नरकेषु कवडीकार आहारः ? प्रदीप्तायस्पिण्डाः, क्वथितं च ताम्रम् । यद्युपघातकोऽप्याहारो भवति चतुःकोटिकं बाध्यते, प्रकरणग्रन्थश्च—"कवडीकार आहारः कतमः ? यं कवडीकारं प्रतीत्येन्द्रियाणामुपचयो भवति[2] विस्तरेण यावद् विज्ञानम्" ?

उपचयाहाराभिसन्धिवचनादविरोधः । अपचयाहारस्तु नरकेषु आहारलक्षणप्राप्तत्वात्[3] ।

स्यात् स्पर्शादीन् प्रतीत्येति । विस्तरेणापरः प्रश्नः । स्पर्शादीनिति स्पर्शचेतनाविज्ञानधर्मानित्येवं नेतव्यम् । एवं च ग्रन्थः कर्त्तव्यः—स्यात् स्पर्शादीन् प्रतीत्येन्द्रियाणामुपचयो भवति महाभूतानां च वृद्धिः, न च ते आहाराः । *स्यात् अन्यभूमिकाननास्रवांश्च* । प्रतीत्येत्यभिसम्बन्धाद् द्वितीयाप्रयोगः । योऽपि *हि परिभुक्त* इति विस्तरः । केन सम्बन्धेनेदमुक्तम् ? अन्यभूमिकाननास्रवांश्च प्रतीत्यानाहार इत्युक्तेऽर्थादेतदुक्तं भवति—स्वभूमिकान् सास्रवान् प्रतीत्याहार इति । यं चेह परिभुक्त इति । कवडीकारो *भोक्तुर्बाधामादधाति* । स किमाहारः ? *सोऽप्याहारः; आपाते* भोजनवेलायामनुग्रहात् ।

सर्वासु सर्वः । एवं योनिष्विति । कामधातौ पञ्चानां गतीनां चतसृणां च योनिनां सद्भावात् । *चतुष्कोटिकं बाध्यते, प्रकरणग्रन्थश्चेति* । प्रथमे चतुष्कोटिके येयं तृतीया कोटिः—यं कवडीकारं प्रतीत्येन्द्रियाणामुपचयो भवति महाभूतानां च वृद्धिरिति, अस्या बाधाच्चतुष्कोटिकं बाध्यते न केवलमुपचयकरः, किं तर्हि ? अपचयकरोऽपि कवडीकाराहार इति । प्रकरणग्रन्थश्च किं बाध्यते ? कीदृशः प्रकरणग्रन्थ इति तद्दर्शयन्नाह—*कवडीकाराहारः कतमः, यं कवडीकारं प्रतीत्येन्द्रियाणामुपचयो भवति विस्तरेण यावद्विज्ञानमिति । उपचयाहाराभिसन्धिवचनादविरोध* इति । उपचयाहाराभिप्रायेण चतुष्कोटिकवचनं प्रकरणग्रन्थवचनं च, तस्मात्तयोरविरोधः । यो ह्युपचयाय स मुख्यः । *आहारलक्षणप्राप्तत्वा-*

---

१. आहार एव—का० । २. भवति महाभूतानां च वृद्धिर्यापनाऽनुयापनेति—का० ।
३. लक्षण०—का० ।

सोऽपि हि जिघत्सां पिपासां च[1] प्रतिहन्तुं[2] समर्थ इति। अपि तु प्रत्येकनरकेषु मनुष्यवत् कवडीकाराहारसद्भावाद् युक्तं पाञ्चगतिकत्वम्।

उक्तं भगवता—"यश्च बाह्यकानामृषीणां कामेभ्यो वीतरागाणां शतं भोजयेद्, यश्चैकं जम्बूषण्डगतं पृथग्जनम्; अतो दानादिदं दानं महाफलतरम्" (　　　　) इति।

कोऽयं जम्बूषण्डगतो नाम पृथग्जनः?

१. जम्बूद्वीपनिवासिनः कुक्षिमन्त इत्येके। तदेतन्न युक्तम्; एकमिति वचनात्। कश्चात्र विशेषः? स्याद्यदि भूयसः पृथग्जनान् भोजयित्वा भूयः पुण्यं स्यात्, नाल्पीयसो वीतरागानिति।

२. सन्निकृष्टो बोधिसत्त्व इत्यपरे। तदेतन्न वर्णयन्ति—"बहुतरं हि तस्मै दत्त्वा पुण्यं नार्हत्कोटिभ्यः" इति। अतो निर्वेधभागीयलाभी पृथग्जन एषोऽभिप्रेत इति वैभाषिकाः।

दिति। कवडीकाराहारलक्षणप्राप्तत्वात्।

कथम्? इत्याह—*सोऽपि हि जिघत्सां पिपासां च प्रतिहन्तुं समर्थ* इति। प्रदीप्तायष्पिण्डलक्षण आहारो जिघत्साप्रतिघाते समर्थः, क्वथितताम्रलक्षणः पिपासाप्रतिघाते इति योज्यम्।

कवडीकाराहारप्रसङ्गेनेदमुच्यते—*उक्तं भगवता यश्च बाह्यकानामिति* विस्तरः। जम्बूद्वीपः = जम्बूषण्डः। तथा ह्युक्तं भगवता—"याः काश्चित् जम्बूषण्डात् स्रवन्त्यः सर्वाः समुद्रनिम्नाः समुद्रप्राग्भाराः" इति। तस्मिन्नवासिनो *जम्बूषण्डगताः कुक्षिमन्तो* भोजनशक्त्युपेता अकललाद्यवस्था इत्यभिप्रायः।

तदेतदयुक्तमिति वचनादिति। यदि जम्बूद्वीपवासिनः कुक्षिमन्तो जम्बूषण्डगता इष्येरन्, यश्च जम्बूषण्डगतान् पृथग्जनानिति वक्तव्यं स्यात्। उक्तं च—'यश्चैकं जम्बूषण्डगतम्' इति। तस्मादयमर्थो न घटते। *कश्चात्र विशेष* इति। किमत्राश्चर्यं यद्बहून् भोजयित्वा बहु पुण्यं स्यात्, न त्वल्पीयसः शतमात्रान् वीतरागानित्यर्थः।

सन्निकृष्टो बोधिसत्त्व इति। आसन्नाभिसम्बोधिः। "बोधिसत्त्वः कुतो यावद्यतो लक्षणकर्मकृत्" (अभि० को० ४.११०) इत्यभिप्रायः।

---

१. का० पुस्तके नास्ति।　　　　२. हन्तुं—का०।

३. न त्वियमन्वर्था संज्ञा, नापि[1] परिभाषिता सूत्रे, शास्त्रे वा। जम्बूषण्डगतो निर्वेधभागीयलाभीति परिकल्प एवायं केवलः। बोधिसत्त्व एव त्वेष[2] जम्बूषण्डगतो[2] युज्यते। स हि पृथग्जनः कामवैराग्यसम्बन्धेन तदानीं तेभ्यो विशिष्यमाण उक्त इति। अनन्तेभ्योऽपि हि स तेभ्यो विशिष्यमाणः। शतग्रहणं तु पूर्वाधिकारात्। इत्थं चैतदेवं यदेनमपास्य[3] बाह्यकेभ्य एव स्रोतआपत्तिफलप्रतिपन्नकं विशेषयाम्बभूव। अन्यथा हि जम्बूषण्डगतादेव व्यशेषयिष्यत्॥ ४०-४१॥

उक्तो यथा सत्त्वानां प्रतीत्यसमुत्पादः॥
यथावस्थितिश्च्युतिरप्युक्ता यथायुःक्षयादिभिः॥

न त्वियमनर्था संज्ञेति। नार्थानुगता, नार्थवाचकं पदमित्यर्थः। *नापि परिभाषिता*। अर्थमनपेक्ष्य। *बोधिसत्त्व एव त्वेष जम्बूषण्डगत* इति। कृषिग्रामकं व्यवलोकनाय निर्गतः सर्वार्थसिद्धो बोधिसत्त्वो जम्बूवृक्षमूले निषण्णः प्रथमं ध्यानमुत्पादितवान्। अत आह—*स हि पृथग्जनः कामवैराग्यसम्बन्धेनेति*। स चापि हि बोधिसत्त्वः पृथग्जनः कामवीतरागश्च, बाह्यकाश्च तथैव कामवीतरागाः पृथग्जनाश्च; अनेन सम्बन्धेन तेभ्यो बाह्यकेभ्यो बहुतरेण दानफलेन विशिष्यमाण इत्येवमुक्तः। स तेभ्यो बाह्यकेभ्योऽनन्तेभ्यो विशिष्यमाणो "बोधिसत्त्वाय चामेया अनार्येभ्योऽपि दक्षिणा" इति वचनात्। *शतग्रहणं तु पूर्वाधिकारादिति*। तत्रैव सूत्रे शताधिकारोऽधिकृतः। "यश्च तिर्यग्योनिगतानां शताय दानं दद्यात्, यश्चैकस्मै दुःशीलाय मनुष्यभूताय दानं दद्यात्, ततः शतगुणो विपाकः प्रतिकाङ्क्षितव्यः। यावद् यश्च बाह्यकानाम्" इति विस्तरः। *इत्थं चैतदेवमिति*। इत्थं चैतदेव बोधिसत्त्व एव त्वेष जम्बूषण्डे निषण्णो युज्यत इति। *यदेनं बोधिसत्त्वमपास्य*। बाह्यकेभ्य एव *स्रोतआपत्तिफलप्रतिपन्नकं विशेषयाम्बभूवेति*। बाह्यकेभ्यो वीतरागेभ्यः स्रोतआपत्तिफलप्रतिपन्नकाय दानमप्रमेयतरम्, स्रोतआपन्नाय ततोऽप्रमेयतरम्, सकृदागामिफलप्रतिपन्नकायेति विस्तरः। यदि निर्वेधभागी जम्बूषण्डगतोऽभविष्यद् *जम्बूषण्डगतादेव व्यशेषयिष्यत्*। कथम्? यश्च जम्बूषण्डगतानां शतं भोजयेद् यश्चैकं स्रोतआपत्तिफलसाक्षात्क्रियायै प्रतिपन्नकम्, अतो दानादिदं महाफलतरमिति। न त्वेवम्। स्रोतआपत्तिफलप्रतिपन्नकादिभ्यो विशिष्टतरत्वादतो बोधिसत्त्व एव त्वेष जम्बू-

---

१. नापि क्वचित्—का०। २-२. त्वेषु जम्बुद्वीपषण्डेषु निषिण्णो—का०।
३. यदेनं पर्युदस्य—का०।

इदमिदानीं वक्तव्यम्—कतमस्मिन् विज्ञाने वर्त्तमाने च्युत्युपपत्ती भवतः ? इत्याह—

छेद-सन्धान-वैराग्य-हानि-च्युत्युपपत्तयः
मनोविज्ञान एवेष्टाः

कुशलमूलसमुच्छेदः, कुशलमूलप्रतिसन्धानम्, धातुभूमिवैराग्यम्, परिहाणिः, च्युतिः, उपपत्तिश्च—एते षड् धर्मा **मनोविज्ञान** एवेष्यन्ते, नान्यत्र। उपपत्तिवचनादन्तराभवप्रतिसन्धिरप्युक्तरूपो वेदितव्यः।

वेदनायां तु—

उपेक्षायां च्युतोद्भवौ ॥ ४२ ॥

च्युतिरेव च्युतम्। उपपत्तिः = उद्भवः। एतावदुःखासुखायां वेदनायां भवतः, तस्या अपटुत्वात्। इतरे हि वेदने पट्व्यौ। न च पटुविज्ञाने च्युत्युपपत्ती युज्येते ॥ ४२ ॥

तत्रापि च मनोविज्ञानेऽपि—

नैकाग्राचित्तयोरेतौ

'च्युतोद्भवौ' इति वर्तते। न हि समाहितचित्तस्यास्ति च्युतिः, उपपत्तिर्वा;

षण्डगतो युज्यते। *आयुःक्षयादिभिरिति*। अस्त्यायुःक्षयान्मरणं न पुण्यक्षयाद्, अस्ति पुण्यक्षयान्नायुःक्षयादित्यादि ॥ ४०–४१ ॥

छेदसन्धानवैराग्य इति विस्तरः। *कुशलमूलसमुच्छेदो* मिथ्यादृष्ट्या। सा च मानस्येव; सन्तीरकत्वात्। *कुशलमूलप्रतिसन्धानं* सम्यग्दृष्ट्या विचिकित्सया वा, ते च मानस्यौ। *धातुभूमिवैराग्यम्*। धातुभूमितो वा वैराग्यं मनोविज्ञान एव, समाहित एव चित्ते लभ्यत्वात्। *परिहाणिरयोनिशो*मनसिकारप्रवर्तिता। मनोविज्ञानेन चायोनिशोमनसिकारो विकल्प इति। *च्युतिः* संक्षिप्तपञ्चेन्द्रियगोचरस्य प्रवाहच्छेदानुकूले विज्ञाने भवति। *उपपत्तिरपि* विपर्यस्तमतेर्भवतीति मनोविज्ञान एव युज्यते। *अन्तराभवप्रतिसन्धिरप्युक्तरूप* इति। प्रतिसन्धिसामान्यादनुक्तोऽप्युक्तकल्प इति नोच्यत इत्यभिप्रायः।

च्युतिरेव च्युतम्। एकार्थतां दर्शयति; भावे क्तवोत्पन्नत्वात्। *इतरे हि वेदने पट्व्याविति*। सुखदुःखे ॥ ४२ ॥

विसभागभूमिकत्वाद्, आभिसंस्कारिकत्वाद्, अनुग्राहकत्वाच्च ।

नाप्यचित्तकस्य[1] सा, न ह्यचित्तक उपक्रन्तुं[2] शक्येत । यदा चास्याश्रयो विपरिणन्तुमारभेत, तदानीमवश्यमस्य[3] तदाश्रयप्रतिबद्धं चित्तं सम्मुखीभूय पश्चात् प्रच्यवेत, नान्यथा ।

उपपत्तौ च चित्तच्छेदहेत्वभावाद्, विना च क्लेशेनानुपपत्तेरयुक्तमचित्तकत्वम् ।

विसभागभूमिकत्वादिति । समाहितं चित्तं समाहितभूमिकत्वाद् विसभागं कामधातोः । अतश्च्युतिचित्तमुपपत्तिचित्तं वा न युज्यते । यदा तर्हि रूपधातावेव म्रियते उपपद्यते वा, तदा समाहितभूमिकं चित्तं तद् भविष्यति ? इत्यत आह—*आभिसंस्कारिकत्वादिति* । अभिसंस्कारो यत्नः, अभिसंस्कारेण निर्वृत्तमाभिसंस्कारिकम्, तद्भावः, तस्मात् । न तदाभिसंस्कारिकं च्युतिचित्तमुपपत्तिचित्तं वा युज्यते; मरणावस्थाया अपटुत्वात् । *अनुग्राहकत्वाच्च* । यस्माच्च समाहितं चित्तमनुग्राहकं न च्छेदानुकूलम्, अतोऽपि समाहितचित्तस्य च्युतिर्नास्ति ।

नाप्यचित्तकस्येति विस्तरः । नाप्यचित्तकस्य । किम् ? च्युतिरुपपत्तिर्वेति प्रकृतम् । अचित्तको निरोधसमापत्तिसमापन्नोऽसञ्ज्ञिसमापत्तिसमापन्नस्तद्विपाके वावस्थितः । *सोऽचित्तक उपक्रन्तुं* मारयितुं न शक्यते शस्त्रादिभिः । अतो नाचित्तकस्यास्ति च्युतिः । *यदा चास्याश्रयो विपरिणन्तुमारभेतेति* । शस्त्रेनाग्निना वोपक्रमान्निरोधसमापत्तिमसंज्ञिसमापत्तिं वा समापन्नस्यासंज्ञिसमापत्तेर्विपाके स्थितस्य विपाकावेधसमाप्तेरवश्यमस्य *तदानीमाश्रयप्रतिबद्धं चित्तमाश्रये बीजभावेनास्ति* । तत् *सम्मुखीभूय पश्चात् प्रच्यवेत* । कः प्रच्यवेत ? पुद्गलः । यदि पुद्गलोऽधिक्रियेत, असमानकर्तृकत्वात् क्त्वाविधिर्न प्राप्नोति ? चित्तं तर्हि प्रच्यवेत ।

अथवैवमभिसम्बन्धः—यदा चाश्रयो विपरिणन्तुमन्यथात्वमापत्तुमारभेत, अवश्यमस्य पुद्गलस्य तदाश्रयप्रतिबद्धं बीजभावेनावस्थितं चित्तं सम्मुखीभूय समुदाचर्य परिणन्तुमारभेत । पश्चात् प्रच्यवेत पुद्गल इति ।

अथ वा—सम्मुखीभूयेति सम्मुखीभाव्येत्यर्थे णिलोपात् । "अस्ति पर्णरुहो वातः, अस्ति पर्णमुखोऽपरः" इति यथा ।

उपपत्तौ त्वयुक्तम्, अचित्तकत्वात् । कस्मात् ? *चित्तच्छेदहेत्वभावात्* । अवश्यं क्लिष्टतया प्रतिसन्धिचित्तस्य निरोधसमापत्त्याद्यसम्भवात् । *विना च क्लेशेनानुप-*

---

१. नाप्यचित्तस्य—का० । २. उपक्रमितुं—का० ।
३. तदावश्य०—का० ।

मरणभवस्त्रिप्रकार इत्युक्तम् । अर्हस्तु—

निर्वात्यव्याकृतद्वये ।

ऐर्यापथिके, विपाकचित्ते वा । अस्ति चेत्, कामधातौ विपाक उपेक्षा । नास्ति चेत्, ऐर्यापथिक एव ।

किमर्थमव्याकृत एव नान्यस्मिन् ? तद्धि चित्तच्छेदानुकूलम्; दुर्बलत्वात् ।

अथ म्रियमाणस्य कस्मिन् शरीरप्रदेशे विज्ञानं निरुध्यते ? सकृन्मरणे समनस्कं कायेन्द्रियं सहसाऽन्तर्धीयते । यदि तु क्रमेण च्यवते, ततः—

क्रमच्युतौ पादनाभिहृदयेषु मनश्च्युतिः ॥ ४३ ॥

अधोनृसुरगाजानां

अधो गच्छन्तीत्यधोगाः, अपायगामिनः । नॄन् गच्छन्तीति नृगाः, मनुष्यगामिनः । सुरान् गच्छन्तीति सुरगाः, देवगामिनः । तेषां यथासंख्यं पादयोर्नाभ्यां

पत्तेः । सर्वक्लेशैर्हि तद्भूमिकैरुपपत्तिप्रतिसन्धिबन्धो भवति, न च चित्तमन्तरेण क्लेशाः कदाचिदपि भवन्तीति । अतोऽपि नास्त्यचित्तकस्योपपत्तिः ।

मरणभवस्त्रिप्रकार इत्युक्तमिति । "उपपत्तिभवः क्लिष्टः सर्वक्लेशैः स्वभूमिकैः" (अभि० को० ३.३८) इति । उपपत्तिभव एव क्लिष्ट इत्यवधारणात् । मरणपूर्वान्तिकालान्तराभवास्त्रिप्रकाराः कुशलाकुशलाव्याकृता उक्ताः ।

अथ वा—"निरोधयत्युपरमो नारूप्ये जीवितं मनः, उपेक्षां च" इति विस्तरेण यावत् "शुभे सर्वत्र पञ्च च" (अभि० को० २.१५-१६) इत्युक्तम्, अतो मरणभवस्त्रिप्रकार इत्युत्सर्गः ।

अर्हस्तु "निर्वात्यव्याकृतद्वये" इत्येवमपवादः । *अस्ति चेत् कामधातौ विपाक उपेक्षेति* । "अधोऽपि मध्यमस्त्येके" (अभि० को० ४.४८) इत्येकीयमतेन । *नास्ति चेदिति* । "अतः परम्, अदुःखासुखवेद्यम्" (अभि० को० ४.४७) इत्यपरमतेन । *ऐर्यापथिक एवेति* । ऐर्यापथिकजातीयं तद्यत्र निर्वाति ।

"विपाकजैर्यापथिकशैल्पस्थानिकनैर्मितम् ।
चतुर्धा व्याकृतं कामे" (अभि० को० २.७२) इति ।

नैतावदेवाव्याकृतमिष्यत इति व्याख्यातमेतत् । *तद्धि चित्तच्छेदानुकूलमिति* । अप्रतिसन्धिकचित्तच्छेदानुकूलम्, दुर्बलत्वात् । परमापटुत्वादित्यर्थः । सप्रतिसन्धिकचित्तच्छेदे कुशलाकुशलमपि चित्तं सम्भवति ।

तेषां यथासंख्यमिति । पादयोरपायगामिनां *विज्ञानं सन्निरुध्यते*, नाभ्यां

हृदये च विज्ञानं सन्निरुध्यते। न पुनर्जायन्त इत्यजाः, अर्हन्तः । तेषामपि हृदये विज्ञानं निरुध्यते । मूर्ध्नीत्यपरे । कायेन्द्रियस्य तेषु निरोधात् । कायेन्द्रियं हि म्रियमाणस्य तप्त इवोपले जलं निष्ठ्यूतं सङ्कोचमापद्यमानं पादादिष्वन्तर्धीयत इति ।

एवं च पुनः क्रमेण मरणं प्राणिनां प्रायेण मर्मच्छेदवेदनाभ्यां हतानां जायते—

मर्मच्छेदस्त्वबादिभिः ।

शरीरप्रदेशाः केचिदुपहन्यमाना मरणमानयन्ति । ते ह्येतदुच्यन्ते मर्माणीति । तानि चाप्तेजोवायुधातूनामन्यतमेनातिप्रायं गतेन निशितशस्त्रसम्पातस्पर्शिनाडीतीव्राभिर्वेदनाभिः छिद्यन्त इव । न तु[1] पुनस्तानि काष्ठवच्छिद्यन्ते[2], छिन्नवद्वा पुनर्न चेष्टन्त इति च्छिन्नान्युच्यन्ते ।

कस्मान्न पृथिवीधातुना ? चतुर्थदोषाभावात् । वातपित्तश्लेष्माणो हि त्रयो दोषाः । ते चाप्तेजोवायुधातुप्रधाना यथायोगमिति ।

भाजनलोकसंवर्तनीसाधर्म्येणेत्यपरे ।

मनुष्यगामिनाम्, हृदये देवगामिनाम् । अरूपित्वाददेशस्थं विज्ञानं कथं तेषु निरुध्यत इति ? अत आह—*कायेन्द्रियस्य तेषु निरोधादिति* । तेषु पादादिषु । कायेन्द्रियप्रतिबद्धवृत्ति हि कामधातौ रूपधातौ च विज्ञानमिति । *तेषामपि हृदये विज्ञानं निरुध्यत* इति । यथासंख्यनिर्देशादेवायमर्थो लभ्यते । कथम् ? हृदयं च हृदयं च हृदये, पादश्च नाभिश्च हृदये चेति पादनाभिहृदयानीति चत्वारोऽर्थाः ॥ ४३ ॥

अधोगश्च, नृगश्च, सुरगश्च, अजगश्च—इत्येतेऽपि चत्वारोऽर्थाः । तेन यथासंख्यसिद्धिः ।

प्रायेणेति ग्रहणं देवादीनां सुखमृत्युत्वात् । *न तु पुनस्तानि काष्ठवच्छिद्यन्ते* । किं तर्हीति ? *तीव्राभिर्वेदनाभिश्छिद्यन्त इवेति* । *छिन्नवद्वा न पुनश्चेष्टन्त इति छिन्नानीत्युच्यन्त* इति । छिन्नाङ्गप्रत्यङ्गवत्, न पुनश्चेष्टन्त इति छिन्नानीत्युच्यन्ते । नैषा कालान्तिकी; छेदवृत्तिमर्मणा द्विधाभावाकरणात् ।

अप्तेजोवायूनामन्यतमेनेत्युक्ते पृच्छन्ति—*कस्मान्न पृथिवीधातुनेति* । *अप्तेजोवायुधातुप्रधाना यथायोगमिति* । यथासम्भवम् । अब्धातुप्रधानः श्लेष्मा, तेजोधातुप्रधानं पित्तम्, वायुधातुप्रधानो वायुशेष इति । *भाजनलोकसंवर्तनीसाधर्म्येणे-*

---

१. च—का० । २. काष्ठादिव०—का० ।

देवेषु नास्ति मर्मच्छेदः। किं तु च्यवनधर्मणो देवपुत्रस्य पञ्चोपनिमित्तानि प्रादुर्भवन्ति—वस्त्राणामाभरणानां च मनोज्ञः शब्दो निश्चरति, शरीरप्रभा मन्दीभवति, स्नातस्योदबिन्दवः काये सन्तिष्ठन्ते, चपलात्मनोऽप्येकत्र विषये बुद्धिरवतिष्ठते, उन्मेषनिमेषौ चाक्ष्णोः सम्भवतः। एतानि तु व्यभिचारीणि। पञ्च पुनर्निमित्तानि मरणं नातिवर्त्तन्ते—वासांसि क्लिश्यन्ति, माला म्लायन्ति, कक्षाभ्यां स्वेदो मुच्यते, दौर्गन्ध्यं कायेऽवक्रामति, स्वे चासने देवपुत्रो नाभिरमते।

सोऽयं सत्त्वलोक एवमुत्पद्यमानस्तिष्ठन् च्यवमानश्च त्रिषु राशिषु स्थापितो भगवता। त्रयो राशयः—सम्यक्त्वनियतो राशिः, मिथ्यात्वनियतो राशिः, अनियतो राशिरिति। तत्र पुनः—

सम्यङ्मिथ्यात्वनियता आर्यानन्तर्यकारिणः ॥ ४४ ॥

"सम्यक्त्वं कतमत्? यत्तत् पर्यादाय रागप्रहाणम्, पर्यादाय द्वेषप्रहाणम्, पर्यादाय मोहप्रहाणम्, पर्यादाय सर्वक्लेशप्रहाणम्—इदमुच्यते सम्यक्त्वम्" ( ) इति सूत्रम्।

आर्याः कतमे? येषामनास्रवो मार्ग उत्पन्नः। आराद् याताः पापकेभ्यो धर्मेभ्य इत्यार्याः; आत्यन्तिकविसंयोगप्राप्तिलाभात्। एते हि क्लेशक्षये नियतत्वात् सम्यक्त्वनियताः मोक्षभागीयलाभिनोऽप्यवश्यं परिनिर्वाणधर्माण इति। कस्मान्न सम्यक्त्वे नियताः? ते हि मिथ्यात्वेऽपि नियता भवेयुः। न च ते कालनियमेन सम्यक्त्वे नियताः, यथा सप्तकृत्वः परमादयः।

त्यपरे इति। तिस्रो भाजनसंवर्त्तन्यः—अप्संवर्त्तनी, तेजःसंवर्त्तनी, वायुसंवर्त्तनी च। तासां च साधर्म्येण अप्तेजोवायुधातूनामन्यतमेनेति विस्तरेणोक्तमिति।

कथमाराद्याताः? *आत्यन्तिकविसंयोगप्राप्तिलाभात्*। पृथग्जनानां त्वस्ति विसंयोगप्राप्तिलाभः, न त्वात्यन्तिक इति ते नाराद् याता एवेति। *ते हि मिथ्यात्वेऽपि* नियता *भवेयुरिति*। यद्यानन्तर्याणि कुर्युरित्यर्थः। *न च त* इति विस्तरः। न च ते मोक्षभागीयलाभिनः *कालनियमेन सम्यक्त्वे नियताः। यथा सप्तकृत्वः परमादयः।* आदिशब्देन कुलंकुलैकवीचिकादयो गृह्यन्ते। कालनियमश्चैषां पुद्गलनिर्देशे वक्ष्यते।

मिथ्यात्वं कतमत्? नरकाः, प्रेताः, तिर्यञ्चः—इदमुच्यते मिथ्यात्वम्। तत्रानन्तर्यकारिणो नरके नियतत्वान्मिथ्यात्वनियताः। नियतेभ्योऽन्येऽनियता इति सिद्धम्। प्रत्ययापेक्षं हि तेषामुभयभाक्त्वम्, अनुभयभाक्त्वं च॥ ४४॥

उक्तः सत्त्वलोकः॥

भाजनलोक इदानीं वक्तव्यः—

तत्र भाजनलोकस्य सन्निवेशमुशन्त्यधः।
लक्षषोडशकोद्वेधमसंख्यं वायुमण्डलम्॥ ४५॥

त्रिसाहस्रमहासाहस्रलोकधातोरेवं सन्निवेशमिच्छन्ति। यदुताकाशप्रतिष्ठमधस्ताद् वायुमण्डलमभिनिर्वृत्तं सर्वसत्त्वानाम्। कर्माधिपत्येन तस्य योजनलक्षाणां षोडशकमुद्वेधः, परिणाहेनासंख्यम्, तथा च दृढं यन्महानग्नोऽपि वज्रेण भेत्तुमशक्तः॥ ४५॥

तस्योपरिष्टात्—

अपामेकादशोद्वेधं सहस्राणि च विंशतिः।

'मण्डलम्' इति वर्तते। तस्मिन् वायुमण्डले सत्त्वानां कर्मभिर्मेघाः सम्भूयाक्षमात्राभिर्धाराभिरभिवर्षन्ति। तद् भवति अपां मण्डलम्। तस्य योजनानामेकादशलक्षाण्यूर्ध्वे, अधो विंशतिश्च सहस्राणि।

कथं ता आपो न तिर्यग्विस्रवन्ति?

सत्त्वानां कर्माधिपत्येन। यथा हि भुक्तं पीतमन्नं पानं च नापक्वं पक्वाशयमापततीत्येके।

नियतेभ्यो द्वयेभ्य। एभ्योऽन्येऽनियताः। प्रत्ययापेक्षं हीति विस्तरः। यदि सम्यक्त्वे प्रत्ययं लभन्ते, सम्यक्त्वे नियताः। अथ मिथ्यात्वे, मिथ्यात्वे नियताः। अथोभयस्मिन्न प्रत्ययं लभन्ते अनुभयभाक्त्वेऽपि॥ ४४॥

उक्तः सत्त्वलोकः। विद्यादिक्रमनिर्देशेन॥

"उशन्ति" इच्छन्तीत्यर्थः। "लक्षषोडशकोद्वेधमसंख्यं वायुमण्डलम्" लक्षषोडशकं वेधनभावेन। परिणाहेनासंख्यमिति। समन्तपरिक्षेपेणासंख्यमित्यर्थः॥ ४५॥

कर्माधिपत्येन कर्मसामर्थ्येन। तत्र निदर्शनम्—यथा भुक्तं पीतं चान्नं पानं च यथासंख्येन नापक्वं पक्वाशयं पतति। पक्वमेव स पक्वस्थानं गच्छतीत्यर्थः।

कुसूलन्यायेन वायुना सन्धार्यन्त इति **निकायान्तरीयाः** ।

ताश्च पुनरापः सत्त्वानां कर्मप्रभावसम्भूतैर्वायुभिरावर्त्यमाना उपरिष्टात् काञ्चनीभवन्ति पक्वक्षीरशरीभावयोगेन । तद् भवत्यपां मण्डलम् ।

अष्टलक्षोच्छ्रयं पश्चाच्छेषं भवति काञ्चनम् ॥ ४६ ॥

किं च शेषम् ? त्रयो लक्षाः सहस्राणि च विंशतिः । सा काञ्चनमयी मही भवत्यपामुपरिष्टात् ॥ ४६ ॥

उक्तो जलकाञ्चनमण्डलोच्छ्रायः ॥

तिर्यक् त्रीणि सहस्राणि सार्धं शतचतुष्टयम् ।
लक्षद्वादशकं चैव जलकाञ्चनमण्डलम् ॥ ४७ ॥

समानं ह्येतदुभयं विस्तारतः ॥ ४७ ॥

समन्ततस्तु त्रिगुणम्,

समन्ततः परिक्षेपेण तु परिगण्यमानं **त्रिगुणं** जायते—षट्त्रिंशल्लक्षा दशसहस्राणि सार्धानि च त्रीणि शतानि योजनानाम् ।

यच्च तत् काञ्चनमयं महीमण्डलमपामुपरिष्टात् सन्निविष्टम्,

तत्र मेरुर्युगन्धरः ।
ईशाधारः खदिरकः सुदर्शनगिरिस्तथा ॥ ४८ ॥
अश्वकर्णो विनितको निमिन्धरगिरिः

इतीमे काञ्चनमण्डलप्रतिष्ठा अष्टौ महापर्वताः । मध्ये सुमेरुः । शेषाः

कुसूलन्यायेन कोष्ठन्यायेन । समन्तात् प्राकारवदवस्थितमित्यर्थः । *पक्वक्षीरशरीभावयोगेन* । पक्वक्षीरशरीभावन्यायेन । यथा पक्वस्य क्षीरस्य शरी । स्त्रीलिङ्गनिर्देशः, शर इत्यर्थः । अथ वा शरस्य भावः शरीभावः स्त्रीप्रयोगः । यथाऽसौ द्रवो घनीभावेन भवति, एवं जलस्योपरिष्टात् *काञ्चनमयी भूमिरिति* ।

शेषम्, त्रयो लक्षाः सहस्राणि च विंशतिरिति । विंशतिसहस्रोत्तराणामेकादशानां लक्षाणामष्टावपनीयैतावच्छेषं भवति ॥ ४५–४६ ॥

"तिर्यक् त्रीणि सहस्राणि" इति विस्तरः । चतुर्द्वीपकस्य एतत्परिमाणमुच्यते, न त्रिसाहस्रमहासाहस्रस्य । *समानं ह्येतदुभयम्* । एतदिति *"जलकाञ्चनमण्डलम्"* *"समन्ततस्तु त्रिगुणम्"* इति । समन्तपरिक्षेपेण त्रिगुणमेतदुभयम् । सर्वस्य परि-

सुमेरुं परिवार्यावस्थिताः । तस्यान्यसप्तपर्वतप्राकारपरिक्षिप्तस्य यो बाह्यः पर्वतो **निमिन्धरगिरिः** ।

ततः ।

द्वीपाः,

ततो बहिश्चत्वारो **द्वीपाः** । तेभ्यः पुनः—

बहिश्चक्रवाडः,

तेन चतुर्द्वीपकश्चक्रीकृतः[1] । तेषां तु—

सप्त हैमाः स आयसः ॥ ४९ ॥

युगन्धरादयः **सप्त** पर्वताः सौवर्णाः, चक्रवाडः शस्त्रकम्[2] ॥ ४९ ॥

चतूरत्नमयो मेरुः,

सुवर्णमयः, रूप्यमयः, वैदूर्यमयः, स्फटिकमयश्च यथासंख्यं चतुर्षु पार्श्वेषु । **यच्च** यन्मयं पार्श्वं सुमेरोः, तस्यानुभावेन तद्वर्णं तस्यां दिशि नभो दृश्यते । जम्बूद्वीपकस्य[3] पार्श्वं वैदूर्यमयं वर्णयन्ति । तस्येह प्रभानुरागेण वैदूर्यमयं नभो दृश्यत इति ।

अथ कथं तेषां सम्भवः ? काञ्चनमय्यां पृथिव्यां पुनर्वारिधारा अतिपतन्ति । ता ह्यापो नानाविधबीजगर्भा बहुविधप्रकारभिन्नैर्वायुभिर्मथ्यमानास्तां[4] तां जातिं परिणमयन्ति । एवं च पुनः परिणमयन्ति यद् भिन्नजातीयस्य कार्य-

---

मण्डलस्येयं स्थितिः । यदस्य तिर्यक्प्रमाणं त्रिगुणमेव समन्तपरिक्षिप्तस्य प्रमाणमिति ।

तेन चतुर्द्वीपकश्चक्रीकृत इति । चक्रं कृतश्चक्रीकृतः । चक्राकारतां गमितः । अत एव "*चक्रवाडः*" इत्युच्यते ।

शस्त्रकमित्ययोमयः ॥ ४७-४९ ॥

यथासंख्यं चतुर्षु पार्श्वेष्विति । उत्तरकुरुपार्श्वं सुवर्णमयम्, पूर्वविदेहपार्श्वं रूप्यमयम्, जम्बूद्वीपपार्श्वं वैदूर्यमयम्, अवरगोदानीयपार्श्वं स्फटिकमयम् ।

नानाविधबीजगर्भाः । नानाप्रकारसामर्थ्ययुक्ताः । *बहुविधप्रकारभिन्नैर्वायुभिरिति* । तदुत्पादने अनेकप्रकारसामर्थ्यभिन्नैर्वायुभिरित्यर्थः । *असमाधानेनेति* । अयुगपद्भावेनेत्यर्थः । न हि यदा कार्यं तदा कारणं तिष्ठति ।

---

१. चातुर्द्वीपक०—का० । २. शस्त्रकः—का० ।
३. जाम्बूद्वीपकमस्य—का० । ४. ०विधप्रभावभिन्नै०—का० ।

विशेषोत्पत्तावसमाधानेन[1] प्रत्ययीभवन्ति । न तु खलु यथा **सांख्यानां** परिणामः ।

कथं च **सांख्यानां** परिणामः ? न ह्यवस्थितस्य द्रव्यस्य धर्मान्तरनिवृत्तौ धर्मान्तरप्रादुर्भाव इति । कश्चात्र दोषः ? स एव[2] धर्मी न संविद्यते यस्यावस्थितस्य धर्माणां परिणामः कल्प्येत । कश्चैवमाह—धर्मेभ्योऽन्यो धर्मीति, तस्यैव तु द्रव्यस्यान्यथीभावमात्रं परिणामः ? एवमप्ययुक्तम् । किमत्रायुक्तम् ? 'तदेव चेदं न चेदं तथा' इति अपूर्वैषा वाचोयुक्तिः[3] ।

एवं च पुनः सम्भूताः सुवर्णादयः कर्मप्रभावात् प्रेरितैर्वायुभिः समाहृत्य राशीक्रियन्ते ।

त एते पर्वताश्च भवन्ति, द्वीपाश्च ।

ते पुनः सुमेर्वादयश्चक्रवाडपर्यन्ताः पर्वताः—

जलेऽशीतिसहस्रके ।

मग्नाः,

काञ्चनमय्याः पृथिव्या उपर्यशीतियोजनसहस्राण्युदकम्, तत्र ते **मग्नाः** ।

ऊर्ध्वं जलात् मेरुर्भूयोऽशीतिसहस्रकः ॥ ५० ॥

इति हि मेरोः षष्टियोजनशतसहस्रसमुच्छ्रायः[4] ॥ ५० ॥

न ह्यवस्थितस्य द्रव्यस्येति । रूपरसाद्यात्मकस्य । *धर्मान्तरनिवृत्ताविति* । क्षीरनिवृत्तौ । *धर्मान्तरप्रादुर्भाव* इति । दधिजन्म । *स एव धर्मी* नेति । रूपाद्यात्मकक्षीरादिधर्मेभ्योऽन्यो धर्म उत्पादव्ययेऽप्यनुत्पन्नोऽविनष्टः । *परिणाम* इति । क्षीरनिवृत्तौ दधिभावः । *तदेवं चेदमिति* । क्षीरमेव दधि, न चेदं तथेति; न चेदं दधि क्षीरम्, तदेवेदमिति यत् परिणामेनेत्युक्तम् । *न चेदं तथेति* । 'तस्यैव द्रव्यस्यान्यथीभावमात्रं परिणामः' इति वचनात् । *अपूर्वैषा वाचोयुक्तिरिति* । स्ववचनविरुद्धेत्यभिप्रायः । पूर्वोत्तरयोर्हि क्षणयोरन्यथात्वमिष्यते । ययोश्चान्यथात्वं तयोरन्यत्वं दृष्टम्, तद्यथा देवदत्तयज्ञदत्तयोः । तस्मात् कार्यकारणयोरन्यत्वेन भवितव्यम् ।

सुवर्णादय इति । सुवर्णरूप्यमणिमृदादयः । *षष्टियोजनशतसहस्रसमुच्छ्राय* इति । षष्ट्यधिको योजनलक्ष उच्छ्राय इत्यर्थः ॥ ५० ॥

---

१. ०समवधानेन—का० । २. एव हि—का० ।
३. वायो युक्तिः—का० । ४. ०सहस्रं समुच्छ्रयः—का० ।

अर्धार्धहानिरष्टासु

जलादूर्ध्वं यावान्सुमेरुस्ततोऽर्धेन युगन्धरश्चत्वारिंशद्योजनसहस्राणि । ततो-ऽर्धेन ईशाधरः । इत्येवमन्येष्वप्यर्धार्धहानिर्वेदितव्या, यावन्निमिन्धरार्धेनार्धत्रयो-दशोत्तराणि त्रीणि योजनशतानि चक्रवाडः ।

समोच्छ्रायघनाश्च ते ।

यावानेव चैषां जलादूर्ध्वं समुच्छ्रायः, तावानेव घनो विस्तार इत्यर्थः ।

शीताः[1] सप्तान्तराण्येषाम्,

एषां च निमिन्धरान्तानां पर्वतानां **सप्तान्तराणि** सप्त **शीता** उच्यन्ते पूर्णा अष्टाङ्गोपेतस्य पानीयस्य । तद्धि पानीयं शीतलं च स्वादु च लघु च मृदु चाच्छं च निष्प्रतिकं च, पिबतश्च कण्ठं न क्षिणोति, पीतं च कुक्षिं न व्याबाधते ।

तासां च पुनः—

आद्याशीतिसहस्त्रिका ।। ५१ ।।

सुमेरुयुगन्धरान्तरं प्रथमा शीता अशीतिर्योजनसहस्राणि वैपुल्येन ।।५१।।

आभ्यन्तरः समुद्रोऽसौ,

द्वौ हि समुद्रौ—आभ्यन्तरो बाह्यश्च । तदाऽसौ शीताऽऽभ्यन्तरः समुद्रः—

त्रिगुणः स तु पार्श्वतः ।

अशीतिर्योजनसहस्राण्यस्य वैपुल्यमुक्तम् । पार्श्वतस्तु[2] त्रिगुणो भवति युगन्धरतीरेण गण्यमानः—चत्वारिंशत् सहस्राणि, लक्षद्वयं च ।

अर्धार्धेनापराः शीताः

युगन्धरस्येषाधारस्य चान्तरं द्वितीया शीता अर्धेन प्रथमायाश्चत्वारिंशद्

अष्टाङ्गोपेतस्येति ।

"शीतलाच्छलघुस्वादुमृदुनिःपूतिगन्धकम् ।
पीतं न बाधते कुक्षिं न कण्ठं क्षिणोति तज्जलम् ।।"

इति *अष्टांगसंग्रहश्लोकः* ।। ५१ ।।

पार्श्वतस्तु त्रिगुणे भवति युगन्धरतीरेण गण्यमान इति । स *"आभ्यन्तरः समुद्रः"* युगन्धरपार्श्वेनायामतः संख्यायमानः *त्रिगुण* इति कृत्वा *चत्वारिंशद्योजन-*

---

१. शीताः—स्फुटार्थायां मुद्रितः पाठः । २. पार्श्वतः—का० ।

शीताः सहस्राणि, ततोऽर्धेन पुनस्तृतीया—इत्येवमर्धार्धेनापराः शीता भवन्ति। यावदर्धत्रयोदशशतानि सप्तमी शीता।

दैर्घ्यं तु तासां न परिसंख्यातम्; अतिबहुप्रकर्षविसर्पणात्।

शेषं बाह्यो महोदधेः ॥ ५२ ॥

किं शेषम्? निमिन्धरचक्रवाडयोरन्तरम्। तद्धि **बाह्यो** महासमुद्रो लवणः, पूर्णः क्षारोदकस्य ॥ ५२ ॥

स खलु विस्तारेण योजनानाम्—

लक्षत्रयं सहस्राणि विंशतिर्द्वे च,

तत्र चत्वारो द्वीपाश्चतुर्षु सुमेरुपार्श्वेषु।

तत्र तु।

जम्बूद्वीपो द्विसाहस्रस्त्रिपार्श्वः शकटाकृतिः ॥ ५३ ॥

द्विसाहस्राणि त्रीणि पार्श्वान्यस्य, शकटस्येवाकृतिः। तस्य च मध्ये काञ्चन-

---

सहस्राधिकलक्षद्वयमायामो भवति युगन्धरपार्श्वे। अशीतिरेका, तदुभयतश्चेतरयोर्दिशोस्तत्सीतानदीवैपुल्ययोगेनापरे द्वे अशीती इति तिस्रोऽशीतयः। चत्वारिंशदधिकं लक्षद्वयं भवति इति ॥ ५२ ॥

"लक्षत्रयं सहस्राणि विंशतिर्द्वे च" इति निमिन्धरगिरिचक्रवाडयोरन्तर एकस्यां दिशि बाह्यस्य समुद्रस्य तत् परिमाणमुक्तम्। अत्र सहस्रमेकं द्वे शते चान्ये अर्धाष्टाशीतिरेवेति वक्तव्यम्; न्यूनत्वात्। एवमपरस्यां दिशि वक्तव्यम्। एवं द्वयोः सहस्रयोः पञ्चसु शतेषु पञ्चसप्ततौ च योजनानां प्रक्षिप्तेषु स आधारः पूरितो भवति, य उक्तः—

> तिर्यक् त्रीणि सहस्राणि सार्धं शतचतुष्टयम्।
> लक्षद्वादशकं चैव जलकाञ्चनमण्डलम् ॥"

(अभि० को० ३.४७) इति।

अनया चतुर्द्वीपसंख्यया यथाविन्यासमतिरिच्यमानत्वात्। तदिदं परिह्रियते—नैष दोषः; चक्रवाडबहिर्जलकाञ्चनमण्डलस्य एतावतातिरिच्यमानत्वात्। न तर्हि चतुर्द्वीपकस्तेन चक्रवाडेन चक्रीकृतः। उपरिभूमिरनेन चक्रीकृता, न जलमण्डलमित्यवगन्तव्यम्। अपर आह—न सुमेर्वादयः पर्वता अत्यन्तच्छिन्नतटाः समुच्छ्रायघना भवन्ति। किं तर्हि? पर्वताकारन्यायेन

मध्यां पृथिव्यां वज्रासनमभिनिर्वृत्तम्, यस्मिन्निषद्य सर्वे बोधिसत्त्वा वज्रोपमं समाधिमुत्पादयन्ति। न हि तमन्य आश्रयः प्रदेशो वा सोढुं समर्थः ॥ ५३ ॥

सार्धत्रियोजनं त्वेकं

चतुर्थमस्य पार्श्वं सार्धानि त्रीणि योजनानि। अत एव ह्यसौ **शकटाकृतिः**।

प्राग्विदेहोऽर्धचन्द्रवत्।

इतः पूर्वेण सुमेरुपार्श्वे पूर्वं **विदेहो** द्वीपः। सोऽर्धचन्द्र इवाभिनिर्वृत्तः। परिमाणतस्तु—

पार्श्वत्रयं तथाऽस्य

यथा जम्बूद्वीपस्य द्वे द्वे योजनसहस्रे।

एकं सार्धं त्रिशतयोजनम् ॥ ५४ ॥

चतुर्थं पार्श्वं सार्धानि त्रीणि योजनशतानि ॥ ५४ ॥

गोदानीयः सहस्राणि सप्त सार्धानि मण्डलः।

इतः पश्चिमेन सुमेरुपार्श्वेऽपरगोदानीयो द्वीपः **सार्धानि सप्त** योजनसहस्राणि साकल्येन। **मण्डलश्चासौ** पूर्णचन्द्रवत्।

सार्धे द्वे मध्यमस्य,

मध्यमस्यार्धतृतीये योजनसहस्रे।

अष्टौ चतुरस्रः कुरुः समः ॥ ५५ ॥

इह उत्तरेण सुमेरुपार्श्वे उत्तरकुरुद्वीपः। सोऽष्टौ योजनसहस्राणि साकल्येन **चतुरस्रः**, कृत्यापीठिकावत्। सर्वेषु च पार्श्वेषु **समः**। यथैकं पार्श्वं द्वियोजनसहस्रे, तथाऽन्यानि; स्तोकमपि नाधिकम्।

किञ्चिदतिरिच्यमानाधरभागा दुर्लक्षविशेषत्वात् "समोच्छ्रायघनाश्च ते" (अभि० को० ३.५१) इत्युक्ताः। अतस्तैस्तैः किञ्चिदतिरिच्यमानैरधोभागैस्तदाधेयं सुमेर्वादिकमाधारं जलकाञ्चनमण्डलात्मकं व्याप्नोतीत्यविरोध एष इति।

अन्य इति विस्तरः। न बोधिसत्त्वाश्रयादन्य *आश्रयः*, वज्रासनाद्वान्यः *प्रदेशस्तं वज्रोपमं समाधिं सोढुं समर्थं* इति ॥ ५३–५४ ॥

यश्च द्वीपो यदाकृतिस्तदाकृतीन्येव तत्र मनुष्याणां मुखानि ॥ ५५ ॥

तेषां खलु द्वीपानामन्तरालेऽन्तरद्वीपा अभिनिर्वृत्ताः । के पुनस्ते कति च ? इत्याह—

देहा विदेहाः कुरवः कौरवाश्चामरावराः ।
अष्टौ तदन्तरद्वीपा गाठा उत्तरमन्त्रिणः ॥ ५६ ॥

तत्र देहविदेहौ पूर्वविदेहपरिवारौ । कुरुकौरवौ उत्तरकुरोः । गाठोत्तरमन्त्रिणौ अपरगोदानीयस्य । चामरावरौ जम्बूद्वीपस्य । सर्वे मनुष्यैरावासिताः । एको राक्षसैरित्यपरे ॥ ५६ ॥

इहोत्तरेण कीटाद्रिनवकाद्धिमवान्,

इहैव जम्बूद्वीपे **उत्तरेणा**स्य जम्बूद्वीपस्य कृष्णपर्वतास्त्रयः, तानतिक्रम्यापरे त्रयः, पुनश्च त्रयः—इति नवभ्यः कीटपर्वतेभ्यः परेण **हिमवान्** पर्वतः ।

ततः ।

पञ्चाशद् विस्तृतायामं सरोऽर्वाग् गन्धमादनात् ॥ ५७ ॥

तस्माद्धिमवतः परेणानवतप्तं नाम **सरो गन्धमादनादर्वाक्**, यतश्चतस्रो नद्यः स्रवन्ति—गङ्गा, सिन्धुः, शीता, वक्षुश्च । तस्य **पञ्चाशद्** योजनानि विस्तारः । पञ्चाशदायामः । पूर्णमष्टाङ्गस्याङ्गोपेतस्याम्भसः । दुर्गमं च मनुष्याणामनृद्धिमताम् ।

तस्यैव चान्तिके जम्बूरभिनिर्वृत्ता, मधुरस्वादूनि यस्याः फलानि । तदधिकारेणायं[1] जम्बूद्वीप इति ख्यातः । तत्फलाधिकारेण वा जम्बूद्वीप इति ॥ ५७ ॥

यश्च द्वीपो यदाकृतिरिति । प्रत्यक्षमेतद् भूमिवशात् सत्त्वानां वैचित्र्यम्, हिमवद्विन्ध्यवासिनां किरातशबराणां गौर-श्यामते दृश्येते ॥ ५५ ॥

"*देहा विदेहाः कुरवः*" इति । स्थानिनां बहुत्वात् स्थानस्यापि बहुवचननिर्देशः । *एको राक्षसैरि*ति । चामरावरयोरन्यतरः ॥ ५६ ॥

"*कीटाद्रिनवकात्*" इति । कीटाकृतीनां पर्वतानां नवकात् । *तदधिकारेणायं जम्बूद्वीप* इति । जम्बुवृक्षाधिकारेण जम्बुवृक्षचिह्नो द्वीपो जम्बूद्वीपः । *फलाधि-*

१. तस्या अधिकारेणायं—का० ।

नरकाः कस्मिन्नवकाशे ? कियत्प्रमाणाश्च ?

अधः सहस्रैर्विंशत्या तन्मात्रोऽवीचिरस्य हि ।

अस्यैव जम्बूद्वीपस्याधो **विंशत्या** योजनसहस्रैरवीचिर्महानरको विंशतिसहस्रप्रमाण एवोद्वेधविस्ताराभ्याम् । एवमस्याधरतलमितश्चत्वारिंशता योजनसहस्रैर्भवति ।

दुःखनिरन्तरत्वादवीचिः । अन्येषु सान्तरं दुःखम् । तद्यथा—सञ्जीवे च्छिन्नावभिन्नसम्पिष्टशरीराणां शीतला वायवो वान्ति, पुनरपि तान् सत्त्वान् सञ्जीवयन्ति । अत एव सञ्जीवः ।

नास्मिन् सुखवीचिरस्तीत्यवीचिरित्यपरे । अन्येष्वपि सुखा वेदना विपाको नास्ति । नैःष्यन्दिकी न वार्यते ।

तदूर्ध्वं सप्त नरकाः,

तस्मादवीचेरूर्ध्वं **सप्त नरकाः** उपर्युपरि सन्निविष्टाः—प्रतापनः, तापनः, महारौरवः, रौरवः, सङ्घातः, कालसूत्रः, सञ्जीवश्च । अवीचिपार्श्वेष्वित्यपरे ।

ते पुनः—

सर्वेऽष्टौ षोडशोत्सदाः ॥ ५८ ॥

उक्तं हि भगवता—

"इत्येते नरका अष्टावाख्याता दुरतिक्रमाः ।
रौद्रकर्मभिराकीर्णाः प्रत्येकं षोडशोत्सदाः ॥
चतुस्कन्धाश्चतुर्द्वारा विभक्ता भागशोऽसिताः ।
अयःप्राकारपर्यन्ता अयसा प्रतिकुब्जिताः[1] ॥
तसा चैवायसी भूमिर्ज्वलिता तेजसा युता ।
अनेकयोजनशता स्फुटा तिष्ठति अर्चिषा" ॥ ( ) इति ॥५८॥

कारेण वेति । जम्ब्वाः "लुप् च" (पा० सू० ४.३.१६६) इति फलमपि जम्बू । तत्फलचिह्नो जम्बूद्वीप इत्यर्थः ॥ ५७ ॥

चतुःस्कन्धा इति । चतुःप्रकारा इत्यर्थः । चतुःसन्निवेश इत्यपरे । *अयःप्राकारपर्यन्ता* इति । अयःप्राकारपरिक्षिप्ता इत्यर्थः । *अयसा प्रतिकुब्जिता*

---

१. प्रतिवर्जिताः—का० ।

षोडशोत्सदाः कतमे ?

कुकूलं कुणपं चाथ क्षुरमार्गादिकं नदी ।
तेषां चतुर्दिशम्,

द्वारे द्वारे तेषां चत्वार उत्सदाः—

१. **कुकूलं** जानुमात्रम् । यत्र तेषां सत्त्वानां निक्षिप्ते संशीर्यते त्वङ्मांसशोणितम्, उत्क्षिप्ते पादे पुनरपि सञ्जायते त्वङ्मांसशोणितम् ।

२. **कुणपं** गूथमृत्तिका । यत्र न्यङ्कुटा नाम प्राणिनः प्रतिवसन्ति सर्वश्वेताः कृष्णशिरसः सूचिमुखाः, तेषां सत्त्वानां यावदस्थीनि भिन्दन्ति ।

३. (क) क्षुरधाराचितो महापथः । यत्र तेषां सत्त्वानामन्वाक्रामतां निक्षिप्ते पादे सञ्छिद्यते त्वङ्मांसशोणितमिति पूर्ववत् ।

(ख) असिपत्रवनम् । यत्र तेषां सत्त्वानां तीक्ष्णा असयः सन्निपतन्ति, अङ्गप्रत्यङ्गान्यवकृन्तन्ति, श्यामलशबलाश्च[1] श्वानो भक्षयन्ति ।

(ग) अयःशाल्मलीवनं तीक्ष्णषोडशाङ्गुलकण्टकम् । तेषां सत्त्वानामभिरोहतां कण्टका अवाङ्मुखीभवन्तः कायं भिन्दन्ति, अवतरतां चोर्ध्वीभवन्तः । अयस्तुण्डाश्च वायसा अक्षीण्युत्पाट्योत्पाट्य भक्षयन्ति ।

तदेतत् **क्षुरमार्गादिकं** त्रयं शस्त्राभिनिपातं सामान्यादेकीक्रियते ।

४. चतुर्थ उत्सदो **नदी** वैतरणी पूर्णा[2] । यस्यां ते सत्त्वा असिशक्तिप्रासहस्तैः पुरुषैरुभाभ्यां तीराभ्यां प्रतिवार्यमाणा ऊर्ध्वमपि गच्छन्तः स्विद्यन्ते पच्यन्ते, अधस्तिर्यगपि गच्छन्तः स्विद्यन्ते पच्यन्ते । तद्यथा—बहूदकायां स्थाल्यामग्नावधिश्रितायां तिलतण्डुलादयः । सा हि महानरकस्य परिखेवोत्पन्ना ।

इति । अयसोपरिष्टाच्छादिता । अयसा पिहितद्वारा इत्यपरे । स्फुटेति । व्याप्ताः ॥ ५८ ॥

पूर्ववदिति । उत्क्षिप्ते पादे पुनरपि सञ्जायते त्वङ्मांसशोणितमित्यर्थः ।
श्यामलशबलाश्च श्वानो भक्षयन्तीति । असिपत्रवनान्तर्भूताः ।
अयस्तुण्डाश्च वायसा इति । शाल्मलीवनान्तर्भूताः । *प्रासाः* भिन्दिपालादयः ।
क्षुरमार्गादिकं त्रयमिति । क्षुरमार्गः, असिपत्रवनम्, शाल्मलीवनं चेति त्रयः ।

---

१. श्यामशब०—का० । २. ०तप्तस्य क्षारोदकस्य—का० ।

त एते चत्वार उत्सदा दिग्भेदेन षोडशोच्यन्ते।

अधिकयातनास्थानित्वादुत्सदाः इत्युच्यन्ते। नरकेषु हि पतिता एतेषु पुनर्यात्यन्ते। आ नरकावरोधादूर्ध्वमेतेषु सीदन्ति, अतस्तदुत्सदा[1] इत्यपरे॥

प्रश्नात् प्रश्नान्तरमुपजायते—किं ते नरकपालाः सत्त्वसंख्याताः, उताहो नेति? नेत्येके। कथमिदानीं चेष्टन्ते? सत्त्वानां कर्मभिर्विवर्त्तनीवायुवत्[2]। यत्तर्हि भदन्तधर्मसुभूतिनोक्तम्—

"क्रोधनाः क्रूरकर्माणः पापाभिरुचयश्च ये।
दुःखितेषु च नन्दन्ति जायन्ते यमराक्षसाः"॥ इति।

ये ते यमेनानुशिष्टाः सत्त्वान् नरकस्थानेषु[3] प्रक्षिपन्ति त एते यमराक्षसा उक्ताः, न तु ये कारणाः कारयन्तीति। सत्त्वसंख्याता इत्येके।

तस्येदानीं कर्मणः क्व विपाकः? तेष्वेव नरकेषु हि आनन्तर्यकारिणां विपाकावकाशस्तत्र तेषां को विप्रतिबन्धः।

अधिकयातनास्थानत्वादुत्सदा इति। उच्छब्दोऽधिकार्थः। अधिकं सीद्यन्त अत्रेत्युत्सदाः। पुनर्यातनदाधिक्यमपरः। *नरकेष्विति* विस्तरः। *अपर* इति। *स्थविरमनोरथः*। स ऊर्ध्वार्थमुच्छब्दमिति। तेनाह—*आ नरकावरोधा*दवीच्यादि-नरकावरोधात् ऊर्ध्वमेषु कुकूलादिषु *सीदन्ति, अतस्तदुत्सदा* इति।

प्रश्नात् प्रश्नान्तरमिति। 'षोडशोत्सदाः कतमे' इत्युक्त्वा 'चतुर्थ उत्सदो वैतरणी, यस्यां सत्त्वा असिशक्तिप्रासहस्तैः पुरुषैरुभाभ्यां तीराभ्यां प्रतिवार्य-माणादूर्ध्वमपि गच्छन्तः स्विद्यन्ते पच्यन्ते' इति। तस्मादिदं प्रश्नान्तरमुप-जायते। *किं ते नरकपाला* इति विस्तरः। *विवर्तनीवायुवदिति*। यथा विवर्त्तन्यां वायवो भाजनलोकाभिनिवृत्तये चेष्टन्ते, तद्वत् ते भूतभौतिकमात्रा नरकपाला इति।

यमराक्षसा इति। पापकर्माणः सत्त्वा नरकपाला जायन्त इत्यर्थः।

ये ते यमेनेति। ये ते यमेन देवदूतीयसूत्रोक्तेनानुशासनेनानुशिष्टास्तान् *सत्त्वान् नरकस्थानेषु प्रक्षिपन्ति* यमराजधानीनिवासिनः। *त एते यमराक्षसा उक्ताः*। न तु ये *कारणा* यातनाः *कारयन्ति* असिशक्तिप्रासहस्तादयः। *तस्येदानीं कर्मणः क्व विपाक* इति। नरकपालानां नरककृत्यस्य कर्मणः क्व विपाकः। *तेष्वेवेति* विस्तरः। येष्वानन्तर्यकारिणां *विपाकावकाश*स्तेषु नरकेषु *तेषां नरक-*

---

१. उत्सदाः—का०। २. ०वायुबीजवत्—का०। ३. नरकेषु—का०।

कथमग्निना न दह्यन्ते ? अग्नेर्नूनं कर्मभिः कृतावधित्वात्, भूतविशेष-निवृत्तेर्वा ।

इमे तावदुष्णा अष्टौ महानरका उच्यन्ते ॥

शीता अन्येऽष्टावर्बुदादयः ॥ ५९ ॥

अन्ये शीतनरका अष्टौ । तद्यथा—अर्बुदः, निरर्बुदः, अटटः[1], हहवः, हुहुवः, उत्पलः, पद्मः, महापद्मश्च ।

तेषां सत्त्वानां तीव्रशीताभिहतानां कायशब्दविकारानुरूपाण्येतानि नामानि । तेऽप्यस्यैव जम्बूद्वीपस्याधस्तात् महानरकाणां तिर्यक् ।

कुत इयतो जम्बूद्वीपस्याधस्तादवीच्यादीनामवकाशः ? धान्यराशिवदधो विशाला हि द्वीपाः । अत एव महासमुद्रोऽनुपूर्वनिम्नः ।

इतीमे षोडश नरकाः सर्वे सत्त्वकर्माधिपत्यनिर्वृत्ताः । प्रत्येकं नरकास्तु स्वैः स्वैः कर्मभिरभिनिर्वृत्ताः । बहूनां सत्त्वानां द्वयोरेकस्य वा । तेषामनेकप्रकल्पो भेदः स्थानं चानियतम्; नदीपर्वतमरुप्रदेशेष्वन्येषु वाऽधश्च भावात् ।

एष तावन्नरकभाजनानां सन्निवेशः ॥

तिर्यञ्चः स्थलजलाकाशगोचराः । तेषां किल मूलं स्थानं महासमुद्रः, ततोऽन्यत्र विसृता इति ॥

प्रेतानां यमो राजा । तस्य जम्बूद्वीपस्याधस्तात् पञ्चयोजनशतान्तरपरिच्छिन्ना राजधानी तेषां मूलस्थानम्, ततोऽन्यत्र विसृताः । केचित् प्रेता महर्द्धिका दैवीमिव श्रियमुद्वहन्ति । शेषा यथा **प्रेतावदाने** ॥ ५९ ॥

पालानां को विप्रतिबन्धः । एतदुक्तं भवति—तेषामपि तावदानन्तर्यकारिणां महदानन्तर्यकर्मणो विपाकस्यातिमहतो नरकेष्ववकाशोऽस्ति, किमङ्ग पुनर्नरकपालानां यत्कर्म तत् कारणाः कारयतामिति । *कृतावधित्वात् ।* कृतमर्यादत्वान्नरकपालान् प्रति—एते न दग्धव्या इति । *भूतविशेषनिवृत्तेर्वा ।* भूतविशेषास्तादृशास्तेषां कर्मभिरभिनिर्वृत्ताः यत्तेनाग्निना *न दह्यन्ते ।*

कायशब्दविकारानुरूपाणीति । कायविकारानुरूपाणि—अर्बुदः, निरर्बुदः, उत्पलः, पद्मः, महापद्मश्चेति *नामान्यर्बुदाद्या*कारकायत्वात्तत्रत्यानां सत्त्वानाम् । शब्दविकारानुरूपाणि—अठठः, हहवः, हुहुव इत्येतानि नामानि । *अत एवेति ।* *धान्यराशिवदधोविशालत्वात् ।* बहिरिति नान्तर्गतः ॥ ५९ ॥

---

१. अटटः—का० ।

अथेमौ चन्द्रार्कौ कस्मिन् प्रतिष्ठितौ ? वायौ। वायवोऽन्तरिक्षे सर्वसत्त्वसाधारणकर्माधिपत्यनिर्वृत्ता आवर्तवत् सुमेरुं परिवर्तन्ते। चन्द्रार्कताराणां वोर्ध्वचारः।

कियद्विप्रकृष्टावितश्चन्द्रार्कौ ?

अर्धेन मेरोश्चन्द्रार्कौ

युगन्धरगिरेर्मूर्ध्ना समं वहतः।

किम्प्रमाणौ ? यथाक्रमम्—

पञ्चाशत्सैकयोजनौ।

पञ्चाशद् योजनानि चन्द्रमण्डलस्य प्रमाणम्। सैकानि पञ्चाशत् सूर्यमण्डलस्य प्रमाणम्। एकपञ्चाशदित्यर्थः। तारकाविमानां यस्याल्पप्रमाणम्, प्रमाणं तस्य क्रोशः। सूर्यविमानस्याधस्ताद् बहिः स्फटिकमण्डलं तैजसमभिनिर्वृत्तं तापनं प्रकाशनं च। चन्द्रविमानस्याधस्तादाप्यं शीतलं भास्वरं च। प्राणिनां कर्मभिर्दृष्टिशरीरफलपुष्पशस्यौषधीनामनुग्रहार्थम्, उपघातकार्थं च[1] यथासम्भवम्।

चतुर्द्वीपके एकश्चन्द्रमाः कृत्यं करोति, एकः सूर्यः।

किं पुनश्चतुर्द्वीपेषु सूर्यो युगपत् कृत्यं करोति ? नेत्याह। किं तर्हि ? तेषु—

अर्धरात्रोऽस्तङ्गमनं मध्याह्न उदयः सकृत् ॥ ६० ॥

यदोत्तरकुरावर्धरात्रः, तदा पूर्वविदेहे सूर्यस्यास्तङ्गमनम्, जम्बूद्वीपे मध्याह्नः, गोदानीये उदयः। एवमन्येष्वपि योज्यम्। सूर्यस्येह गतिभेदेन रात्रिदिवानां वृद्धिह्रासौ ॥ ६० ॥

तत्र पुनः—

तैजसं सूर्यकान्तात्मकम्। *आप्यं* चन्द्रकान्तात्मकम्। *यथासम्भवमिति*। तदुभयमण्डलं दृष्टयादीनां देशकालावस्थान्तरानुरूप्येणानुग्रहार्थमुपघातार्थं च।

एवमन्येष्वपि योज्यमिति। कथम् ? यदा पूर्वविदेहेऽर्धरात्रस्तदा जम्बूद्वीपे सूर्यास्तगमनम्, अवरगोदानीये मध्याह्नः, उत्तरावुदयः—इत्येवमन्यत्रापि योज्यम् ॥ ६० ॥

---

१. का० पुस्तके नास्ति।

प्रावृण्मासे द्वितीयेऽन्त्यनवम्यां वर्धते निशा ।

वर्षाणां द्वितीये मासे भाद्रपदे द्वितीयस्य पक्षस्य **नवम्यां वर्धते** रात्रिः ।

हेमन्तानां चतुर्थे तु हीयते

सैव **हेमन्तानां चतुर्थे** मासे पुन**र्हीयते** । अन्त्यनवम्यामिति वर्तते । फाल्गुनमासस्य द्वितीयपक्षनवम्याम् ।

अहर्विपर्ययात् ॥ ६१ ॥

यदा रात्रिर्वर्धते तदा दिवसो हीयते । यदा रात्रिर्हीयते तदा दिवसो वर्धते ॥ ६१ ॥

कियत्या मात्रया वर्धते ?

लवशो रात्र्यहर्वृद्धी,

लवं लवं रात्रिर्वर्धते, दिवसो वा । ते च हानिवृद्धी यथाक्रमं—

दक्षिणोत्तरगे रवौ ।

जम्बूद्वीपस्य दक्षिणं पार्श्वं गच्छति भास्करे रात्रिवृद्धिः, उत्तरं गच्छत्यहर्वृद्धिः ॥

शुक्लपक्षस्यादौ चन्द्रमसो विकलं मण्डलं दृश्यते, किं तत्र कारणम् ?

स्वच्छाययाऽर्कसामीप्याद् विकलेन्दुसमीक्षणम् ॥ ६२ ॥

यदा हि सौरस्य विमानस्यासन्ने चान्द्रमसं विमानं वहति तदा किल सौर्या भासस्तस्मिन् विमाने पतन्ति, ततोऽपरपार्श्वे छाया पतन्ती विकलं मण्डलं दर्शयतीति **प्राज्ञप्तिको** निर्देशः ।

"प्रावृण्मासे द्वितीयेऽन्त्यनवम्याम्" इति । प्रावृण्मासाश्चत्वारः—श्रावणो यावत् कार्त्तिकः । सर्वे च मासाः कृष्णपक्षाद्याः । तत्र *भाद्रपदशुक्लपक्षनवम्यां रात्रिर्वर्धते ।*

हेमन्तकानां चतुर्थे हीयते । हेमन्ता मासाश्चत्वारः—मार्गशीर्षाद्याः फाल्गुनान्ताः । तत्र फाल्गुनशुक्लपक्षनवम्यां हीयते ॥ ६१ ॥

"लवशः" इति लवं लवम्, "कालाध्वनोरत्यन्तसंयोगे" (पा० सू० २.३.५) द्वितीया ।

अपरपार्श्वे छाया पतन्ती विकलमण्डलं दर्शयति । तद्यथा—स्तम्भे प्रदीपच्छाया पतन्ती यथा यथा स्तम्भ आसन्नो भवति, तथा तथा स्तम्भः

वाह्योगः स तादृशो भवति यत् कदाचिद् विमानस्यार्धं दृश्यत इति पूर्वाचार्याः ॥

अथैतानि सूर्यादिविमानानि कतमे सत्त्वा अध्यावसन्ति ? देवाश्चातुर्महाराजकायिकाः ।

किमेतान्येव तेषां स्थानानि ? विमानवासिनामेतानि । भूमिनिवासिनां पुनः सुमेरुपरिषण्डादीनि ॥ ६२ ॥

कति चास्य परिषण्डाः ? कियत्यो वा ?

परिषण्डाश्चतस्रोऽस्य दशसाहस्रिकान्तराः ।

दशयोजनसहस्राण्युद्गम्यैका, एवं यावच्चतुर्थी। ताभिः सुमेरोरर्धमाक्षिप्तम्। ताश्च ततो यथासंख्यम्—

षोडशाष्टौ सहस्राणि चत्वारि द्वे च निर्गताः ॥ ६३ ॥

प्रथमा परिषण्डा **षोडश सहस्राणि** योजनानां सुमेरोर्निर्गता । द्वितीयाऽष्टौ । तृतीया चत्वारि । चतुर्थी द्वे ॥ ६३ ॥

करोटपाणयस्तासु मालाधारास्सदामदाः ।

महाराजिकदेवाश्च,

प्रथमायां परिषण्डायां **करोटपाणयो** नाम यक्षाः प्रतिवसन्ति । द्वितीयायां **मालाधाराः** । तृतीयायां **सदामदाः** सदामत्ताः । सर्वे एते चातुर्महाराज-

---

स्वच्छायायाच्छाद्यते—दूरे हि वर्तमाने प्रदीपे परिपूर्णस्तम्भो दृश्यते, किञ्चिदासन्ने किञ्चित् क्षीयते, यावदासन्ने स्तम्भो नष्टरूपो वर्त्तते; तद्वदेतत् ।

वाह्योग स तादृश इति । पुनस्तिर्यग्गवनामोन्नामयोगेनाधोभागश्चन्द्रमण्डलस्य क्षीयते, ऊर्ध्वं वर्धते चेति *योगाचाराः* ।

चातुर्महाराजकायिका इति । चतुर्महाराजानं कायः, तत्र भवाश्चातुर्महाराजकायिकाः ।

सुमेरुपरिषण्डादीनीति । आदिशब्देन युगन्धरादीनि ॥ ६२ ॥

"*दशसाहस्रिकान्तराः*" इति । योजनदशसहस्रप्रमाणान्तरा इत्यर्थः । *अर्धमाक्षिप्तमिति* । अर्धमवष्टब्धम् ॥ ६३ ॥

"*सदामदाः*" इति । 'सदामत्ताः' वक्तव्ये श्लोकबन्धानुगुण्येन 'सदामदाः' इत्युक्तम्; अर्थैकत्वात् ।

कायिकाः । चतुर्थ्यां[1] चत्वारो महाराजाः स्वयं प्रतिवसन्ति, तत्परिचाराश्च । अतस्तस्यां चातुर्महाराजकायिका[2] देवा इत्युक्तम् ।

यथा परिषण्डासु चतुर्महाराजकायिका देवाः, एवं

पर्वतेष्वपि सप्तसु ॥ ६४ ॥

युगन्धरादि **पर्वतेषु** तेषां ग्रामनिगमाः । अत एवैष देवनिकायः सर्वेषां **महिष्ठः** ॥ ६४ ॥

मेरुमूर्ध्नि त्रयस्त्रिंशाः,

अथ कियान् मेरुमूर्धा ?

स चाशीतिसहस्रदिक् ।

एकैकपार्श्वमशीतिसहस्राणि यथैवाधस्तात् ।

अन्ये पुनराहुः—**स विंशतिसहस्रदिक्** । चत्वारि पार्श्वान्यस्य चतस्रो दिशः । एकैकं पार्श्वं विंशतिर्योजनसहस्राणि, समन्तात् परिक्षेपेणाशीतिरिति ।

तस्य च—

विदिक्षु कूटाश्चत्वार उषिता वज्रपाणिभिः ॥ ६५ ॥

सुमेरुमूर्ध्नो **विदिशः** कोणाः, तासु पञ्चयोजनशतप्रमाणाश्चत्वारः **कूटा** अभ्युद्गताः, येषु **वज्रपाणयो** नाम यक्षाः प्रतिवसन्ति ॥ ६५ ॥

तस्य च मेरुमूर्ध्नः—

चतुर्थ्यां चत्वारो महाराजाः[3] *स्वयं प्रतिवसन्ती*ति । धृतराष्ट्रः पूर्वदिग्भागे, विरूढको दक्षिणे, विरूपाक्षः पश्चिमे, वैश्रवण उत्तरस्मिन्नित्यनुक्रमोऽवगन्तव्यः । *चातुर्महाराजिका देवा* इत्युक्तमिति । यस्माच्चतुर्थ्यां परिषण्डायां चत्वारो महाराजानः स्वयं प्रतिवसन्ति, अत एवमुक्तम्—"*महाराजिकदेवाः*" इति । महाराजे भवा इति कृत्वा । महिष्ठो महत्तमः ॥ ६४ ॥

*स विंशतिसहस्रदिगि*ति । यद्येवम्, कथमिदमुक्तम्—"समुच्छ्रायघनाश्च ते" (अभि० को० ३.५१) इति ? मध्यभागमेवाभिसमीक्ष्यैवमुक्तमिति तेषामभिप्रायः ॥ ६५ ॥

---

१. चतुर्थ्यां तु—का० । २. महाराज०—का० ।

३. महाराजानः—इति मुद्रित पाठः ।

मध्ये सार्धद्विसाहस्रपार्श्वमध्यर्धयोजनम् ।
पुरं सुदर्शनं नाम हैमं चित्रतलं मृदु ॥ ६६ ॥

सुमेरुतलस्य मध्ये सुदर्शनं नाम नगरं दैर्ध्ये सार्धतृतीययोजनसहस्रे एकैकं पार्श्वमुच्छ्रायेणाध्यर्धयोजनम् । प्राकारः सौवर्णः । एकोत्तरेण धातुशतेनास्य भूमिश्चित्रिता । तच्च भूमितलं तूलपिचुवत् मृदुसंस्पर्शं पादक्षेपोत्क्षेपाभ्यां नतोन्नतम् । शक्रस्य देवानामिन्द्रस्य राजधानी ॥ ६६ ॥

सार्धद्विशतपार्श्वोऽत्र वैजयन्तः,

शक्रस्य देवानामिन्द्रस्य **वैजयन्तो** नाम प्रासादो नगरस्य मध्ये नानारत्नस्थानविधानसम्पदा सर्वान्यभवनश्रीमहिम्ना ह्रेपणः, दैर्घ्येणार्धतृतीये योजनशते पार्श्वं पार्श्वम् । इयं तावन्नगरस्याभिरामता ।

बहिः पुनः ।
तच्चैत्ररथ-पारुष्य-मिश्र-नन्दनभूषितम् ॥ ६७ ॥

तस्य हि नगरस्य बहिश्चतुर्षु पार्श्वेषु चत्वार्युद्यानादीनि देवानां क्रीडाभूमयः । चैत्ररथमुद्यानम्, पारुष्यकम्, मिश्रकावणम्, नन्दनवनं च । तैस्तन्नगरं बहिरलंकृतम् ॥ ६७ ॥

विंशत्यन्तरितान्येषां सुभूमीनि चतुर्दिशम् ।

एषां चोद्यानानां **चतुर्दिशं** चत्वारि **सुभूमीनि** विंशतियोजनान्यतिक्रम्य[1]

अध्यर्धमिति । अधिकमर्धमस्मिन्निति । अध्यर्धं योजनमस्येति *"अध्यर्धयोजनम्"* । 'समुच्छ्रायेण' इत्यध्याहार्यम् ॥ ६६ ॥

धातुशतेन रत्नशतेन । *नानारत्नस्थानविधानसम्पदेति* । नानारत्नविधानसम्पदा, नानास्थानविधानसम्पदा च । *सर्वान्यभवनानां श्रियस्तासां महिमानो* महत्त्वानि । *ह्रेपणः* । लज्जनः । लज्जाजनक इत्यर्थः । *दैर्घ्येणार्धतृतीये योजनशते पार्श्वमिति* । एकं पार्श्वमेतत्प्रमाणम् । यावच्चतुर्थमप्येतत्प्रमाणमिति ।

चैत्ररथादीन्यपि चतुरस्रसार्धद्विशतपार्श्वानि ॥ ६७ ॥

"सुभूमीनि" इति । शोभना भूमय एषामिति सुभूमीनि क्रीडास्थानानि । *"चतुर्दिशमिति"* । चतस्रो दिशा अस्त्येति चतुर्दिशं क्रियाविशेषणम् । *भागुरिमतेन* दिक्शब्द आकारान्तो भवति । *विंशतियोजनान्यतिक्रम्येति* । क्रीडा-

---

1. योजनान्तरितानि—का० ।

क्रीडास्थानानि[1] भवन्ति । तान्येव[1] देवानां परस्परस्पर्धयैव शोभां वितन्वन्ति ।

बहिरेव नगरस्य पार्श्वे—

पूर्वोत्तरे पारिजातः सुधर्मा दक्षिणावरे ॥ ६८ ॥

पारिजातो नाम कोविदारस्त्रायस्त्रिंशानां देवानां कामरतिप्रकर्षालयः[2] । तस्य पञ्च योजनानि मूलाभिनिवेशः, योजनशतमुच्छ्रायः । पञ्चाशद् योजनानि शाखापत्रपलाशं स्फरित्वा तिष्ठति ।

तस्य खलु सर्वपरिफुल्लस्य योजनशतमनुवातं गन्धो वाति पञ्चाशद् योजनानि[3] प्रतिवातम् ।

युक्तं तावदनुवातम्, प्रतिवातं तु कथम्? वृक्षानतिक्रमं सन्धायोक्तमित्येके । न हि नाम प्रतिवातं[4] वातो वाति । तस्यैव तु सा गन्धस्य तादृशी प्रभावसम्पदेष्टव्या यत् प्रतिबाध्यमनोऽपि दिव्यैर्मृदुमारुतैर्गन्धान्तरं सन्तनोति । मन्दतरतमसमारम्भात्तु गन्धसन्तान[5] आश्वेव समुच्छिद्यते, अतो[6] न तथा विप्रकृष्टमध्वानं प्रसर्पति ।

स्थानानि भवन्तीति । विंशतियोजनान्यन्तरितानीत्युच्यते ।

त्रायस्त्रिंशानामिति । त्रयस्त्रिंशास्तेषु भवास्त्रायस्त्रिंशाः, तेषाम् । *कामरतिप्रकर्षालयः* । कामरतिविशेषस्थानम् ।

वृक्षानतिक्रमं सन्धायोक्तमिति । तं कोविदारवृक्षमनतिक्रम्य स गन्धो वर्त्तते । तस्य पञ्चाशद्योजनानि शाखापत्रपलाशमिति । एवं वृक्षानतिक्रमं सन्धायोक्तम्—*पञ्चाशद्योजनानि प्रतिवातं गन्धो वातीति* । अत्रोत्तरमाहुः—*न हि नाम प्रतिवातं वातो भवति*, यत्रैवोत्पद्यते तत्रैव ध्वंस्यते, न देशान्तरे सन्तानं सन्तनोति । उक्तं च—"पञ्चाशद्योजनानि प्रतिवातम्" इति, तस्मादसमाधिरेषः ? तस्मात् समाध्यन्तरमिदमाह—*तस्यैव त्विति* विस्तरः । किं पुनः कारणम्—योजनशतमत्र वातं गन्धो वाति, प्रतिवातं तु पञ्चाशत्, न ततः परेण ? इत्यत आह—*मन्दतरतमसमारम्भात्त्विति* विस्तरः । मृदुमारुतप्रतिबध्यमानतया मन्दतरतमसमारम्भः । ततश्च स *गन्धसन्तान आश्वेव समुच्छिद्यते । अतः* कारणात् न तथा *विप्रकृष्टमध्वानं* योजनशतप्रमाणं *प्रसर्पतीति* ।

१–१. ०स्थानान्येव—का० । २. ०श्रयः—का० । ३. योजनयोजनानि—का० ।
४. सप्रतिवातं—का० । ५. सन्तान—का० । ६. यतो—का० ।

किं पुनः स्वभूताश्रित एवमपुष्पगन्धसन्तानो वर्तते, उताहो वायुरधिवासितो जायते ? नात्र नियमः। उभयथापि ह्याचार्येष्टिः।

यत्तर्हि भगवतोक्तम्—

"न पुष्पगन्धः प्रतिवातमेति न मौलिकस्तागरचान्दनो वा।

सतां तु गन्धः प्रतिवातमेति सर्वा दिशः सत्पुरुषः प्रवाति" ॥ (   ) इति ?

मानुष्यकं पुष्पगन्धं सन्धायोक्तम्। तद्धि प्रतीतं लोके। न च तस्य तादृशी शक्तिः।

महीशासकास्तु[1] पठन्ति—"योजनशतमनुवातं गन्धो वाति पञ्चाशद् योजनानि प्रतिवातम्" (   ) इति।

सुधर्मा नाम देवसभा दक्षिणपश्चिमे दिग्भागे, यस्यां निषद्य देवाः कृत्याकृत्यं समर्थयन्ते[2] ॥ ६८ ॥

एष तावत् त्रिदशानां भाजनसन्निवेशः ॥

तत ऊर्ध्वं विमानेषु देवाः

त्रिदशेभ्य **ऊर्ध्वं देवा विमानेषु** प्रतिष्ठिताः। ते पुनर्यामाः, तुषिताः, निर्माणरतयः, परनिर्मितवशवर्तिनश्च ब्रह्मकायिकादयश्च पूर्वोक्ताः षोडशस्थानान्तरगताः। इत्येते द्वाविंशतिर्देवनिकायाः समासेन येषां भाजनं प्रज्ञायते।

कामभुजस्तु षट्।

तेषां तु **षट्** कामावचरा देवनिकायाः कामान् परिभुञ्जते, न **शेषाः**। तद्यथा—चतुर्महाराजकायिका यावत् परनिर्मितवशवर्तिनः। ते पुनः—

उताहो वायुरधिवासितो जायत इति। यथा तिलेषु पुष्पगन्धाद् गन्धान्तरमुत्पद्यतेऽन्यदेव, न स पौष्पो गन्ध इत्याह—यदि पञ्चाशद् योजनं प्रतिवातं गन्धो वाति।

यत्तर्हि भगवतोक्तं न पुष्पगन्धः प्रतिवातमेतीति विस्तरः। *मौलिको गन्धो* मुस्तादिः।

कृत्याकृत्यं समर्थयन्त इति। कार्याकार्यं सम्प्रतीच्छन्ति सम्प्रधारयन्तीत्यर्थः ॥ ६८ ॥

समासेन येषां भाजनं प्रज्ञायत इति। भाजनम्=स्थानम्। विस्तरेणान्येऽपि देवाः क्रीडाप्रमोषकप्रहासकादयः सन्तीति। अतः समासेनोक्तम्।

---

१ महीसासकास्तु—का०। २. समर्थयन्ति—का०।

द्वन्द्वालिङ्गनपाण्याप्तिहसितेक्षितमैथुनाः ॥ ६९ ॥

द्वन्द्वेन मैथुनं भूमिसम्बद्धवासिनाम्—चातुर्महाराजकायिकानां त्रायस्त्रिंशानाम्, यथा मनुष्याणाम्। तेषां तु वायुनिर्मोक्षाद् दाहविगमः; शुक्राभावात्। आलिङ्गनेन मैथुनं यामानाम्; आलिङ्गनमात्रेण दाहविगमात्। पाणिसम्प्राप्त्या तुषितानाम्, हसितेन निर्माणरतीनाम्, प्रेक्षितेन परनिर्मितवशवर्तिनाम्। स्ववर्तिनां सर्वेषां द्वन्द्वसमापत्त्या।

कालपरिमाणं तु प्रज्ञप्तावुक्तमिति वैभाषिकाः। यावद्यावद् विषयाणां तीव्रतरता, तावत्तावद् रागोऽपि तीव्रतरः।

यस्य देवस्य देव्या वा उत्सङ्गे देवकुमारो देवकन्या वा जायते, स तयोः पुत्रो भवति सा च दुहिता ॥ ६९ ॥

कियत्प्रमाणो जायते ?

पञ्चवर्षोपमो यावत् दशवर्षोपमः शिशुः।

सम्भवत्येषु

यथासंख्यं षट्सु देवनिकायेषु। ते तु क्षिप्रमेवाभिवर्धन्ते।

सम्पूर्णाः सवस्त्राश्चैव रूपिणः ॥ ७० ॥

रूपावचरा देवाः सम्पूर्णकायाः वस्त्रेण संवीता उपपद्यन्ते। सर्वे देवा आर्यभाषाभाषिणः ॥ ७० ॥

तदत्र कामधातौ वेदितव्याः—

कामोपपत्तयस्तिस्रः कामदेवाः समानुषाः।

द्वन्द्वेन यावदीक्षितेन मैथुनमेषामिति *"द्वन्द्वालिङ्गनपाण्याप्तिहसितेक्षितमैथुनाः।"*

सर्वेषां समापत्त्येति। षण्णामपि कामभुजां द्वन्द्वसमापत्त्या परिदाहविगमः।

कालपरिमाणं तु प्रज्ञप्तावुक्तमिति। यावता कालेन द्वन्द्वालिङ्गनपाण्याप्तिहसितेक्षितानि भवन्ति, तावता कालेन एषां भूमिसम्बन्धवासिनां याम-तुषित-निर्माणरति-परनिर्मितवशवर्त्तिनां यथाक्रमं द्वन्द्वसमापत्तिरिति *वैभाषिकाः*। *यावद्यावदिति* विस्तरः। यावद्यावत् परेण परतरेण *विषयाणां तीव्रतरत्वात् रागोऽपि* तीव्रतरः, तावत्तावन्मैथुनकर इत्यभिप्रायः ॥ ६९–७० ॥

कथं कृत्वा ! सन्ति सत्त्वाः प्रत्युपस्थितकामाः प्रत्युपस्थितेषु कामेष्वैश्वर्यं वशे वर्तयन्ति । तद्यथा—मनुष्याः, तदेकत्याश्च देवाः । ते पुनश्चत्वारो देवनिकायाः ।

सन्ति सत्त्वा निर्मितकामा निर्माय कामानैश्वर्यं वशे वर्तयन्ति । तद्यथा—देवा निर्माणरतयः ।

सन्ति सत्त्वाः परनिर्मितकामाः परनिर्मितेषु कामेष्वैश्वर्यं वशे वर्त्तयन्ति । तद्यथा—देवाः परनिर्मितवशवर्त्तिनः ।

ता एता यथोत्पन्नपरिभोगित्वात्, यथेच्छात्मनिर्मितपरिभोगित्वाद्, यथेच्छात्मपरनिर्मितपरिभोगित्वाच्च **तिस्रः कामोपपत्तय** इत्युच्यन्ते ॥

रूपधातौ तु—

सुखोपपत्तयस्तिस्रो नवत्रिध्यानभूमयः ॥ ७१ ॥

त्रिषु ध्यानेषु या नव भूमयः तास्तिस्रः **सुखोपपत्तयः** । ते हि देवा विवेकजेन समाधिजेन च प्रीतिसुखेन च निष्प्रीतिकेन च सुखेन सुखं विहरन्तो दीर्घमध्वानं तिष्ठन्ति । अत एता निर्दुःखदीर्घसुखत्वात् सुखा उपपत्तयः सुखोपपत्तयः । ध्यानान्तरोत्पत्तौ तु प्रीतिसुखाभावात् सुखोपपत्तित्वं विचार्यम् ॥ ७१ ॥

ते पुनश्चत्वारो देवनिकाया इति । चातुर्महाराजकायिका यावत् तुषिताः । यथोत्पन्नप्रतिभोगः, स एषामस्तीति *यथोत्पन्नपरिभोगिनः*, तदभावस्तस्मात् । यथेच्छयात्मनिर्मितम्, तस्य *परिभोगः* पूर्ववत् । *यथेच्छात्मपरनिर्मितपरिभोगित्वादिति* । आत्मना परेण च निर्मिते यथेच्छात्मपरनिर्मिते, तयोः परिभोगः पूर्ववत् । *यथेच्छपरनिर्मितपरिभोगित्वादि*ति केचित् पठन्ति । तत्र तावदेवं विग्रहः—परनिर्मितं यथेच्छं परनिर्मितं तस्य परिभोग इति पूर्ववत् । निर्माणरतीनां परनिर्मितान् कामान् परिभोक्तुं न समृध्यति । तदेवं परनिर्मितवशवर्त्तिनां निर्माणरतिभ्यो विशेषः प्रदर्शितो भवति । बाह्यरूपादिविषयनिर्माणं चात्र वेदितव्यम् ।

विवेकजेन प्रथमध्यानभूमिकेनाकुशलविविक्तत्वात् । *समाधिजेन* च द्वितीयध्यानभूमिकेन वितर्कविचारविगमात् । *प्रीतिसुखेनेति* । प्रीतिलक्षणेन सुःखेन । *निष्प्रीतिकेन* च *सुखेन* सौमनस्यविगमात् । *सुखं विहरन्त* इति । सुखमिति क्रियाविशेषणम् । *सुखोपपत्तित्वं विचार्यमिति* । सुखाभावान्न ध्यानान्तरं सुखोप-

यान्येतानि देवानां द्वाविंशतिस्थानान्युक्तानि, तेषामधरादुत्तरं कियद् विप्रकृष्टम् ? नैतत् सर्वं योजनपरिसंख्यया सुकरं परिसंख्यातुम् । अपि तु—

स्थानात् स्थानावधो यावत् तावदूर्ध्वं ततस्ततः ।

जम्बूद्वीपात् प्रभृति यदुत्तरं स्थानं तस्माद् **यावदधो** जम्बूद्वीपस्**तावत्** पुनस्तस्मादूर्ध्वं स्थानान्तरम् । तद्यथा—चतुर्थी परिषण्डा चतुर्णां महाराजानां मूलस्थानमितश्चत्वारिंशद्योजनसहस्राणि, तस्माद् यावदधो जम्बूद्वीपस्तावदूर्ध्वं त्रिदशानां स्थानम् । तस्मादपि यावदधो जम्बूद्वीपस्तावदूर्ध्वं यामानां स्थानम् । ततोऽपि यावदधो जम्बूद्वीपस्तावदूर्ध्वं तुषितानां स्थानमिति । एवं विस्तरेण सर्वमनुक्रम्य सुदर्शनेभ्यो यावदधो जम्बूद्वीपस्तावदूर्ध्वमकनिष्ठानां स्थानम् ।

तस्मादूर्ध्वं न पुनः स्थानमस्ति । अत एव ज्येष्ठभूत्वादकनिष्ठा उच्यन्ते । अघ-निष्ठा इत्यपरे । अघं किल चित्तस्थं रूपम्, तन्मात्रनिष्ठेति ॥

किं पुनरधरस्थानोपपन्ना ऊर्ध्वानि विमानानि गत्वा पश्यन्ति ?

नोर्ध्वं दर्शनमस्त्येषामन्यत्रर्द्धिपराश्रयात् ॥ ७२ ॥

ऋद्ध्या वा त्रायस्त्रिंशा यामान् गच्छेयुः । पराश्रयेण वा यदृद्धिमता नीयेरन्, देवेन वा तत्रत्येन । एवं शेषाः ।

आगतं तूर्ध्वोपपन्नं पश्येत्, न तूर्ध्वधातुकम्, नोर्ध्वभूमिकम् । यथा स्प्रष्टव्यं न स्पृशेदविषयत्वात् । अत एव ते नास्वेन कायेनागच्छन्ति, किं तर्हि ? निर्मितेनाधरभूमिकेन ।

तदिच्छया पश्येदिहत्यमिवेति **निकायान्तरीयाः** ॥

पत्तिरिति शक्यं वक्तुम् । कुशलविपाकत्वेन सुखकल्पत्वात् सुखोपपत्तिरिति न शक्यं व्यवस्थापयितुम्, चतुर्थेऽपि ध्याने सुखोपपत्तिप्रसङ्ग इति चेत् ? न; तस्यां भूमौ सुखाभावात् । तस्माद्विचार्य सम्प्रधार्यमेतदिति भावः ॥ ७१ ॥

एवं शेषा इति । ऋद्ध्या वा यामास्तुषितां गच्छेयुः, यदि ऋद्धिमता नीयेरन्, देवेन वा तत्रत्येन । समानभूमिकास्तु चातुर्महाराजकायिकास्त्रयस्त्रिंशां गच्छन्ति । *आगतं तूर्ध्वोपपन्नं पश्येदिति* । समानभूमिकम्, नोर्ध्वभूमिकमिति । प्रथमध्यानोपपन्नो न द्वितीयध्यानोपपन्नमित्यादि ।

तदिच्छयेति । ऊर्ध्वोपपन्नेच्छया । *इहत्यमिवेति* । इह भवः इहत्यः । अधोभूमिक इत्यर्थः । *इहत्यमिव पश्येदिति निकायान्तरीयाः* । *यथा स्प्रष्टव्यमिति* । उदाहरणमात्रमेतत् । यथाशब्द इत्येतदपि गम्येत ।

अथैषां यामादिविमानानां कियत् प्रमाणम् ?

चतुर्णां तावद् यावत्सुमेरुमूर्ध्नः **इत्येके** । द्विगुणोत्तरमित्यपरे ।

प्रथमं तु ध्यानं यावांश्चातुर्द्वीपकः, द्वितीयं यावान् साहस्रश्चूडिको लोकधातुः, तृतीयं यावान् द्विसाहस्रः, चतुर्थं यावांस्त्रिसाहस्र **इत्येके** ।

प्रथमादीनि साहस्रादिपरिमाणानि, चतुर्थं त्वपरिमाणमि**त्यपरे** ॥ ७२ ॥

अथ कोऽयं साहस्रश्चूडिको लोकधातुः, को द्विसाहस्रः, त्रिसाहस्रो वा ?

चतुर्द्वीपकचन्द्रार्कमेरुकामदिवौकसाम् ।
ब्रह्मलोकसहस्रं च साहस्रश्चूडिको मतः ॥ ७३ ॥

सहस्रं जम्बूद्वीपानां पूर्वविदेहानामपरगोदानीयानामुत्तरकुरूणाम्, सहस्रं सूर्याणां चन्द्राणां सुमेरूणाम्, सहस्रं चातुर्महाराजकायिनां देवानां यावत् परनिर्मितवशवर्तिनाम्, सहस्रं ब्रह्मलोकानाम्—अयमुच्यते **साहस्रश्चूडिको लोकधातुः** ।

तत् सहस्रं द्विसाहस्रो लोकधातुस्तु मध्यमः ।

तेषां चूडिकानां लोकधातूनां सहस्रं **द्विसाहस्रो मध्यमो लोकधातुः** ।

तत् सहस्रं त्रिसाहस्रः

तेषां द्विसाहस्राणां लोकधातूनां सहस्रं **त्रिसाहस्र**महासाहस्रो लोकधातुः ।

एष हि कृत्स्नः—

समसंवर्तसम्भवः ॥ ७४ ॥

समं संवर्तते, समं विवर्तते । सम्भवो हि विवर्त इत्युत्तरत्र व्याख्यास्यामः[1] ।

चतुर्णां कामावचराणां यामादिस्थानानाम् । *द्विगुणोत्तरमिति* । यामस्थानाद् द्विगुणं तुषितस्थानमित्यादि । *चतुर्थं त्वपरिमाणमिति* । तारकावदतलवाटकं प्रतिबद्धविमानत्वादपरिमाणत्वसम्भव इत्यभिप्रायः ॥ ७२ ॥

सहस्रं ब्रह्मलोकानामिति । ब्रह्मकायिक-ब्रह्मपुरोहित-महाब्रह्मणामित्यर्थः । लोके तथा प्रतीतत्वात् ।

"चूडिकः" इति । महतो लोकधातोश्चूडाभूतत्वाच्चूडिक इत्युच्यते । *सम्भवो हि विवर्त* इति । विविधवर्त्तनं विवर्त्तः । विविधा वर्तन्तेऽस्मिन्निति

१. व्याख्यास्यते—का० ।

किं खलु यथा भाजनानां प्रमाणभेदः, एवं तद्वासिनामपि सत्त्वानां प्रमाणभेदोऽस्ति ? अस्तीत्याह । तत्र तावत्—

जाम्बूद्वीपाः प्रमाणेन चतुःसार्धत्रिहस्तकाः ।

जम्बूद्वीपका मनुष्याः प्रमाणार्धचतुर्हस्तकाः । केचित्तु चतुर्हस्तकाः ।

द्विगुणोत्तरवृद्ध्या तु पूर्वगोदोत्तराह्वयाः ॥ ७५ ॥

पूर्वविदेहकाः, गोदानीयाः,[1] औत्तरकौरवाश्च[2] मनुष्या अष्ट-षोडश-द्वात्रिंश-द्धस्तप्रमाणका[3] यथाक्रमम् ॥ ७५ ॥

पादवृद्ध्या तनुर्यावत् सार्धक्रोशो दिवौकसाम् ।

कामिनाम्,

पादः = क्रोशस्य चतुर्थो भागः । तन्मात्रं शरीरं चातुर्महाराजकायिकानाम्, द्वौ पादौ त्रायस्त्रिंशानाम्, त्रयो यामानाम्, चत्वारस्तुषितानाम्, पञ्च निर्माणरतीनाम्, अध्यर्धः क्रोशः परिनिर्मितवशवर्तिनाम् ।

रूपिणां त्वादौ योजनार्धम्,

रूपिणां देवानां प्रथमे स्थाने ब्रह्मकायिकानामर्धयोजनमात्रं शरीरम् ।

विवर्तः । संवर्तनं संवर्तः । संवर्तन्ते वास्मिन्निति संवर्तः । तस्मिन् हि काले सत्त्वा एकस्मिन् ध्याने द्वितीये तृतीये चतुर्थे वा संवर्त्तन्ते, सङ्गच्छन्त इति ।

"विवर्तते च संवृत्त आस्ते संवर्तते समम्" (अभि० को० ३.९३) इति उत्तरत्र *व्याख्यास्यामः* ॥ ७३-७४ ॥

"जाम्बूद्वीपाः प्रमाणेन चतुःसार्धत्रिहस्तकाः" इति । सार्धत्रिहस्तप्रमाणशरीराः । केचित्तु चतुर्हस्तप्रमाणशरीराः ।

"पूर्वगोदोत्तराह्वयाः" इति । पूर्वगोदः, उत्तर इति चाह्वय एषां ते पूर्वगोदोत्तराह्वयाः, तेषां *यथासंख्यमष्टहस्तप्रमाणाः पूर्वविदेहकाः, षोडशहस्तप्रमाणा गोदानीयाः, द्वात्रिंशद्धस्तप्रमाणका औत्तरकौरवा* इति ॥ ७५ ॥

"पादवृद्ध्या" इति विस्तरः । *"यावत् सार्धक्रोशः"* इति । वक्ष्यमाणत्वात् पाद इति क्रोशस्येति गम्यते । *क्रोशचतुर्थभागमात्रं च शरीरं चातुर्महाराजकायिकानाम्, द्विपादमात्रं त्रायस्त्रिंशानाम्, यावदध्यर्धं क्रोशमात्रं परनिर्मितवशवर्त्तिनाम् ।*

---

१. गोदानीकाः—का० । २. उत्तर०—का० ।

३. ०द्धस्तकाः—का० ।

ततः परम् ॥ ७६ ॥

अर्धार्धवृद्धिः,

त्रिषु स्थानेषु ब्रह्मपुरोहितानां योजनम्, महाब्रह्मणोऽध्यर्धम्, परीत्ताभानां द्वे योजने ।

ऊर्ध्वं तु परीत्ताभेभ्य आश्रयः ।

द्विगुणद्विगुणा हित्वाऽनभ्रकेभ्यस्त्रियोजनम् ॥ ७७ ॥

अप्रमाणाभानां चत्वारि योजनानि । आभास्वराणामष्टौ । एवं द्विगुणवृद्ध्या यावच्छुभकृत्स्नानां चतुःषष्टिः । अनभ्रकाणां ततो योजनत्रयेण हीनं द्विगुणं पञ्चविंशतियोजनशतम् । तस्मात् परेण पुनः पुण्यप्रसवानां द्विगुणं द्विगुणं यावदकनिष्ठानां षोडशयोजनसहस्राणि शरीरम् ॥ ७६—७७ ॥

एवं प्रमाणभिन्नानां किमायुषोऽप्यस्ति भेदः ? अस्तीत्याह ।

सहस्रमायुः कुरुषु

वर्षाणाम् ।

द्वयोरर्धार्धवर्जितम् ।

द्वयोर्द्वीपयोरर्धार्धं वर्जयित्वा पञ्च वर्षशतानि गोदानीयानाम् । अर्धतृतीये वर्षशते पूर्वविदेहानाम् ।

इहानियतम्,

जम्बूद्वीपे नास्त्यायुषो नियमः । कदाचित् भूयो भवति, कदाचिदल्पीयः ।

अन्ते तु दशाब्दाः,

अब्दः = संवत्सरः । अन्ते हीयमानं दश वर्षाण्यायुर्भवति ।

आदितोऽमितम् ॥ ७८ ॥

आदितः प्राथमकल्पिकानां मनुष्याणामपरिमाणमायुर्भवति । सहस्रादि-

---

योजनत्रयेण हीनं द्विगुणमिति । द्विगुणं कृत्वा त्रीणि योजनान्यपनेयानि । *पञ्चविंशयोजनशतमनभ्रकाणां* शरीरप्रमाणमिति । *पुण्यप्रसवानामिति* । पुण्यप्रसवानामर्धतृतीये योजनशते शरीरप्रमाणम्, बृहत्फलानां पञ्चयोजनशतानीति गणयितव्यम् ॥ ७६-७७ ॥

संख्यया परिमातुं न शक्यते ।

उक्तं मनुष्याणाम् ॥

देवानां वक्तव्यम् । तच्चाहोरात्रं व्यवस्थाप्य शक्यं वक्तुमिति स एव चैषां व्यवस्थाप्यते—

नृणां वर्षाणि पञ्चाशदहोरात्रो दिवौकसाम् ।
कामेऽधराणाम्,

यानि मनुष्याणां **पञ्चाशद् वर्षाणि**, तानि कामधातावधराणां देवानां चातुर्महाराजकायिकानामेकं रात्रिन्दिवम् ।

तेनायुः पञ्चवर्षशतानि तु ॥ ७९ ॥

तेन ततस्त्येनाहोरात्रेण[1] तेषां त्रिंशद्रात्रकेण मासेन द्वादशमासकेन संवत्सरेण दिव्यानि **पञ्चवर्षशतानि** आयुःप्रमाणम् ।

द्विगुणोत्तरमूर्ध्वानामुभयम्,

ऊर्ध्वानां देवानामुभयं **द्विगुणोत्तरम**होरात्रश्चायुश्च । कथं कृत्वा ? यन्मनुष्याणां वर्षशतं तत् त्रायस्त्रिंशानां देवानामेकं रात्रिन्दिवम्, तेन रात्रिन्दिवेन दिव्यं वर्षसहस्रमायुः । एवं यामादीनां यथाक्रमम् । मानुष्यकाणि द्वे चत्वार्यष्टौ षोडश वर्षशतान्येकं रात्रिन्दिवम्, तेन रात्रिन्दिवेन द्वे चत्वार्यष्टौ षोडश दिव्यानि वर्षसहस्राण्यायुषः प्रमाणम् ।

युगन्धरादूर्ध्वं सूर्याचन्द्रमसोरभावात् कथं देवानामहोरात्रव्यवस्थानम्, आलोककृत्यं वा ?

पुष्पाणां सङ्कोचविकासात् कुमुदपद्मवत्[2], शकुनीनां च[3] कूजनाकूजनात्,

---

"*कुमुदपद्मवदिति*" । यथेह कुमुदान्यहनि सङ्कुचन्ति रात्रौ विकसन्ति, पद्मानि तु विपर्ययेण; तथा तत्र केषाञ्चिदेव पुष्पाणां सङ्कोचादहनि च विकासादहोरात्रव्यवस्थानम् । *शकुनीनाञ्च कूजनाकूजनात्।* अकूजनाद् रात्रिः,

---

१. ततस्तेना०—का० । २. कुमुदवःधुवत्—का० ।
३. का० पुस्तके नास्ति ।

मिद्धापगमोपगमाच्च[1] आलोककृत्यम्; स्वयम्प्रभत्वात् ।

उक्तमायुः कामिनाम् ॥

रूपिणां पुनः ।

नास्त्यहोरात्रमायुस्तु कल्पैः स्वाश्रयसम्मितैः ॥ ८० ॥

येषां **रूपिणामर्धयोजनमाश्रयः, तेषामर्धकल्पमायुः** । येषां योजनम्, तेषां कल्पम् । एवं यस्य यावद्योजनमाश्रयः, तस्य तावत्कल्पमायुः; यावदकनिष्ठानां षोडशकल्पसहस्राण्यायुःप्रमाणम् ॥ ८० ॥

आरूप्ये विंशतिः कल्पसहस्राण्यधिकाधिकम् ।

आकाशानन्त्यायतने **विंशतिकल्पसहस्राण्या**युषः प्रमाणम् । विज्ञानानन्त्यायतने तस्मा**दधिकं** विंशतिः सहस्राणि । आकिञ्चन्यायतने तस्मा**दधिकं** विंशतिः । भवाग्रे तस्मादधिकं विंशतिः । एवं तेषां यथाक्रमं चत्वारिंशत्[2] षष्टिरशीतिः कल्पसहस्राण्यायुःप्रमाणम् ॥

कतमोऽत्र कल्पो वेदितव्यः—किमन्तरकल्पः, अथ संवर्तकल्पः, अथ विवर्त्तकल्पः, अथ महाकल्पः ?

महाकल्पः परीत्ताभात् प्रभृत्यर्धमधस्ततः ॥ ८१ ॥

परीत्ताभादेव निकायात् **प्रभृति** महाकल्पेनायुः वेदितव्यम् । तस्मा**दधो** महाकल्पस्यार्धं कल्पीकृत्य महाब्रह्मादीनामायुर्व्यवस्थापितम् ।

कूजनात् प्रभातम् । विपर्ययेण वा यथा शकुनिजात्[3] *मिद्धापगमोपगमाच्च ।* मिद्धोपगमाद् रात्रिः प्रज्ञायते, मिद्धापगमात् प्रभातमिति ॥ ७८-८० ॥

"अधिकाधिकम्" इति । विंशतिरधिकम् । अधिकं भवतीत्यर्थः । तेनाह—*एवं तेषां यथाक्रमं चत्वारिंशत् षष्टिरशीतिः कल्पसहस्राणि आयुःप्रमाणमिति । विज्ञानानन्त्यायतने* चत्वारिंशत् । *आकिञ्चन्यायतने* षष्टिः । *भवाग्रेऽशीतिः । तस्मादधो महाकल्पस्यार्धमिति* विस्तरः । अशीतिरन्तरकल्पा महाकल्पाः, तस्यार्धं चत्वारिंशदन्तरकल्पाः । तस्य महाकल्पार्धस्य कल्पीकृतस्य यदर्धं विंशतिरन्तरकल्पाः, तद् ब्रह्मकायिकानामायुःप्रमाणम् । यत्तदर्धकल्पीकृतं चत्वारिंशदन्तरकल्पाः, तद्ब्रह्मपुरोहितानामायुःप्रमाणम् । तदेवमात्मीयार्धं महाब्रह्मण आयुःप्रमाणम् । स ह्यध्यर्धः कल्प इत्युच्यते षष्ट्यन्तरकल्पसंख्याः । महा-

---

१. मिद्धापगमागमाच्च—का० । २. विंशतिश्चत्वा०—का० ।

३. शकुनिजोति—मु० पाठः ।

कथं कृत्वा ?

यत्र लोको विंशतिमन्तरकल्पान् विवर्तते, यत्र लोको विंशतिमन्तरकल्पान् विवर्त आस्ते, यत्र विंशतिमन्तरकल्पान् संवर्तते—इमे षष्टिरन्तरकल्पा महाब्रह्मणोऽध्यर्धः कल्प उक्तः। एवं च कृत्वा महाकल्पस्यार्धं चत्वारिंशदन्तरकल्पान् कल्पीकृत्य तेषामायुःप्रमाणमुक्तम् ॥ ८१ ॥

उक्तं सुगतावायुःप्रमाणम् ॥

दुर्गताविदानीं वक्तव्यम्। तत्र तावत्—

कामदेवायुषा तुल्या अहोरात्रा यथाक्रमम्।
सञ्जीवादिषु षट्सु,

यावत् षण्णां कामावचराणां देवनिकायानामायुरुक्तम्, तेन **तुल्या अहोरात्राः षट्षु** नरकेषु **यथाक्रमं** वेदितव्याः—सञ्जीवे, कालसूत्रे, सङ्घाते, रौरवे, महारौरवे, तापने च।

आयुस्तैस्तेषां कामदेववत् ॥ ८२ ॥

तैरिदानीं स्वैरहोरात्रैस्तेषां यथा षण्णां कामावचराणां देवानामायुः, तथैव यथाक्रमं वेदितव्यम्।

कथं कृत्वा ? यद्धि चातुर्महाराजकायिकानामायुःप्रमाणम्, तत् सञ्जीवने महानरके एकं रात्रिन्दिवम्। तेन यावद् द्वादशमासकेन संवत्सरेण तत्रत्यानि पञ्चवर्षशतान्यायुः।

ब्रह्मादीनामिति। आदिशब्देन ब्रह्मपुरोहितानां ब्रह्मकायिकानां च प्रातिलोम्येन ग्रहणम्।

"अर्धमपरततः"। परीत्ताभात् देवनिकायादिति निर्देशापेक्षणात् *तेषामायुःप्रमाणमुक्तमिति*। तेषां महाब्रह्मपुरोहितानां ब्रह्मकायिकानाम् ॥ ७८-८१ ॥

"कामदेवायुषा तुल्याः" इति विस्तरः। चातुर्महाराजकायिकानां यदायुःप्रमाणमुक्तम्, स सञ्जीवे अहोरात्रः। एवं यावद्यत् परनिर्मितवशवर्तिनामायुःप्रमाणमुक्तम्, स तपने अहोरात्रः।

"कामदेववत्" इति। कामदेवानामिव कामदेववत्। "तत्र तस्येव" (पा० सू० ५.१.११६) इति वतिः। तेन *यावद् द्वादशमासकेनेति*। तेन तत्स्थेनाहोरात्रेण तेषां त्रिंशद्रात्रकेण *मासेन* द्वादशमासकेन *संवत्सरेण तत्रत्यानि*

यत् त्रायस्त्रिंशानामायुःप्रमाणम्, तत् कालसूत्रे महानरके एकं रात्रिन्दिवम्। तेन रात्रिन्दिवेन तस्मिन् वर्षसहस्राण्यायुःप्रमाणम्।

एवमन्येष्वपि यथायोगं योज्यम्, यावत् परनिर्मितवशवर्तिनामायुःप्रमाणं तत्तुल्येनाहोरात्रेण तापने षोडश वर्षसहस्राण्यायुःप्रमाणम् ॥ ८२ ॥

अर्धं प्रतापने,

प्रतापने महानरकेऽन्तरकल्पस्यार्धमायुःप्रमाणम्।

अवीचावन्तःकल्पम्,

तिरश्चां तु नियमो नास्ति।

परं पुनः।

कल्पं तिरश्चाम्,

परमायुस्तिरश्चामन्तरकल्पम्। तत् पुनर्नागानां **नन्दोपनन्दाश्वतरी**प्रभृतीनाम्। उक्तं हि **भगवता**—"अष्टाविमे भिक्षवो नागा महानागाः कल्पस्था धरणीन्धराः" (   ) इति विस्तरः।

प्रेतानां मासाह्ना शतपञ्चकम् ॥ ८३ ॥

यो मनुष्याणां मासः, स **प्रेताना**महोरात्रः। तेनाहोरात्रेण पञ्च वर्षशतान्यायुः ॥ ८३ ॥

शीतनरकेष्वायुषः किं प्रमाणम्?

वाहाद् वर्षशतेनैकतिलोद्धारक्षयायुषः।
अर्बुदाद् विंशतिगुणप्रतिवृद्ध्यायुषः परे ॥ ८४ ॥

दिव्यानि पञ्च वर्षशतान्यायुरित्यादि।

एवमन्येष्वपि यथायोगं योज्यमिति। यद् यामानामायुःप्रमाणम्, तत् सङ्घाते महानरके एकं रात्रिन्दिवम्। तेन तस्मिन् रात्रिन्दिवेन वर्षसहस्रद्वयमायुःप्रमाणम्। एवमन्येष्वपि यथायोगं योज्यम् ॥ ८२ ॥

अष्टाविमे भिक्षव इति। 'अष्टाविमे भिक्षवो नागा महानागाः कल्पस्था धरणीन्धरा अप्रत्युद्धार्याः सुपर्णिनः पक्षिराजस्य देवासुरमपि संग्राममनुभवन्त्यपि प्रत्यनुभवन्त्यपि। ते पुनः कतमे? तद् यथा—नन्दो नागराजः, उपनन्दो नागराजः, अश्वतरी नागराजः, मुचिलिन्दो नागराजः, मनस्वी नागराजः,

उपमानमात्रेण तेष्वायुराख्यातं भगवता—"तद्यथा भिक्षव इह स्याद् विंशतिखारीको मागधकस्तिलवाहः पूर्णस्तिलानां चूडिकाबद्धः। ततः कश्चिदेव वर्षशतस्यात्ययादेकं तिलमपनयते, क्षिप्रतरं भिक्षवः स विंशतिखारीको मागधकस्तिलवाहोऽनेनोपक्रमेण परिक्षयं पर्यादानं गच्छेत्। न त्वेवाहमर्बुदोपपन्नानामायुषः पर्यन्तं वदामि। यथा खलु भिक्षवो विंशतिरर्बुदाः, एवमेको निरर्बुदः; विस्तरेण यथा खलु भिक्षवो विंशतिः पद्मा एवमेको महापद्मः" इति ॥

एवमेषामायुष्मतां सत्त्वानां किमस्त्यपरिपूर्णायुषामन्तरा मृत्युः, आहोस्विन्न? सर्वत्रास्ति—

कुरुबाह्योऽन्तरामृत्युः

उत्तरकुरुषु नियतायुषः सत्त्वा अवश्यं कृत्स्नमायुर्जीवन्ति। अन्येषु नावश्यम्। पुद्गलानां तु बहूनां नास्त्यन्तरेण कालक्रियया। तुषितस्थस्यैकजातिप्रतिबद्धस्य[1] बोधिसत्त्वस्य, चरमभविकसत्त्वस्य जिनादिष्टस्य जिनभूतस्य, श्रद्धानुसारिधर्मानुसारिणोः,[2] बोधिसत्त्वचक्रवर्तिमात्रोश्च तद्गर्भयोरित्येवमादीनाम् ॥

योजनप्रमाणेन स्थानानि शरीराणि चोक्तानि, वर्षप्रमाणेनायुरुक्तम् ॥

तयोश्च प्रमाणं नोक्तमिति वक्तव्यम्, नाम्ना च सर्वेषां व्यवस्थानम्, अतस्तस्यापि पर्यन्तो वक्तव्यः। तेषां समानाख्यानार्थमादिप्रक्रम आरभ्यते—

परमाण्वक्षरक्षणाः।

धृतराष्ट्रो नागराजः, महाकारो नागराजः, एलपत्रो नागराजः" ( ) इति। चूडिकाबद्ध इति शिखाबद्धः ॥ ८३-८४ ॥

एकजातिप्रतिबद्धस्येति। एकजन्मप्रतिबद्धबुद्धत्वस्य। *चरमभविकस्येति*। अन्त्यजन्मनः। येन तस्मिन्नेव जन्मन्यर्हत्त्वं साक्षात् कर्तव्यम्। तस्य नास्त्यन्तरेण कालक्रिया यावदर्हत्त्वं न प्राप्नोति। *श्रद्धानुसारिधर्मानुसारिणोः* नास्त्यन्तरेण कालक्रिया यावच्छ्रद्धाधिमुक्तदृष्टिप्राप्तौ न भवतः। *तद्गर्भयोरिति*। बोधिसत्त्वचक्रवर्तिगर्भयोः तन्मात्रोर्नास्त्यन्तरेण कालक्रिया यावन्न तौ जायेते। *एवमादीनामिति*। आदिशब्देन निरोधासंज्ञिसमापत्तिसमापन्नानां मैत्र्यादिसमापन्नानां च नास्त्यन्तरेण कालक्रिया, यावत्तस्मात् समाधेर्न व्युत्तिष्ठन्ते ॥ ८६ ॥

---

१. जातिबद्धस्य—का०। २. श्रद्धाधर्मानुसारिणो—का०।

रूपनामाध्वपर्यन्ताः,

रूपस्यापचीयमानस्य पर्यन्तः परमाणुः । कालस्य पर्यन्तः क्षणः । नाम्नः पर्यन्तोऽक्षरम् । तद्यथा—गौरिति ।

क्षणस्य पुनः किं प्रमाणम्? समग्रेषु प्रत्ययेषु यावता धर्मस्यात्मलाभः, गच्छन् वा धर्मो यावता परमाणोः परमाण्वन्तरं गच्छति । बलवत्पुरुषाच्छटमात्रेण पञ्चषष्टिः क्षणा अतिक्रामन्तीत्याभिधार्मिकाः ।

परमाणुरणुस्तथा ॥ ८५ ॥

लोहाप्शशाविगोच्छिद्ररजोलिक्षास्तदुद्भवाः ।

यवस्तथाङ्गुलीपर्व ज्ञेयं सप्तगुणोत्तरम् ॥ ८६ ॥

एतत् परमाण्वादिकं सप्तगुणोत्तरं वेदितव्यम् । सप्त परमाणवोऽणुः, सप्ताणवो लोहरजः, तानि सप्ताब्रजः, तानि सप्त शशरजः, तानि सप्तैडकरजः, तानि सप्त गोरजः, तानि सप्त वातायनच्छिद्ररजः, तानि सप्त लिक्षाः, तदुद्भवा यूकेत्यर्थः, सप्त यूका यवः, सप्त यवा अङ्गुलीपर्व । त्रीणि पर्वाण्यङ्गुलीति प्रसिद्धमेवेति नोक्तम् ॥ ८५–८६ ॥

पार्श्वीकृतास्तु—

चतुर्विंशतिरंगुल्यो हस्तो हस्तचतुष्टयम् ।

धनुः,

व्यासेनेत्यर्थः ।

पञ्चशतान्येषां क्रोशोऽरण्यं च तन्मतम् ॥ ८७ ॥

धनुषां पञ्चशतानि क्रोशः । क्रोशमात्रं च ग्रामादि अरण्यमिष्टम्[1] ॥८७॥

तेऽष्टौ योजनमित्याहुः,

उक्तं योजनस्य प्रमाणम् ॥

वर्षस्येदानीमुच्यते—

विंशं क्षणशतं पुनः ।

"*चतुर्विंशतिरङ्गुल्यो हस्तः*" इति । अभिधर्मवचनकाले यः पुरुषहस्तः स ग्रहीतव्यः । येन चतुर्द्वीपकादिपरिमाणव्यवस्थानम् ॥ ८७ ॥

१. रण्यमिष्टम्—का० ।

तत्क्षण:,

क्षणानां विंशं शतमेकस्तत्क्षणः ।

ते पुनः षष्टिर्लवः,

तत्क्षणाः षष्टिर्लव इत्युच्यते ।

त्रिंशद्गुणोत्तराः ॥ ८८ ॥

त्रयो मुहूर्ताहोरात्रमासाः,

त्रिंशल्लवा मुहूर्तः, त्रिंशन्मुहूर्ता अहोरात्रः । कदाचित्तु रात्रिरधिका भवति, कदाचिदूना, कदाचित् समा । त्रिंशदहोरात्रा मासः ।

द्वादशमासकः ।

संवत्सरः सोनरात्रः,

चत्वारो मासा हेमन्तानाम्, चत्वारो वर्षाणामित्येते द्वादश मासा संवत्सरः सार्धमूनरात्रैः । संवत्सरेण हि षडूनरात्रा निपात्यन्ते । कथं कृत्वा ?

"हेमन्तग्रीष्मवर्षाणामध्यर्धे मासि निर्गते ।
शेषेऽर्धमासे विद्वद्भिरूनरात्रो निपात्यते ॥"

उक्तं वर्षप्रमाणम् ॥

हेमन्तानामिति । यथा वर्षा इत्येकस्मिन्नप्यर्थे बहुवचनं प्रसिद्धम्, तथा हेमन्ताः, ग्रीष्मा इति द्रष्टव्यम् । *प्रवचने* त्रय एवर्तवः, न यथा लोके षडिति । शिशिरो हि शीतसामान्याद्धेमन्त इत्युक्तः, वसन्तोऽप्यूष्मसामान्याद् ग्रीष्म इत्युक्तः, शरदपि वृष्टिसामान्याद् वर्षा इत्युक्तेति ।

हेमन्तग्रीष्मवर्षाणामिति । सर्वबौद्धानां हेमन्ताः प्रथम ऋतुः, ग्रीष्मा द्वितीयः, वर्षास्तृतीयः । तत्राधिकमर्धमस्येत्यध्यर्धो मासः, तस्मिन्नध्यर्धे *मासि निर्गते* । मार्गशीर्षे सपौषार्धेऽधिक्रान्ते । *शेषेऽर्धमासे* । पौषस्यार्धेऽवशिष्टे कृष्णचतुर्दश्याम्, ऊनरात्रो *विद्वद्भिर्बौद्धैर्निपात्यते* । त्यज्यत इत्यर्थः । चातुर्दशिकोऽत्र भिक्षुभिः पोषधः क्रियते । एवं माघे फाल्गुनार्धेऽतिक्रान्ते शेषेऽर्धमासे फाल्गुनावशिष्टे पुनरपर ऊनरात्रो निपात्यते । तथा ग्रीष्मेषु वैशाखकृष्णचतुर्दश्याम्, आषाढकृष्णचतुर्दश्यां चापरावूनरात्रौ निपात्येते । वर्षास्वपि भाद्रपदकृष्णचतुर्दश्यां कार्त्तिककृष्णचतुर्दश्यां चापरावूनरात्रौ निपात्येते ॥ ८८–८९ ॥

कल्पस्येदानीं वक्तव्यम् —

कल्पो बहुविधः स्मृतः ॥ ८९ ॥

अन्तरकल्पः, संवर्त्तकल्पः, विवर्त्तकल्पः, महाकल्पश्चेति । तत्र तावत्—

संवर्त्तकल्पो नरकासम्भवात् भाजनक्षयः ।

नरकेषु हि सत्त्वासम्भवात् प्रभृति यावत् भाजनसंक्षयः ।

द्वे हि संवर्त्तन्यौ—गतिसंवर्तनी, धातुसंवर्तनी च । पुनर्द्वे संवर्तन्यौ—सत्त्वसंवर्तनी, भाजनसंवर्तनी च ।

भवति स कालो यन्नरकेषु सत्त्वाश्च्यवन्ते नोपपद्यन्ते । स आरम्भः संवर्तकल्पस्य । यदयं लोको विंशत्यन्तरकल्पान् विवृत्तोऽस्थात् तन्निर्यातं वक्तव्यम् । यद्विंशतिमन्तरकल्पान् संवर्तिष्यते तत् प्रतिपन्नं वक्तव्यम् ।

यदा नरकेष्वेकसत्त्वो नावशिष्टो भवति इयतायं लोकः संवृत्तो भवति । यदुत नरकसंवर्त्तन्या यस्य तदानीं नियतं नरकवेदनीयं कर्म ध्रियते स लोकधात्वन्तरनरकेषु क्षिप्यते ।

एवं तिर्यक्संवर्त्तनी, प्रेतसंवर्त्तनी च वक्तव्या । महासमुद्रगतास्तिर्यञ्चः पूर्वं संवर्तन्ते ।

गतिसंवर्त्तनीति । नरकाद्याः पञ्चगतयो गत्येकदेशे देवगतौ संवर्त्तन्ते एकस्थीभवन्तीत्यर्थः । *धातुसंवर्त्तनी* चेति । कामधातू रूपधातौ संवर्तत इति । *सत्त्वसंवर्त्तनी* । यदा सत्त्वा एव संवर्त्तन्ते, ध्यानेष्वेकस्थीभवन्ति; न तु तद्भाजनानि संवर्तन्ते, विनश्यन्तीत्यर्थः । *भाजनसंवर्तनीति* । यदा भाजनान्येव संवर्त्तन्ते न तु सत्त्वाः; एकस्यापि सत्त्वस्य तत्राभावात् ।

यदयं लोक इति विस्तरः । यदयं लोको *विंशतिमन्तरकल्पान्* विवृत्तो जातः । यावन्नरकोत्पत्तिप्रवृत्ति *निर्यातं* तन्निष्ठितं *वक्तव्य*मित्यर्थः । *तत्प्रतिपन्नं वक्तव्यमिति* । तत्संवर्तनमारब्धं वक्तव्यमिति ।

एवं तिर्यक्संवर्तनी प्रेतसंवर्त्तनी च वक्तव्येति । यदा तिर्यक्ष्वेकसत्त्वोऽपि नावशिष्टो भवति, इयतायं लोकः संवृत्तो भवति । तिर्यक्संवर्तन्या यस्य तदानीं नियतं तिर्यग् वेदनीयं कर्म ध्रियते, स लोकधात्वन्तरतिर्यक्षु क्षिप्यते । एवं प्रेतसंवर्तनी योज्या 'यदा प्रेतेषु' इति विस्तरेण ।

मनुष्यसहचरिष्णवस्तु तैरेव सार्धं भवन्ति । स कालो यन्मनुष्येष्वन्यतमः सत्त्वः स्वयमनाचार्यकं धर्मताप्रातिलम्भिकं प्रथमं ध्यानं समापद्यते, स तस्मात् व्युत्थाय वाचं भाषते—'सुखं बत विवेकजं प्रीतिसुखम्, शान्तं बत विवेकजं प्रीतिसुखम्' इति । तं च शब्दं श्रुत्वा अन्येऽपि सत्त्वाः समापद्यन्ते । कालं कृत्वा ब्रह्मलोक उपपद्यन्ते । यदा जम्बूद्वीप एकसत्त्वोऽपि नावशिष्टो भवति इयताऽयं लोकः संवृत्तो भवति यदुत जम्बूद्वीपसंवर्तन्या ।

एवं पूर्वविदेह-गोदानीयोत्तरकुरुसंवर्तन्यो वक्तव्याः ।

यदा मनुष्येष्वेकसत्त्वोऽपि नावशिष्टो भवति इयताऽयं लोकः संवृत्तो भवति यदुत मनुष्यगतिसंवर्त्तन्या ।

औत्तरकौरवास्तु कालं कृत्वा कामावचरेषु देवेषूपपद्यन्ते । तत्र वैराग्याभावात् ।

एवं चातुर्महाराजकायिकेष्वपि देवेषु प्रथमं ध्यानं समापद्य ब्रह्मलोक उपपद्यन्ते । यदा तत्रैकसत्त्वोऽपि नावशिष्टो भवति इयताऽयं लोकः संवृत्तो भवति यदुत चातुर्महाराजकायिकसंवर्त्तन्या ।

एवं यावत् परिनिर्मितवशवर्तिसंवर्त्तन्यो वक्तव्याः । यदैकसत्त्वोऽपि कामावचरेषु देवेषु नावशिष्टो भवति इयताऽयं लोकः संवृत्तो भवति यदुत कामधातुसंवर्तन्या ।

ब्रह्मलोकेऽप्यन्यतमः सत्त्वो धर्मताप्रातिलम्भिकं द्वितीयं ध्यानं

मनुष्यसहचरिष्णव इति । मनुष्यसहचरणशीला गोमहिषादयः । *धर्मताप्रतिलम्भिकमिति* । धर्मता नाम कुशलानां धर्माणां तदानीं परिणामविशेषः, तया प्रतिलम्भोऽस्यास्तीति धर्मताप्रतिलम्भिकम् । *यन्मनुष्येष्विति* । जम्बूद्वीपमनुष्येष्वित्यभिप्रायः ।

एवं *पूर्वविदेह-गोदानीयसंवर्तन्यौ* योज्यौ । *उत्तरकुरुसंवर्तनी* त्वेवं वक्तव्या भवति—स कालो यदुत्तरकुरौ मनुष्याश्च्यवन्त एव, नोपपद्यन्ते । *यदा तत्रैकसत्त्वोऽपि नावशिष्टो भवति*, इयतायं लोकः संवृत्तो भवत्युत्तरकुरुसंवर्तन्येति । कस्मादेवं वक्तव्या, न तु जम्बूद्वीपसंवर्त्तन्यादिवद् ? इत्याह—तत्र *वैराग्याभावात्* । तत्रोत्तरकुरौ वैराग्याभावात् ।

समापद्योत्थाय वाचं भाषते—'सुखं बत समाधिजं प्रीतिसुखम्, शान्तं बत समाधिजं प्रीतिसुखम्' इति। तं शब्दं श्रुत्वाऽन्येऽपि सत्त्वाः समापद्यन्ते। कालं च कृत्वा आभास्वरेषु देवेषूपपद्यन्ते। यदा ब्रह्मलोक एकसत्त्वोऽपि नावशिष्टो भवति इयताऽयं लोकः संवृत्तो भवति यदुत सत्त्वसंवर्तन्या।

ततः शून्ये भाजने इत एव सामन्तकात् सत्त्वानां तदाक्षेपके कर्मणि परिक्षीणे सप्त सूर्याः प्रादुर्भूय क्रमेण यावत् पृथिवीं सुमेरुं च निःशेषं दहन्ति। तस्मादेव च[1] प्रज्वलितादर्चिर्वायुना क्षिप्तं शून्यं ब्राह्मं विमानं निर्दहत् परैति। तच्च तद्भूमिकमेवार्चिर्वेदितव्यम्। नहि विसभागा अपक्षालाः क्रमन्ते; तत्सम्बद्ध-सम्भूतत्वात्। तस्मात्तदित्युक्तम्। कामावचरो ह्यग्नी रूपावचरमग्निं सम्बध्नातीति।

एवमन्यस्यामपि संवर्तन्यां यथासम्भवं[2] वेदितव्यमिति। नरकेषु सत्त्वानां च्युत्यनुत्पादात् प्रभृति यावत् भाजनानां संक्षय एष कालः।

विवर्तकल्पः प्राग्वायोर्यावन्नरकसम्भवः ॥ ९० ॥

प्रथमाद् **वायोः** प्रभृति **यावन्नरकेषु** सत्त्वसम्भवः, एष कालो **विवर्तकल्प** इत्युच्यते।

इत एव सामन्तकादिति। चातुर्द्वीपकसामन्तकादित्यर्थः। *तदाक्षेपके कर्मणि परिक्षीण* इति। भाजनाक्षेपके भाजनोत्पादके परिक्षीण इत्यर्थः। *ब्राह्मं विमानं निर्दहदर्चिः परैति।* गच्छतीत्यर्थः। *तच्च तद्भूमिकमेवार्चिरिति।* प्रथमध्यान-भूमिकम्। *कस्माद्?* इत्याह—*नहि विसभागा* विसदृशा *अपक्षाला* उपद्रवा अग्न्यादयः *क्रमन्ते।* तापयन्त इत्यर्थः। आह—यद्येवम्, किमिदमुच्यते—*तस्मादेव चेति* विस्तरेणेति? अत उच्यते—*तत्सम्बद्धसम्भूतत्वादिति* विस्तरः। तेन कामावचरेणार्चिषा सम्बद्धं सम्भूतं रूपावचरमर्चिः, तद्भावस्तस्मादिति।

एवमन्यस्यामिति। यथा तेजःसंवर्तन्यामुक्तम्, एवमन्यस्यामप्यप्संवर्तन्याम्, वायुसंवर्तन्यां च *यथासम्भवं वेदितव्यम्।* कथं कृत्वा नरकादिसंवर्तनी? यां पूर्व-वदुक्त्वा यावदियताऽयं लोकः संवृत्तो भवति सत्त्वसंवर्तन्या। ततः शून्ये भाजने सहजोऽब्धातुः सम्भवति। यस्तं भाजनलोकं लवणमिव विलोपयति, स कामा-वचरोऽब्धातुः प्रथमध्यानभूमिकमब्धातुं सम्बध्नाति, स च द्वितीयध्यानभूमिकं सम्बध्नाति। स चाब्धातुस्त्रिभूमिकोऽपि स्वेन स्वेन भाजनेन सहान्तर्धीयते।

---

१. का० पुस्तके नास्ति। २. यथायोगं—का०।

तथा हि[1] संवृत्तो[1] लोक आकाशमात्रावशेषश्चिरं कालं तिष्ठति यावत् पुनरपि सत्त्वानां कर्माधिपत्येन भाजनानां पूर्वनिमित्तभूता आकाशे मन्दमन्दा वायवः स्यन्दन्ते। तदा प्रभृति[2] यदयं लोको विंशतिमन्तरकल्पान् संवृत्तोऽस्थात्, तन्निर्यातं वक्तव्यम्। यद् विंशतिमन्तरकल्पान् विवर्तिष्यते, तदुपयातं वक्तव्यम्।

ततस्ते वायवो वर्धमाना यथोक्तं वायुमण्डलं जायते। ततः शनैर्यथोक्तक्रमविधानं सर्वं जायते—अब्मण्डलम्, काञ्चनमयी पृथिवी[3], सुमेर्वादयश्च। प्रथमं तु ब्राह्मं विमानमुत्पद्यते। ततो यावद् यामीयम्, ततो वायुमण्डलादीनि। इयताऽयं लोको विवृत्तो भवति यदुत भाजनविवर्तन्या।

अथान्यतरः सत्त्व आभास्वरेभ्यश्च्युत्वा शून्ये ब्राह्मे विमान उत्पद्यते।

एवं वायुसंवर्तन्यां सहजो वायुः सम्भवतीति वक्तव्यम्। कथमिति ? पूर्ववदुक्त्वा यावत् सहजो वायुधातुः सम्भवतीति। यस्तं भाजनलोकं कामावचरं यावत् तृतीयध्यानभूमिकं क्रमेण पांशुराशिमिव विकरति विध्वंसयति। यावत्तेनैव सार्धमन्तर्धीयते।

विवर्तकल्पं विस्तरेण वक्तुकाम आह—*तथा हि संवृत्तो लोक* इति विस्तरः। तथेति यथा वर्णितम्। *तदेति* विस्तरः। *यदाकाशे मन्दमन्दा वायवः स्यन्दन्ते तदा प्रभृति यदयं लोको विंशतिमन्तरकल्पान् संवृत्तोऽस्थात्*, *तन्निर्यातं* परिसमाप्तं वक्तव्यम्। *तदुपयातं वक्तव्यमिति*। तदारब्धं वक्तव्यमित्यर्थः।

यथोक्तक्रमविधानमिति। यथोक्तेन क्रमेण विधानेन च *सर्वं जायते*। यथोक्तः क्रमः—*वायुमण्डलम्*, *अब्मण्डलम्*, ततः *काञ्चनमयी पृथिवी*, *ततः सुमेर्वादयश्चेति*। यथोक्तं विधानम्—यस्य यद्विधानमुक्तम्, अयामोद्वेधपरिणाहसंस्थानलक्षणम्, तत्तथा *सर्वं जायते*। *प्रथमं तु ब्राह्ममिति* विस्तरः। यत् पश्चात् संवर्त्तते तत्पूर्वं विवर्तत इति स्थितिः। तेनाह—*प्रथमं तु ब्राह्मं विमानमुत्पद्यते। ततो यावद्यामीयमिति*। यावच्छब्देन ब्रह्मविमानानन्तरं परनिर्मितवशवर्त्तिविमानम्, तदनन्तरं निर्माणरतिविमानम्, ततोऽनन्तरं यावद्यामीयं विमानमुत्पद्यते। *ततो* यामीयविमानोत्पत्त्यनन्तरं *वायुमण्डलादीनीति*। *यदुत भाजनविवर्तन्येति*। न सत्त्वविवर्तन्येति दर्शयति।

शून्ये ब्राह्मे विमान उत्पद्यते इति। महाब्रह्मा।

१-१. तथा संवृत्ते हि—का०।　　२. का० पुस्तके नास्ति।

३. महापृथिवी द्वीपाः—का०।

अन्येऽपि च[1] सत्त्वास्ततश्च्युत्वा ब्रह्मपुरोहितेषूपपद्यन्ते। ततो ब्रह्मकायिकेषु परनिर्मितवशवर्तिषु। क्रमेण यावदुत्तरकुरौ, गोदानीये, पूर्वविदेहे, जम्बूद्वीपे, प्रेतेषु, तिर्यक्षु, नरकेषूपपद्यन्ते। धर्मता ह्येषा—यत् पश्चात् संवर्तते तत् पूर्वं विवर्तते।

यदा नरकेष्वेकः सत्त्वोऽपि प्रादुर्भूतो भवति, तदा यदयं लोको विंशतिमन्तरकल्पान् विवर्तते तन्निर्यातं भवति। यद् विंशतिमन्तरकल्पान् विवर्त्तः स्थास्यति, तदुपयातं भवति ॥ ९० ॥

अन्तःकल्पोऽमितात् यावद् दशवर्षायुषः,

विवर्तमाने लोके एकान्नविंशतिरन्तरकल्पा अपरिमितायुषां मनुष्याणामतिक्रामन्ति।

अपरिमितायुषामेव ह्रसतां[2] यावद्दशवर्षायुषो भवन्ति। सोऽसौ विवृत्तानां तिष्ठतां प्रथमोऽन्तरकल्पः।

ततः।

उत्कर्षा अपकर्षाश्च कल्पा अष्टादशापरे ॥ ९१ ॥

तस्मादपरेऽष्टादशोत्कर्षाः, अपकर्षाश्चाष्टादशान्तरकल्पा भवन्ति।

अन्येऽपि च सत्त्वा इति। तत्परिवाराः। *ततश्च्युत्वा ब्रह्मपुरोहितेष्विति*। तत आभास्वरेभ्यः।

तन्निर्यातं भवतीति। तद्विवर्तनं लोकस्य परिसमाप्तं भवतीत्यर्थः। *तदुपयातं भवतीति*। आरब्धं विवृत्तावस्थानायेत्यर्थः ॥ ९० ॥

एकोनविंशतिरन्तरकल्पा अपरिमितायुषामिति। एकोऽन्तरकल्पो ब्रह्मलोकविमानादिभाजननिवृत्त्याऽतिक्रान्त इत्येकोनविंशतिरवशिष्टा अन्तरकल्पा अपरिमितायुषां मनुष्याणामतिक्रामन्ति; आनरकसत्त्वप्रादुर्भावात्। सा च विवर्तमानावस्थातिक्रान्तैवावगन्तव्या। प्रादुर्भूते नारके सत्त्वे विवृत्तावस्था प्रारब्धा। सेयमुच्यते—*अपरिमितायुषामेव ह्रसतां य.वद्दशवर्षायुषामेको विवृत्तावस्थान्तरकल्पः*। तेनाह—*सोऽसौ विवृत्तानां तिष्ठतां प्रथमोऽन्तरकल्प* इति।

ततोऽष्टादश "उत्कर्षा अपकर्षाश्च" ॥ ९१ ॥

---

१. का०, पुस्तके नास्ति।   २. क्रमतां—का०।

कथं कृत्वा ? तेभ्यो हि दशवर्षायुष्केभ्य उत्कर्षं गच्छन्तः क्रमेणाशीति-वर्षसहस्रायुषो भवन्ति । पुनश्चापकर्षं गच्छन्तो दशवर्षायुषो भवन्ति । एवं द्वितीयोऽन्तरकल्पः। एवं यावदष्टादश ॥ ९१ ॥

उत्कर्ष एकः,

एकान्तरकल्पो विंशतितम उत्कर्षः । एवमपकर्षः । दशवर्षायुष्केभ्यो यावदशीतिवर्षायुषां मनुष्याणामिति वर्त्तते ।

अथैते उत्कर्षाः कियन्तं प्रकर्षं गच्छन्ति ?

तेऽशीतिसहस्राद् यावदायुषः ।

नातः परेण वर्धन्ते । यावानेव चान्येषामन्तरकल्पानामुत्कर्षापकर्षकालः, तावानेव प्रथमस्यापकर्षकालः पश्चिमस्य चोत्कर्षकाल इति समानकालाः सर्वे भवन्ति ।

इति लोको विवृत्तोऽयं कल्पांस्तिष्ठति विंशतिम् ॥ ९२ ॥

इत्यनेनान्तरकल्पन्यायेनायं विंशतिमन्तरकल्पान् विवृत्तस्तिष्ठति ॥९२॥

यावन्तं कालं विवृत्तस्तिष्ठति, तावन्तमेव कालम्—

विवर्ततेऽथ संवृत्त आस्ते संवर्तते समम् ।

विंशतिमेवान्तरकल्पान् विवर्तते, विंशतिं संवर्त्तते, विंशतिं संवृत्त आस्ते । यद्यपि तदानीमुत्कर्षा अपकर्षाश्च न प्रवर्तन्ते, कालस्तु समानः परि-संख्यायते । तत्रैकेनान्तरकल्पेन भाजनान्यभिनिवर्तन्ते, एकान्नविंशत्याऽन्तर-कल्पेन भाजनानि विध्वंस्यन्ते, एकान्नविंशत्या शून्यीभवन्ति । ता एता अन्तरकल्पानां चतस्रो विंशत्योऽशीतिर्भवन्ति ।

ते ह्यशीतिर्महाकल्पः

एतन्महाकल्पस्य प्रमाणम् ॥

कल्पः किंस्वभावः ? पञ्चस्कन्धस्वभावः । यदुच्यते—

ततस्तु *"उत्कर्ष एकः"* इति । विंशत्यन्तरकल्पपरिमाणा *विवृत्तावस्था* अव-गन्तव्या ॥ ९२ ॥

पञ्चस्कन्धस्वभावः कल्पः । "त एवाध्वा कथावस्तु" (अभि० को० १.७) इति ।

"त्रिभिरसंख्येयैः कल्पानां बुद्धत्वं प्राप्यते" ( ) इति ।

तत् कतमेषां कल्पानाम् ? य एव महाकल्पो निर्दिष्टः ।

तदसंख्यत्रयोद्भवम् ॥ ९३ ॥

बुद्धत्वम्,

असंख्येयानां कल्पानां त्रयेण ।

कथमसंख्येयस्यासति संख्येयावसाने पुनस्त्रित्वमुच्यते ? नैतदेव वेदितव्यम् । किं तर्हि ? "षष्टिः स्थानान्तराण्यसंख्येयम्" ( ) इति मुक्तकसूत्रं पठ्यते ।

कतमानि षष्टिः ?

एको ह्यद्वितीयः प्रथमं स्थानान्तरम् । एककानां दशको द्वितीयम् । दश दशकानि शतं तृतीयम् । दश शतानि सहस्रम् । दश सहस्राणि प्रभेदः । दश प्रभेदा लक्षम् । दश लक्षा अतिलक्षः । दशातिलक्षाः कोटिः । दश कोट्यो मध्यः । दश मध्या अयुतम् । दशायुता महायुतम् । दश महायुता नियुतम् । दश नियुता महानियुतम् । दश महानियुताः प्रयुतम् । दश प्रयुता महाप्रयुतः । दश महाप्रयुताः कङ्करः । दश कङ्करा महाकङ्करः । दश महाकङ्करा विस्वरः । दश विस्वरा महाविस्वर. । दश महाविस्वरा अक्षोभ्यः । दशाक्षोभ्या महाक्षोभ्यः । दश महाक्षोभ्या विवाहः । दश विवाहा महाविवाहः । दश महाविवाहा उत्सङ्गः । दशोत्सङ्गा महोत्सङ्गः । दश महोत्सङ्गा वाहनः । दश वाहनानि महावाहनम् । दश महावाहनानि तिटिभः । दश तिटिभा महातिटिभः । दश महातिटिभा हेतुः । दश हेतवो महाहेतुः । दश महाहेतवः करभः । दश करभा महाकरभः । दश महाकरभा इन्द्रः । दशेन्द्रा महेन्द्रः । दश महेन्द्राः समाप्तम् । दश समाप्तानि महासमाप्तम् । दश महासमाप्तानि गतिः । दश गतयो महागतिः । दश महागतयो निम्बरजः । दश निम्बरजांसि महानिम्बरजः । दश महानिम्बरजांसि मुद्रा । दश मुद्रा महामुद्रा । दश महामुद्रा बलम् । दश बलानि महाबलम् । दश महाबलानि संज्ञा । दश संज्ञा

मुक्तकमिति । न चतुरागमान्तर्गतमित्यर्थः ।

महासंज्ञा । दश महासंज्ञा विभूतः । दश विभूता महाविभूतः । दश महाविभूता बलाक्षम् । दश बलाक्षा महाबलाक्षम् । दश महाबलाक्षाणि असंख्यम् ।

अष्टकं मध्याद् विस्मृतम्[1] ।

इत्येतेषां षष्टिस्थानान्तरगतां संख्यामनुप्राप्ताः कल्पा असंख्येयानीत्युच्यन्ते । ततो व्यावृत्य पुनर्गण्यन्ते । एवं त्रीणि असंख्येयानीत्युच्यन्ते । न तु नैव परिसंख्यातुं शक्यन्त इति ।

किन्नु खलु कालप्रकर्षेणैव कृतप्रणिधाना बोधिसत्त्वा बोधिमभिसम्बुध्यन्ते ? किमेतदेव भविष्यति—महतां हि पुण्यज्ञानसम्भारेण षड्भिः पारमिताभिः बहुभिर्दुष्करशतसहस्रैस्त्रिभिः कल्पासंख्येयैरनुत्तरां सम्यक्संबोधिमभिसम्बुध्यन्ते बोधिसत्त्वाः । यद्यप्यन्यथाप्यस्ति मोक्षावकाशः, किमर्थं त इयन्तं यत्नमारभन्ते ? परार्थं त इयन्तं यत्नमारभन्ते—'कथं परानपि महतो दुःखौघात् परित्रातुं शक्नुयाम्' इति ।

क एषां परार्थेन स्वार्थः ? एष एव तेषां स्वार्थो यः परार्थः, तस्याभिमतत्वात् ।

क[2] इदानीमेतच्छ्रद्धास्यते ? सत्यं दुःश्रद्धानमेतदात्मम्भरिभिर्निष्करुणैः;

अष्टकं मध्याद् विस्मृतमिति । अष्टौ स्थानानि क्वापि प्रदेशे प्रमुषितत्वान्न पठितानि । तेनात्र द्वापञ्चाशत् स्थानानि भवन्ति । षष्टया च संख्यास्थानेर्भवितव्यम् । तान्यष्टकानि स्वयं कानिचिन्नामानि कृत्वा पठितव्यानि, येन षष्टिसंख्यास्थानानि परिपूर्णानि भवेयुः । *असंख्या* इति । असंख्येयाः संख्यानेनासंख्येया असंख्या इति । बहुवचननिर्देशादनुक्ता अपि तद्धिता भवन्ति । यद्येवं "तदसंख्यत्रयोद्भवम्" इति कथमुक्तम् ? नैष दोषः; नास्ति संख्या परेणेष्वित्यसंख्याः, असंख्येयाः कल्पाः । असंख्याश्चासंख्याश्चासंख्याश्चेत्यसंख्याः, तेषां त्रयम् । तेषां कल्पानामसंख्यत्रय उद्भवतीति तदसंख्यत्रयोद्भवं बुद्धत्वमित्येवं तद्व्याख्यातव्यम् ।

तस्याभिमतत्वादिति । तस्य परार्थस्याभिमतत्वात् । यो ह्यभिमतः स स्वार्थो दृष्ट इति ।

---

१. विस्तृतम्—का० । २. का० पुस्तके नास्ति ।

कारुणिकैस्तु अद्धितमेवैतत् । यथा चेह केचिदभ्यस्तनैर्घृण्या असत्यपि स्वार्थे परव्यसनाभिरता उपलभ्यन्ते । तथा पुनरभ्यस्तकारुण्या असत्यपि स्वार्थे परहितक्रियाभिरामाः सन्तीति सम्भाव्यम् । यथैव चाभ्यासवशादनात्मभूतेषु संस्कारेषु संस्कृतलक्षणानभिज्ञा आत्मस्नेहं निवेश्य तद्धेतोर्दुःखान्युद्वहन्ति, एवं पुनरभ्यासवशादात्मस्नेहं तेभ्यो निर्वर्त्य परेष्वपेक्षां वर्धयित्वा तद्धेतोर्दुःखान्युद्वहन्तीति सम्भाव्यम् ।

गोत्रान्तरमेव हि तत् तथाजातीयं निर्वर्तते यत् परेषां दुःखेन दुःखायते सुखेन सुखायते, नात्मन इति । न ते पुनः स्वार्थमन्यं पश्यन्ति । आह चात्र—

"हीनः प्रार्थयते स्वसन्ततिगतं यैस्तैरुपायैः सुखम्,
मध्यो दुःखनिवृत्तिमेव न सुखं दुःखास्पदं तद् यतः ।
श्रेष्ठः प्रार्थयते स्वसन्ततिगतैर्दुःखैः परेषां सुखम्,
दुःखात्यन्तनिवृत्तिमेव च यतस्तद्दुःखदुःख्येव सः ॥" (   )

किं पुनरुत्कर्षा बुद्धा उत्पद्यन्ते ? आहोस्विदपकर्षाः ?

अपकर्षे तु[१] शताद् यावत् तदुद्भवः ।

अशीतिवर्षशतायुषि प्रजायामपकर्षे आरब्धे यावद्वर्षशतायुषो मनुष्या भवन्ति, एतस्मिन्नन्तरे बुद्धा उत्पद्यन्ते ।

तद्धेतोरिति । आत्मस्नेहहेतोः । *आत्मस्नेहं तेभ्य* इति विस्तरः । आत्मस्नेहं तेभ्यः स्वासान्तानिकेभ्यः संस्कारेभ्यो *निर्वर्त्य*[२] *अपेक्षां* करुणालक्षणां *वर्धयित्वा तद्धेतो*रपेक्षाहेतो*र्दुःखान्युद्वहन्तीति सम्भाव्यं* प्रतिपत्तव्यम् ।

मध्यो दुःखनिवृत्तिमेवेति । प्रत्येकबुद्धः श्रावको दुःखनिवृत्तिमेव मोक्षमेव *प्रार्थयते, न सुखं* सांसारिकम् । कुतः ? *दुःखास्पदं तद्यतः* । यस्मात् तत् सांसारिकं सुखं दुःखस्थानं भवति । *श्रेष्ठो* बोधिसत्त्वः *स्वसन्ततिगतैर्दुःखैः परेषां सुख*माभ्युदयिकं *दुःखात्यन्तनिवृत्तिमेव च* निःश्रेयसस्वभावां परेषां *प्रार्थयते* । अथवा—परेषां सुखमाभ्युदयिकनैःश्रेयसिकं प्रार्थयते । दुःखात्यन्तनिवृत्तिमेव च बुद्धलक्षणामात्मीयां परहितक्रियोपायभूतां प्रार्थयते । कस्माद् ? इत्याह—*यतस्तद्दुःखदुःख्येव स* इति । तस्मात् परदुःखैः स बोधिसत्त्वो दुःखी भवति । अत एव सुखं द्विप्रकारं प्रार्थयत इति ।

---

१. हि—का० ।   २. निवर्त्य—मुद्रितः पाठः ।

कस्मान्नोत्कर्षकाले ? तदा हि दुःसमुद्वेजाः सत्त्वा भवन्ति ।

कस्मान्न शतात् ? तदा हि पञ्च कषाया अभ्युत्सदा भवन्ति । तद्यथा—आयुष्कषायः, कल्पकषायः, क्लेशकषायः, दृष्टिकषायः, सत्त्वकषायश्च ।

अपकर्षस्याधस्तात् प्रत्यवरा आयुरादयः किट्टभूतत्वात्[1] कषाया उच्यन्ते ।

द्वाभ्यां हि जीवितोपकरणविपत्ती यथाक्रमम् । द्वाभ्यां कुशलपक्षविपत्तिः; कामसुखल्लिकाऽऽत्मक्लमथानुयोगाधिकारात्, गृहिप्रव्रजितपक्षयोर्वा । एकेनात्मभावविपत्तिः; प्रमाणरूपारोग्यबलबुद्धिस्मृतिवीर्यधैर्यभ्रंशात् ॥

अथ प्रत्येकबुद्धानां कस्मिन् काले उत्पादः ?

द्वयोः प्रत्येकबुद्धानाम्,

उत्कर्षेऽपि, अपकर्षेऽपि ।

द्विविधा हि प्रत्येकबुद्धाः—वर्गचारिणः, खड्गविषाणकल्पाश्च ।

---

*अपकर्षस्याधस्तादि*ति विस्तरः । वर्षशतस्याधस्तात् । *पञ्चकषाया अभ्युत्सदा भवन्ति* । अभ्यधिका भवन्तीत्यर्थः । वर्षशतेऽभ्युत्सदाः, न त्वभ्युत्सदा यथाधस्तात् । *आयुःकषाय* इति । *किट्टभूतं प्रत्यवरं* कषायः, आयुरेव कषाय आयुःकषायः । एवं कल्पकषायादयः ।

*यथाक्रममि*ति । *जीवितविपत्तिरा*युःकषायेण, *उपकरणविपत्तिः* कल्पकषायेण । धान्यपुष्पफलौषधादीन्युपकरणान्यल्परसवीर्यविपाकप्रभावाणि हि तानि भवन्ति, नैव वा भवन्ति । *द्वाभ्यां कुशलपक्षविपत्तिरि*ति । क्लेषकषायेण, दृष्टिकषायेण च कुशलपक्षस्य विपत्तिः । कथम् ? इत्याह—*कामसुखल्लिकात्मक्लमथानुयोगाधिकारादि*ति । कामसुखमेव कामसुखल्लिका, कामसुखलीनतेति वा । कामतृष्णा वा कामसुखल्लिका, यथा कामसुखे सज्यते । आत्मक्लमथः = आत्मोपतापः । आत्मपीडेत्यर्थः । कामसुखल्लिकात्मक्लमथयोरनुयोगः=अनुसेवनम्, तस्याधिकारस्तस्मात् । तदुक्तम्—कामसुखल्लिकानुयोगमात्मक्लमथानुयोगं वाधिकृत्यारभ्य क्लेशदृष्टिकषायाभ्यां कुशलपक्षविपत्तिर्भवतीति । एवं तावदविशेषेण ।

गृहिप्रव्रजितपक्षयोर्वा । गृहिपक्षस्य क्लेषकषायेण कुशलपक्षविपत्तिः, प्रव्रजितपक्षस्य दृष्टिकषायेण । यथाक्रमं कामप्रधाना गृहिणः, दृष्टिप्रधाना प्रव्रजिता इति । *एकेने*ति । सत्त्वकषायेण ।

द्विविधा हि प्रत्येकबुद्धा इति । *यस्माद् वर्गचारिणोऽपि* प्रत्येकबुद्धा।

---

१. किटभूतत्वात्—का० ।

तत्र वर्गचारिणः श्रावकपूर्विणः प्रत्येकजिना उच्यन्ते । पृथग्जनपूर्विणोऽपि सन्तीत्यपरे । येऽन्यत्रोत्पादितनिर्वेधभागीया इह स्वयं मार्गमभिसम्बुध्यन्ते । तथा हि पूर्वयोगं पठन्ति—"पर्वते किल पञ्चशतानि तापसानां कष्टानि तपांसि तप्यन्ते स्म, यावत् प्रत्येकबुद्धसहोषितेन मर्कटेनागम्य तदीर्यापथसन्दर्शनात् प्रत्येकबोधिमभिसम्बुद्धाः" ( ) इति । न चार्याः सन्तः कष्टानि तपांसि तप्येरन् ।

खड्गविषाणकल्पाः पुनरसंसृष्टविहारिणः[१] ।

तेषां प्रत्येकबुद्धानाम्—

खड्गः कल्पशतान्वयः ॥ ९४ ॥

महाकल्पानां शतं बोधिसम्भारेषु चरितः खड्गं विषाणकल्पो भवति । विनोपदेशेनात्मानमेकं प्रतिबुद्धा इति प्रत्येकबुद्धाः । ते ह्येकमात्मानं दमयन्ति, नान्यान् ।

किं पुनरत्र कारणम् ? न हि तावदशक्ता धर्मं देशयितुम्; प्रतिसंवित्प्राप्त-

---

श्रावकपूर्विणो भवन्ति न केवलं खड्गविषाणकल्पाः । तस्मादुत्कर्षेऽपि तेषामुत्पत्तिर्न विरुध्यते । ये ह्युत्पादितस्रोतआपत्तिफलसकृदागामिफला अन्तर्हिते बुद्धशासने स्वयमर्हत्त्वमधिगच्छन्ति, ते वर्गचारिणः । ते च बुद्धोत्पादकाल एव प्राकृतसंवेगत्वान्न पुनः संवेजनीया इति । *तदीर्यापथसन्दर्शनादि*ति । प्रत्येकबुद्धेर्यापथसन्दर्शनात् । पर्यङ्कबद्धसमाधिरूपसन्दर्शनात् । *न चार्याः सन्तः कष्टानि तपांसि तप्येरन्नि*ति । सत्यदर्शनकाल एव शीलव्रतपरामर्शदृष्टेः प्रहीणत्वात्, शीलव्रतपरामर्शदृष्टिपूर्वकत्वाच्च कष्टतपःक्रियायाः ।

खड्गविषाणकल्पा इति । यथा खड्गविषाणा अद्वितीया भवन्ति, एवं ते गृहस्थप्रव्रजितैरन्यैश्च प्रत्येकबुद्धैरसंसृष्टविहारिण इति । खड्गविषाणकल्पा इत्युच्यन्ते ।

"कल्पशतान्वयः" इति । कल्पशतकृतबोधिहेतुरित्यर्थः । अत एव व्याचष्टे—*महाकल्पानां शतं बोधिसम्भारेषु* शीलसमाधिप्रज्ञालक्षणेषु *चरितः* कृतप्रयोग इति ।

---

१. पुनरेकविहारिणः—का० ।

त्वात् । शक्यं च तैः पूर्वबुद्धानामनुशासनमनुस्मृत्यापि[1] धर्मं देशयितुम् । नापि निष्करुणाः; सत्त्वानुग्रहार्थमृद्धेराविष्करणात् । नापि सत्त्वानामभव्यत्वात्; तथा हि लौकिकवीतरागाः[2] संविद्यन्ते । किं तर्हि ?

पूर्वाभ्यासवशेनाल्पोत्सुकताधिमुक्तत्वात् नोत्सहन्ते गम्भीरधर्मग्रहणाय परेषां व्यापर्तुम् । अनुस्रोतोगामिनीनां हि प्रजानां दुष्करं प्रतिस्रोतोनयनम् ।

गणपरिकर्षणप्रसङ्गपरिहारार्थं च; व्याक्षेपसंसर्गभीरुत्वात् ॥ ९३–९४ ॥

अथ चक्रवर्तिनः कदोत्पद्यन्ते ?

चक्रवर्तिसमुत्पत्तिर्नाधोऽशीतिसहस्रकात् ।

अमिते चायुषि मनुष्याणां यावदशीतिसहस्रके चोत्पत्तिश्चक्रवर्तिनाम्, नाधः; तस्याः सम्पदस्तदूनायुषामभाजनत्वात् ।

राज्यं चक्रेण वर्तयितुं शीलमेषामिति चक्रवर्तिनः ।

ते पुनश्चतुर्विधाः—

सुवर्णरूप्यताम्रायश्चक्रिणः,

---

*शक्यञ्च तैरि*ति विस्तरः । अथापि ते प्रतिसंवित्प्राप्ता न भवेयुः । तथापि तैः प्रणिधिज्ञानेन *पूर्वबुद्धानामनुशासनमनुस्मृत्य धर्मो देशयितुं शक्यते । ऋद्धेराविष्करणादिति ।* आकाशगमनादिकायाः सत्त्वानुग्रहार्थं प्रकाशनात् । *नापि सत्त्वानामभव्यत्वात् ।* धर्मं न देशयन्तीति वाक्यशेषः । कस्माद् ? इत्याह—*तथाहीति* विस्तरः । यस्माद्धि *लौकिकवीतरागास्तदानी संविद्यन्ते*, तस्माल्लोकोत्तरवीतरागा अपि सम्भवेयुरित्यभिप्रायः । यद्येते न हेतवो धर्मदेशनाया अकरणे, कस्तर्हि हेतुः ? इत्याह—*किं तर्ही*ति विस्तरः ।

पूर्वाभ्यासवशेन असंसर्गाभ्यासवशेन । *अल्पोत्सुकताधिमुक्तत्वात् ।* तत्कृतरुचित्वादित्यर्थः । *गणपरिकर्षणप्रसङ्गपरिहारार्थं*[3] च *नोत्सहन्ते गम्भीरधर्मग्रहणाय परेषां व्यापर्तुम् ।* तथा व्यापारे हि सति गणः परिकृष्टव्यः स्यात् । गणपरिकर्षणप्रसङ्गं पुनः कस्मात् परिहरन्ति ? *व्याक्षेपसंसर्गभीरुत्वात् ।* व्याक्षेपसंसर्गाभ्यां भीरुत्वात् । व्याक्षेपः=अभिप्रेतसमाध्यादिकर्मण्यप्रवृत्तिः । संसर्गः=अन्यसम्पर्कः । व्याक्षेपसंसर्गभीरुत्वं पुनः पूर्वाभ्यासवशात् ॥ ९३–९४ ॥

---

१. ०बुद्धानां शासनमनु०—का० ।　　२. लौकिकमार्गवीत०—का० ।

३. ०परिहार्यं—मुद्रितः पाठः ।

सुवर्ण-रूप्य-ताम्र-अयश्चक्राणि येषां सन्ति । प्रथम एषामुत्तमः, द्वितीय ऊनोत्तमः, तृतीयो मध्यमः, चतुर्थोऽधमः ।

तेऽधरक्रमात् ॥ ९५ ॥

एक-द्वि-त्रि-चतुर्द्वीपाः

यस्यायसं चक्रं स एकद्वीपाधिपतिः, यस्य ताम्रमयं स द्वयोः, यस्य रूप्यमयं स त्रयाणाम्, यस्य सुवर्णमयं स चतुर्द्वीपाधिपतिः—एष **प्राज्ञप्तिको** निर्देशः ।

सूत्रे तु प्रधानग्रहणादेकमेव सौवर्णं चक्रम् । "यस्य राज्ञः क्षत्रियस्य मूर्धाभिषिक्तस्य तदैव पोषधे पञ्चदश्यां शिरःस्नातस्योपोषधोपोषितस्योपरिप्रासाद-तलगतस्यामात्यगणपरिवृतस्य पूर्वस्यां दिशि चक्ररत्नं प्रादुर्भवति सहस्रारं सना-भिकं सनेमिकं सर्वाकारपरिपूर्णं शुभकर्मारकृतं दिव्यं सर्वसौवर्णम्, स राजा भवति चक्रवर्ती" (   ) इति ।

एवं चैते चक्रवर्तिन उत्पद्यन्ते—

न च द्वौ सह बुद्धवत् ।

सूत्र उक्तम्—"अस्थानमनवकाशो यदपूर्वाचरमौ द्वौ तथागतावर्हन्तौ सम्यक्सम्बुद्धौ लोक उत्पद्येयाताम् । नेदं स्थानं विद्यते । स्थानमेतद् विद्यते यदेकस्तथागतः । यथा तथागत एवं चक्रवर्तिनौ" (   ) इति ।

इदमत्र सम्प्रधार्यम्—किमत्र त्रिसाहस्रमहासाहस्रो लोकधातुर्लोक इष्टः, उताहो सर्वलोकधातव इति ?

नान्यत्र बुद्धा उत्पद्यन्ते इत्येके । किं कारणम् ? मा भूद् भगवतः शक्ति-व्याघात इति । एक एव हि भगवान् सर्वत्र शक्तः । यत्र बुद्ध एको न शक्तः

एष प्राज्ञप्तिक इति । *प्रज्ञप्तिशास्त्रनिर्देशः—चतुर्विधाश्चक्रवर्तिन* इति । सूत्रे तु सुवर्णचक्रवर्त्येवोक्तः; प्राधान्यात् ।

अस्थानं वर्तमानकालापेक्षया । *अनवकाशोऽ*नागतापेक्षया । अनागतेऽप्य-ध्वनि सम्भवाद्युगपद् द्वयोरिति । *अपूर्वाचरमाविति* । नैकः पूर्वो नापरः पश्चात् । किं तर्हि ? सहेत्यर्थः । *समसम* इति वीप्सा । अथ वा—समैः सर्वसत्त्वेषु बुद्धै-र्भगवद्भिः सम इति समसमः ।

स्याद् विनेयान् विनेतुम्, तत्रान्योऽपि न शक्त इति। उक्तं च सूत्रे—"स चेत् त्वां शारिपुत्र कश्चिदुपसंक्रम्यैवं पृच्छेत्—'अस्ति कश्चिदेतर्हि श्रमणो वा ब्राह्मणो वा समसमः श्रमणेन गौतमेन यदुताभिसम्बोधाय। एवं च पृष्टः किं व्याकुर्याः'? 'स चेन्मां भदन्त कश्चिदुपसंक्रम्यैवं पृच्छेत्, तस्याहं पृष्ट एवं व्याकुर्याम्—नास्ति कश्चिदेतर्हि श्रमणो वा ब्राह्मणो वा समसमो भगवता यदुताभिसम्बोधाय। तत् कस्य हेतोः? सम्मुखं मे भगवतोऽन्तिकाच्छ्रुतम्, सम्मुखमुद्गृहीतम्—अस्थानमनवकाशो यदपूर्वाचरमौ तथागतौ लोक उत्पद्येयातां नेदं स्थानं विद्यते"' ( ) इति।

यत्तर्हि भगवतोक्तं ब्रह्मसूत्रे—"यावत्त्रिसाहस्रमहासाहस्रको लोको वशे मेऽत्र वर्तते" ( ) इति? आभिप्रायिक एष निर्देशः।

कोऽत्राभिप्रायः? तावतोऽनभिसंस्कारेण व्यवलोकनात्। अभिसंस्कारेण त्वनन्तो बुद्धानां चक्षुर्विषयः।

सन्त्येवान्यलोकधातुषु बुद्धा इति **निकायान्तरीयाः**। किं कारणम्? बहवो हि समं सम्भारेषु प्रवर्तमाना दृश्यन्ते। न चैकत्र बहूनां युगपद् योग उत्पत्तुम्, न चास्ति तदुत्पत्तौ कश्चित् प्रतिबन्ध इति नियतं लोकधात्वन्तरेषूत्पद्यन्ते। अनन्ता लोकधातव इति न शक्यं भगवता कल्पमप्यायुर्बिभ्रता यथेह तथान्येष्वपि अनन्तेषु लोकधातुषु व्यापर्तुम्, किं पुनः पुरुषायुषम्।

कथं चेह बुद्धो व्याप्रियते? अस्य पुद्गलस्येदमिन्द्रियम् इयता कालेनामुष्मिन् देशे अमुं पुद्गलमागम्यास्य दोषस्य परिहारादस्याङ्गस्योपसंहारादनेन प्रयोगेणानुत्पन्नं वोत्पत्स्यते, अपरिपूर्णं वा परिपूरयिष्यतीति।

यत्त्विदं सूत्रमत्रोपनीतम्—"अस्थानमनवकाशो यदपूर्वाचरमौ द्वौ तथागतावेकत्र लोक उत्पद्येयाताम्" ( ) इति, तदेवेदं सम्प्रधार्यते—

तावतोऽनभिसंस्कारेणेति। तावतो लोकधातोरनाभोगेन दर्शनात्।
निकायान्तरीया इति। महासाङ्घिकप्रभृतयः।
न चैकत्रेति। लोकधातौ पुरुषायुषमिति। पुरुषस्यायुः पुरुषायुषम्। तद् बिभ्रतेति वर्तते। इद*मिन्द्रियमि*ति। श्रद्धादि। *अस्याङ्गस्येति*। अस्य प्रत्ययस्य।

किमिदमेकं लोकधातुमधिकृत्योक्तम्, आहोस्वित् सर्वानिति ? चक्रवर्तिनोऽपि चास्य लोकधातौ न स्यादुत्पादः; सहोत्पत्तिप्रतिषेधात् बुद्धवत् ।

अथैतत् क्षम्यते, इदं तु कस्मान्न क्षम्यते—"पुण्यस्तु बुद्धानां लोक उत्पादः" इति ? यदि बहूनां बहुषु स्यात्, न दोषः स्यात् । भूयसां लोकानामभ्युदयेन योगः स्यान्निःश्रेयसेन च ॥

अथैकस्मिन्नपि कस्माद् द्वौ तथागतौ न सहोत्पद्येते ?

१. प्रयोजनाभावात् । २. प्रणिधानवशाच्च । एवं हि बोधिसत्त्वाः प्रणिधानं कुर्वन्ति—'अहो बताहमन्धे लोकेऽपरिणायके बुद्धो लोक उत्पद्येयमनाथानां नाथः' इति । ३. आदरार्थम् । ४. अभित्वरार्थं च । एकस्मिन् हि बुद्धे सुतरामाद्रियन्ते । 'दुर्लभ ईदृशोऽन्यः' इति मन्यमानाः सुतरां चाभित्वरन्ते शासनप्रतिपत्तौ—'माऽस्मिन् गते परिनिर्वृते वाऽनाथा भूम' इति ॥

अथैते चक्रवर्तिनः सुवर्णादिमयैश्चक्रैः पृथिवीं जयन्तः कथं जयन्ति ? यथाक्रमम्—

प्रत्युद्यानस्वयंयानकलहास्त्रजितः,

यस्य सौवर्णं चक्रं भवति तं कोट्टराजानः स्वयं प्रत्युद्गच्छन्ति—'इमे देवस्य जनपदाः ऋद्धाश्च स्फीताश्च क्षेमाश्च सुभिक्षाश्चाकीर्णबहुजनमनुष्याश्च, तान् देवः समनुशास्तु, वयं देवस्यानुयात्रिका भविष्यामः' इति ।

यस्य रूप्यमयं स स्वयमेव तेषामन्तिकं याति, पश्चादस्य प्रह्वीभवन्ति ।

यस्य ताम्रमयं स तेषामन्तिकं गत्वा कलहायते, पश्चात् प्रह्वीभवन्ति ।

किमिदमेकं लोकधातुमधिकृत्येति । एकचातुर्द्वीपकं त्रिसाहस्रमहासाहस्रं वा लोकधातुमधिकृत्यैतदुक्तमित्यभिप्रायः । *चक्रवर्तिनोऽपि* चेति विस्तरः । "अस्थानमनवकाशो यदपूर्वाचरमौ द्वौ तथागतौ उत्पद्येयाताम्" इति नानेन वचनेन लोकधात्वन्तरोत्पादप्रतिषेधः; तथागतानां तथोक्तत्वात् । तद् यथा—चक्रवर्त्तिनाम् । चक्रवर्त्तिनोऽपि हि तथोक्ताः—"अस्थानमनवकाशो यदपूर्वाचरमौ द्वौ चक्रवर्त्तिनौ लोक उत्पद्येयाताम्" इति ।

जनाः प्राकृतमनुष्याः । मनुष्यास्तु मतिमन्तः ।

यस्य शस्त्रमयं स तेषामन्तिकं गच्छति, अन्योन्यं शस्त्राण्यावहन्ति, पश्चान्नमन्ति ॥

सर्वे तु चक्रवर्तिनः—

अवधाः ॥ ९६ ॥

शस्त्रेणापि जयतां वधो न प्रवर्तते । निर्जित्य च सत्त्वान् दशसु कुशलेषु कर्मपथेषु प्रतिष्ठापयन्ति । अत एव ते नियतं देवेषूत्पद्यन्ते । सूत्र उक्तम्—"राज्ञश्चक्रवर्तिनो लोके प्रादुर्भावात् सप्तानां रत्नानां लोके प्रादुर्भावो भवति । तद्यथा—चक्ररत्नस्य, हस्तिरत्नस्य, अश्वरत्नस्य, मणिरत्नस्य, स्त्रीरत्नस्य, गृहपतिरत्नस्य, परिणायकरत्नस्य" (   ) इति । कथं सत्त्वसंख्याता हस्त्यादयः परकीयेण कर्मणोत्पद्यन्ते ? न वै कश्चित् परकीयेणोत्पद्यते । येन तु सत्त्वेन तत्सम्बन्धजातीयं[1] तत्सम्बद्धसंवर्तनीयं[1] कर्मोपचितम्, तस्मिन्नुत्पन्ने स्वान्येवैनं कर्माण्युत्पादयन्ति ।

किमेष एवान्यराजभ्यश्चक्रवर्तिनां विशेषः ? अन्योऽपि विशेषोऽस्ति; तद्यथा—द्वात्रिंशन्महापुरुषलक्षणान्येषां भवन्ति, तद्यथा बुद्धानाम् ॥९५–९६॥

तत्र तु—

देशस्थोत्तप्तपूर्णत्वैर्लक्षणातिशयो मुनेः ।

देशस्थतराणि बुद्धानां लक्षणानि, उत्तप्ततराणि, सम्पूर्णतराणि च—इत्येष तेषां विशेषः ॥

शस्त्राण्यावहन्ति उत्क्षिपन्ति ।

गृहपतिरत्नम् । कोषाध्यक्षजातीयः । *परिणायकरत्नम्* । बलाध्यक्षजातीयः । *तत्सम्बन्धजातीयमिति* । तेन चक्रवर्तिना सम्बद्धः । तत्सम्बद्धस्य तत्सम्बद्धेन वा संवर्तनं तस्मै हितं तदनुकूलं *तत्सम्बद्धसंवर्तनीयमिति* । येन सत्त्वेन कर्मापचितं *तस्मिन्नुत्पन्ने* चक्रवर्तिन स्वान्येवैनं सत्त्वं कर्माण्युत्पादयन्ति । न तु सत्त्वश्चक्रवर्त्तिकुशलविपाकोत्पत्तिप्रत्ययभावमापद्यते । स च कुशलविपाकश्चक्रवर्त्तिन एवेत्यवगन्तव्यम् ॥ ९५–९६ ॥

देशस्थतराणीति । अभ्रष्टस्थानानि । *उत्तप्ततराणि* । प्रभास्वरतराणि । *सम्पूर्णतराणि* । अखण्डरूपाणि ॥

१–१. तत्सम्बन्धसंवर्तनीयम्—का० ।

किं खलु प्राथमकल्पिका अपि मनुष्याः सराजका आसन् ? नेत्याह । किं तर्हि ?

प्रागासन् रूपिवत् सत्त्वाः,

प्राथमकल्पिका मनुष्या रूपावचरा इवासन् । सूत्र उक्तम्—"ते भवन्ति रूपिणो मनोमयाः सर्वाङ्गप्रत्यङ्गोपेता अविकला अहीनेन्द्रियाः शुभा वर्णस्थायिनः स्वयम्प्रभा विहायसङ्गमाः प्रीतिभक्षाः प्रीत्याहारा दीर्घायुषो दीर्घमध्वानं तिष्ठन्ति" (   ) इति ।

रसरागात् ततः शनैः ॥ ९७ ॥

आलस्यात् सन्निधिं कृत्वा साग्रहैः क्षेत्रपो भृतः ।

तेषां तथाभूतानां भूमिरसः प्रादुर्भूतो मधुस्वादुरसः ।

तस्यान्यतमो लोलुपजातीयः सत्त्वो गन्धं घ्रात्वा रसं स्वादितवान्, भक्षितवांश्च । तथा अन्येऽपि सत्त्वास्तथैवाकार्षुः । स आरम्भः कवडीकाराहारस्य । तेषां तदाहाराभ्यासात् खरत्वं गुरुत्वं च कायेऽवक्रान्तम्, प्रभावा अन्तर्हिताः । ततोऽन्धकार उत्पन्ने सूर्याचन्द्रमसौ प्रादुर्भूतौ ।

सोऽप्येषां भूमिरस आस्वादगृद्धानां क्रमेणान्तर्हितो भूमिपर्पटकं प्रादुर्भूतम् । तत्रापि गृद्धाः, तदप्यन्तर्हितम् । वनलता प्रादुर्भूता । तत्रापि गृद्धाः, साऽप्यन्तर्हिता । अकृष्टोप्तः शालिरुत्पन्नः, तं प्रभुक्ताः । तस्येदानीमौदारिकत्वान्निःष्यदनिर्वाहार्थं सत्त्वानां मूत्रपुरीषमार्गौ सह स्त्रीपुरुषेन्द्रियाभ्यां प्रादुर्भूतौ, संस्थानं च

चक्रवर्त्तिराजप्रस्तावेनेदं विचार्यते—*किं खलु यावत् सराजका* इति । *रूपावचरा इवासन्निति*, अस्यार्थस्य प्रतिपादनाय सूत्रमानयति—*सूत्र उक्तमिति* विस्तरः । दृश्यरूपत्वाद् *रूपिणः* । उपपादुकत्वान्*मनोमयाः* । हस्तपादतदङ्गुल्याद्युपेतत्वात् *सर्वाङ्गप्रत्यङ्गोपेताः* । समग्रेन्द्रियत्वाद*विकलाः* । काणविभ्रान्ताद्यभावाद*हीनेन्द्रियाः* । दर्शनीयसंस्थानत्वात् *शुभाः* । रमणीयवर्णत्वाद् *वर्णस्थायिनः* । आदित्यादिप्रभानपेक्षत्वात् *स्वयम्प्रभाः* । कर्मर्द्धिसंयोगेनाकाशचरत्वाद् *विहायसङ्गमाः* । कवडीकाराहारानपेक्षत्वात् *प्रीतिभक्षाः*, *प्रीत्याहारा* इति पर्यायौ । तथा *दीर्घायुषो दीर्घमध्वानं तिष्ठन्तीति* ।

मधुस्वादुरस इति । मधुन इव स्वादुरसोऽस्य स इति ।

भिन्नम् । तेषामन्योन्यं पश्यतां पूर्वाभ्यासवशादयोनिशोमनस्कारग्राहग्रासतां गतानां कामराग उदीर्णो यतो विप्रतिपन्नाः । एष आरम्भः कामिनां कामभूत-ग्रहावेशस्य ।

ते च खलु तं शालिं सायं च सायमाशार्थं प्रातश्च प्रातराशार्थं प्रवेश-यन्ति स्म । अथान्यतमः सत्त्वोऽलसजातीयः सन्निधिकारमकार्षीत् । अन्येऽपि च सत्त्वाः सन्निधिकारमकार्षुः । तेषां तत्र ममकार उत्पन्ने स शालिर्लूनो लूनो न पुनर्जायते स्म ।

ततः क्षेत्राणि प्रविभज्य स्वेष्वाग्रहं कृत्वा परकीयं हर्तुमारब्धाः । प्रथम आरम्भश्चौर्यस्य । तैस्तेषामङ्कुशार्थं समेत्यान्यतमः पुरुषविशेषः क्षेत्राणि पालयितुं षष्ठभागेन भृतः । तस्य क्षेत्राणामधिपतिः क्षत्रियः क्षत्रिय इति संज्ञोत्पन्ना । महाजनकायस्य सम्मतः प्रजां च रञ्जयतीति महासम्मतो राजेति संज्ञोत्पन्ना । एष आरम्भो राजपरम्परायाः ।

तत्र ये गृहेभ्यो बहिर्मनसः संवृत्तास्तेषाम् 'ब्राह्मणाः' इति संज्ञोत्पन्ना ।

अथान्यतमस्य राज्ञो लोभात् संविभागमकुर्वन्तः सत्त्वानां तास्कर्यं प्राचुर्य-मापन्नम् । स तान् शस्त्रेणोपसंक्रमते स्म । ततोऽन्ये 'नैवङ्कारकाः स्म' इति मृषा वाचं वक्तुमारब्धा इति ।

ततः कर्मपथाधिक्यादपह्रासे दशायुषः ॥ ९८ ॥

तत एवं कर्मपथानां वृद्धौ सत्यां क्रमेण ह्रसतां मनुष्याणां दशवर्षायुषो मनुष्याः सम्भवन्ति ।

अतोऽस्य कृत्स्नस्यानर्थौघस्य द्वौ धर्मौ मूलयोनिः—रसरागः, आलस्यं च ॥ ९८ ॥

अयोनिशोमनस्कारस्य ग्राहभूतस्य ग्रासतां गतानां सत्त्वानां *काम* एव ग्रहः, *तेनावेशस्तस्यारम्भ* इति ।

सायमाशार्थमिति । अपराह्णभोजनार्थम् । *प्रातराशार्थमिति* । प्रातर्भोज-नार्थम् । *सन्निधिकारः* संग्रहः । *क्षेत्राणि विभज्य* अकृष्टोप्तेन शालिना तद्वृत्ति-कल्पनात् । क्षत्रियादिसंज्ञानां नैरुक्तेन विधिना सिद्धिः ॥ ९७-९८ ॥

दशवर्षायुषां मनुष्याणामन्तरकल्पस्य निर्याणं भवति। कथं भवति ? इत्याह—

कल्पस्य शस्त्ररोगाभ्यां दुर्भिक्षेण च निर्गमः।

त्रिभिरन्तरकल्पस्य निर्याणं भवति—**शस्त्रेण, रोगेण, दुर्भिक्षेण च।** अन्तरकल्पस्य निर्याणकाले दशवर्षायुषो मनुष्या अधर्मरागरक्ता भवन्ति विषमलोभाभिभूता मिथ्याधर्मपरीताः अमातृज्ञा[1] अपितृज्ञाः[1]। तेषां व्यापाद उत्कर्षं गतोऽन्योन्यं सत्त्वं दृष्ट्वा तीव्रमाघातचित्तं वधकचित्तं च प्रत्युपस्थितं भवति। तद्यथा—इदानीं मृगलुब्धकस्यारण्यकं मृगं दृष्ट्वा ते यद्यदेव गृह्णन्ति काष्ठं वा लोष्टं वा तत्तेषां तीक्ष्णं शस्त्रं प्रादुर्भवति, तेऽन्योन्यं सत्त्वं जीविताद् व्यपरोपयन्ति।

पुनः कल्पस्य निर्याणकाले दशवर्षायुषां मनुष्याणां तैरेव दोषैरमनुष्या ईतिमुत्सृजन्ति, यतस्तेषामसाध्या[2] व्याध्यादयः प्रादुर्भवन्ति यतो म्रियन्ते।

पुनर्दशवर्षायुषां मनुष्याणां तैरेव दोषैर्देवा वर्षं नोत्सृजन्ति, यतो दुर्भिक्षं जायते—चञ्चुः, श्वेतास्थि, शलाकावृत्तिः।

कथं च चञ्चुः ? द्वाभ्यां कारणाभ्याम्। य इदानीं समवायः स तदानीं 'चञ्चुः' इत्युच्यते। समुद्गोऽपि चञ्चुः। ते च मनुष्या जिघत्सादौर्बल्यपरीताः

निर्याणमिति। परिसमाप्तिः। *अधर्मरागरक्ता* इति। काममिथ्याचाररागाध्यवसिताः। *विषमलोभाभिभूता* इति। विषमलोभः = परकीयस्वीकरणेच्छा चौर्याद् बलाद्वा, तेनाभिभूताः। *मिथ्याधर्मपरीता* इति। विपरीतधर्मपरिदीपकाः। *अमातृज्ञा अपितृज्ञा* इति विस्तरः।

पुनः कल्पस्य निर्याणकाल इति। इह कल्पस्य निर्याणानि त्रीण्युच्यन्ते—शस्त्र-रोग-दुर्भिक्षाणि। किमेकस्य दशवर्षायुःकल्पस्य त्रीणि निर्याणाणि क्रमेण भवन्ति, आहोस्विदेकैकस्यैकैकं क्रमेणेति ? एके तावदाहुः—एकैकमिति। अपरे पुनराहुः—एकस्य क्रमेण त्रीणि भवन्ति। पूर्वं दुर्भिक्षम्, तदनन्तरो रोगः, तदनन्तरं शस्त्रमिति। पूर्वकस्तु पक्ष इष्ट इति पश्यामः।

तैरेव दोषैरिति। अधर्मादिरागादिभिः। *अमनुष्याः* पिशाचादयः। ईति व्याधयो *देवामुत्सृजन्ति*, ओजो वा हरन्ति, प्रभावतो वा पुष्पफलौषधिप्रभृतीनां महाभूतानि दूषयन्ति। *यतस्तेषामसाध्या व्याधयः प्रादुर्भवन्ति यतो म्रियन्ते।*

१—१. का० पुस्तके नास्ति। २. तेषाम०—का०।

समेत्य कालं कुर्वन्ति, समुद्गेषु चानागतजनतानुग्रहार्थं बीजान्यवस्थापयन्ति । अतस्तद् दुर्भिक्षम्, 'चञ्चम्' इत्युच्यते ।

कथं श्वेतास्थि ? द्वाभ्यां कारणाभ्याम् । तेषां हि शुष्करूक्षकायानां कालं कुर्वतामाश्वेवास्थीनि श्वेतानि भवन्ति, बुभुक्षाहताश्च श्वेतान्यस्थीनि संहृत्य क्वाथयित्वा पिबन्ति ।

कथं शलाकावृत्तिः ? द्वाभ्यां कारणाभ्याम् । ते हि सत्त्वाः शलाकोद्देशिकया गृहेष्वामिषं संविभजन्ते—अद्य गृहस्वामी भोक्ष्यते, श्वो गृहस्वामिनीत्येवमादि; धान्यस्थानविवरेभ्यश्च शलाकया धान्यफलानि निष्कृष्य बहुलोदकेन क्वाथयित्वा पिबन्ति ।

एवं वर्णयन्ति—"येनैकाहमपि प्राणातिपातविरतिः संरक्षिता भवति एकहरीतकी वा सङ्घायैकपिण्डपातो वा सत्कृत्यानुप्रदत्तो भवति, स तेषु शस्त्ररोग-दुर्भिक्षान्तरकल्पेषु नोत्पद्यते" (   ) इति ।

अथ कियन्तं कालमेतानि शस्त्राघातरोगदुर्भिक्षाणि तेषां सत्त्वानां भवन्ति ?

दिवसान् सप्त मासांश्च वर्षाणि च यथाक्रमम् ॥ ९९ ॥

शस्त्रकः प्राणातिपातः **सप्त दिवसान्** भवति । रोगः **सप्त मासांश्च**, दिवसांश्च । दुर्भिक्षं सप्त **वर्षाणि च** । मासांश्च दिवसांश्चेति समुच्चयार्थश्चकारः ।

तदा च द्वयोर्द्वीपयोस्तेषां प्रतिरूपकाणि भवन्ति । व्यापाद उद्रेकप्राप्तो भवति, वैवर्ण्यदौर्बल्ये, जिघत्सापिपासे च ।

यदुक्तम्, एवमन्यस्यामपि संवर्तन्यां वेदितव्यं यथायोगमिति ॥ ९९ ॥

अथ कतीमाः संवर्तन्यः ?

संवर्तन्यः पुनस्तिस्रो भवन्त्यग्न्यम्बुवायुभिः ।

एकत्र ध्याने सत्त्वाः समं संवर्तन्ते एतस्यामिति संवर्तनी ।

तदा चेति विस्तरः । यदेह जम्बुद्वीपे शस्त्रकः प्राणातिपातः, तदा द्वयोर्द्वीपयोः पूर्वविदेहावरगोदानीययोर्व्यापाद उद्रेकप्राप्तो भवति । यदेह रोगस्तदा तयोर्दौर्बल्यम्, यदेह दुर्भिक्षं तयोर्जिघत्सापिपासे ॥ ९९ ॥

१. सप्तभिः सूर्यैस्तेजःसंवर्तनी भवति । २. वर्षोदकेनाप्संवर्तनी । ३. वायुप्रकोपाद् वायुसंवर्तनी । ताभिश्च भाजनानां सूक्ष्मोऽप्यवयवो नावशिष्यते ।

अत्र तु केचित् तीर्थकरा इच्छन्ति—"परमाणवो नित्यास्ते तदानीं शिष्यन्ते" इति ।

कस्मात् त एवमिच्छन्ति ? मा भूदबीजकः स्थूलानां प्रादुर्भाव इति ।

ननु च सत्त्वानां कर्मजः प्रभावविशिष्टो वायुर्बीजमुक्तम् । संवर्तनीशीर्ष-वायुर्वा तस्य निमित्तं भविष्यति । "वायुना लोकान्तरेभ्यो बीजान्याह्रियन्ते" इति महीशासकाः सूत्रे पठन्ति ।

एवमपि न ते बीजादिभ्योऽङ्कुरादीनामुत्पत्तिमिच्छन्ति । किं तर्हि ? स्वेभ्य एवावयवेभ्यः, तेषामपि स्वेभ्य एव, एवं यावत् परमाणुभ्यः ।

किमिदं बीजादीनामङ्कुरादिषु सामर्थ्यम् ? न किञ्चिदन्यत्र परमाणूप-सर्पणात्[1] ।

किं पुनः कारणं त एवमिच्छन्ति ? नहि विजातीयात् सम्भवो युक्त इति ।

कस्मान्न युक्तः ? अनियमो हि स्यात् ।

तीर्थकराः कणभुक्प्रभृतयः ।

वायुर्बीजमुक्तमिति । "बहुविधप्रभावभिन्नैर्वायुभिरभिमथ्यमानाः[2]" इति वचनात् । *तस्य निमित्तमिति* । रूपावचरो वायुरविनष्टः । कामावचरस्य विवर्तकाले प्रथमक्षणोत्पन्नस्य वायोर्निमित्तम् । *बीजान्याह्रीयन्त* इति । पञ्च बीजजातानि मूलबीजादीनि । मूलबीजम्, फल्गुबीजम्, बीजबीजम्, अग्रबीजम्, स्कन्धबीजम् ।

एवमपीति । यद्यप्याह्रियन्ते बीजानि *न ते* स्थूलभावानां *बीजादिभ्यो* बीजाङ्कुरगण्डादिभ्यो*ऽङ्कुरादीनामङ्कुरकाण्डादीनामुत्पत्तिमिच्छन्ति* । बीजादीनि हि तेषां निमित्तकारणानि, न समवायिकारणानि, समवायिकारणैश्च भवितव्यम् ? अत आह—*किं तर्हि, स्वेभ्य एवावयवेभ्य* इति विस्तरः । तद्यथा—अङ्कुराद्यवयवी अङ्कुराद्यवयवेभ्यः । तेषामप्यङ्कुराद्यवयवानां स्वेभ्य एवावयवेभ्यः । *तेषामपि स्वेभ्य एवेति* । *एवं यावत् परमाणुभ्यः* ।

*अन्यत्र परमाणूपसर्पणादि*ति । न जनने बीजादीनां *सामर्थ्यं किञ्चिदस्ति* । अङ्कुरादिपरमाणूपसर्पणात्तु तेषां सामर्थ्यमिष्यत इत्यभिप्रायः । *अनियमो हि*

---

१. तत्परमाणू०—का० ।   २. द्र०—अभि० को० ३.४९; ५०८ तमे पृष्ठे ।

शक्तिनियमान्नैवं भविष्यति । शब्दपाकजोत्पत्तिवत् ।

चित्रो हि गुणधर्मः, द्रव्यं तु नैवम् । समानजातीयेभ्यः एव हि द्रव्येभ्यः समानजातीयानां दृष्ट उत्पादः, तद्यथा—वीरणेभ्यः कटस्य, तन्तुभ्यः पटस्येति ।

इदमयुक्तं वर्तते ।

किमत्रायुक्तम् ? यदसिद्धं साधनायोदाह्रियते ।

किमत्रासिद्धम् ? अन्यो वीरणेभ्यः कटः, अन्यश्च तन्तुभ्यः पट इति ।

त एव हि ते तथासन्निविष्टास्तां तां संज्ञां लभन्ते, पिपीलिकापङ्क्तिवत् ।

कथं गम्यते[1] ? एकतन्तुसंयोगे पटस्यानुपलम्भात् । को हि तदा सतः पटस्योपलब्धौ प्रतिबन्धः ।

स्यादिति । तन्त्वादिभ्योऽपि कटाद्युत्पत्तिः स्यादित्यर्थः । *शक्तिनियमादिति* । यथा बीजादीनां सामर्थ्यनियमान्नानियमो भविष्यति । *शब्दपाकजोत्पत्तिवत्* । यथा शब्दोऽभिघातादिभ्यो विजातीयेभ्य उत्पद्यते, अथ च न यतः कुतश्चिद् गन्धरसादेर्विजातीयादुत्पद्यते, अभिघातादीनामेव विजातीयानां तदुत्पादने सामर्थ्यात्; तथा पाकजा रूपादयो विजातीयादग्न्यादेरुत्पद्यन्ते, अथ च न यतः कुतश्चिद् विजातीयाच्चक्षुरादेरुत्पद्यन्ते, अग्न्यादेरेव तदुत्पादने सामर्थ्यात् ।

वैशेषिक आह—*चित्रो वै गुणधर्मः* स्वजातीयेभ्यो विजातीयेभ्यश्चोत्पद्यते । स्वजातीयेभ्यस्तावद् रूपरसगन्धस्पर्शादयः कारणपूर्वा रूपरसगन्धस्पर्शादिभ्यः एवोत्पद्यन्ते, विजातीयेभ्योऽपि संयोगविभागपाकजादयः कर्मादिभ्यः । तदेवं गुणधर्मो द्रव्यधर्मं प्रत्यनुदाहरणम् ।

त एव हि ते तथेति विस्तरः । वीरणादय एव हि *ते तथा* तेन प्रकारेण कटादिरूपेण *सन्निविष्टा* व्यवस्थि*तास्तां कटसंज्ञां लभन्ते* । *पिपीलिकादिपंक्तिवत्* । यथा पिपीलिकास्तथासन्निविष्टाः पंक्तिरिति संज्ञां लभन्ते, न च ताभ्योऽन्यत् पंक्तिद्रव्यमस्ति भवतामपि सिद्धान्ते ।

कथं गम्यते तानि वीरणादीनि तथासन्निविष्टानि कटादिसंज्ञां लभन्ते, न पुनस्तेभ्यो द्रव्यान्तराणीति ? अत आह—*एकतन्तुसंयोगे पटस्यानुपलम्भात्* । आरब्धकार्ये ह्येकस्मिन् तन्तौ चक्षुःस्पर्शाभ्यां संयुक्ते तत्समवेतः, पटोऽपि च ताभ्यां सन्निकृष्ट इत्यसावपि तथैवोपलभ्येत । यदि ब्रूयात्—प्रतिबन्धात्तस्यानुपलब्धिरिति ? अत आह—*को हि तदा सतो* विद्यमानस्य *पटस्योपलब्धौ प्रतिबन्ध इति* । नास्ति प्रतिबन्ध इत्यभिप्रायः । तस्मान्न पटो नाम द्रव्यान्तरमस्तीति ।

स्यान्मतम्, एकैकस्मिन्तन्तौ प्रदेशेन पटो वर्त्तते, न सर्वात्मना वर्त्तत इति ?

---

१. गम्येत—का० ।

अकृत्स्नवृत्तौ पटभागोऽत्र स्यात्, न पटः। समूहमात्रं च पटः[1]। कश्च तन्तुभ्योऽन्यः पटभागः। अनेकाश्रयसंयोगापेक्षायां[2] दशामात्रसङ्घाते[3] पटोपलब्धिः स्यात्। न वा कदाचित्; मध्यपरभागानामिन्द्रियेणासन्निकर्षात्। क्रमसन्निकर्षे चावयवानां चक्षुःस्पर्शनाभ्यामवयविज्ञानं[4] न स्यात्। तस्मात् क्रमेण सन्निकर्षादवयविव्यवसायादवयवेष्वेव तद्बुद्धिः, अलातचक्रवत्। भिन्नरूपजातिक्रियेषु

अत उच्यते—*अकृत्स्नवृत्ताविति* विस्तरः। अकृत्स्नवृत्तौ पटस्य कल्प्यमानायां *पटभागोऽत्रै*कैकस्मिन् तन्तौ *स्यान्न पटः।* ततः किमिति चेत्? अत आह—*समूहमात्रं च पटः।* स्यादिति वर्त्तते। एकस्मिन् तन्तावेको भागः, अपरस्मिन्नपर इति तन्तुवर्त्तिनां बहूनां भागानां समुदायः पट इति च प्राप्नोति, न चेष्यते। *कश्च तन्तुभ्योऽन्यः पटभाग* इति *कणभुग्भक्ताः* प्रष्टव्याः, येन भागेनायमिन्द्रियसन्निकृष्टे तन्तौ वर्त्तते। तस्मादेतामपि कल्पनां कल्पयित्वा नातोऽन्यः पटः सिध्यति।

स्यान्मतम्—एकैकस्मिन्नपि तन्तौ पटो वर्त्तते, पटोपलब्धेस्तु पटेन्द्रियसन्निकर्षः पटस्यानेकाश्रयसंयोगापेक्षो निमित्तमिति। *अतोऽनेकाश्रयसंयोगापेक्षायामु*पलब्धौ कल्प्यमानायां *दशामात्रसङ्घाते* गृह्यमाणे *पट उपलभ्येत*, न तूपलभ्यते; पटमध्यभागाद्यदर्शनात्।

अथ मतम्—नैव तदानीमपीन्द्रियेण मध्यादिभागाः सम्प्रयुज्यन्त इति, अतो दशामात्रसङ्घाते पटोपलब्धिर्न भवतीति? तत इदमभिधीयते—*न वा कदाचिदि*ति विस्तरः। न वा कदाचित् *पटोलब्धिः स्यात्। मध्यपरभागानामिन्द्रियेणासन्निकर्षात्।* नैव हि सम्भवोऽस्ति यत्तदारम्भका मध्यपरभागाः सर्व एवेन्द्रियेण सन्निकृष्येरन्। तथा च सति तन्त्वादिष्वप्येष प्रसङ्ग इति। न च किञ्चिदपि कार्यमुपलभ्येत। किञ्च—*क्रमसन्निकर्षे* चेति विस्तरः। यदा क्रमेण चक्षुः संस्पर्शनेन्द्रियं वा पटं गृह्णीयात्, तदा पटग्रहणं न स्यात्; युगपदनेकाश्रयसंयोगाभावाच्चक्षुःस्पर्शनेन्द्रिययोः। एवमन्येषामप्यवयवानां ग्रहणं न स्यात्।

तस्मादिति विस्तरः। यस्मात् क्रमेण पटबुद्धिः कटबुद्धिर्वा, *तस्मादवयवेष्वेव* पटावयवेषु कटावयवेषु वा *तद्बुद्धिः* पटबुद्धिः, कटबुद्धिर्वा विकल्पवशाद् भवति। *अलातचक्रवत्।* यथालाते शीघ्रसञ्चारात् तत्र तत्रोत्पद्यमाने अलातचक्रबुद्धिर्भवति, तद्वत्। साधनं चात्र—'न द्रव्यसत् पटः, अवयवग्रहणसापेक्षग्रहणत्वात्, अलातचक्रवत्'। *भिन्नरूपजातिक्रियेष्विति* विस्तरः। भिन्नरूपेषु

१. पटः स्यात्—का०। २. ०गापेक्षणे—का०। ३. ०संयोगे—का०। ४. ०मवयववि०—का०।

तन्तुषु पटस्य रूपाद्यसम्भवात् ।

चित्ररूपादित्वे विजातीयारम्भोऽपि स्यात्, अविचित्रे[1] च पार्श्वान्तरे पटस्यादर्शनं स्यात्[2], चित्ररूपदर्शनं[3] वा । क्रियापि च चित्रेत्यतिचित्रम् । तापप्रकाशभेदे चाग्निप्रभाया[4] आदिमध्यान्तेषु तद्रूपस्पर्शयोरनुपपत्तिः ।

परमाण्वतीन्द्रियत्वेऽपि समस्तानां प्रत्यक्षत्वं यथा तेषां कार्यारम्भकत्वं

तन्तुषु नीलपीतादिभेदात्, भिन्नजातिषु दुकूलकर्पासादिभेदात्, भिन्नक्रियेषूर्ध्वाधोगमभेदात् । *पटस्य रूपाद्यसम्भवात्* । कीदृशं तत्र रूपं भवतु, जातिः क्रिया वा ?

स्यादेषा बुद्धिः—चित्रमस्य रूपादीति ? तदेवं *चित्ररूपादित्वे* कल्प्यमाने *विजातीयारम्भोऽपि* स्यात्, तन्तुवीरणयोरपि कटारम्भः स्यात् । तथा सति धर्मविशेषविपर्ययः प्राप्नोति । अत्यन्तविजातीयारम्भकत्वं द्रव्याणां प्राप्नोतीत्यर्थः ।

अविचित्रे च पार्श्वान्तरे एकपार्श्वचित्रस्य *पटस्यादर्शनं स्यात्*, तस्य चित्ररूपाभिमतत्वात् । रूपदर्शने हि तदाश्रयद्रव्योपलब्धिरिष्यते वैशेषिकैः; "महत्यनेकद्रव्यवत्त्वाद्रूपाच्चोपलब्धिः", "रूपसंस्काराभावाद् वायावनुपलब्धिः" (वै० सू० ४.१.६-८) इति वचनात् । *चित्ररूपदर्शनं* वा अचित्रे पार्श्वे स्याद् यदि पटो दृश्येत । चित्रं हि तस्य रूपमिष्यते । *क्रियापि च चित्रेत्यतिचित्रमिति* । एकं तद् द्रव्यं विचित्रक्रियमिति न युज्यते । क्रियावैचित्र्ये हि क्रियावदभिमतानां द्रव्याणामन्यत्वमिष्यते । *तापप्रकाशभेदे* चेति विस्तरः । अग्निप्रभालक्षणस्यावयविन आदिमध्यान्तेष्वारम्भकेषु तापप्रकाशभेदे स्पर्शनभेदो दृष्टः । स च तद्भेदस्तत्र यथाक्रमं तीव्रमध्यमन्दता । तस्यावयविनः प्रभाद्रव्यस्य तौ *रूपस्पर्शौ नोपपद्येते* । न ह्येकस्यावयविनोऽनेकं रूपं स्पर्शो वा युज्यते । तेन नावयवेभ्योऽवयविद्रव्यमन्यदस्तीति ।

अथ मतम्—यदि तन्त्वादिभ्योऽवयवेभ्यो न पटाद्यवयवी व्यतिरिक्तोऽस्ति, परमाणूनामतीन्द्रियत्वात्, न च तैरवयवैरैन्द्रियक आरब्ध इति कृत्स्नं जगदप्रत्यक्षं स्यात्, प्रत्यक्षं च गवादि दृश्यते । तस्मादतीन्द्रियैः परमाणुभिरर्थान्तरमन्यदैन्द्रियकमारब्धमिति सिद्धिरिति ? अत्रोच्यते—*परमाण्वतीन्द्रियत्वेऽपीति* विस्तरः । यथा भवतां वैशेषिकाणामतीन्द्रियत्वेऽपि *समस्तानां* कार्यारम्भकत्वम्,

---

१. अचित्रे—का० ।
२. का० पुस्तके नास्ति ।
३. चित्रदर्शनं—का० ।
४. वा०—का० ।
५. आदिमध्यान्ते—का० ।

चक्षुरादीनां च तैमिरिकाणां च विकीर्णकेशोपलब्धिः। तेषां परमाणुवदेकः केशोऽतीन्द्रियः।

रूपादिष्वेव च परमाणुसंज्ञाविनिवेशात्[1] तद्विनाशे सिद्धः परमाणुविनाशः?

द्रव्यं हि परमाणुः, अन्यच्च रूपादिभ्यो द्रव्यमिति न तेषां विनाशे तद्विनाशः सिद्ध्यति।

अप्रयुक्तमस्यान्यत्वम्; यावता न परिच्छिद्यन्ते[2] केनचित्—इमानि पृथिव्यप्तेजांसि, इम एषां रूपादय इति। चक्षुःस्पर्शनग्राह्याणि च प्रतिज्ञायन्ते[3]। दग्धेषु चोर्णाकर्पासकुसुम्भकुङ्कुमादिषु तद्बुद्ध्यभावाद् रूपादिष्वेव[4] तद्बुद्धिः।

न व्यस्तानाम्; एवमस्माकमपि समस्तानामेव प्रत्यक्षत्वं न व्यस्तानामसत्यवयविन्यर्थान्तरभूते। *यथा चक्षुरादीनां* चक्षुरूपालोकमनस्काराणां समस्तानां चक्षुर्विज्ञानोत्पत्तौ *कारणत्वम्*, नैकैकस्य; एवं परमाणूनामतीन्द्रियत्वेऽपि समस्तानां प्रत्यक्षत्वम्, नैकैकस्य। *तैमिरिकाणां* च पुरुषाणां *विकीर्णा*नामसंयुक्तानां *केशानां समूह उपलभ्यते* अनारब्धेऽप्यवयविनि, न त्वेकैकः केशः। *तेषां* तैमिरिकाणां *परमाणुवदेकः केशोऽतीन्द्रिय* इति। अतो नास्ति तेऽन्यद् द्रव्यम्।

तदेवमवयविनं प्रतिषिध्य रूपादिभ्यो गुणेभ्योऽर्थान्तरं गुणिनं प्रतिषेद्धुकाम आह—*रूपादिष्वेव चेति* विस्तरः। रूपादिष्वेव *परमाणु*रिति *संज्ञाविनिवेशः।* *तद्विनाशे* रूपादिविनाशे सिद्धः *परमाणुविनाश* इति।

वैशेषिका आहुः—*द्रव्यं हि परमाणुः। अन्यच्च रूपादिभ्यो* द्रव्यम्; "रूपरसगन्धस्पर्शवती पृथिवी" (वै० सू० २.१.१) इत्येवमादिसिद्धान्तवचनात्।

अप्रयुक्तमस्यान्यत्वम्। यस्मान्न *केनचित् परिच्छिद्यन्ते इमानि पृथिव्यप्तेजांसि, इमे एषां* पृथिव्यादीनां *रूपादयो* रूपरसगन्धस्पर्शा गुणा *इति*। ब्रूयाद्—अतीन्द्रियाणि तत्त्वतो न निर्धार्यन्त इति ? अत आह—*चक्षुस्पर्शनग्राह्याणि च तानि* पृथिव्यादीनि *प्रतिज्ञायन्त* इति। *दग्धेषु* चेति विस्तरः। ऊर्णादीन्यवयविद्रव्याणि न पच्यन्त इति *पैलुकाः।* तदुक्तं भवति—प्राक्तनगुणनिवृत्तौ पाकजगुणोत्पत्तौ तदाश्रयास्तु द्रव्याणि तदवस्थानान्येव भवन्तीति। तथैवोर्णादिबुद्धिः स्यात्। न च भवति। *तस्माद्* द्रव्यबुद्ध्यभावात्, *रूपादिष्वेव तद्बुद्धि*र्न द्रव्येऽर्थान्तरभूत इति। यदि हि ऊर्णादिद्रव्यं रूपादिभ्योऽन्यत् स्यात्, तत्तदवस्थानं भवतीति

---

१. संज्ञानिवेशात्—का०। २. निर्धार्यते—का०।
३. प्रज्ञायन्ते—का०। ४. रूपादिभेदेष्वेव—का०।

पाकजोत्पत्तौ घटपरिज्ञानं संस्थानसामान्यात्, पङ्क्तिवत् । चिह्नमपश्यतोऽपरिज्ञानात्[1] ।

को वा बालप्रलापेष्वादरः इति तिष्ठतु तावदेवाप्रतिषेधः ॥

अथ कस्याः संवर्तन्याः कतमच्छीर्षं भवति ?

ध्यानत्रयं द्वितीयादि शीर्षं तासां यथाक्रमम् ॥ १०० ॥

त्रीणि संवर्तनीशीर्षाणि—तेजःसंवर्तन्या द्वितीयं ध्यानं शीर्षं भवत्यधो दह्यते, अप्संवर्तन्यास्तृतीयं ध्यानं शीर्षं भवत्यधः क्लिद्यते, वायुसंवर्तन्याश्चतुर्थं ध्यानं शीर्षं भवत्यधो विकीर्यते ।

यद्धि संवर्तन्या उपरिष्टात्तच्छीर्षमित्युच्यते ॥ १०० ॥

किं पुनः कारणं प्रथमद्वितीयतृतीयध्यानानि तेजोजलवायुभिर्ध्वस्यन्ते ?

तदपक्षालसाधर्म्यात्,

प्रथमे हि ध्याने वितर्कविचारा अपक्षालाः । ते च मनसः परिदाहकत्वादग्निकल्पाः ।

द्वितीये प्रीतिरपक्षाला । सा च प्रस्रब्धियोगेनाश्रयमृदुकरणादप्कल्पा[2] ।

रूपादीन्येवाग्निसम्बन्धादुष्णेन निरुद्धानीत्यूर्णादिबुद्धिः स्यात्, न च भवति, तस्माद् रूपादिष्वेवोर्णादिबुद्धिः ।

वैशेषिका आहुः—यदि रूपादिमात्रं घटः स्यात्, अग्निसम्बन्धाद् रूपादीनि पाकजादीन्यन्यान्युत्पद्यन्त इति 'स एवायं घटः' इति न परिज्ञायेत । यस्य तु पाकाद् रूपादीन्येवोत्पद्यन्ते निरुध्यन्ते चेति, स एव घटस्तदवस्थानो भवतीति तस्य तत् परिज्ञानं युज्यत इति ? अत इदमुच्यते—*पाकजोत्पत्तौ घटपरिज्ञानं संस्थानसामान्यादि*ति । रूपाद्याकृतिसामान्यादित्यर्थः । *पंक्तिवत् ।* यथा न वस्तत् पिपीलिकानां तद्व्यतिरिक्तं पंक्तिद्रव्यं नामास्ति, अथ च पूर्वपंक्तिसंस्थानसामान्यादन्यस्यामपि[3] तत्परिज्ञानं भवति—सैवेयं पिपीलिकानां पंक्तिरिति । आह—कथमेतद् गम्यते संस्थानसामान्यात् परिज्ञानम्, न तु तादवस्थ्यादिति ? अत्रोच्यते—*चिह्नमपश्यतोऽपरिज्ञानादि*ति । यस्मात् खण्डनिम्नोन्नतादि चिह्नमपश्यतस्तत्परिज्ञानं न भवति, अतः संस्थानसामान्यादिति सिद्धम् ॥ १०० ॥

सा चेति विस्तरः । सा च प्रीतिः । *प्रस्रब्धियोगेन ।* 'प्रीतेर्मनसः प्रस्रब्धिर्जायते' इति प्रस्रब्धियोगे*नाश्रयमृदुकरणादप्कल्पा ।*

---

१. परिज्ञानाभावात्—का० । २. ०मृदूकरणादाकल्पाः—का० ।

३. ०स्यामिति—मुद्रितः पाठः ।

अत एव च[1] तस्मिन् कृत्स्नकायस्थैर्यापगमात्[2] दुःखेन्द्रियनिरोध[3] उक्तः सूत्रे ।

तृतीये ध्याने आश्वासप्रश्वासाः । ते च वायव एव । इति यस्यां ध्यानसमापत्तौ यथाभूत आध्यात्मिकोऽपक्षालः, तस्यां ध्यानोपपत्तौ तथाभूतो बाह्य इति ।

कस्मात् पृथिवीसंवर्तनी न भवति ? पृथिव्येव हि भाजनाख्या, तस्यां तेजोजलवायुभिर्विरोधः, न पृथिव्येति ।

अथ चतुर्थध्याने कथं न संवर्तनी ?

न चतुर्थेऽस्त्यनिञ्जनात् ।

चतुर्थं ध्यानमाध्यात्मिकापक्षालरहितत्वादानेज्यमुक्तं[4] **भगवता** । अतोऽत्र बाह्योऽपक्षालो न प्रवर्तत इति नास्त्यत्र संवर्तनी ।

शुद्धावासप्रभावादित्यपरे । न[5] तैः शक्यमारूप्यान् प्रवेष्टुम्, नाप्यन्यत्र गन्तुमिति ।

नित्यं तर्हि चतुर्थध्यानभाजनं प्राप्नोति ?

न नित्यं सह सत्त्वेन तद्विमानोदयव्ययात् ॥ १०१ ॥

अत एव चेति विस्तरः। आश्रयमृदुकरणात् । *तस्मिन्* द्वितीये *समापत्तिध्याने* कृत्स्नस्य *कायस्थैर्यस्यापगमाद् दुःखेन्द्रियनिरोध* उक्तः । "सुखस्य च प्रहाणाद् दुःखस्य च प्रहाणात् पूर्वमेव सौमनस्यदौर्मनस्ययोरस्तङ्गमाददुःखासुखमुपेक्षा-स्मृतिपरिशुद्धं चतुर्थं ध्यानमुपसम्पद्य विहरति" (   ) इति वचनात् ।

*आध्यात्मिकापक्षालरहितत्वा*दिति । ये वितर्कविचारादयोऽष्टावाध्यात्मिका-पक्षालाः—"वितर्कचारौ श्वासौ च सुखादि च चतुष्टयम्" (अभि० को० ८.११) इति, तद्रहितत्वादित्यर्थः । *आनेज्यमिति* । "एजृ कम्पने" (मा० धा० १.१४६) इत्यस्य धातोरेतद् रूपम्—आनेज्यमिति । यदा त्वा*निञ्ज्यमिति* पाठः, तदा इगेः[6] प्रकृत्यन्तरस्यैतद् रूपं द्रष्टव्यम् । *न तैः* शुद्धावासकायिकैः *शक्यमारूप्यान् प्रवेष्टुं* विपश्यनाचरितत्वात् । शमथचरिताश्चारूप्याः । *नाप्यन्यत्र गन्तुमधरां* भूमिं विशेषगामित्वात् ॥ १०१ ॥

---

१. का० पुस्तके नास्ति ।
२. ०क्रौर्या०—का० ।
३. ०न्द्रियस्य०—का० ।
४. दानेञ्ज्य०—का० ।
५. नहि—का० ।
६. इ०—मा० धा० १.९१ ।

न हि चतुर्थं ध्यानमेकम्मिसम्बद्धम् । किं तर्हि ? विच्छिन्नस्थानान्तरम्, तारकावत् । तत्राध्ययं सत्त्व उपपद्येत, च्यवेत वा, स सार्धं विमानेनेति नास्त्यस्य नित्यत्वम् ॥ १०१ ॥

केन पुनः क्रमेणैताः संवर्तन्यो भवन्ति ? निरन्तरं तावत्—

सप्ताग्निना,

सप्त संवर्तन्यस्तेजसा भवन्ति । ततः—

अद्भिरेका,

सप्तानां तेजःसंवर्तनीनामनन्तरमद्भिः संवर्तनी भवति ।

एवं गतेऽद्भिः सप्तके पुनः ।

तेजसा सप्तकः,

एतेन क्रमेणाप्संवर्तनीनां **गते सप्तके पुनः** तेजःसंवर्तनीनां सप्तको भवति ।

पश्चाद् वायुसंवर्तनी ततः ॥ १०२ ॥

पश्चादेका वायुसंवर्तनी भवति । किं कारणम् ? यथैव हि तेषां सत्त्वानां समापत्तिविशेषादात्मभावानां स्थितिविशेषः, तथा भाजनानामपामिति ता एता भवन्ति । एवं[1] च कृत्वा[1]—षट्पञ्चाशत् तेजःसंवर्तन्यः, सप्त अप्संवर्तन्यः, एका

एतेन क्रमेणेति । यथोक्तेन । सप्तानां तेजःसंवर्तनीनामनन्तरमद्भिः संवर्तनी भवत्येका । *पुनः सप्तानां तेजःसंवर्तनीनामनन्तरमद्भिः संवर्तनी भवति* द्वितीया । एवं यावत् सप्तम्यद्भिः संवर्तनी ।

"एवं गतेऽद्भिः सप्तके पुनः तेजसा सप्तकः" । *"ततः"* पश्चात् *एका वायुसंवर्तनी भवति, किं कारणम् ?* यथा वर्णितम्—बहुना कालप्रकर्षेणाप्संवर्तनी भवति, ततोऽपि बहुतरेण वायुसंवर्तनीति, अत इदमुच्यते—*यथैव हि तेषामिति* विस्तरः । *यथा* प्रथमध्यानाद् द्वितीयध्यान*समापत्तिविशेषादात्मभावानां* द्वितीयध्यानभूमिकानां *स्थितिविशेषः* । अर्धमहाकल्पार्धं प्रथमध्यानोपपन्नानामायुःप्रमाणम्, कल्पद्वयं द्वितीयध्यानोपपन्नानामिति । *तथा भाजनानामपामपि* । किम् ? स्थितिविशेष इति । एवं द्वितीयादपि तृतीयध्यानस्य विशेषो वक्तव्यः । *एवं च कृत्वेति* । यस्मादष्टकृत्वस्तेजःसंवर्तनीसप्तका इति *षट्पञ्चाशत् तेजःसंवर्तन्यो*

१–१. का० पुस्तके नास्ति ।

वायुसंवर्त्तनी ।

एवं च प्रज्ञप्तिभाष्यं सुनीतं भवति—"चतुःषष्टिः कल्पाः शुभकृत्स्नानामायुःप्रमाणम्[1]" (   ) इति ॥ १०२ ॥

अभिधर्मकोशभाष्ये लोकनिर्देशो नाम
तृतीयं कोशस्थानं
समाप्तमिति[2] ।

ये धर्मा हेतुप्रभवा हेतुं तेषां तथागतो ह्यवदत् ।
तेषां च यो निरोध एवंवादी महाश्रमणः ॥ इति ।

भवन्ति, सप्ताप्संवर्तन्यः, एका वायुसंवर्तनीति चतुःषष्टिः संवर्तन्यो भवन्ति । तस्माद् यदुक्तं *प्रज्ञप्तिभाष्ये*—*चतुःषष्टिः कल्पाः शुभकृत्स्नानामायुःप्रमाणमिति*, तत् सूक्तं *भवति* । यथा "ऊर्ध्वं तु परीत्ताभेभ्य आश्रयः । द्विगुणद्विगुणः" (अभि० को० ३.७७) इत्यत्रोक्तं शुभकृत्स्नानां चतुःषष्टियोजनानां शरीरप्रमाणम् । शरीरप्रमाणेन च तेषामायुःप्रमाणमुक्तम् । "आयुस्तु कल्पैः स्वाश्रय०" (अभि० को० ३.८०) इति वचनात् । एकैका संवर्तनी महाकल्प इति कृत्वा । इयता हि कालेन तेषामायुषः परिसमाप्तिरिति ॥ १०२ ॥

आचार्ययशोमित्रकृतायां स्फुटार्थायाम्
अभिधर्मकोशव्याख्यायां
तृतीयं कोशस्थानम् ॥

---

१. शुभकृत्स्नानां देवानामायुः०—का० ।

२. ०श्रीलामावाकस्य यदत्र पुण्यम्—का० ।

॥ ॐ नमो बुद्धाय ॥

चतुर्थं कोशस्थानम्

(कर्मनिर्देशः)

अथ यदेतत् सत्त्वभाजनलोकस्य बहुधा वैचित्र्यमुक्तं तत् केन कृतम् ? न खलु केनचिद् बुद्धिपूर्वकं कृतम् । किं तर्हि ? सत्त्वानां

कर्मजं लोकवैचित्र्यम्,

यदि कर्मजम्, कस्मात् सत्त्वानां कर्मभिः कुङ्कुमचन्दनादयो रम्यतरा जायन्ते, न तेषां शरीराणि ? कर्माण्येव तान्येवञ्जातीयानि व्यामिश्रकारिणां सत्त्वानाम् यदाश्रयाश्च व्रणभूता जायन्ते, भोगाश्च रम्यास्तत्प्रतीकारभूताः । अव्यामिश्रकारिणां तु देवानामुभयेऽपि रम्याः ।

किं पुनस्तत् कर्म ? इत्याह—

चेतना तत्कृतं च तत् ।

सूत्र उक्तम्—"द्वे कर्मणी चेतना कर्म चेतयित्वा च" (   ) इति । यत् तच्चेतयित्वा चेतनाकृतं च तत् ।

ते एते द्वे कर्मणी त्रीणि भवन्ति—काय-वाङ्-मनस्कर्माणि ।

कथमेषां कर्मणां व्यवस्थानम्, किमाश्रयतः ? आहोस्वित् स्वभावत.

स्फुटार्थाव्याख्यायाम्

चतुर्थं कोशस्थानम्

तीर्थंकरविप्रतिपत्त्या समुत्पादित-सन्देहः पृच्छति—*अथ यदेतदिति* विस्तरः ।

तत्र सत्त्ववैचित्र्यं धातु-गति-योन्यादिभेदेन । *भाजनवैचित्र्यं* मेरु-द्वीपादि-भेदेन । *व्यामिश्रकारिणामिति* । कुशलाकुशलकर्मकारिणाम् । अथ कस्मात् तेषा-माश्रया रम्या न भवन्ति, भोगास्तु रम्या इति ? सति चैवं विषयोपभोगः सम्भवति । आश्रयरम्यत्वे हि कस्य प्रतीकाराय रम्यविषयोपभोगः स्यात् । *अव्यामिश्रकारिणामिति* । रूपावचराणाम् । कामावचरा अपि देवा अव्यामिश्र-कारिकल्पा आश्रयविषयरम्याः; रम्यताहेतुकर्मद्वयकारित्वात् ।

चेतयित्वा चेति । एवं चेदं करिष्यामीति ।

समुत्थानतो वा ? आश्रयतश्चेद्, एकं कायकर्म प्राप्नोति, सर्वेषां कायाश्रितत्वात् । स्वभावतश्चेद्, वाक्कर्मैकं प्राप्नोति; वचसः कर्मस्वभावत्वात् । समुत्थानतश्चेत्, मनस्कर्मैकं प्राप्नोति; सर्वेषां मनःसमुत्थितत्वात् ?

यथाक्रमं त्रिभिः कारणैस्त्रयाणामिति वैभाषिकाः ।

तत्र पुनः—

चेतना मानसं कर्म,

चेतना मनस्कर्मेति वेदितव्यम् ।

तज्जं वाक्कायकर्मणी ।। १ ।।

यत्तच्चेतनाजनितं चेतयित्वा कर्मेत्युक्तम्, कायवाक्कर्मणी ते वेदितव्ये ।

ते तु विज्ञप्त्यविज्ञप्ती,

ते तु कायवाक्कर्मणी प्रत्येकं **विज्ञप्त्यविज्ञप्ति**स्वभावे वेदितव्ये । तत्र तु—

कायविज्ञप्तिरिष्यते ।

संस्थानम्,

चित्तवशेन कायस्य तथा तथा संस्थानं **कायविज्ञप्तिः** । गतिरित्यपरे । प्रस्यन्दमानस्य हि कायकर्म, नोऽप्रस्यन्दमानस्येति[१] ।

न गतिर्यस्मात् संस्कृतं क्षणिकं

कोऽयं क्षणो नाम ? आत्मलाभोऽनन्तरविनाशी, सोऽस्यास्तीति

स्वभावतश्चेद्वाक्कर्मैकमिति । वागेव कर्मेति कृत्वा । इतरयोस्तु न कर्मत्वम् । कायेन कायस्य वा कर्म कायकर्म, एवं मनस्कर्म । इति न स्वभावतः कर्म ।

त्रिभिः कारणैरिति । आश्रयत, स्वभावतः, समुत्थानतश्चेति । *त्रयाणामिति* । कायवाङ्मनस्कर्मणाम् । आश्रयत कायकर्म—कायाश्रयं कर्म कायकर्मेति, स्वभावतो वाक्कर्म—वागेव कर्मेति, समुत्थानतो मनस्कर्म—मनःसमुत्थितमिति कृत्वा ॥ १ ॥

गतिरित्यपर इति । वात्सीपुत्रीयाः ।

आत्मलाभोऽनन्तरविनाशीति । क्षणस्यानन्तरक्षण इति नैरुक्तेन विधिना आत्मलाभ । अनन्तरविनाशी क्षणशब्देनाभिधीयते । अथ वा—कालपर्यन्तः

---

१ ०स्येति । त उच्यन्ते—का० ।

क्षणिकः[1] । दण्डिकवत् । सर्वं हि संस्कृतमात्मलाभादूर्ध्वं न भवतीति यत्रैव जातं तत्रैव ध्वस्यते । तस्यायुक्ता देशान्तरसंक्रान्तिः । तस्मान्न गतिः कायकर्म ।

स्यादेतदेव, यदि सर्वस्य क्षणिकत्वं सिध्येत् ? सिद्धमेवैतद् विद्धि । कुतः ? संस्कृतस्यावश्यं—

व्ययात् ॥ २ ॥

आकस्मिको हि भावानां विनाशः । किं कारणम् ? कार्यस्य हि कारणं भवति, विनाशश्चाभावः । यश्चाभावस्तस्य किं कर्तव्यम् ! सोऽसावाकस्मिको विनाशो यदि भावस्योत्पन्नमात्रस्य न स्यात्, पश्चादपि न स्याद्; भावस्य तुल्यत्वात् । अथान्यथीभूतः ? न युक्तं तस्यैवान्यथात्वम् । न हि स एव तस्माद् विलक्षणो युज्यते । दृष्टो वै काष्ठादीनामग्न्यादिसंयोगाद् विनाशः । न च दृष्टाद् गरिष्ठं प्रमाणमस्तीति । न च सर्वस्याकस्मिको विनाशः ।

कथं तावद् भवान् काष्ठादीनामग्न्यादिसंयोगाद् विनाशं पश्यामीति मन्यते ? तेषां पुनरदर्शनात् । सम्प्रधार्यं तावदेतत्—किमग्निसंयोगात् काष्ठादयो विनष्टाः,

---

क्षणः स्वावस्थानः । *सोऽस्यास्तीति क्षणिकः ।* "अत इनिठनौ" (पा० सू० ५.२.११५) इति ठन् ।

संस्कृतस्यावश्यं व्ययादिति । उत्पत्त्यनन्तरविनाशिरूपं चित्तचैत्तवत् ।

आकस्मिको हि भावानां विनाश इति । अकस्माद्भव *आकस्मिकः ।* अहेतुक इत्यर्थः । साधनं चात्र—'अहेतुको विनाशः; अभावत्वाद्, अत्यन्ताभाववत्' । *दृष्टो वै काष्ठादीनामिति* विस्तरः । *आदि*शब्देन रूपादीनां ग्रहणम् । *दृष्टोऽग्निसंयोगाद् विनाश इति ।* प्रत्यक्षद्वारापतितो धर्मस्वरूपविपर्यय इति प्रतिज्ञादोषं दर्शयति । अत एवाह—*न च दृष्टाद् गरिष्ठं प्रमाणमिति ।* न प्रत्यक्षाद् गुरुतमं प्रमाणमस्तीत्यर्थः ।

आचार्यः प्रत्यक्षाभिमानं परेषां दर्शयन्नाह—*कथं तावद्भवान् यावन् मन्यत इति ।* न हि काष्ठादिविनाशो रूपादिवत् प्रत्यक्षत उपलभ्यते । *अक्षणिकवादिनस्त* आहुः । *तेषां पुनरदर्शनादिति ।* तेषां काष्ठादीनामदर्शनात् । तदेवमनुमानतः सिद्धिं दर्शयति—'अग्निसंयोगहेतुकः, काष्ठादिविनाशः; तदापाते भावात् । यस्य यदापाते भावः स तद्धेतुकः, तद्यथा—बीजपातभाव्योऽङ्कुरः । *सम्प्रधार्यं तावदेतदिति ।* अनेकान्तिकतामुद्भावयति[2] । न हि यस्यापाते यो विनाशो भवति

---

१. क्षणिकम्—का० । २. नैकान्तिक०—मुद्रितः पाठः ।

अतो न दृश्यन्ते ? उताहो स्वयं विनष्टाः अन्ये च पुनर्नोत्पन्नाः, अतो न दृश्यन्ते; यथा वायुसंयोगात् प्रदीपः, पाणिसंयोगाद् घण्टाशब्द इति ? तस्माद्-नुमानसाध्योऽयमर्थः ॥ २ ॥

किं पुनरत्रानुमानम् ? उक्तं तावत् अकार्यत्वादभावस्येति । पुनः—

न कस्यचिदहेतोः स्यात्

यदि विनाशो हेतुसामान्यान्न कस्यचिदहेतुकः स्यादुत्पादवत् । क्षणिकानां च बुद्धिशब्दार्चिषां दृष्ट आकस्मिको विनाश इति नायं हेतुमपेक्षते ।

यस्तु मन्यते—बुद्ध्यन्तराद् बुद्धेर्विनाशः, शब्दान्तराच्छब्दस्येति ? न[1] युक्तमेतत्[1]; बुद्ध्योरसमवधानात् । न हि संशयनिश्चयज्ञानयोर्युक्तं समवधानम् ।

स तद्धेतुक इति । *वायुसंयोगपाते हि सति प्रदीपस्य विनाशः ।* न च स विनाशो वायुसंयोगकृतः । क्षणिकत्वाभ्युपगमाद्धि प्रदीपस्याकस्मिको विनाश इष्यते । स हि उत्पन्नप्रध्वंसितत्वात् *स्वयं विनष्टः* प्रदीपः । वायुप्रतिबन्धादन्यस्यानुत्पत्तौ न दृश्यते, न तेन विनाश इति । तथा घण्टाशब्दैः क्षणिक इष्यते । *पाणिसंयोगपाते* च सति घण्टाशब्दस्य विनाशः, न स तत्कृतः । क्षणिकत्वाद्धि स्वयं विनष्टो घण्टाशब्दस्तत्प्रतिबन्धत्वादन्यस्यानुत्पत्तौ न दृश्यते, न तेन विनाश इति । *तस्मादनुमानसाध्योऽयमर्थः ।* न प्रत्यक्षसिद्ध इत्यभिप्रायः । तस्मादनैकान्तिकमेतत् । यस्य पाते यः कश्चिद्विनाशः स तत्कृत इति ।

किं पुनरत्रानुमानमिति । अत्राहेतुको विनाश इत्येतस्मिन्नर्थे किमनुमानमिति । *उक्तं तावदकार्यत्वादभावस्येति ।* 'अहेतुको विनाशः; अकार्यत्वादाकाशवत् । अकार्यश्चासौ अभावस्वभावत्वादत्यन्ताभाववत्' ॥ २ ॥

"न कस्यचिदहेतोः" इति । न कस्यचिदकस्मादित्यर्थः । *उत्पादवदिति ।* विपरीतोपमानम् । यथोत्पाद आत्मलाभलक्षणः सहेतुक एव, नाहेतुकस्तद्विनाशः स्यात् । न चैवं भवति । कथम् ? इत्याह—*क्षणिकानां च बुद्धिशब्दार्चिषां दृष्ट आकस्मिको विनाशः ।* तदेवमनुमानापतितो धर्मः स्वरूपविपर्ययः । 'आकस्मिकः काष्ठादीनां विनाशः; विनाशस्वाभाव्यात्, बुद्ध्यादिविनाशवद्' इति ।

यस्तु मन्यत इति । वैशेषिकः । पूर्वा बुद्धिरुत्तरया बुद्ध्या उत्पन्नया विनाश्यते । अन्या तु बुद्धिः पूर्वया बुद्ध्या विनाश्यते । एवं शब्दोऽपि वाच्यः । आह—*न युक्तमेतत् ।* कस्मात् ? *बुद्ध्योरसमवधानात्* अयुगपद्भावादित्यर्थः । न ह्यसन्तं नाश्यं हेतुर्विनाशयतीति । कथं गम्यते बुद्ध्योरसमवधानमिति ? अत आह—*न हि संशयनिश्चयज्ञानयोर्युक्तं समवधानमिति* विस्तरः । स्वसंवेद्-

---

१–१. तदयुक्तम्—का० ।

एवं[1] सुखदुःखयोः, रागद्वेषयोर्वा। यदा च पटुबुद्धिशब्दानन्तरमपटुबुद्धिशब्दावुत्पद्येते, तदा कथमपटुः समानजातीयो धर्मः पटीयांसं हिंस्यात्। अन्त्ययोश्च कथम्।

योऽपि अर्चिषामवस्थानहेत्वभावाद्, धर्माधर्मवशाद् वा विनाशं मन्यते। स[2] चायुक्तः[2]; न ह्यभावः कारणं भवितुमर्हति। न चाप्युत्पादविनाशहेत्वोर्धर्माधर्मयोः क्षण[3] एव[3] क्षणे वृत्तिलाभप्रतिबन्धौ भवितुमर्हतः।

शक्यश्चैष कारणपरिकल्पः सर्वत्र संस्कृते कर्तुमित्यलं विवादेन।

मेतत्। यदा संशयज्ञानं न तदा निश्चयज्ञानम्, यदा निश्चयज्ञानं न तदा संशयज्ञानमिति। *एवं सुखदुःखयो रागद्वेषयोश्चा*समवधानमिति योज्यम्। यथा च विरुद्धयोरसमवधानम्, एवमविरुद्धयोरपि ज्ञानयोरसमवधानं भवतीति। *यदा चेति* विस्तरः। अथापि समवधानं स्यादिति, तथाप्यपटुबुद्धिशब्दौ पटू न हिंस्याताम्; दुर्बलसमानजातीयत्वात्। न हि दुर्बलसमानजातीयो बलवन्तं हिंसन् दृष्टः। असमानस्तु दुर्बलोऽपि हिंस्यात्। तद्यथा—उदकं तेजः।

योऽप्यर्चिषामवस्थानहेत्वभावादिति। अवस्थानहेत्वभावाद् भावानां विनाश इति *स्थविर-वसुबन्धुप्रभृतिभिरयं* हेतुरुक्तः; *स चायुक्तः। न ह्यभावः कारणं भवितुमर्हतीति*। *धर्माधर्मवशाद्वेति वैशेषिकः*। तं प्रत्याह—*न चाप्युत्पादविनाशहेत्वोरिति*। उत्पादविनाशहेत्वोरधर्मस्य। *क्षण एव क्षण* इति। मुख्ये क्षणे, नौपचारिके क्षण इत्यर्थः। अथ वा *क्षण एव क्षण* इति। क्षणे क्षण एवेत्यर्थः। *वृत्तिलाभप्रतिबन्धौ*। वृत्तिलाभो वृत्तिप्रतिबन्धश्च क्षणे क्षणे भवितुं नार्हतः। कथं कृत्वा? यस्यार्चिषः उत्पत्तावनुग्रहो भवति चैत्रस्य मैत्रस्य वा, तस्य धर्म उपलब्धवृत्तिः तदुत्पादयतीत्येवमुत्पादहेतुः। विनाशहेतुरपि, यदि तद्विनाशस्तस्यानुग्रहं करोति अन्धकारावस्थायाम्। एवमधर्मोऽपि यस्यार्चिरुत्पत्तावपकारो भवति, तस्याधर्मोपलब्धवृत्तिस्तदुत्पादयति। विनाशहेतुरपि, यदि तद्विनाशस्तस्याप्यपकारं करोति अन्धकारावस्थायामिति तयोर्वृत्तिलाभादर्चिषामुत्पत्तिर्भवति। न च वृत्तिलाभं तयोरप्रतिबध्य ताभ्यामेव तस्मिन्नेव क्षणे तेषां विनाश इति। क्षणे क्षणे वृत्तिलाभप्रतिबन्धौ न द्वयोर्युज्येते।

शक्यश्चैष कारणपरिकल्प इति विस्तरः। धर्माधर्मविनाश इति कारणपरिकल्प इति। *सर्वत्र संस्कृते* द्व्यणुकादौ अनित्येषु रूपादिषु कर्मणि च शक्यते कर्तुम्। अतो न वक्तव्यमेतत्—अग्निसंयोगात् काष्ठादीनां विनाश इत्येवमादि। ततश्च सर्वसंस्कृतस्य क्षणिकसिद्धिः; धर्माधर्मयोस्तद्विनाशकारणान्तरानपेक्ष-

---

१. का० पुस्तके नास्ति। २–२. तदप्ययुक्तम्—का०। ३–३. क्षणे—का०।

यदि च काष्ठादीनामग्न्यादिसंयोगहेतुको विनाशः स्यात्, एवं सति पाकजानां गुणानां पक्वतरतमोत्पत्तौ—

हेतुः स्याच्च विनाशकः ।

हेतुरेव च विनाशकः स्यात् । कथं कृत्वा ? घासाद्यग्निसम्बन्धाद्[1] गुणाः पाकजा उत्पन्नाः, तत एव तादृशाद्वा पुनः पक्वतरतमोत्पत्तौ तेषां विनाश इति हेतुरेव तेषां विनाशकः स्याद्, हेत्वविशिष्टो वा ।

न च युक्तम्—यत एव यादृशाद्वा तेषां भावः, तत एव तादृशाच्च तेषां पुनरभाव इति । ज्वालान्तरेषु च[2] तावद्धेतुभेदेऽपि[3] परिकल्पनां[3] परिकल्पयेयुः । क्षारहिमशुक्तसूर्योदकभूमिसम्बन्धात्तु पाकजविशेषोत्पत्तौ कां कल्पनां कल्पयेयुः ।

यत्तर्ह्यापः क्वाथ्यमानाः क्षीयन्ते, किं तत्राग्निसंयोगाः कुर्वन्ति ? तेजोधातुं प्रभावतो वर्धयन्ति, यस्य प्रभावादपां सङ्घातः क्षामक्षामो जायते, यावदतिक्षामतां गतोऽन्ते न पुनः सन्तानं सन्तनोति । इदमत्राग्निसंयोगाः कुर्वन्ति ।

त्वादित्यलं *विवादेन* ।

तत एव तादृशाद्वेति । अग्निसंयोगः श्यामतां घटस्य निवर्त्य रक्ततां जनयति, स एव रक्ततां निवर्त्य रक्ततरतां जनयतीति कल्प्यते । हेतुरेव विनाशकः स्यात् ।

अथ ज्वालानां क्षणिकत्वादन्यस्तत्संयोगो जनकः, अन्योऽपि विनाशक इति कल्प्यते ? हेत्वविशिष्टो विनाशकः स्यात्, न च युक्तमिति सर्वम् । *ज्वालान्तरेषु च तावद्धेतुभेदेऽपि परिकल्पनां परिकल्पयेयुर्वैशेषिकाः* । क्षणिकत्वात् ज्वालानामन्या जनिका अन्या विनाशिका इति । *क्षार-यावद्-भूमिसम्बन्धात्तु पाकजविशेषोत्पत्तौ कां कल्पनां कल्पयेयुः* । न हि तेषां क्षारादयः क्षणिकाः । तत्र हेतुरेव विनाशकः स्यात् ।

यत्तर्हि आप इति विस्तरः । यद्यग्निसंयोगेऽप्यापो न विनाश्यन्ते, कथं तर्ह्यापः *क्वाथ्यमानाः क्षीयन्त* इत्यभिप्रायः । *तेजोधातुरिति* । तदविनिर्भागसंवर्धनम् । *यस्य प्रभावादपां संघातः*[4] *क्षामक्षामो जायत* इति । कारणविशेषात् कार्यविशेष इति क्षामक्षामतरो जायते । *यावदतिक्षामतां गतोऽन्ते न पुनः सन्तानं सन्तनोतीति* । कार्यं करोति । न स्वभावं करोतीत्यर्थः ।

---

१. ०सम्बन्धा—का० । २. का० पुस्तके नास्ति ।
३-३. ०भेदकल्पनां—का० । ४. संहातः—मुद्रितः पाठः ।

तस्मान्नास्ति भावानां विनाशहेतुः । स्वयमेव तु भङ्गुरत्वाद् विनश्यन्त उत्पन्नमात्राद्[1] विनश्यन्तीति सिद्ध एषां क्षणभङ्गः । क्षणभङ्गाच्च गत्यभावः ।

गत्यभिमानस्तु देशान्तरेषु निरन्तरोत्पत्तौ तृणज्वालावत् । गत्यभावे च "संस्थानं कायविज्ञप्तिः" इति सिद्धम् ।

"नास्ति संस्थानं द्रव्यतः" इति सौत्रान्तिकाः । एकदिङ्मुखे हि भूयसि वर्ण उत्पन्ने दीर्घं रूपमिति प्रज्ञप्यते, तमेवापेक्ष्याल्पीयसि ह्रस्वमिति, चतुर्दिशं भूयसि चतुरस्रमिति, सर्वत्र समे वृत्तमिति । एवं सर्वम् । तद्यथा—अलातमेकस्यां दिशि देशान्तरेष्वनन्तरेषु निरन्तरमाशु दृश्यमानं दीर्घमिति प्रतीयते, सर्वतो दृश्यमानं मण्डलमिति । न[2] द्रव्यसत्[2] संस्थानम् । यदि हि स्यात्—

द्विग्राह्यं स्यात्,

चक्षुषा हि दृष्ट्वा दीर्घमित्यवसीयते कायेन्द्रियेणापि स्पृष्ट्वेति द्वाभ्यामस्य ग्रहणं प्राप्नुयात् । न च रूपायतनस्य द्वाभ्यां ग्रहणमस्ति ।

यथा वा स्प्रष्टव्ये दीर्घादिग्रहणम्, तथा वर्णेऽपि[3] सम्भाव्यताम् ।

भङ्गुरत्वादिति विस्तरः । भङ्गशीलत्वात् *स्वयं विनश्यन्तो*ऽन्येनाजनितविनाशाः । *सन्त उत्पन्नमात्रा*देकक्षणलब्धात्मानो भवन्तो *विनश्यन्ति* ।

तृणज्वालावदिति । यथा तृणज्वालायाः क्षणिकत्वेऽपि *देशान्तरेषु निरन्तरोत्पत्तौ गत्यभिमानः*— तृणं दहन्तीति, ज्वाला गच्छन्तीति, तद्वत् । साधनं च— 'अविद्यमानगतयो देशान्तरे निरन्तरमुत्पद्यमाना रूपादयो भावाः; क्षणिकत्वात्, तृणज्वालावत्' । *संस्थानं कायविज्ञप्तिरिति* । *वैभाषिकवचनम्* ॥ ३ ॥

एकदिङ्मुख इति । एका दिङ् मुखमस्येति एकदिङ्मुखं तस्मिन् । *भूयसि* बहुतरे । *एवं सर्वमि*त्यूर्ध्वैकदिङ्मुखे भूयसि उत्पन्न उन्नतमिति प्रज्ञप्यते, अधो भूयस्यवनतमिति । एषा दिक् । *तद् यथा अलातमिति* । *'न द्रव्यसत् संस्थानम्;* वर्णग्रहणात् पक्षग्रहणत्वात्, अलातचक्रवद्' इति । अथवा—'न द्रव्यसंस्थानम्; अन्यरूपग्रहणात् पक्षग्रहणत्वाद्धान्यराशिवद्' इति ।

*द्वाभ्यामस्य ग्रहणं प्राप्नुयादि*त्युक्ते *वैभाषिको* ब्रूयात्—न दीर्घत्वादेः कायेन्द्रियेण ग्रहणम्, किं तर्हि ? स्प्रष्टव्यावयवेष्वेव तथासंनिविष्टेषु दीर्घादिग्रहणं भवति, अतो न द्वाभ्यामस्य ग्रहणं प्राप्नोति ? अत इदमुच्यते—*यथा वा*

---

१. उत्पन्नमात्रा—का० ।　　　२–२. न तु खलु जात्यन्तरमस्ति—का० ।
३. वर्णे—का० ।

स्मृतिमात्रं तत्र स्पर्शसाहचर्याद्[1] भवति। स तु साहचर्यात् भवति, न तु साक्षाद् ग्रहणम्, यथा—अग्निरूपं दृष्ट्वा तस्योष्णतायां स्मृतिर्भवति, पुष्पगन्धं च घ्रात्वा तद्वर्ण इति?

युक्तमत्राव्यभिचारत्वादन्येनान्यस्मरणम्[2]; न तु किञ्चित् स्प्रष्टव्यं क्वचित् संस्थाने नियतम्, यतोऽत्र[3] स्मरणं नियमेन स्यात्।

तथा[4] सत्यपि साहचर्यनियमे संस्थाने[5] स्मरणं[5] नियमेन स्यात्। वर्णेऽपि स्यात्। वर्णवद् वा संस्थानेऽप्यनियमेन स्यात्।

स्प्रष्टव्य इति विस्तरः। कोऽर्थः? *यथा स्प्रष्टव्ये दीर्घह्रस्वादिग्रहणम्*, न च स्प्रष्टव्यायतनसंगृहीतं संस्थानम्; *तथा वर्णेऽपि* सम्भाव्यतां दीर्घादिग्रहणम्, न च रूपायतनसंगृहीतसंस्थानम्। अर्थान्तरभूतं स्यादित्यर्थः।

पुनर्वैभाषिक आह—*स्मृतिमात्रं तत्र इति* विस्तरः। स्मृतिमात्रं तत्र संस्थाने स्पर्शसाहचर्यात् श्लक्ष्णत्वादिभिः स्पर्शैः सहचरभावाद् भवति। *न तु साक्षाद्ग्रहणं* दीर्घादिसंस्थानस्य। *यथाग्निरूपं दृष्ट्वा तस्याग्नेरुष्णतायां स्मृतिर्भवति* साहचर्यात्। पुष्पस्य च चम्पकस्य च *गन्धं घ्रात्वा तद्वर्णऽपि* स्मृति-साहचर्यम्।

आह—*युक्तमत्रेति* विस्तरः। युक्तमत्राग्नावव्यभिचारात् उष्णतायाश्च रूपस्य च। *अन्येनान्यस्मरणम्*। अग्निरूपेणोष्णतायाः, पुष्पगन्धेन च तद्वर्णस्य। *न तु किञ्चिदिति* विस्तरः। न तु किञ्चित् *स्प्रष्टव्यं* श्लक्ष्णत्वादि क्वचिदिति संस्थाने दीर्घादौ *नियतम्; यतोऽत्र* संस्थाने स्प्रष्टव्यं स्पृष्ट्वा *स्मरणं नियमेन स्यात्।* यत्र ह्यग्निरूपम्, तत्र तदुष्णतया भवितव्यम्। यत्र च चम्पकगन्धः, तत्र तद्रूपेण भवितव्यम्। न तु यत्र श्लक्ष्णत्वं कर्कशत्वं वा, तत्र दीर्घत्वेन ह्रस्वत्वेन वा भवितव्यम्। तस्मात् तदुष्णतारूपयोर्नियमेन युज्यते। संस्थानेन तु नियमेन स्मरणं न प्राप्नोति।

तथा सत्यपि साहचर्यनियमे स्प्रष्टव्यं संस्थानयोः *संस्थाने स्मरणं नियमेन स्यात्। वर्णेऽपि स्यात्।* स्मरणं नियमेनेति वर्तते। तदेवं स्प्रष्टव्यं स्पृष्ट्वा स्मरेदित्यर्थः। *अथा*नियमेन वर्णस्मरणं भवति? *वर्णवद्वा संस्थानेऽप्यनियमेन स्यात्*—

---

१. स्प्रष्टव्यसाह०—का०। २. ०नान्यस्य स्मरणम्—का०।
३. यतस्तत्र—का०। ४. अथा—का०।
५-५. संस्थान०—का०।

न चैवं भवति। अयुक्तमस्य स्प्रष्टव्यात् स्मरणम्। चित्रान्तरेण[1] वाऽनेकवर्णसंस्थाने दर्शनाद् बहूनामेकदेशं[2] प्राप्नुयात्। तच्चायुक्तं वर्णवत्।

तस्मान्नास्ति द्रव्यतः संस्थानम्॥

यच्चापि किञ्चित् सप्रतिघं रूपमस्ति तदवश्यं परमाणौ विद्यते!

न चाणौ तत्

न च संस्थानं परमाणौ विद्यते दीर्घादि। तस्माद् बहुष्वेव तथासन्निविष्टेषु दीर्घादिप्रज्ञप्तिः।

दीर्घे ह्रस्वमिति, ह्रस्वे दीर्घमिति। किं कारणम्? वर्णे ह्यनियमेन स्मरणं भवति स्प्रष्टव्यात् कदाचिद् रक्ते पीतमिति पीते रक्तमिति। *न चैवं भवति।* कथमेवं न भवति? यथा वर्णे सस्मरणं न नियमेन भवति, तथा संस्थानेऽप्यनियमेनेति। किं तर्हि? वर्णे स्मरणं न नियमेन भवति, संस्थाने पुनर्नियमेनेति अयुक्तमस्य संस्थानस्य स्प्रष्टव्यात् स्मरणम्। कथं तर्हि दीर्घबुद्धिर्ह्रस्वबुद्धिर्वा भवति? उक्तमेतद्—एकदिङ्मुखे भूयसि वर्णे वा स्प्रष्टव्ये वा गृह्यमाणे दीर्घविकल्पबुद्धिः, अल्पीयसि ह्रस्वविकल्पबुद्धिरित्येवमाद्यवगन्तव्यम्। *चित्रान्तरेण वेति* विस्तरः। *चित्रान्तरेण वानेकवर्णसंस्थाने* बहुभिः प्रकारैर्दृश्यमानेनानेकसंस्थानं दृश्यते दीर्घादि। अतोऽनेकसंस्थानदर्शनात् *बहूनां संस्थानानामेकदेशं प्राप्नुयात्।* यत्रैव दीर्घत्वं तत्रैव ह्रस्वादिग्रहणात्। *तच्चायुक्तं वर्णवत्।* यथा हि वर्णः सप्रतिघत्वादेकदेशो न भवति, तथा संस्थानमपीति।

तथा च सति *द्रव्यतोऽपि संस्थान*मिति सापक्ष्यालः पक्ष्यो भवति; धर्मविशेषविपर्ययात्।

"*न चाणौ तद्*" इति। यथा नीलादिरूपम् अष्टद्रव्यकादावणौ विद्यते *न चैवमणौ संस्थानं दीर्घादि विद्यते।* कथं पुनर्गम्यते—संस्थानं परमाणौ नास्तीति? दीर्घसङ्घातेऽपचीयमाने दीर्घबुद्ध्यभावात्। दीर्घं हि दण्डमुपलभ्य तस्मिन्नेवापचीयमाने दीर्घबुद्धिर्न निवर्तेत[3]। न हि नीलादि द्रव्यमुपलभ्यापचीयमाने तस्मिन् पीतबुद्धिर्भवति। दीर्घद्रव्ये त्वपचीयमाने ह्रस्वबुद्धिर्भवति, न दीर्घबुद्धिः। न च युक्तं वक्तुम्—तदेव संस्थानं दीर्घादि-ह्रस्वादि-बुद्धिं जनयतीति। *तस्माद् बहुष्वेवेति* सर्वम्।

---

१. चित्रास्तरणे—का०। २. मेकदेश्ये—का०।
३. विवर्तेत—मुद्रितः पाठः।

अथ मतम्—संस्थानपरमाणव एव तथासन्निविष्टा दीर्घादिसंज्ञा[1] भवन्ति[1] इति ! सोऽयं केवलः पक्षपातः; तेषामसिद्धत्वात् । सिद्धस्वलक्षणानां हि तेषां सञ्चयो युज्यते । न च संस्थानावयवानां वर्णादिवत् स्वभावः सिद्ध इति कुत एषां सञ्चयः ।

यत्तर्हि वर्णत्वाभिन्नो[2] भवति, संस्थानं च भिन्नं दृश्यते मृद्धाजनानाम् ! ननु चोक्तं यथा कृत्वा वर्णे दीर्घादिसंज्ञा प्रज्ञप्यते, यथा च पिपीलिकादीनामभेदे पङ्क्तिचक्रादीनां भेदः प्रज्ञायते, तथा संस्थानस्यापि ।

यत्तर्हि तमसि[3] दूराद् वा वर्णमपश्यन्तः स्थाण्वादीनां दैर्घ्यादीनि पश्यन्ति ? वर्णमेव ते तत्राव्यक्तं दृष्ट्वा दीर्घादिपरिकल्पं कुर्वन्ति, पङ्क्तिसेनापरिकल्पवत् ।

---

*अथ मत*मिति विस्तरः । *संस्थानपरमाणव एव तथासन्निविष्टा* एकदिङ्मुखादिक्रमेण *दीर्घादिसंज्ञा भवन्ति* । न ह्येतत्स्वभावाः तथासन्निविष्टाः समानास्तां संज्ञामुपलब्धुमर्हन्तीत्यभिप्रायः । *न च संस्थानावयवानां वर्णादिवत् स्वभावः सिद्ध इति* । वर्णावयवाः प्रसिद्धस्वभावाः; प्रत्यवयवं नीलादित्वतो ग्रहणात्, न चैवं संस्थाने परमाणवः प्रत्यवयवं दीर्घादित्वतो गृह्यन्ते । तस्मान्न प्रसिद्धस्वभावाः । यदि नु नैव ते दीर्घादिस्वभावाः, सन्निवेशविशेषात् तु दीर्घादिबुद्धिहेतवो भवन्ति । वर्णादिपरमाणव एव सन्निवेशविशेषात्तु दीर्घादिबुद्धिहेतवो भवन्तीति किं नेष्यते ।

यत्तर्हि वर्णत्वाभिन्न इति । यदि वर्णसन्निवेशमात्रं संस्थानं स्यात्, वर्णभेदे संस्थानभेदो न स्यात्; *मृद्धाजनानां* कुण्डादीनामनर्थान्तराभावात् ।

ननु *चोक्त*मिति विस्तरः । यथा कृत्वा वर्णे दीर्घादिसंज्ञा प्रज्ञप्यते । एकदिङ्मुखे च वर्ण इति विस्तरेण । *यथा च पिपीलिकादीनामिति* विस्तरः । यथा च पिपीलिकादय एकरूपा भवन्ति । तेषां च *पङ्क्ति*रित्यस्मिन् देशेऽन्यादृशी, अन्यस्मिन्नन्यादृशी । एवं *चक्रादीनां भेद* इत्येवमादि । तथा वर्णभेदेऽपि *संस्थानभेदः स्यात्* ।

यत् तर्हि तमसीति विस्तरः । यत् तर्हि तमसि *वर्णमपश्यन्तः स्थाणुपुरुषहस्त्यादीनामिति दीर्घत्व*ह्रस्वत्वपरिमण्डलादी*नि पश्यन्ति* । तत् कथमिति वाक्यशेषः । यदि तर्हि वर्णाज्जात्यन्तरसंस्थानं न स्यात् । यथा वर्णं नीलं पीतमिति वा न पश्यन्ति तथा संस्थानमपि दीर्घह्रस्वमिति न पश्येयुः, पश्यन्ति च कदाचित् । अतो जात्यन्तरं संस्थानमिति । *पङ्क्तिसेनापरिकल्पवदिति* । यथा

१–१. ०संज्ञा लभन्त—का० । २. वर्णश्चाभिन्नो—का० । ३. तमपि—का० ।

वेविदितं[1] चैतदेवम् । यत् कदाचिदनिर्धार्यमाणपरिच्छेदं सङ्घातमात्रमव्यक्तं दृश्यते किमप्येतदिति ।

अथेदानीं कायस्य गतिं निराकृत्य संस्थानं च तत्रभवन्तः **सौत्रान्तिकाः** कां कायविज्ञप्तिं प्रज्ञपयन्ति ? संस्थानमेव हि ते कायविज्ञप्तिं प्रज्ञपयन्ति, न तु पुनर्द्रव्यतः ।

तां च प्रज्ञपयन्तः कथं कायकर्म प्रज्ञपयन्ति ? कायाधिष्ठानं कर्म कायकर्म, या चेतना कायस्य तत्र तत्र प्रणेत्री ।

एवं वाङ्मनस्कर्मणी अपि यथायोगं वेदितव्ये ।

यत्तर्हि "चेतना कर्म चेतयित्वा च" (   ) इत्युक्तम् ? सङ्कल्पचेतना पूर्वं भवति—'एवं चैवं च करिष्यामि' इति । तथा चेतयित्वा पश्चात् क्रिया चेतनोत्पद्यते । यया कायः प्रेर्यते सासौ चेतयित्वा कर्मेत्युच्यते ।

एवं तर्हि विज्ञप्त्यभावादविज्ञप्तिरपि कामावचरी न[2] स्यादिति[2] महान्तो

तमस्यव्यक्तं पक्षिणः पिपीलिका वा दृष्ट्वा दीर्घा पंक्तिरिति परिकल्पयन्ति, यथा वा तमस्येव हस्त्यादीनव्यक्तं दृष्ट्वा परिमण्डलेयं सेना व्यवस्थितेति परिकल्पयन्ति, तद्वत् । *वेविदितं चैतदेवमिति* । यथेदानीमुक्तम्—असत्यपि जात्यन्तरे संस्थाने वर्णमेव ते तत्राव्यक्तं दृष्ट्वा दीर्घादिपरिकल्पं कुर्वन्ति । *यत् कदाचिदिति* विस्तरः । *अनिर्धार्यमाणपरिच्छेदमिति* । अनिर्द्धार्यमाणसंस्थानसंघातमात्रमव्यक्तमलक्ष्यमाणनीलत्वादिकं दृश्यते । न च वर्णसंस्थानव्यतिरिक्तं रूपायतनमस्तीति । यथा नान्यत् किञ्चिद् द्रव्यं कल्प्यते, तद्वत् संस्थानमपि न वर्णव्यतिरिक्तं कल्पयितव्यम् ।

तत्रभवन्त इति । ते भवन्त इत्यर्थः । "इतराभ्योऽपि दृश्यन्ते" (पा० सू० ५.३.१४) इति वचनात् । *कथं कायकर्म प्रज्ञापयन्तीति* । प्रज्ञप्तिसत्त्वात् कायकर्मायोग *इति* मन्यमानः पृच्छति । *कायाधिष्ठानमिति* । कायालम्बनमित्यर्थः । यस्य हि कायः प्रवर्त्यः, तत्कायाधिष्ठानं कर्म । तेनाह—*या चेतना कायस्य तत्र तत्र प्रणेत्रीति*[3] । *यथायोगं वेदितव्ये* इति । वागधिष्ठानं कर्म *वाक्कर्म* । *मनस्कर्म* तु मनसः कर्म, मनसा वा संयुक्तं कर्म मनस्कर्म । तेन *यथायोगमित्युक्तम्* ।

विज्ञप्त्यभावादिति विस्तरः । यदि विज्ञप्तिर्न स्यात् *अविज्ञप्तिरपि कामावचरी न स्यात्* । विज्ञप्त्यधीना हि कामावचर्यविज्ञप्तिः, न चित्तानुपरिवर्तिनीति । सा

---

१. इत्थं—का० । २-२. नास्तीति—का० । ३. पश्यतीति—मुद्रितः पाठः ।

दोषा अनुषज्यन्ते, अनुषङ्गाणां[1] पुनः प्रत्यनुषङ्गा भविष्यन्ति; यदि तस्मादेव कायकर्मसंज्ञाब्दिताच्चेतनाविशेषादविज्ञप्तिः स्यात्, चित्तानुपरिवर्तिनी स्यात् समाहिताविज्ञप्तिवत् !

नैवं भविष्यति; चेतनाविशेषेण तदाक्षेपविशेषात्। सापि च विज्ञप्तिः सती तदाक्षेपे उत्पादनचेतनाया[2] बलं निभालयते; जडत्वात्। द्रव्यमेव तु संस्थानं वैभाषिका वर्णयन्ति, संस्थानात्मिकां तु कायविज्ञप्तिम्।

वाग्विज्ञप्तिस्तु वाग्ध्वनिः ॥ ३ ॥

वाक्स्वभावो यः शब्दः सैव **वाग्विज्ञप्तिः** ॥ ३ ॥

अविज्ञप्तिः पूर्वमेवोक्ता। सापि द्रव्यतो नास्तीति **सौत्रान्तिकाः**; अभ्युपेत्याकरणमात्रत्वात्। अतीतान्यपि महाभूतान्युपादाय प्रज्ञप्तेः, तेषां चाविद्यमान-

---

चेवं नास्तीति *महान्तो दोषा अनुषज्यन्ते*। संवरासंवराभावदोषः, सप्तौपधिकपुण्यक्रियावस्तु-पुण्यवृद्ध्यभावदोष इत्येवमादयोऽनुषङ्गाः। *अनुषङ्गाणां पुनः प्रत्यनुषङ्गा* इति। तत्परिहारा भविष्यन्तीत्यर्थः। *कायकर्मसंशब्दितादिति*। कायाधिष्ठानादित्यर्थः। *समाहिताविज्ञप्तिवदिति*। यथा समाहिताविज्ञप्तिश्चित्तानुपरिवर्तिनी, एवं प्रातिमोक्षसंवरादिलक्षणाप्यविज्ञप्तिः स्यात्।

सौत्रान्तिका आहुः—*नैवं भविष्यति*। *न* चित्तानुपरिवर्तिनी *भविष्यति; चेतना*विशेषणासमाहितेन *तदाक्षेपविशेषाद्*। असमाहिताया *अविज्ञप्तेराक्षे*पादित्यर्थः। *सापि च विज्ञप्तिर्भवदीया सती* विद्यमाना अविज्ञप्तेराक्षेपे *उत्पादनचेतनाया बलं* सामर्थ्यं *निभालयते* अपेक्षते। कस्मात्? *जडत्वाद्*। अपटुत्वाच्चेतनाबलमन्तरेण तामविज्ञप्तिं जनयितुं न शक्नोति। न ह्यसत्यां समादानचेतनायां यदृच्छोत्पन्ना विज्ञप्तिरविज्ञप्तिं जनयति।

"वाग्विज्ञप्तिस्तु" इति। तु-शब्दो विशेषणेन। यथा कायविज्ञप्तिः संस्थानात्मिका, न तथा वाग्विज्ञप्तिः। किं तर्हि? वागात्मको ध्वनिः, वर्णात्मकः शब्द इत्यर्थः ॥ ३ ॥

अविज्ञप्तिः पूर्वमेवोक्तेति। "ते तु विज्ञप्त्यविज्ञप्ती" इत्युक्तम्। तत्र विज्ञप्तिरुक्ता, अविज्ञप्तिर्वक्तव्या। सा च पूर्वमेवोक्ता—"विक्षिप्ताचित्तकस्य" (अभि० को० १.११) इति वचनात्। *सापि द्रव्यतो नास्ति*। साप्यविज्ञप्तिर्द्रव्यतो नास्ति। न केवला विज्ञप्तिरित्यपिशब्दः। *अभ्युपेत्याकरणमात्रत्वादिति*। "इमं दिवसमुपा-

---

१. अनुषङ्गानां—का०। २. चेतनायाः—का०।

स्वभावत्वाद्, रूपलक्षणाभावाच्च ।

अस्तीति वैभाषिकाः । कथं ज्ञायते ?

त्रिविधामलरूपोक्तिवृद्ध्यकुर्वत्पथादिभिः ।

त्रिविधं रूपमुक्तं सूत्रे—"त्रिभिः स्थानै रूपस्य रूपसंग्रहो भवति—अस्ति रूपं सनिदर्शनं सप्रतिघम्, अस्ति रूपमनिदर्शनं सप्रतिघम्, अस्ति रूपमनिदर्शनमप्रतिघम्" ( ) इति । अनास्रवं च भगवता रूपमुक्तम्—"अनास्रवाः धर्माः कतमे ? यस्मिन् रूपेऽतीतानागतप्रत्युत्पन्नो नोत्पद्यतेऽनुनयो वा प्रतिघो वा यावद् यस्मिन् विज्ञाने, इम उच्यन्तेऽनास्रवा धर्माः" ( ) इति । नाविज्ञप्तिं[1] विरहय्यास्ति रूपमनिदर्शनमप्रतिघम्, नाप्यनास्रवम् ।

दाय प्राणातिपातादिभ्यः प्रतिविरमामि' इत्यभ्युपेत्य । तस्मात् परेण तेषामकरणमात्रमविज्ञप्तिरित्येवं द्रव्यतो नास्तीति *सौत्रान्तिकाः* । *तेषां* चातीतानां महाभूतानाम् । न ह्यतीतानां प्रत्युत्पन्नस्वभावोऽस्ति । *पञ्चमे च कोशस्थान* एतद् दर्शयिष्यत इति । कथम् ? *अविद्यमानान्यस्या* आश्रय इत्यतो न द्रव्यतोऽस्ति । *रूपलक्षणाभावाच्च* । रूप्यत इति रूपलक्षणम्, तच्चास्या अप्रतिघत्वान्नास्ति । तस्मान्न द्रव्यतोऽस्ति ।

त्रिविधेति विस्तरः । त्रिविधञ्च तदमलञ्च *त्रिविधामलरूपम्*, तस्योक्तिः । अकुर्वतः पन्था *अकुर्वत्पथः* । परेण कारयतः स्वयमकुर्वतः कर्म इत्यर्थः । त्रिविधामलरूपोक्तिश्च वृद्धिश्चाकुर्वत्पथश्चादिरेषाम्, तानीमानि *त्रिविधामलरूपोक्तिवृद्ध्यकुर्वत्पथादीनि* । *आदि*शब्देन धर्मो भिक्षो इत्यत्रारूपीत्यवचनम्, आर्याष्टाङ्गवचनम्, प्रातिमोक्षसंवरसेतुवचनं च गृह्यते ।

रूपस्य रूपसंग्रह इति । रूपस्य रूपेणैव संग्रहो भवति, नान्यैर्वेदनादिभिः । *अस्ति रूपं सनिदर्शनं सप्रतिघम्* । यच्चक्षुर्विज्ञानविज्ञेयं रूपम् । अस्त्य*निदर्शनं सप्रतिघम्* । यानि चक्षुरादीनि तत् पुनर्नव रूप्यायतनानि । *अस्ति रूपमनिदर्शनमप्रतिघम्* । यन्मनोविज्ञानविज्ञेयम् अविज्ञप्तिरूपं धर्मायतनसंगृहीतम् । *नाविज्ञप्तिं विरहय्येति* विस्तरः । अविज्ञप्तिं मुक्त्वा *नास्ति रूपमनिदर्शनमप्रतिघं* यद् *रूपसंग्रहसूत्र* उक्तम् । *नाप्यनास्रव*मस्ति रूपम् । अविज्ञप्तिं विरहय्येति वर्तते । न हि मार्गसत्यसमापन्नस्य कायवाग्विज्ञप्तिरूपं युज्यते ।

---

१. न चाविज्ञप्ति—का० ।

वृद्धिरपि चोक्ता—"एभिः सप्तभिरौपधिकैः पुण्यक्रियावस्तुभिः समन्वागतस्य श्राद्धस्य कुलपुत्रस्य वा[1] कुलदुहितुर्वा चरतो वा स्वपतो वा तिष्ठतो वा जाग्रतो वा सततसमितमभिवर्धत एव पुण्यम्, उपजायत एव पुण्यम्। एवं निरौपधिकैः" ( ) इति। न चाविज्ञप्तिमन्तरेणान्यमनसोऽपि पुण्यस्याभिवृद्धिर्युज्यते। अकुर्वतश्च स्वयं परैः कारयतः कर्मपथा न सिध्येयुरसत्यामविज्ञप्तौ।

सप्तभिरौपधिकैरिति। उपधिः=आरामविहारादिः, तत्र भवमौपधिकम्। तस्योपधेरभावा*न्निरौपधिकम्*। *सततम*भीक्ष्णम्। *समितं* निरन्तरम्।

अत्र सूत्रम्—"भगवान् कौशाम्ब्यां विहरति स्म घोषितारामे। अथायुष्मान् महाचुन्दो येन भगवांस्तेनोपसंक्रान्तः। उपसंक्रम्य भगवतः पादौ शिरसा वन्दित्वा एकान्तेऽस्थात्। एकान्ते स्थित आयुष्मान् महाचुन्दो भगवन्तमेतदवोचत्—'लभ्यं भदन्त औपधिकं पुण्यक्रियावस्तु प्रज्ञपयितुं महाफलं महानुशंसं महाद्युतिकं महावैस्तारिकम्' ? 'लभ्यं चुन्द' इति भगवांस्तस्यावोचत्।

'*सप्तेमानि चुन्दौपधिकानि पुण्यक्रियावस्तूनि* महाफलानि यावन्महावैस्तारिकाणि। *यैः समन्वागतस्य* श्राद्धस्य कुलपुत्रस्य वा कुलदुहितुर्वा *चरतो वा तिष्ठतो वा स्वपतो वा जाग्रतो वा सततसमितमभिवर्धते एव पुण्यम्, उपजायते एव पुण्यम्*'।

'कतमानि सप्त' ? १. 'इह चुन्द श्राद्धः कुलपुत्रो वा कुलदुहिता वा चातुर्दिशाय भिक्षुसङ्घायारामं प्रतिपादयति। इदं चुन्द प्रथमौपधिकं पुण्यक्रियावस्तु महाफलं यावन्महावैस्तारिकम्, येन समन्वागतस्य कुलपुत्रस्य वा विस्तरेण यावदुपजायत एव पुण्यम्।

२. 'पुनरपरं चुन्द श्राद्धः कुलपुत्रो वा कुलदुहिता वा तस्मिन्नेवारामे विहारं प्रतिष्ठापयति। इदं द्वितीयमौपधिकं पुण्यक्रियावस्तु महाफलं यावदुपजायत एव पुण्यम्।

३. 'पुनरपरं चुन्द श्राद्धः कुलपुत्रो वा कुलदुहिता वा तस्मिन्नेव विहारे शयनासनं प्रयच्छति। तद्यथा—मञ्चं पीठं वृषि कोचवं बिम्बोपधानं चतुरस्रकं ददाति। इदं चुन्द तृतीयमौपधिकं पुण्यक्रियावस्तु पूर्ववत्।

४. 'पुनरपरं चुन्द श्राद्धः कुलपुत्रो वा कुलदुहिता वा तस्मिन्नेव विहारे ध्रुवभिक्षां प्रज्ञपयत्यनुकूलयज्ञाम्। इदं चुन्द चतुर्थमौपधिकं पुण्यक्रियावस्तु महाफलं पूर्ववत्।

१. का० पुस्तके नास्ति।

५. 'पुनरपरं चुन्द श्राद्धः कुलपुत्रो वा कुलदुहिता वा आगन्तुकाय गमिकाय वा दानं ददाति । इदं चुन्द पञ्चममौपधिकं पुण्यक्रियावस्तु पूर्ववत् ।

६. 'पुनरपरं चुन्द श्राद्धः कुलपुत्रो वा कुलदुहिता वा ग्लानाय ग्लानोपस्थापकाय वा दानं ददाति । इदं चुन्द षष्ठमौपधिकं पुण्यक्रियावस्तु पूर्ववत् ।

७. 'पुनरपरं चुन्द श्राद्धः कुलपुत्रो वा कुलदुहिता वा यास्ता भवन्ति शीतलिका वा वद्दलिका वा वातलिका वा वर्षलिका वा, तद्रूपासु शीतलिकासु यावद्वर्षलिकासु भक्तानि वा तर्पणानि वा यवागूपानानि वा तानि सङ्घायाभिनिर्हृत्यानुप्रयच्छति—इदमार्या अस्माकमनार्द्रगात्रा: अनभिवृष्टचीवरा: परिभुज्य सुखस्पर्शं विहरन्तु । इदं च चुन्द सप्तममौपधिकं पुण्यक्रियावस्तु महाफलं यावदुपजायत एव पुण्यम् ।

'एभि: सप्तभिरौपधिकै: पुण्यक्रियावस्तुभि: समन्वागतस्य श्राद्धस्य कुलपुत्रस्य वा कुलदुहितुर्वा न लभ्यं पुण्यस्य प्रमाणमुद्ग्रहीतुम्—एतावत् पुण्यं वा, पुण्यफलं वा, पुण्यविपाकं वा । अपि तु बहुत्वात् पुण्यस्य 'महापुण्यस्कन्ध:' इति संख्यां गच्छतीत्येवमादि''' ।

"द्विरप्यायुष्मान् महाचुन्दो भगवन्तमेतदवोचत्—'लभ्यं भदन्त *निरौपधिकं* पुण्यक्रियावस्तु प्रज्ञपयितुं महाफलं यावन्महावैस्तारिकम् ? 'लभ्यं चुन्द' इति भगवांस्तस्यावोचत् । 'सप्तेमानि चुन्द निरौपधिकानि पुण्यक्रियावस्तूनि यै: समन्वागतस्य श्राद्धस्य कुलपुत्रस्य वा कुलदुहितुर्वा चरतो वा तिष्ठतो वा विस्तरेण यावदुपजायत एव पुण्यम्' ।

'कतमानि सप्त'? १. 'इह चुन्द श्राद्धः कुलपुत्रो वा कुलदुहिता वा शृणोति तथागतं वा तथागतश्रावकं वा अमुकं ग्रामक्षेत्रमुपनिश्रित्य विहरतीति । श्रुत्वा पुनरधिगच्छति प्रीतिप्रामोद्यमुदारं कुशलं नैष्क्रम्योपसंहितम् । इदं चुन्द प्रथमं निरौपधिकं पुण्यक्रियावस्तु पूर्ववत् यावदुपजायत एव पुण्यम् ।

२. 'पुनरपरं चुन्द श्राद्धः कुलपुत्रो वा कुलदुहिता वा शृणोति तथागतं वा तथागतश्रावकं वा उद्युक्तमागमनाय । श्रुत्वा च पुनरधिगच्छतीति पूर्ववत् । इदं चुन्द द्वितीयं निरौपधिकं पुण्यक्रियावस्तु ।

३. 'पुनरपरं चुन्द श्राद्धः कुलपुत्रो वा कुलदुहिता वा शृणोति तमेव तथागतं वा तथागतश्रावकं वा अध्वानमार्गप्रतिपन्नं तमेव ग्रामक्षेत्रमनुप्राप्तम् । श्रुत्वा च पुनरधिगच्छतीति पूर्ववत् । इदं चुन्द तृतीयं निरौपधिकं पुण्यक्रियावस्तु यावदुपजायत एव पुण्यम् ।

४. 'पुनरपरं चुन्द श्राद्धः कुलपुत्रो वा कुलदुहिता वा शृणोति तमेव तथागतं वा तथागतश्रावकं वा तदेव ग्रामक्षेत्रमनुप्राप्तम् । श्रुत्वा च पुनरधिगच्छतीति पूर्ववत् । इदं चुन्द चतुर्थं निरौपधिकं पुण्यक्रियावस्तु यावदुपजायत एव पुण्यम् ।

न ह्याज्ञापनविज्ञप्तेः[1] कर्मपथ उपयुज्यते[1]; तस्य कर्मणोऽकृतत्वात्। कृतेऽपि च तस्याः स्वभावविशेषादिति।

उक्तं च भगवता—"धर्मा भिक्षवो बाह्यमायतनमेकादशभिरायतनैरसंगृहीतमनिदर्शनमप्रतिघम्" (   ) इति। न त्वरूपीत्युक्तम्। तत्र किं प्रयोजनं स्याद् यदि धर्मायतनान्तर्गतमविज्ञप्तिरूपं नश्येत!

अष्टाङ्गश्च मार्गो न स्यादविज्ञप्तिमन्तरेण। समापन्नस्य वाक्कर्मान्ताजीवानामयोगात्[2]।

यत्तर्हीदमुक्तम्—"तस्यैवं जानत एवं पश्यतः सम्यग्दृष्टिर्भावनापरिपूरिं

---

५. 'पुनरपरं चुन्द श्राद्धः कुलपुत्रो वा कुलदुहिता वा तमेव तथागतं वा तथागतश्रावकं वा दर्शनायोपसंक्रामति, दृष्ट्वा च पुनरधिगच्छतीति पूर्ववत्। इदं चुन्द पञ्चमं निरौपधिकं पुण्यक्रियावस्तु।

६. 'पुनरपरं चुन्द श्राद्धः कुलपुत्रो वा कुलदुहिता वा तस्यैव तथागतस्य वा तथागतश्रावकस्य वा अन्तिकाद् धर्मं शृणोति। श्रुत्वा च पुनरधिगच्छतीति पूर्ववत्। इदं चुन्द षष्ठं निरौपधिकं पुण्यक्रियावस्तु।

७. 'पुनरपरं चुन्द श्राद्धः कुलपुत्रो वा कुलदुहिता वा तस्यैव तथागतस्य वा तथागतश्रावकस्य वा अन्तिकाद् धर्मं शृणोति। श्रुत्वा च बुद्धं शरणं गच्छति, धर्मं शरणं गच्छति, सङ्घम् शरणं गच्छति, शिक्षापदानि च प्रतिगृह्णाति। इदं चुन्द सप्तमं निरौपधिकं पुण्यक्रियावस्तु महाफलमिति पूर्ववत्"। बहुग्रन्थभयात् न सर्वं लिखितम्।

न ह्याज्ञापनविज्ञप्तेः कर्मपथ उपयुज्यते; तस्य प्राणातिपातादि*कर्मणोऽकृतत्वात्।* स्यान्मतम्, कृते तस्मिन् कर्मणि तदाज्ञापनविज्ञप्तेः कर्मपथो भविष्यतीति? अत्रेदमुच्यते—*कृतेऽपि च तस्याः स्वभावाविशेषादिति।* परेण कृतेऽपि तस्मिन् कर्मणि तस्या आज्ञापनविज्ञप्तेर्न कश्चित् स्वभावविशेषोऽस्ति, येन तदानीं कर्मपथः स्यात्। तस्मात् पूर्ववत्। *तस्याः स्वभावाविशेषात्।* यथैव पूर्ववत् कर्मपथो न व्यवस्थाप्यते, तथैव पश्चादित्यतोऽस्तीत्यभ्युपगन्तव्या यासौ तदानीमुत्पद्यते कर्मपथसंगृहीतेति।

एकादशभिरायतनैरसंगृहीतमिति। धर्मायतनवर्जैः। *वाक्कर्मान्ताजीवानामयोगादिति।* विज्ञप्तिस्वभावानामेवासम्भवादित्यर्थः।

यत्तर्हीदमुक्तमिति विस्तरः। कोऽस्याभिसम्बन्धः। यदि वा मतम्—यद्य-

---

१-१. ०विज्ञप्तिः मौलः कर्मपथो युज्यते—का०। २. सम्यग्वाक्क०—का०।

गच्छति, सम्यक्सङ्कल्पः, सम्यग्व्यायामः, सम्यक्स्मृतिः, सम्यक्समाधिः। पूर्वमेव चास्य सम्यग्वाक्कर्मान्ताजीवाः परिशुद्धा भवन्ति पर्यवदाताः" ( ) इति ? लौकिकमार्गवैराग्यं पूर्वकृतमभिसन्धायैतदुक्तम्।

प्रातिमोक्षसंवरश्चापि न स्यादसत्यामविज्ञप्तौ। न हि समादानादूर्ध्वं तदस्ति, येनान्यमनस्कोऽप्ययं भिक्षुः स्यात्, भिक्षुणी वेति। सेतुश्च सूत्रे विरक्तिरुक्ता; दौःशील्यविबन्धत्वात्। न वा भवन्ती सेतुर्भवितुमर्हतीत्यस्त्येवाविज्ञप्तिः।

अत्र **सौत्रान्तिका** आहुः—बह्वप्येतत्, चित्रमप्येतत्। नैवं त्वेतत्। किं कारणम् ? यत्तावदुक्तम्—"त्रिविधरूपोक्तेः" इति।

तत्र **योगाचारा** उपदिशन्ति—ध्यायिनां समाधिविषयरूपं[1] समाधिप्रभावादुत्पद्यते, चक्षुरिन्द्रियाविषयत्वाद् अनिदर्शनम्, देशानावरणाद् अप्रतिघमिति[2]।

अथ मतम्—कथमिदानीं तद् रूपमिति ? एतदविज्ञप्तौ समानम्। यदप्युक्तम्—'अनास्रवरूपोक्तेः' इति, तदेव समाधिप्रभावसम्भूतं रूपमनास्रवे समाधावनास्रवं वर्णयन्ति **योगाचाराः**।

विज्ञप्तिर्न स्यादष्टाङ्गोऽयं मार्गो न स्यात्; तत्र विज्ञप्त्ययोगात्। तस्माद् अस्त्यविज्ञप्तिरिति।

यत्तर्हीदमुक्तमिति विस्तरेणोक्त्वा यावत् *सम्यक् समाधिरिति* किमर्थमेवमुच्यते ? *पूर्वमेव चास्येति* सर्वम्। मार्गस्य समापत्तिकालात् पूर्वमित्यर्थः। विज्ञप्तिरूपास्त उक्ता इत्यभिप्रायः। *वैभाषिका* परिहरन्ति—*लौकिकमार्गवैराग्यमिति विस्तरः*। लौकिकमार्गवैराग्यावस्थायां वागादिस्वभावं विज्ञप्तिरूपम्। एतद*भिसन्धायैतदुक्तम्*। न तु मार्गकाले तत् संगृहीतं वागाद्यविज्ञप्तिरूपं नास्तीति।

समाधिविषयरूपमिति। समाधेरालम्बनमस्थिसङ्कलादि। *देशानावरणादप्रतिघमिति*। यद्रूपं देशमावृणोति तत् प्रतिघम्। विपर्ययादप्रतिघमिति सिद्धम्।

कथमिदानीं तद्रूपमिति। यदि न रूपयितुं शक्यत इत्यभिप्रायः। *एतदविज्ञप्तौ समानम्*। अविज्ञप्तिरपि वा देशं नावृणोतीति तुल्यम्। *अनास्रवे समाधौ अनास्रवमिति*। मार्गं सम्मुखीकुर्वाणो *योगाचारस्तद्रूपमाशयं* चाश्रयञ्च प्रतिलभते यत् सम्यग्दृष्टिवदनास्रवं शीलं प्रतिलभते। यस्मिन् सति प्रकृतिशीलतायां सन्तिष्ठते।

---

[1] ०विषयो रूपं—का०। [2] ०नावरणत्वाद०—का०।

काङ्क्षितव्यः" इति, अत्र तदानीं दातुः कश्चेतनाविशेषः ? तस्मात् सन्तति-परिणामविशेष एव न्याय्यः ।

यदप्युक्तम्—"कारयतः कथं कर्मपथाः सेत्स्यन्ति" इति ? तत्राप्येवं वर्णयन्ति—तत्प्रयोगेण परेषामुपघातविशेषात् प्रयोक्तुः सूक्ष्मः सन्ततिपरिणामविशेषो जायते, यत आयत्यां समन्तेऽपि बहुतरफलाभिनिर्वर्तनसमर्थो भवतीति ।

स्वयमपि च कुर्वतः क्रियाफलपरिसमाप्तावेष एव न्यायो वेदितव्यः ।

सोऽसौ सन्ततिपरिणामविशेषः 'कर्मपथः' इत्याख्यायते; कार्ये कारणोपचारात् । कायिकवाचिकत्वं तु तस्य[1] तत्क्रियाफलत्वाद्, यथा अविज्ञप्तिवादिनामविज्ञप्तिरिति[2] ।

उपात्तेषु स्कन्धेषु त्रिकालया चेतनया प्राणातिपातावद्येन स्पृश्यते घातक[3] इति भदन्तः । 'हनिष्यामि', 'हन्मि', 'हतम्' इति चास्य यदा भवतीति ।

न त्रियता कर्मपथः परिसमाप्यते । मा भूदहतेऽपि मात्रादौ हताभिमानिना-

---

चेतनाविशेष इति । एतदालम्बनचेतनस्यापि दायकस्याप्रमाणः पुण्याभिष्यन्दोऽस्तीति दर्शयति ।

क्रियाफलपरिसमाप्ताविति । मौलकर्मपथप्रयोगः *क्रिया* । मौलकर्मपथफलं तस्य *परिसमाप्तौ* । *एष एव न्याय इति* । स्वयं प्रयोगेण परेषामुपघातविशेषात् कर्त्तुः सूक्ष्मः सन्ततिपरिणामविशेषो जायत इति सर्वम् ।

कार्ये कारणोपचारादिति । *सन्ततिपरिणामविशेषः कर्मपथो* भवतीति । सन्ततिपरिणामविशेषः *कार्यम्*, कर्मपथः *कारणम्* । योऽसौ कायवाचोः प्रयोगः, स हि चेतनालक्षणस्य कर्मणः पन्था इति । तस्मिन् कार्ये कर्मपथ इति कारणोपचारः । *कायिकवाचिकत्वं तु तस्य* सन्ततिपरिणामविशेषस्य *तत्क्रियाफलत्वात्* । कायवाक्क्रियायाः फलत्वादित्यर्थः । *यथा अविज्ञप्तिवादिनाम् अविज्ञप्तिरिति* । *यथा* वैभाषिकाणाम*विज्ञप्तिवादिनामविज्ञप्तिः* कर्मपथ इत्याख्यायते; कार्यकारणोपचारात् । कायिकवाचिकत्वं तु तत्क्रियाफलत्वादिति ।

अविज्ञप्तिरद्रव्यमिति प्रकारान्तरेण दर्शयन् *भदन्त आह—उपात्तेषु स्कन्धेष्विति* विस्तरः । सत्त्वसंख्यातेषु वर्तमानेषु स्कन्धेषु *त्रिकालया चेतनया प्राणातिपातावद्येन स्पृश्यते घातक इति* । कथं त्रिकालया ? इत्याह—*हनिष्यामि हन्मि हतमिति चास्य यदा भवतीति* । तदेवमत्र चेतनैव कर्मेत्युक्तं भवति । *आचार्यो भदन्तमतं* केनचिद् भागेनाभिप्रेतं केनचिद्भागेनानभिप्रेतं दर्शयन्नाह—*न त्रियतेति*

---

१. का० पुस्तके नास्ति । २. ०मविज्ञप्तेरिति—का० । ३. का० पुस्तके नास्ति ।

मानन्तर्यं कर्मेति, स्वयं तु घ्नत एतावांश्चेतनासमुदाचार इति—अयमत्राभिप्रायो युक्तरूपः स्यात् ।

क इदानीमेष प्रद्वेषो यदविज्ञप्तिः प्रक्षिप्यते, सन्ततिपरिणामविशेषश्चाभ्युपगम्यते तथैवासंज्ञायमानः[1] ?

न खलु कश्चित् प्रद्वेषः; किन्तु चित्तान्वयकायप्रयोगेण क्रियापरिसमाप्तौ ताभ्यां पृथग्भूतं धर्मान्तरं प्रयोक्तयितुरुत्पद्यत इति नोत्पद्यते परितोषः । यत्कृतप्रयोगसम्भूता तु क्रियापरिसमाप्तिस्तस्यैव तन्निमित्तः सन्ततिपरिणामो भवतीति भवति परितोषः; चित्तचैत्तसन्तानाश्रयत्वां फलोत्पत्तेः ।

उक्तं चात्र । किमुक्तम् ? "विज्ञप्त्यभावाद्" इत्येवमादि । तदभावादविज्ञप्तेरभावः ।

यदप्युक्तम्—"धर्मायतनस्यारूपित्वं यस्मान्नोक्तम्" इति ? तद्वदेवात्र रूप-

---

विस्तरः । यदि कश्चिदेवं प्रयोजयेत्—मन्मातरं मारयेति । उच्चलिते च मारके तस्यैवं भवेद्—हता तेन मन्मातेति । तस्य *हताभिमानिन आनन्तर्यकर्म स्यात्* । न चेष्यते । तस्मात् स्वयं घ्नन्निति *भदन्तेन* विशेष्यं वक्तव्यम् । अत एवाह—*स्वयं तु घ्नत* इति विस्तरः । *एतावांश्चेतनासमुदाचार इति* । हनिष्यामि हन्मि हतमिति । *युक्तरूप* इति । युक्त एव युक्तरूप इति । स्वार्थे रूपप्रत्ययः, नामधेयवत् । यथा—नामैव नामधेयमित्येके व्याचक्षते । प्रशस्तरूपो युक्तरूपः । युक्तं वा रूपं स्वभावोऽस्येति युक्तरूपः ।

तथैवासंज्ञायमान इति । यथैवाविज्ञप्तिर्दुरवबोधा, तथैव सन्ततिपरिणामविशेषोऽपीति । *चित्तान्वयकायप्रयोगेणेति* । चित्तपूर्वकेण कायप्रयोगेणेत्यर्थः । *ताभ्यां पृथग्भूतमिति* । चित्तकायाभ्यां पृथग् भूतम् । *यत्कृतप्रयोगसम्भूतेति* । येन कृतो यत्कृतः, यत्कृतात् प्रयोगात् सम्भूता । *क्रियापरिसमाप्तिः* । कर्मपथपरिसमाप्तिः । *तस्यैव* चित्तचैत्तस्य प्रयोक्तुस्*तन्निमित्त*स्तत्प्रयोगनिमित्तः *सन्ततिपरिणामो भवतीति । भवति परितोषः* । अस्माकमिति वाक्यशेषः । *चित्तचैत्तसन्तानाश्रयत्वां फलोत्पत्तेः* । नाविज्ञप्तिः । किम् ? भवति परितोष इति वर्तते ।

विज्ञप्त्यभावादित्येवमादीति । समुत्थापकस्य धर्मस्याभावात् समुत्थाप्यस्य धर्मस्याभाव इत्यर्थः । अविज्ञप्तिर्द्रव्यतो नास्तीति साधितमेतत् । आदि-शब्देन—अभ्युपेत्याकारणमात्रत्वादतीतानि महाभूतान्युपादाय प्रज्ञप्तेः; तेषामविद्यमान-

---

1. ०वाप्रज्ञायमानः—का० ।

मनिदर्शनमप्रतिघं चोक्तम्, तदेवास्तु धर्मायतनपर्यापन्नम् ।

यदप्युक्तम्—अष्टाङ्ग आर्यमार्गो न स्यादिति? अङ्ग[1] तावदाचक्ष्व—कथं मार्गसमापन्नस्य सम्यग्वाक्कर्मान्ताजीवा भवन्तीति! किमसौ वाचं भाषते, क्रियां वा करोति, चीवरादीन् वा पर्येषते? नेत्याह। किं तर्हि? तद्रूपामनास्रवामविज्ञप्तिं प्रतिलभते। यस्याः प्रतिलम्भाद् व्युत्थितोऽपि न पुनर्मिथ्यावागादिषु प्रवर्तते, सम्यग्वागादिषु च प्रवर्तते। अतो निमित्ते नैमित्तिकोपचारादविज्ञप्तौ तदा[2] व्याक्रियते[2]।

यद्येवम्, इहाप्येवं किं न गृह्यते—मार्गसमापन्नो विनाप्यविज्ञप्त्या तद्रूपमाशयं च आश्रयं च प्रतिलभते, यस्य प्रतिलम्भात् व्युत्थितोऽपि न पुनर्मिथ्यावागादिषु प्रवर्तते, सम्यग्वागादिषु च प्रवर्तते। अतो निमित्ते नैमित्तिकोपचारं कृत्वा अष्टौ मार्गाङ्गानि व्यवस्थाप्यन्त इति?

अपरस्त्वाह—तदक्रियामात्रमत्राङ्गमुक्तं स्यात्। यदसावार्यमार्गसामर्थ्याद्-क्रियानियमं प्रतिलभते, तच्चानास्रवमार्गसन्निश्रयलाभादनास्रवं स्यात्।

न हि सर्वत्र द्रव्यमन्तो धर्माः परिसंख्यायन्ते। तद्यथा अष्टौ लोकधर्माः—

त्वादि। *तदेवास्तु धर्मायतनपर्यापन्नमिति*। यद्ध्यायिनां समाधिविषयो रूपं समाधिप्रभावादुत्पद्यत इत्युक्तं तदयनिदर्शनं चाप्रतिघं च।

अङ्ग तावदाचक्ष्वेति। अङ्गाप्रातिलोम्य इति पठ्यते। हन्त तावदाचक्ष्वेति। एहि तावदाचक्ष्वेत्यर्थ इत्यपरे। *अतो निमित्त* इति विस्तरः। यत एवम्, *अतो निमित्तेऽविज्ञप्तौ नैमित्तिकोपचारात्* सम्यग्वागाद्युपचारात् *अविज्ञप्ती तदा व्याक्रियते*। सम्यग्वाक्कर्मान्ताजीवाख्या क्रियत इत्यर्थः।

आशयं चाश्रयं चेति। *आशयः* प्राणातिपाताद्यकरणाशयः, श्रद्धाद्याशयो वा। *आश्रय* आश्रयपरावृत्तिः। *अतो निमित्ते* आशये च *नैमित्तिकोपचारम्*। सम्यग्वागाद्युपचारं *कृत्वाष्टौ मार्गाङ्गानि व्यवस्थाप्यन्त इति*।

तदक्रियामात्रमिति। *मिथ्यावागाद्यक्रियामात्रम्*। कतमत्तद्? इत्याह—*यदसाविति* विस्तरः। यद्यक्रियामात्रमङ्गं कथं तदनास्रवम्? इत्याह—*तच्चानास्रवमार्गसन्निश्रयालाभादनास्रवमिति*। यद्यक्रियामात्रमङ्गम्, तथाऽद्रव्यसत्।

कथमष्टावङ्गानि भवन्ति? इत्याह—*न हि सर्वत्रेति* विस्तरः। *विधिपूर्व-*

---

1. अङ्गं—का०। 2–2. तदाख्याक्रियते—का०।

लाभः, अलाभः, यशः, अयशः, निन्दा, प्रशंसा, सुखम्, दुःखमिति । न चात्र चीवरादीनामलाभो नामास्ति द्रव्यान्तरम् । प्रातिमोक्षसंवरोऽपि स्यात्, यया चेतनया विधिपूर्वं कृत्वाऽभ्युपगमः प्रतिषिद्धात् कर्मणः कायवाचौ संवृणोति ।

अन्यचित्तो न संवृतः स्यादिति चेत् ? न; तद्भावनया क्रियाकाले स्मरतः तत्प्रत्युपस्थानात् सेतुभावोऽपि स्यादक्रियां प्रतिज्ञां संस्मृत्य लज्जितो दौःशील्याकरणात् इत्यर्थमेव[1] तस्याः समादानम् । यदि पुनरविज्ञप्तेरेव दौःशील्यं प्रतिबध्नीयात्, न कश्चित् मुषितस्मृतिः शिक्षां भिन्द्यात् ।

अलं विस्तरेण, अस्त्येव द्रव्यान्तरमविज्ञप्तिरूपमिति वैभाषिकाः ।

यद्यप्ति, तच्च महाभूतान्युपादायेत्युक्तम्, तत् किं विज्ञप्तिमहाभूतान्येवोपादायाविज्ञप्तिरुत्पद्यते ? अथान्यानि ? अन्यान्येव सा महाभूतान्युपादायोत्पद्यते ।

न हि सैव सामग्री सूक्ष्मफला चौदारिकफला च युज्यते । किं खलु ? यदातनी विज्ञप्तिस्तदातनान्येव सा महाभूतान्युपादाय वर्तते । सर्वमुपादायरूपं

मिति । शीलग्रहणविधिपूर्वम् । *अन्यचित्तो न संवृतः स्यादिति चेत्* । यदि सा चेतना संवरः, तस्माच्चेतनाचित्तादन्यचित्तो *न संवृतः स्यात्* । यया[2] चेतनया[2] कायवाचौ संवृणोति नासौ तदानीमस्तीति । *न तद्भावनयेति* विस्तरः । नैतदेवम्; *तद्भावनया* चित्तसन्तानभावनया *क्रियाकाले* प्राणातिपातादिचित्ते प्रत्युपस्थिते *स्मरतः* अहं प्राणातिपातादिभ्यः प्रतिविरत इति प्रत्युपस्थितस्मृतेः । *तत्प्रत्युपस्थानाद्* यया चेतनया कायवाचौ संवृणोति; तस्याः सम्मुखीभावात् । *इत्यर्थमेव तस्याः समादानमिति* । कथम् ? अयमक्रियाप्रतिज्ञां संस्मृत्य दौःशील्यं कुर्यादिति । *न कश्चिन्मुषितस्मृतिः शिक्षां भिद्यादिति* । यासावविज्ञप्तिः सेतुभूता दौःशील्यं प्रतिबध्नाति सा तदानीं विद्यत इति ।

न हि सैव सामग्रीति विस्तरः । *न सैव* पृथिवीधात्वादीनां महाभूतानां विज्ञप्त्याश्रयाणां *सामग्री सूक्ष्मफला* चानिदर्शनाप्रतिघा अविज्ञप्तिफलत्वात्, *औदारिकफला च* सनिदर्शनसप्रतिघविज्ञप्तिफलत्वाद् *युज्यते* । तस्मादन्यान्येव महाभूतानि उपादायाविज्ञप्तिरुत्पद्यते ।

यदातनी विज्ञप्तिरिति विस्तरः । यदा भवा विज्ञप्तिः यदातनी विज्ञप्तिः । एवं तदातनानि महाभूतानि । यत्कालसम्भूता *विज्ञप्तिः किं* तत्कालसम्भूतान्येव *महाभूतान्युपादाय* विज्ञप्तिरुत्पद्यते । *सर्वमुपादाय रूपं* विज्ञप्तिरविज्ञप्तिर्ध्यानास्रव-

---

१. ०मेव च—का० ।　　२–२. यथा चेतना या—मुद्रितः पाठः ।

प्रायेणैवम्, किञ्चिद्[1] वर्तमानमनागतं चातीतानि महाभूतान्युपादाय ।

किं पुनस्तदिति ?

क्षणादूर्ध्वमविज्ञप्तिः कामाप्तातीतभूतजा ॥ ४ ॥

प्रथमात् क्षणादूर्ध्वमविज्ञप्तिः कामावचरी अतीतानि महाभूतान्युपादायोत्पद्यते । तान्यस्या आश्रयार्थेन सम्भवन्ति[2] । प्रत्युत्पन्नानि शरीरमहाभूतानि सन्निश्रयार्थेन; प्रवृत्त्यनुवृत्तिकारणत्वाद् यथाक्रमम् । चक्रस्येव भूमौ सपरिवर्तमानस्य पाण्यावेध-भूमिप्रदेशौ ॥ ४ ॥

अथ कुतस्त्यानि महाभूतान्युपादाय कुतस्त्यं कायवाक्कर्म ?

स्वानि भूतान्युपादाय कायवाक्कर्म सास्रवम् ।

कामावचरं कायवाक्कर्म कामावचराण्येव महाभूतान्युपादाय । एवं यावच्च चतुर्थध्यानभूमिकं तद्भूमिकान्येवोपादाय ।

संगृहीता चक्षुःश्रोत्ररूपशब्दादि चैवं समानकालान्येव *महाभूतान्युपादाय वर्तते । प्रायेणेति*ग्रहणं किञ्चित्कामावचर्यविज्ञप्तिनिरासार्थम् । अत एवाह—*किञ्चिद् वर्तमानमनागतमतीतानि महाभूतान्युपादायेति* । किञ्चिदुपादाय रूपं वर्तमानमतीतानि महाभूतान्युपादाय वर्तते, किञ्चिदनागतमुपादायरूपमतीतानि महाभूतान्युपादाय वर्तते ।

*किं पुनस्त*दुपादायरूपं यदेवं भूतमिति दर्शयन्नाह—

"*क्षणादूर्ध्वमविज्ञप्तिः कामाप्तातीतभूतजा*" इति । कामावचरसंवरादिग्रहणकालेऽविज्ञप्तिः सहजानि महाभूतान्युपादायोत्पद्यते । एवमन्याप्य*विज्ञप्तिस्तान्येवोपादायोत्पद्यते; यस्मात् तान्यस्या आश्रयार्थेन सम्भवन्ति* । यथान्येषामुपादायरूपाणां प्रत्युत्पन्नानि महाभूतान्याश्रयः, एवं *तस्यातीतान्याश्रयः* । *प्रवृत्त्यनुवृत्तिकारणत्वात् यथाक्रममिति* । अतीतानि महाभूतानि *प्रवृत्तिकारणत्वात्* आक्षेपकारणत्वात् आश्रयार्थेन भवन्ति । *प्रत्युत्पन्नानि शरीरमहाभूतान्यनुवृत्ति*कारणत्वादधिष्ठानकारणत्वात् *सन्निश्रयार्थेन* भवन्ति । *चक्रस्येवेति* विस्तरः । यथा चक्रस्य *पाण्यावेधः* । एवमस्याः प्रवृत्तिकारणम् । यथा *भूमिप्रदेशः* । एवमनुवृत्तिकारणम् ॥ ४ ॥

कालनियममुक्त्वा भूमिनियमं पृच्छति—*अथ कुतस्त्यानीति* विस्तरः । *यावच्च चतुर्थध्यानभूमिकमिति* । आरूप्येषु भूतभौतिकानामभावात् ।

---

१. किंचित्तु—का० । २. भवन्ति—का० ।

अनास्रवं यत्र जातः,

अनास्रवं तु कायवाक्कर्म यस्यां भूमौ जातस्तदुत्पादयति, तद्भूमिकान्युपादाय तद् वेदितव्यम्। धात्वपतितत्वाद्, अनास्रवाणां च महाभूतानामभावात्[1], तद्बलेन चोत्पत्तेः। तत्र विज्ञप्त्यविज्ञप्त्याख्यकर्मणी वेदितव्ये।

अविज्ञप्तिरनुपात्तिका ॥ ५ ॥

नैःष्यन्दिकी च सत्त्वाख्या,

किञ्च—

निष्यन्दोपात्तभूतजा।

नैःष्यन्दिकान्येव भूतान्युपादाय चित्तचैत्तानि चोपादायाविज्ञप्तिर्भवति। असमाहितभूमिकाया एष प्रकारः॥

समाधिजौपचयिकानुपात्ताभिन्नभूतजा ॥ ६ ॥

ध्यानानास्रवसंवरा विज्ञप्तिः **समाधिजा**। सा समाधिसम्भूतान्यौपचयि-

---

धात्वपतितत्वादिति। अनास्रवस्य कायवाक्कर्मणो धात्वप्रतिसंयुक्तत्वात्। नास्ति नियमत इत्यभिप्रायः। अनास्रवाणि तर्हि महाभूतान्युपादाय कस्मान्न भवति? इत्यत आह—*अनास्रवाणाञ्च महाभूतानामभावादिति*। किं पुनरस्या महाभूतैः कार्यम्? इत्यत आह—*तद्बलेन चोत्पत्तेरिति*। महाभूतबलेन चोत्पत्तेरित्यर्थः। अथ चित्तबलेनैव तदुत्पत्तिः कस्मान्न भवति? अनुपादायरूपत्वप्रसङ्गात्।

"अविज्ञप्तिरनुपात्तिका"इति। अमूर्तत्वाच्चित्तचैत्ताधिष्ठानभावायोगाद् ॥५॥

"नैष्यन्दिकी च" इति। कुशलाकुशलत्वात्। न विपाकजा; "नाव्याकृतास्त्यविज्ञप्तिः" (अभि० ४.७) इति वचनात्। विपाकजस्य चाव्याकृतत्वात् "विपाकोऽव्याकृतो धर्मः" (अभि० को० २.५७) इति वचनात्। नौपचयिकी उपचयाभावात्। पारिशेष्यान्नैष्यन्दिकी।

"सत्त्वाख्या" सत्त्वसन्तानपतितत्वात्।

"निष्यन्दोपात्तभूतजा" इति। नैष्यन्दिकोपात्तमहाभूतजा; समुत्थापकचित्तापेक्षत्वात्, असमाहितचित्तविज्ञप्त्यधिकाराच्च। न स्वप्नसमाध्याद्यौपचयिकमहाभूतजा। अत एव च न विपाकजमहाभूतजा।

"समाधिजा" इति विस्तरः। सास्रवानास्रवमाधिजत्वात्। ध्यानानास्र-

---

1. भूतानाम०—का०।

कानि, अनुपात्तानि च महाभूतान्युपादायोत्पद्यते । अभिन्नानि च, यान्येव च भूतान्युपादाय प्राणातिपाताद् विरतिरुत्पद्यते तान्येव यावत् सम्भिन्नप्रलापात् । किं कारणम् ? चित्तवद् भूताभेदात् ।

प्रातिमोक्षसंवरे त्वन्यान्यानि महाभूतान्युपादाय सप्ताविज्ञप्तयो भवन्ति । विज्ञप्तिस्तु नैःष्यन्दिकी । उपात्ता तु कायिकी ।

किं पुनरियं विज्ञप्तिरुत्पद्यमाना पूर्वकस्य संस्थानस्य सन्तानं बाधित्वोत्पद्यते ? उताहो न ?

किञ्चातः यदि बाधित्वोत्पद्यते ? न; विपाकरूपस्योच्छिन्नस्य पुनः प्रबन्धादवैभाषिकीयं प्राप्नोति ।

अथाबाधित्वा ? कथमेकस्मिन् भूतसङ्घाते संस्थानद्वयं सिध्यति । अन्यान्येव तानि नैःष्यन्दिकानि तदानीमुपजायन्ते यान्युपादाय विज्ञप्तिर्भवति ?

वज्रसंवराविज्ञप्तिः समाधिजेत्युच्यते । *अनुपात्तानि च महाभूतान्युपादायेति* । समाहितचित्तवशेन तत्र शरीरे चित्तानुवृत्तित्वात् । उपात्तानि हि महाभूतानि निरोधसमापत्त्याद्यवस्थासु चित्तमन्तरेणापि वर्तन्ते । *यावत्सम्भिन्नप्रलापादिति* । यावच्छब्देन अदत्तादानात् काममिथ्याचारान्मृषावादात् पैशुन्यात् पारुष्यात् सम्भिन्नप्रलापादिति । *चित्तवद् भूताभेदात्* । यथा तदुत्पादकं चित्तमभिन्नम्, एवं भूतान्यपि तदुत्पादकान्यभिन्नान्येव । न चाधारार्थेनाविज्ञप्तेर्महाभूतान्याश्रयः, किं तर्हि ? तत्प्रवर्तनार्थेन । तस्माद*भिन्नभूतजेति* वचनं न विरुध्यते।

प्रातिमोक्षसंवरे त्वन्यान्यानीति । अचित्तानुपरिवर्त्तनीयत्वात् । *विज्ञप्तिस्तु नैष्यन्दिकीति* । आक्षेपवशेनानुवृत्तेः । *उपात्ता तु कायिकीति* । न वाचिकीत्यर्थः । कायिकी हि कायमहाभूताविनिर्भागवर्तित्वात् तदाश्रयभूतानामुपात्ता । न तु वाचिकी; तद्विनिर्भागवर्तित्वात् ।

अत्र चोदयति—शास्त्रविरुद्धमेतद् । एवं ह्याह–"यानीमान्युपासकस्य पञ्च शिक्षापदानि, एषां कत्युपात्तानि ? कत्यनुपात्तानि ? आह—सर्वाण्यनुपात्तानि" इति ? अविज्ञप्तिलक्षणशिक्षापदभिसन्धिवचनाद् बाहुलिकत्वाद्वा तथानिर्देशस्येत्यदोषः ।

पुनः प्रबन्धादवैभाषिकीयमिति । एकसंस्थानोत्पत्तावितरसंस्थानानिवृत्तेः । *कथं* विस्तरेण यावत् *संस्थानद्वयं सिध्यतीति* । अन्योन्यावकाशदानात् ।

एवं तर्हि यद्यदेवाङ्गं निश्रित्योत्पद्यते विज्ञप्तिः, तेन तेनाङ्गेन महीयसा भवितव्यम्; तन्महाभूतैरभिव्यापनात्। अनभिव्यापने च पुनः कथं कृत्स्नेनाङ्गेन[1] विज्ञपयेत्। शुषिरत्वात् कायस्यास्ति तेषामवकाशः ॥ ६ ॥

तत् खल्वेतत् कर्म पर्यायेण द्विविधम्, त्रिविधम्, पञ्चविधं चोक्तम्। चेतना, चेतयित्वा चेति। चेतयित्वा पुनर्द्विधा—काय-वाक्कर्म, चेतना च। कायकर्म पुनः द्विविधम्—विज्ञप्त्याख्यम्, अविज्ञप्त्याख्यं च। एवं वाक्कर्म, चेतना चेति पञ्चविधं भवति। तत्र पुनरविज्ञप्तिर्द्विधा—कुशला, अकुशला च।

नाव्याकृतास्त्यविज्ञप्तिः,

किं कारणम्? अव्याकृतं हि चित्तं दुर्बलम्, अतो न शक्तं बलवत् कर्माक्षेप्तुम्, यन्निरुद्धेऽपि तस्मिन्ननुबध्नीयात्।

त्रिधाऽन्यत्,

अन्यत् कर्म त्रिविधम्—कुशलाकुशलाव्याकृतम्। किं तदन्यत्? विज्ञप्तिः, चेतना च।

अशुभं पुनः।

तन्महाभूतैरभिव्यापनादिति। विज्ञप्त्याश्रयैर्महाभूतैरङ्गस्याभिव्यापनात्। *अनभिव्यापने च पुर्नविज्ञप्तिमहाभूतैः कथं कृत्स्नेनाङ्गेन विज्ञापयेत्।* न हि शक्यते वक्तुम्—कायैकदेशेनासौ विज्ञापयति न सर्वकायेनेति। विज्ञप्त्याश्रयाणि महाभूतानि तदङ्गं न व्याप्यावतिष्ठन्त इति। *शुषिरत्वात् कायस्यास्ति तेषामवकाश इति।* अभिव्यापनेऽपि न महीयसाङ्गेन भवितव्यम्; शुषिरत्वेन कायानुप्रवेशात्। पीनेन तर्हि गुरुणा वा तेनाङ्गेन न भवितव्यम्; सूक्ष्मत्वात् ॥ ६ ॥

द्विविधं त्रिविधं पञ्चविधं चोक्तमिति। "चेतना तत्कृतं च तत्" (अभि० को० ४.१) इति वचनाद् द्विविधमुक्तम्। "चेतना मानसं कर्म तज्जे वाक्कायकर्मणी" (अभि० को० ४.२) इति वचनात् त्रिविधमुक्तम्। "ते तु विज्ञप्त्यविज्ञप्ती" (अभि० को० ४.३) इति कायवाक्कर्मणोर्विज्ञप्त्यविज्ञप्तित्वे भेदात् चेतनात्मनः कर्मणश्च पञ्चसत्त्वात् पञ्चविधमुक्तम्।

"नाव्याकृतास्त्यविज्ञप्तिः" इति। कुशलाकुशलैवाविज्ञप्तिरित्यर्थादुक्तं भवति। *बलवत्कर्मेति।* अविज्ञप्तिलक्षणम्।

---

1. कृत्स्नाङ्गेन—का०।

कामे,

अकुशलं वस्तु कर्म कामधातौ वेदितव्यम्, नान्यत्र; अकुशलमूलानां प्रहीणत्वाद्, आह्रीक्यानपत्राप्ययोश्च। कुशलाव्याकृतं तु सर्वत्राप्रतिवेधात्। तत्र—

रूपेऽप्यविज्ञप्तिः,

कामेऽपीति; अपिशब्दात्। आरूप्येषु नास्ति; भूताभावात्। यत्र हि कायवाचोः प्रवृत्तिस्तत्र कायवाक्संवरौ।

इह तर्हि समापन्नस्य स्यादनास्रवाविज्ञप्तिवत्? न; तस्या धात्वपतितत्वात्।

आरूप्यावचरी त्वविज्ञप्तिर्नार्हति कामरूपावचराणि[1] विसभागानि महाभूतान्युपादाय[2] भवितुम्।

सर्वरूपवैमुख्याच्चारूप्यसमापत्तिर्नालं[3] रूपोत्पत्तये; विभूतरूपसंज्ञत्वात्।

दौःशील्यप्रतिपक्षेण शीलम्। तच्च दौःशील्यं कामावचरम्। आरूप्याश्च

कामेऽपीति अपिशब्दादिति। च-शब्दार्थेनापिशब्देन *काम* इत्याकृष्यते। *अनास्रवाविज्ञप्तिवदिति*। यथा न च तावदनास्रवाया अविज्ञप्तेरनास्रवाणि महाभूतानि; अथ च पुनर्यस्यां भूमौ जातस्तामुत्पादयति, तद्भूमिकानि महाभूतान्युपादायोत्पद्यते। एवं न च तावदारूप्याणि महाभूतानि स्युः।

अथ च पुनर्यस्यां भूमौ जातस्तामुत्पादयति, तद्भूमिकानि महाभूतान्युपादायारूप्यावचर्याविज्ञप्तिर्भविष्यतीति? *न; तस्या धात्वपतितत्वादिति*। नेह; असाम्यात्। यस्मादविज्ञप्तिरनास्रवा धात्वपतिता कामरूपारूप्यावचरीति तृष्णाभिरस्वीकृतत्वात् तस्या धातुतो भूमितो वा नैव सभागानि, नापि विसभागानि महाभूतानि भवन्तीति, अतो यत्र जातस्तत्रजानि महाभूतान्युपादायोत्पद्यते। *आरूप्यावचरी त्वविज्ञप्तिर्नार्हति कामरूपावचराणि विसभागानि महाभूतान्युपादाय भवितुम्*। धातुपतितत्वादित्यभिप्रायः।

किञ्च—सर्वरूपवैमुख्याच्चारूप्यसमापत्तिर्नालं रूपोत्पत्तये। रूपभूमिका त्वनास्रवा समापत्तिरलं रूपोत्पत्तये, अविज्ञप्त्युत्पत्तये इत्यर्थः। कस्मात्? सर्वरूपवैमुख्यादित्यभिप्रायः। कथं चारूप्यसमापत्तेः सर्वरूपवैमुख्यमिति? अतो ब्रवीति—*विभूतरूपसंज्ञत्वादिति*। विगतरूपसंज्ञत्वादित्यर्थः।

दौःशील्यप्रतिपक्षेण शीलमिति विस्तरः। *दौःशील्यं कामावचरम्*; अकुशल-

---

१. का० पुस्तके नास्ति। २. भूतान्युपा०—का०।

३. ०समापत्तु०—का०।

कामधातोराश्रयाकारालम्बनप्रतिपक्षदूरताभिर्दूरे । अत एषाविज्ञप्तिर्नास्तीति वैभाषिकाः ।

विज्ञप्तिः सविचारयोः ॥ ७ ॥

विज्ञप्तिस्तु सविचारयोरेव भूम्योः । कामधातौ प्रथमे च ध्याने न तत ऊर्ध्वम् ॥ ७ ॥

कामेऽपि निवृता नास्ति,

निवृता तु विज्ञप्तिः **कामधातावपि नास्ति** । ब्रह्मलोक एवास्ति । **महाब्रह्मणो** हि शाठ्यसमुत्थितं कायकर्म श्रूयते । स हि स्वपर्षन्मध्ये आयुष्मतोऽश्वजितः क्षेपार्थमात्मानं क्षिप्तवान् ।

तत ऊर्ध्वमसत्यां वाग्विज्ञप्तौ कथं तत्र शब्दायतनं बाह्यमहाभूतहेतुकम् ।

समुत्थानत्वात् । तस्य रूपभूमिकं शीलमविज्ञप्तिलक्षणं प्रतिपक्ष इति युज्यते । आरूप्यावचरमप्येवं भविष्यतीति चेद् ? अत आह—*आरूप्याश्च कामधातोरिति* विस्तरः । *आरूप्याः कामधातोश्चतसृभिर्दूरताभिर्दूरे* । दूरत्वाच्चारूप्यसंगृहीतं शीलं कामधातुप्रतिपक्षे न कल्पते । चतस्रश्च दूरता व्याख्याताः पुरस्तादिति[1] न पुनर्व्याख्यायन्ते । *प्रतिपक्षदूरता* चात्रोदाहरणम् ।

"विज्ञप्तिः सविचारयोः" इति । सविचारयोरेव भूम्योरिति । अवधारणार्थ आरम्भः । "वितर्क्य विचार्य वाचं भाषते" इति वितर्कविचारपूर्वकत्वात् कायवाक्कर्मणोः ॥ ७ ॥

"कामेऽपि निवृता नास्ति" इति । न केवलमविचारासु भूमिष्विति दर्शयति । *ब्रह्मलोक एवास्तीत्युक्तं* भवति ।

तत ऊर्ध्वमिति । ब्रह्मलोकादूर्ध्वम् । *बाह्यमहाभूतहेतुकमिति* । वायुप्रभृतीनां *शब्दायतनम्* । विज्ञप्तिशब्दप्रतिषेधपरमेतद्वचनम् । न तु बाह्यमहाभूतहेतुकमिति । पाण्याद्यङ्गशब्दोऽपि हि द्वितीयादिषु ध्यानेषु सम्भवति । अन्यथा हि शास्त्रविरोधः स्यात् । तथा हि शास्त्र उक्तम्—"शब्दधातुना कः समन्वागतः ? आह—कामरूपावचरः । कोऽसमान्वागतः ? आह—आरूप्यावचरः" (
) इति । न हि बाह्येन सत्त्वसंख्यातेन समन्वागतो युज्यते; "प्राप्त्यप्राप्तिस्वसन्तानपतितानाम्" (अभि० को० २.३६) इति वचनात् ।

---

१. द्र०—अभि० को० स्फु० २.६७; पृ० ३५८ ।

अन्ये पुनराहुः—द्वितीयादिष्वपि ध्यानेषु विज्ञप्तिरस्त्यनिवृताव्याकृता। न तु[1] कुशला, न क्लिष्टा। किं कारणम्? न हि तेषूपपन्नस्तथाजातीयमधोभूमिकं[2] चित्तं सम्मुखीकरोति, येन तां विज्ञप्तिं समुत्थापयेत्; न्यूनत्वात्, प्रहीणत्वाच्च।

पूर्वमेव तु वर्णयन्ति।

किं पुनः कारणमूर्ध्वं ब्रह्मलोकान्नास्ति विज्ञप्तिः, कामधातौ च निवृताव्याकृता नास्ति?

समुत्थानमसद्यतः।

सवितर्कविचारेण हि चित्तेन विज्ञप्तिः समुत्थाप्यते। तच्च द्वितीयादिषु ध्यानेषु नास्ति, भावनाप्रहातव्येन चोत्थाप्यते; दर्शनप्रहातव्यस्यान्तर्मुखप्रवृत्तत्वात्।

अस्यैव च दोषपरिहारार्थमन्ये पुनराहुरिति। *द्वितीयादिष्वपि ध्यानेषु विज्ञप्तिरस्तीति*। किम्भूमिका? प्रथमध्यानभूमिका। *वैभाषिक*पक्ष एवायम्, न पक्षान्तरम्;

"कायाक्षिश्रोत्रविज्ञानं विज्ञप्त्युत्थापकं च यत्।
द्वितीयादौ तदा ध्यानमक्लिष्टाव्याकृतं च तत्"॥

इति सिद्धान्तात्। एवं तर्हि द्वितीयादिध्यानभूमिका भवति पक्षान्तरम्। सा तु किं व्याकृता, उताव्याकृता? इत्याह—*अनिवृताव्याकृता। न तु कुशला न क्लिष्टेति*। परस्परसम्भाषणादि कुर्वतां ततस्त्यानामव्याकृता विज्ञप्तिर्भवति। *किं कारणं* न कुशला न क्लिष्टाऽस्ति? इत्याह—*न हि तेषूपपन्न* इति विस्तरः। न हि द्वितीयादिषु ध्यानेषूपपन्नः *तथाजातीयं* कुशलक्लिष्टजातीयम*धोभूमिकं चित्तं सम्मुखीकरोति। येन* चित्तेन कुशलां क्लिष्टां वा *विज्ञप्तिं समुत्थापयेत्*। किं कारणम्? इति आह—*न्यूनत्वात् प्रहीणत्वाच्चेति*। कुशलमधोभूमिकं न्यूनत्वात् न सम्मुखीकरोति। प्रहीणत्वाच्चेति न क्लिष्टम्। अर्थादेतदुक्तं भवति—अव्याकृतमधोभूमिकं चित्तं सम्मुखीकरोति, तेन तां समुत्थापयतीति। एतदुक्तं भवति—अधोभूमिकेन चित्तेनोर्ध्वभूमिका विज्ञप्तिरुत्थाप्यत इति। तदेवं नेच्छन्ति *वैभाषिकाः*। प्रथमध्यानिकैव हि सा विज्ञप्तिः; प्रथमध्यानभूमिकचित्तसमुत्थापितत्वात्। तस्मादाह—*पूर्वमेव तु वर्णयन्तीति*।

तच्च कामाधाताविति। तच्च भावनाप्रहातव्यं *निवृताव्याकृतं* चित्तं *कामधातौ नास्ति*। सत्कायान्तग्राहदृष्टिसम्प्रयुक्तमेव हि कामधातौ निवृताव्याकृतं चित्तमिष्यते। तेन च न विज्ञप्तिः समुत्थाप्यते। *अन्तर्मुखप्रवृत्तत्वात्*।

---

१. का० पुस्तके नास्ति। २. ०न्नस्तज्जातीय०—का०।

तत्र कामधातौ निवृताव्याकृतं नास्ति ।

किं खलु समुत्थानवशादेव धर्माणां कुशलाकुशलत्वं वेदितव्यम् ? नेत्याह । किं तर्हि ? चतुर्भिः प्रकारैः—परमार्थतः, स्वभावतः, सम्प्रयोगतः, समुत्थानतश्च ।

तत्र तावत्—

परमार्थशुभो मोक्षः,

निर्वाणं हि सर्वदुःखव्युपशमः । ततः परमक्षेमत्वात् परमार्थेन कुशलम्, आरोग्यवत् ।

स्वतो मूलह्र्यपत्रपाः ॥ ८ ॥

त्रीणि कुशलमूलानि ह्रीश्चापत्राप्यं च स्वभावेन कुशलानि; अन्यसम्प्रयोगसमुत्थानानपेक्षत्वात्, पथ्यौषधवत् ॥ ८ ॥

सम्प्रयोगेण तद्युक्ताः,

तैरेव कुशलमूलह्र्यपत्राप्यैः सम्प्रयुक्ता धर्माः सम्प्रयोगेण कुशलाः; तैरसम्प्रयुक्तानां कुशलत्वाभावाद्, औषधमिश्रपानीयवत् ।

समुत्थानात् क्रियादयः ।

कायवाक्कर्मणी चित्तविप्रयुक्ताश्च संस्कारजात्यादयः प्राप्तिनिरोधासंज्ञिसमापत्तयस्तैरेव कुशलमूलादिसम्प्रयुक्तैर्धर्मैः समुपस्थापिताः समुत्थानेन कुशलाः, औषधिपानीयसम्भूतक्षीरवत्[1] ।

प्राप्तीनां तु विसभागचित्तसमुत्थापितानां कथं कुशलत्वमिति वक्तव्यम् ।

स्वभावत इति । आत्मतः । *परमक्षेमत्वादिति* । अक्षेमलेशानुबन्धाभावात् । यद्धि स्वभावसम्प्रयोगसमुत्थानतः कुशलम्, न तत् परमक्षेममित्युक्तं भवति ॥८॥

असम्प्रयुक्तानां कुशलत्वाभावादिति । कुशलमूलादिभिरसम्प्रयुक्तानां चैत्तादीनां कुशलत्वाभावात् तत्सम्प्रयोगकुशलत्वसिद्धिः ।

तैरेव कुशलमूलादिसम्प्रयुक्तैरिति । आदिशब्देन ह्र्यपत्राप्ययोर्ग्रहणम् । *औषधिपानीयसम्भूतक्षीरवदिति* । पीतौषधपानीयायार्गोर्यत् क्षीरं तदौषधपानीयसंभूतम् ।

प्राप्तीनां त्विति विस्तरः । *प्राप्तीनां* कुशलानां *विसभागचित्तसमुत्थापितानाम्* । विसभागं चित्तं कुशलादन्यत् । विचिकित्सया कुशलमूलप्रतिसन्धाने याः

---

१. औषधपानीयसम्भूतधात्रीक्षीरवत्—का० ।

तद्यथा—विचिकित्सया कुशलमूलप्रतिसन्धानम्, धातुप्रत्यागमपरिहाणिभ्यां च।

यथा च कुशलमुक्तम्, ततो

विपर्ययेणाकुशलम्,

कथं कृत्वा ? संसारः परमार्थेनाकुशलः; सर्वदुःखप्रवृत्त्यात्मकत्वेन परमाक्षेमत्वात्। अकुशलमूलाह्रीक्यानपत्राप्याणि स्वभावतः। तत्सम्प्रयुक्ता धर्माः सम्प्रयोगतः। तत्समुत्थापिताः कायवाक्कर्मजात्यादिप्राप्तयः समुत्थानतः व्याध्यपथ्यौषधादिभिरुपमेयाः।

एवं तर्हि न किञ्चित् सास्रवमव्याकृतं भविष्यति, कुशलं वा; संसाराभ्यन्तरत्वात् ? परमार्थत एवमुक्तम्, विपाकं तु प्रति यत् सास्रवं न व्याक्रियते तदव्याकृतमित्युच्यते।

कुशलानां प्राप्तयः, तासां कुशलत्वम्। न तावत् परिनिर्वाणवत्; परमार्थाक्षेमत्वात्। नाप्यलोभादिवत् स्वभावतः कुशलम्; अतत्स्वभावत्वात्। नापि वेदनादिवत्; संप्रयोगतो विप्रयुक्तत्वात्। नापि समुत्थानतः; तत्समुत्थानचित्तस्य क्लिष्टत्वात्। एवं पुनर्भवप्रतिसन्धावपि उपपत्तिप्रतिलम्भिककुशलप्राप्तयो वक्तव्याः। *कथं तासां कुशलत्वमिति वक्तव्यमेतत्*। कर्तव्योऽत्र यत्न इत्यभिप्रायः। अत्र परिहरन्ति—कुशलमूलसमुत्थापनीयत्वादनागतावस्थायामेव ताः कुशलमूला भवन्ति। क्लिष्टेन चित्तेन तत्प्राप्तिविबन्धोऽपनीयते। न तत् कुशलत्वमापद्यत इति।

सर्वदुःखप्रवृत्त्यात्मकत्वेनेति। सर्वस्य दुःखस्य प्रवृत्तिरात्मा स्वभावोऽस्येति सर्वदुःखप्रवृत्त्यात्मकः, तद्भावेन। *परमार्थेनाक्षेमः संसारः*। *कायवाक्कर्मजात्यादिप्राप्तय इति*। कायवाक्कर्माणि विज्ञप्त्यविज्ञप्तिस्वभावान्यसंवर-नैवसंवरनासंवरसंगृहीतानि। *जात्यादयो* जातिजरास्थित्यनित्यतालक्षणालक्षणस्वभावाः। प्राप्तयोऽकुशलानाम्। *व्याध्यपथ्यौषधादिभिरुपमेया* इति। संसारो व्याधिनोपमेयः। व्याधिसंसार इत्यर्थः। लोभादीन्यपथ्यौषधेनोपमेयानि; अन्यसम्प्रयोगसमुत्थानापेक्षत्वात्। तत्सम्प्रयुक्ता अपथ्यौषधिमिश्रपानीयेन। कायवाक्कर्मजात्यादिप्राप्तयोऽपथ्यौषधपानीयसम्भूतक्षीरेणोपमेयाः।

एवं तर्हीति विस्तरः। यदि परमार्थेनाकुशलः संसारः। *न किञ्चित् सास्रवमव्याकृतं भविष्यति, कुशलं वा; संसाराभ्यन्तरत्वात्* सास्रवस्य। *परमार्थत एवमुक्तमिति*। अभ्युपगतमेतत्—सर्वं संसारपर्यापन्नमकुशलमिति। *विपाकं तु प्रतीति* विस्तरः। *यद्विपाकं प्रति न व्याक्रियते*। सविपाकमेतदिति। *तद व्याकृत-*

इष्टविपाकत्वात्[1] कुशलमित्युच्यते ।

यदि तु परमार्थेनाव्याकृतं मृग्यते, तत्—

परमाव्याकृते ध्रुवे ॥ ९ ॥

द्वे असंस्कृते निष्पर्यायेणानिवृताव्याकृते—आकाशम्, अप्रतिसंख्या-निरोधश्च ।

इदं विचार्यते—यदि समुत्थानवशात् कुशलाकुशलत्वं कायवाक्कर्मणः, किं न महाभूतानाम् ? कर्मणि हि कर्तुरभिप्रायः, न महाभूतेषु ।

समाहितस्याविज्ञप्तौ नास्त्यभिप्रायः । न चासमाहितं चित्तं तस्याः समुत्थापकं विसभागभूमिकत्वादिति कथं तस्याः कुशलत्वम् ?

दिव्ययोरपि वा चक्षुःश्रोत्रयोः कुशलत्वप्रसङ्गः ? कर्तव्योऽत्र यत्नः ।

मित्युच्यते । तदुक्तं भवति—यत् सास्रवं तदकुशलम्; परमाक्षेमत्वात् । विपाकं प्रत्यव्याकरणार्थादव्याकृतमिति । कुशलमपि । तथैवाकुशलम् । *इष्टविपाकत्वात् कुशलमित्य*व[क्त]व्यम् ।

यदि समुत्थानवशादिति विस्तरः । चेतनाया एव कुशलाकुशलत्वमित्यनेनाभिप्रायेण । *कायवाक्कर्मणः कुशलाकुशलत्वं* विचारयति । *किं न महाभूतानामिति* । कुशलाकुशलत्वम् । कुशलाकुशलेन हि चित्तेन कायवाक्कर्म-तन्महाभूतानि समुत्थाप्यते । *वैभाषिक* आह—*कर्मणि हि कर्तुरभिप्रायो न महाभूतेषु* । न 'महाभूतानि कुर्याम्' इति । किं तर्हि ? 'इदं कर्म कुर्याम्' इति । न कर्मवन्महाभूतानां कुशलाकुशलत्वमिति ।

आचार्य आह—*समाहितस्य कर्तुरविज्ञप्तौ नास्त्यभिप्रायः* । अविज्ञप्तिं कुर्यामिति । *न चासमाहितं चित्तं तस्याः समुत्थापकमस्ति* । यदेवमभिप्रायं कुर्यात् । *विसभागत्वाद्* विसदृशत्वाद् *भूमितो*ऽसमाधानाद्वा । *कथं तस्याः* समाहितायाः अविज्ञप्तेः *कुशलत्वम्* । महाभूतवत् तस्याः कुशलत्वं न स्यादित्यभिप्रायः ।

दिव्ययोरपि वा चक्षुःश्रोत्रयोः कुशलत्वप्रसङ्ग इति । यद्यन्तरेणापि तदभिप्रायमविज्ञप्तेः कुशलमिति । अथ वा अयमस्याभिसम्बन्धः—यदि विसभागासमाहितचित्तवशेन तस्याः कुशलत्वम्, दिव्ययोरपि चक्षुःश्रोत्रयोः कुशलत्वप्रसङ्गः, प्रयोगकाले तदभिप्रायसम्भवात् । न च तयोः कुशलमस्ति, "अव्याकृते श्रोत्रचक्षुरभिज्ञे" (अभि० ७.४५) इति वचनात् ।

---

[1] ०विपाकं च—का० ।

यदुक्तम्—"दर्शनप्रहातव्यं चित्तं विज्ञप्तेरसमुत्थापकम्" इति । किं तर्हि भगवतोक्तम्—"ततोऽपि मिथ्यादृष्टेर्मिथ्यासङ्कल्पः प्रभवति मिथ्यावाग् मिथ्याकर्मान्तः[1]" इत्येवमादि । अविरुद्धमेतत् ॥ ९ ॥

समुत्थानं द्विधा हेतुतत्क्षणोत्थानसंज्ञितम् ।

द्विविधं समुत्थानम्—हेतुसमुत्थानम्, तत्क्षणसमुत्थानं च । तत्रैव क्षणे समुद्भावात्[2] ।

प्रवर्तकं तयोराद्यं द्वितीयमनुवर्तकम् ॥ १० ॥

हेतुसमुत्थानं **प्रवर्तकम्**; आक्षेपकत्वात् । तत्क्षणसमुत्थानम**नुवर्तकम्**; क्रियाकालानुवर्तनात् ।

किमिदानीं तस्य तस्यां क्रियायां सामर्थ्यम् ? तेन हि विनासौ मृतस्येव न स्यादाक्षिप्तापि सती ।

यदुक्तं दर्शनप्रहातव्यं चित्तं विज्ञप्तेरसमुत्थापकमिति । दर्शनप्रहातव्यस्यान्तर्मुखप्रवृत्तत्वादित्येवं ब्रुवतां *किं तर्हि भगवतोक्तमिति* विरुध्यते । तद् भगवतोक्तमिति वाक्यार्थः । किं तद् ? इत्युच्यते—*ततो मिथ्यादृष्टेरिति* विस्तरः । कथं *मिथ्यादृष्टे*र्दर्शनप्रहातव्यायाः *मिथ्यावाक्* विज्ञप्तिस्वभावा, *मिथ्याकर्मान्तश्च* तत्स्वभाव एवेत्युक्तमिति ॥ ९ ॥

"हेतुतत्क्षणोत्थानसंज्ञितम्" इति । हेतूत्थानं च तत्क्षणोत्थानं च हेतुतत्क्षणोत्थानम्, हेतुतत्क्षणोत्थानमिति संज्ञितं हेतुतत्क्षणोत्थानसंज्ञितम् । संज्ञितमिति संज्ञीकृतम् । अथवा—हेतुतत्क्षणोत्थानं संज्ञास्येति हेतुतत्क्षणोत्थानसंज्ञम्, हेतुतत्क्षणोत्थानसंज्ञीकृतं हेतुतत्क्षणोत्थानसंज्ञितम् ।

हेतुसमुत्थानमिति । समुत्तिष्ठतेऽनेनेति समुत्थानम्, हेतुश्च समुत्थानञ्च तत् हेतुसमुत्थानम् । *तत्क्षणसमुत्थानमिति* । स क्षणः क्रियाक्षणः, तत्क्षणे समुत्थानं तत्क्षणसमुत्थानम् । *तत्रैव क्षणे समुद्भावात्* । सद्भावात् । तत्रैव क्रियाक्षणे तत्क्षणसमुत्थानस्य भावादित्यर्थः । *आक्षेपकत्वादिति* । उत्पादकत्वात् ।

किमिदानीमिति विस्तरः । *तस्य* तत्क्षणसमुत्थानस्य *तस्यां* विज्ञपनक्रियायां *सामर्थ्यम्* । येन तदानीं तदनुवर्तकमित्युच्यते । *तेन हीति* विस्तरः । *तेन हि* तत्क्षणसमुत्थानेन *विना असौ* विज्ञप्ति*र्मृतस्येव न स्यादाक्षिप्ता सती* । हेतुसमुत्थानेन जनितापि सती । तद्यथा—कश्चिद् 'ग्रामं गमिष्यामि' इत्याक्षिप्तक्रियान्तरा म्रियेत, तस्यानुवर्तकचित्ताभावाद् गमनं न भवति, तद्वत् ।

---

१. मिथ्याकर्मान्तम्—का०। २. तद्भावात्—का० ।

अचित्तकस्य तर्हि संवरोत्पत्तौ कथं भवति ? स्फुटतरा तर्हि सचित्तकस्य भवतीति, एतत् तस्य[1] सामर्थ्यम् ॥ १० ॥

तत्र च—

प्रवर्तकं दृष्टिहेयं विज्ञानम्,

दर्शनप्रहातव्यं चित्तं विज्ञप्तेः **प्रवर्तकम्**; तत्समुत्थापकयोर्वितर्कविचारयोर्निदानभूतत्वात्। न त्वनुवर्तकम्; बहिर्मुखचित्तस्य क्रियाकाले तदभावात्। तत्समुत्थापितं च रूपं दर्शनप्रहातव्यं स्यात्।

किं स्यात् ? अभिधर्मो बाधितः स्यात्।

विद्याविद्याभ्यां चाविरोधान्नास्ति रूपं दर्शनप्रहातव्यम्।

अचित्तकस्य तर्हीति विस्तरः। यदि तत्क्षणसमुत्थानेन विनाऽसौ मृतस्येव न स्यात्। निरोधसमापत्तिलाभिनः कस्यचिदुपसम्पाद्यमानस्य कायविज्ञप्तिमाबध्नतः तत्कालोपस्थितनिरोधसमापत्तित्वाद*चित्तकस्य संवरोत्पत्तौ* कर्मवासनावसानकालीनायां तत्संवरान्तर्गता कायविज्ञप्तिः *कथं भवति*। कथमुत्पद्यते तत्क्षणसमुत्थानं विनेत्यर्थः। एवं विरोधिते समाध्यन्तरं श्रीयते—*स्फुटतरा तर्हीति*। तत्क्षणसमुत्थानेन *सचित्तकस्य* व्यक्ततरा विज्ञप्तिर्*भवतीत्येतत् तस्य सामर्थ्यम्* ॥ १० ॥

प्रवर्तकं दृष्टिहेयमिति। प्रवर्तकमेव दृष्टिहेयमित्यवधार्यते। कथं पुनस्तत् प्रवर्तकम्? इत्याह—*तत्समुत्थापकयोर्वितर्कविचारयोर्निदानभूतत्वात्*। हेतुभूतत्वाद् विज्ञप्तेः प्रवर्तकमिति। *न त्वनुवर्तकमिति* विस्तर.। यत्तद् *बहिर्मुखं चित्त*मनुवर्तकम्, तस्य यो विज्ञप्ति*क्रियाकालः*, तस्मिन् *तदभावात्*। तस्य दर्शनप्रहातव्यस्य प्रवर्तकस्याभावादित्यर्थः। अतस्तन्नानुवर्तकम्। अयं चान्यो दोषः—*तत्समुत्थापितं च रूपमिति* विस्तरः। यदि तदनुवर्तकं स्याद्दर्शनप्रहातव्यम्, तेन दर्शनप्रहातव्येन *समुत्थापितं* कायवाग्विज्ञप्तिरूपं *दर्शनप्रहातव्यं स्यात्*। यथा भावनाप्रहातव्येन चित्तेन समुत्थापितं कायवाक्कर्म भावनाप्रहातव्यमिति।

किं स्यादिति चोदकः। *अभिधर्मो बाधितः स्यादिति* वैभाषिकः। "न दृष्टिहेयमक्लिष्टं न रूपम्" (अभि. को. १.४०) इति वचनात्।

किञ्च—*विद्याविद्याभ्यां* चाविरोधात्। विद्यया दर्शनमार्गेण सत्कायदृष्ट्यादिवत् तस्य रूपस्या*विरोधात्*। अप्रहाणादित्यर्थः। दृष्टसत्यानामपि तत्समन्वागतत्वान्*नास्ति रूपं दर्शनप्रहातव्यम्*। *अविद्यया चाविरोधात्*। किञ्च अविद्ययापि

१. का० पुस्तके नास्ति।

साध्य एव पक्षः ।

भूतान्यपि तर्हि दर्शनप्रहातव्यानि स्युः; समानचित्तोत्थापितत्वात् ?

नैवं भविष्यति, यथा न कुशलाकुशलानि भवन्ति । अथ वा पुनर्भवन्तु ।

नैवं शक्यम् । न हि तानि दर्शनप्रहातव्यानि युज्यन्ते, नाप्यप्रहातव्यानि ।

किं कारणम् ? अक्लिष्टस्य धर्मस्य विद्याविद्याभ्यामविरोधात् ।

रूपं न विरुध्यते । न हि क्लिष्टाक्लिष्टरूपसमुदाचारावस्थायां तत्प्राप्तिप्रवाहे वा सत्यविद्या न भवति । अविद्यायां च सत्यां तन्न भवति । यथा अनास्रवो मार्गोऽविद्यया विरुध्यते; पृथग्जनावस्थायां तदनुत्पादात् । तदुत्पादे वार्यावस्थायां कस्याश्चिदविद्यायाः प्रहाणात् । तदेवमनास्रववदप्रहातव्यमपि न भवति । न चेदप्रहातव्यम्, नापि दर्शनप्रहातव्यम्, पारिशेष्याद् भावनाप्रहातव्यमिति सिद्धम् ।

इतर आह—*साध्य एव पक्षः*—विद्यया रूपं न विरुध्यत इति । यो हि दर्शनप्रहातव्यं रूपमिच्छति स कथं विद्यया रूपस्याविरोधं ग्रहीष्यति !

वैभाषिक आह—*भूतान्यपीति* विस्तर. । यदि तद्रूपं दर्शनप्रहातव्यचित्तसमुत्थापितं दर्शनप्रहातव्यं स्यात् । तदाश्रयभूतान्यपि *तर्हि दर्शनप्रहातव्यानि स्युः ।* कस्मात् ? *समानचित्तोत्थापितत्वात् ।* येन हि दर्शनप्रहातव्येन चित्तेन तद्रूपं समुत्थापितम्, तेनैव तदाश्रयभूतान्यपि इति । न च तानि तथा भवितुमर्हन्ति; अक्लिष्टाव्याकृतत्वात् । दर्शनप्रहातव्यानां च क्लिष्टत्वात् ।

इतर आह—*नैवं भविष्यति* । दर्शनप्रहातव्यानि स्युरिति । कथम् ? इत्याह—*यथा न कुशलाकुशलानि भवन्ति* । यथा येन चित्तेन कुशलाकुशलेन कुशलाकुशलं रूपं समुत्थापितं तेनैव तदाश्रयभूतानि समुत्थापितानि । तत्र कायवाक्कर्मस्वभावं रूपं कुशलाकुशलम्, न तदाश्रयभूतानीति, तद्वत् । स एव पुनः परावृत्याह—*अथवा पुनर्भवन्तु* दर्शनप्रहातव्यानीति ।

वैभाषिक आह—*नैवं शक्यं भवितुम् ।* दर्शनप्रहातव्यानीति वाक्यशेषः । कस्मात् ? *अक्लिष्टस्य धर्मस्य विद्याविद्याभ्यामविरोधात् ।* न ह्यक्लिष्टो धर्मः अनिवृताव्याकृतः कुशलसास्रवश्च विद्ययाऽनास्रवेण मार्गेण विरुध्यते । यथा क्लिष्टा धर्माः प्राप्तिच्छेदाद् विरुध्यन्ते । तदालम्बनक्लेशप्राप्तिच्छेदात्तु विरोधो न प्रतिषिध्यते । नाप्यविद्यया विरुध्यते । प्राप्तिच्छेदेन तदालम्बनक्लेशप्रहातव्येन च । भूतानि चाक्लिष्टानि । तत्र यदुक्तम्—'अथवा पुनर्भवन्तु' इति, तदयुक्तम् । तदेवमत्र साधनमुत्तिष्ठते—"न दर्शनप्रहातव्यानि क्लिष्टरूपाश्रयमहाभूतानि; अक्लिष्टत्वादक्लिष्टचित्तचैत्तधर्मवत्" इति ।

अतो हेतुसमुत्थानमधिकृत्य सूत्रे पठनान्नास्ति विरोधः ।

उभयं पुनः ।

मानसं भावनाहेयम्,

भावनाहेयं पुनर्मनोविज्ञानमुभयं भवति—प्रवर्तकं च, अनुवर्तकं च ।

पञ्चकं त्वनुवर्तकम् ।। ११ ।।

पञ्च विज्ञानकाया अनुवर्तका एव । तदिदं चतुष्कोटिकं भवति—प्रवर्तकमेव दर्शनप्रहातव्यं चित्तम्, अनुवर्तका एव पञ्च विज्ञानकायाः, उभयं भावनाहेयं मनोविज्ञानम्, नोभयमनास्रवम् ।। ११ ।।

किं खलु यथा प्रवर्तकं तथैवानुवर्तकं भवति ? नेदमेकान्तम्[1] ।

प्रवर्तके शुभादौ हि स्यात् त्रिधाप्यनुवर्तकम् ।

कुशले प्रवर्तके कुशलाकुशलाव्याकृतमनुवर्तकं स्यात् । एवमकुशले च, अव्याकृते च ।

तुल्यं मुनेः,

बुद्धस्य तु भगवतस्तुल्यं प्रवर्तकेनानुवर्तकम्—कुशले कुशलम्, अव्याकृते चाव्याकृतम् ।

शुभं यावत्,

कुशलं वा भवत्यनुवर्तकमव्याकृतेऽपि प्रवर्तके । न तु कदाचित् कुशलं प्रवर्तकमनुवर्तकं चाव्याकृतं भवति । अम्लायमाना[2] हि बुद्धानां देशनेति ।

तदेवं *वैभाषिकः प्रवर्तकं दृष्टिहेयं विज्ञानमिति* सचोद्यपरिहारं प्रतिष्ठाप्य निगमयति—*अतो हेतुत्थानमिति* विस्तरः । *यदुक्तम्*—'मिथ्यादृष्टेर्मिथ्यासंकल्पो यावन्मिथ्याकर्मान्तः' इति, तस्य सूत्रस्य न विरोधो भवतीति ।

प्रवर्तकं चानुवर्तकं चेति । अन्तर्बहिर्मुखप्रवृत्तत्वात् ।

"पञ्चकं त्वनुवर्तकम्" इति । अवधारणमविकल्पकत्वात् ।

नोभयमनास्रवमिति । न प्रवर्तकम्, नाप्यनुवर्तकम्; समाहितान्तर्मुखप्रवृत्तत्वात् ।। ११ ।।

अम्लायमानेति । अहीयमाना । शानच्प्रत्ययान्तश्चायं शब्दः ।

---

१. नायमेका०—का० । २. आम्नायमाना—का० ।

नास्ति बुद्धानामव्याकृतं चित्तमिति निकायान्तरीयाः। कुशलैकसन्ताना[1] हि बुद्धानां सन्ततयः; नित्यं समाहितत्वात्। उक्तं हि सूत्रे—

"चरन् समाहितो नागस्तिष्ठन्नागः समाहितः।
स्वपन् समाहितो नागो निषण्णोऽपि समाहितः"॥ ( ) इति।

अनिच्छयास्य चित्तस्याविसरणादेवमुक्तम्, न तु न सन्त्यव्याकृतानि विपाकजैर्यापथिकनिर्माणचित्तानि बुद्धानामिति वैभाषिकाः। मानसं भावनाहेयं प्रवर्तकं चानुवर्तकं चेत्युक्तम्, तत् कुशलाकुशलाव्याकृतं सर्वं वेदितव्यम्।

नोभयं तु विपाकजम्॥ १२॥

विपाकजं तु चित्तं नैव प्रवर्तकं नानुवर्तकम्; निरभिसंस्कारवाहित्वात्।

किमिदानीं यथा प्रवर्तकं तथा विज्ञप्तिः, आहोस्विद् यथा अनुवर्तकम्? किं चातः? यथा प्रवर्तकं चेत्, इहापि निवृताव्याकृता विज्ञप्तिः प्राप्नोति; सत्कायान्तग्राहदृष्टिप्रवर्तितत्वात्?

न वा सर्वं दर्शनप्रहातव्यं प्रवर्तकमिति विशेषणं वक्तव्यम्। यथानुवर्तकं

कुशलैकसन्ताना इति। कुशलैकप्रबन्धा इत्यर्थः। "बुद्धो भगवान् नागः" इत्युक्तं सूत्रे। कथम्? "तथागत उदायिन् सदेवके लोके समारके" इति विस्तरेणोक्त्वाह—"आगो न करोति कायेन वाचा मनसा, तस्मान्नाग इत्युच्यते" इति। आगो न करोतीति, अपराधं न करोतीत्यर्थः।

अनिच्छयास्येति। अनिच्छयास्य बुद्धस्य चित्तस्याविसरणाद् विषयेष्वगमनादेवमुक्तम्।

चरन्[2] *समाहितो नाग* इति विस्तरः। चतुर्ष्वीर्यापथेषु चरन् चरामीति, यावत् निषीदन्निषीदामीति उपस्थितस्मृतित्वान्नित्यसमाहितः स उच्यते।

निरभिसंस्कारवाहित्वादिति। अभावो हि संस्कारस्य = प्रयत्नस्य निरभिसंस्कारम्, निरभिसंस्कारं वहतीति निरभिसंस्कारवाही, तद्भावस्तस्मात् इति।

न वा सर्वं दर्शनप्रहातव्यं प्रवर्तकमिति। स्यादेतदेवम्, यदि सर्वं दर्शनप्रहातव्यं प्रवर्तकमिष्येत, न तु सर्वम्। किं तर्हि? मिथ्यादृष्ट्यादिकमेव प्रवर्तकं विज्ञप्तेः, न सत्कायदृष्ट्यादिकम्? इत्यत आह—न वा सर्वमिति विशेषणं

---

१. कुशलैकताना—का०; जा०। २. चरण—मुद्रितः पाठः।

चेत्, अकुशलाव्याकृतचित्तस्य प्रातिमोक्षविज्ञप्तिः कुशला न प्राप्नोति ! यथा प्रवर्तकं तथा विज्ञप्तिः, न तु यथा दर्शनप्रहातव्यम्; भावनाहेयान्तरितत्वात्।

यदि नानुवर्तकवशाद्विज्ञप्तेः कुशलादित्वम्, न तर्हीदं वक्तव्यम्—'हेतुसमुत्थानं सन्धायोक्तं सूत्रे, न तत्क्षणसमुत्थानम्। अतो नास्तीह निवृताव्याकृता विज्ञप्तिः' इति। एवं तु[1] वक्तव्यम्—'अन्यव्यवहितं हेतुसमुत्थानं सन्धायोक्तम्' इति। अवसितः प्रसङ्गः ॥ १२ ॥

सा तु पूर्वोक्ता

अविज्ञप्तिस्त्रिधा ज्ञेया संवरासंवरेतरा।

संवरश्च, असंवरश्च, ताभ्यां चेतरो नैवसंवरो नासंवरः। दौःशील्यप्रसरस्य संवरणं संरोधः = संवरः। तत्र पुनः—

संवरः प्रातिमोक्षाख्यो ध्यानजोऽनास्रवस्तथा ॥ १३ ॥

त्रिविधः संवरः—१. प्रातिमोक्षसंवर इहत्यानां कामावचरं शीलम्। २. ध्यानसंवरो रूपावचरं शीलम्। ३. अनास्रवसंवरोऽनास्रवं शीलम् ॥१३॥

वक्तव्यम्—ईदृशं प्रवर्तकमीदृशं नेति। *अकुशलाव्याकृतचित्तस्येति*। उपसम्पाद्यमानस्य केनचिद् योगेनाकुशलाव्याकृतचित्तस्य। प्रातिमोक्षसंवरविज्ञप्तिरञ्जल्यादिका *कुशला न प्राप्नोति*। तदनुवर्तकचित्तमकुशलाव्याकृतमिति कृत्वा। *यथा प्रवर्तकमिति* विस्तरः। यथा प्रवर्तकं चित्तं भावनाप्रहातव्यम्। *तथा विज्ञप्तिर्व्यवस्थाप्यते*। *न तु यथा दर्शनप्रहातव्यं* प्रवर्तकं तथा व्यवस्थाप्यते। कस्मात्? *भावनाहेयेनान्तरितत्वात्*। तस्मात् तत्प्रवर्तकं दर्शनप्रहातव्यं भावनाहेयेन प्रवर्तकेनान्तरितम्। कथं कृत्वा? तद्यथा—'अस्त्यात्मेति मया परेषां गमयितव्यम्' इति पूर्वमेवावधार्य ततो वाक्समुत्पादकेन चित्तेन बहिर्मुखप्रवृत्तेन भावनाप्रहातव्येन सवितर्केण सविचारेण वाचं भाषते 'अस्त्यात्मा' इत्येवमादि। अतो *यथाप्रवर्तकमिति* विस्तरः। तदेवमवश्यं दर्शनप्रहातव्यस्य प्रवर्तकस्यानन्तरं प्रवर्तकमेव भावनाप्रहातव्यं कुशलमकुशलमव्याकृतं चोत्पद्यते, तद्वशाच्च विज्ञप्तेः कुशलादित्वमिति।

एवं तु वक्तव्यमिति विस्तरः। एवं तु *वक्तव्यमन्यव्यवहितं* भावनाहेयव्यवहितं *हेतुसमुत्थानं सन्धायोक्तमिति*। परम्पराहेतुसमुत्थानं सन्धायेत्यर्थः ॥ १२ ॥

"अविज्ञप्तिस्त्रिधा" इति विस्तरः। त्रिविधेत्युद्दिश्य *"संवरासंवरेतरा" इति*।

---

१. का० पुस्तके नास्ति।

तत्र पुनः—

अष्टधा प्रातिमोक्षाख्यः,

१. भिक्षुसंवरः, २. भिक्षुणीसंवरः, ३. शिक्षमाणासंवरः, ४. श्रामणेरसंवरः, ५. श्रामणेरीसंवरः, ६. उपासकसंवरः, ७. उपासिकासंवरः, ८. उपवाससंवरश्च—एषोऽष्टविधसंवरः प्रातिमोक्षसंवर इत्याख्यायते ।

नामत एषोऽष्टविधः,

द्रव्यतस्तु चतुर्विधः ।

१. भिक्षुसंवरः, २. श्रामणेरसंवरः, ३. उपासकसंवरः, ४. उपवाससंवरश्च—इत्येष **चतुर्विधः** प्रातिमोक्षसंवरस्तु **द्रव्यतः;** प्रतिनियतलक्षणत्वात् । भिक्षुसंवराद् भिक्षुणीसंवरो नान्यः, श्रामणेरसंवराच्च शिक्षमाणा-श्रामणेरीसंवरौ । उपासकसंवरादुपासिकासंवरो नान्यः ।

कथं ज्ञायते ?

लिङ्गतो नामसञ्चारात्,

लिङ्गमिति व्यञ्जनस्याख्या, येन स्त्रीपुरुषौ लिङ्ग्येते । **लिङ्गतो** हि भिक्षुभिक्षुण्यादीनां नामसञ्चारो भवति । कथं कृत्वा ? परिवृत्ते हि व्यञ्जने भिक्षुर्भिक्षुणीत्युच्यते, भिक्षुणी च पुनर्भिक्षुः । श्रामणेरः श्रामणेरीत्युच्यते, श्रामणेरी च पुनः शिक्षमाणा च श्रामणेरः । उपासक उपासिकेत्युच्यते, उपा-

---

विवृणोति—संवरश्च सः असंवरश्च सः संवरासंवरः, संवरासंवरश्च स इतरा च सा *संवरासंवरेतरेति* समासः ॥ १३ ॥

प्रतिनियतलक्षणत्वादिति । भिक्षुसंवरस्यान्यल्लक्षणम्, एवं यावदुपवाससंवरस्यान्यल्लक्षणम् । तथा हि वक्ष्यति—

"पञ्चाष्टदशसर्वेभ्यो वर्ज्येभ्यो विरतिग्रहात् ।
उपासकोपवासस्थश्रमणोद्देशभिक्षुता" ॥ (अभि० को० ४.१५)

इति अष्टविधत्वे तु साङ्कर्यसम्भवः । य एव हि भिक्षुसंवरः स एव भिक्षुणीसंवर इत्येवमादि ।

श्रामणेरी च पुनः शिक्षमाणा चेति । श्रामणेरी परिवृत्तव्यञ्जना श्रामणेरो भवति । शिक्षमाणा चापि परिवृत्तव्यञ्जना श्रामणेर एव भवति । किमेवं

सिका च पुनरुपासक इति । न च व्यञ्जनपरिवृत्तौ पूर्वसंवरत्यागकारणमस्ति[1], नाप्यपूर्वसंवरप्रतिलम्भे । तस्मादभिन्न एषां चतुर्णां संवराणां त्रिभ्यः स्वभावः ।

य उपासकसंवराच्छ्रामणेरसंवरं समादत्ते तस्माच्च पुनर्भिक्षुसंवरम्, किं ते संवरा विरतिवृद्धियोगादन्योन्य उच्यन्ते, पञ्च-दश-विंशतिवत्, दीनारसतेरवच्च[2] ? आहोस्वित् पृथगेव ते सकला उपजायन्ते[3] ? आह—

पृथक्,

अव्यामिश्रा एव ते पृथग्लक्षणा उपजायन्ते । त्रिषु संवरेषु तिस्रः प्राणातिपातविरतयो यावन्मद्यपानविरतयः । एवं शेषाः ।

नेष्यते, परिवृत्तव्यञ्जनो भिक्षुर्भिक्षुसंवरं च त्यजति भिक्षुणीसंवरं च प्रतिलभते ? इत्यत आह—*न च व्यञ्जनपरिवृत्ताविति* विस्तरः । न भिक्षुभिक्षुणीव्यञ्जनप्रादुर्भावे *पूर्वसंवरत्यागकारणमस्ति* ।

प्रातिमोक्षदमत्यागशिक्षानिक्षेपणाच्च्युतेः ।
उभयव्यञ्जनोत्पत्तेर्मूलोच्छेदान्निशात्ययात् ॥ (अभि० को० ४.३८)

इत्यत्र यत् कारणमुक्तम् । *नाप्यपूर्वसंवरप्रतिलम्भे* । कारणमस्तीति वर्तते । यदुक्तम्—प्रातिमोक्षाख्यः परविज्ञानादिभिरिति । अतो विज्ञायते—न भिक्षुसंवरादन्यो भिक्षुणीसंवर इति । एवं श्रामणेरादीनामपि वक्तव्यम् । *तस्मादभिन्नोऽनन्यश्चतुर्णां* भिक्षुणीशिक्षमाणाश्रामणेर्युपासिका*संवराणां त्रिभ्यो* भिक्षुश्रामणेरोपासकसंवरेभ्यः *स्वभावः* ।

किं ते संवरा इति विस्तरः । *यथा* पञ्चसंख्यायामन्यानि पञ्च प्रक्षिप्य पञ्चवृद्धियोगाद् *दश* भवन्ति । पञ्चदशसंख्यायां चान्यानि पञ्च प्रक्षिप्य च *विंशति*र्भवन्ति । *दीनारसतेरवच्च* । यथा पूर्वको दीनारो द्वितीयेन सह सतेरो भवति । तथा हि लोके एकदीनारमूल्येन द्वितीयं दीनारं दीनारमूल्यं वा तेन पूर्वकेण दीनारमूल्येन सहाधिकमपेक्ष्य कश्चिद् वक्ता भवेत्—दीनारसतेरो मया लब्ध इति । दीनारद्वयं मया लब्धमित्यर्थः । किमेवमेतदुपासकश्रामणेरभिक्षुसंवरा *विरतिवृद्धियोगात्* प्राणातिपातादिविरतिषु तथैवावस्थितासु पुनर्नृत्यगीतविरत्यादीनां पूर्वासां विरतीनां वृद्धियोगादन्योन्य *उच्यन्ते* । अन्य उपासकसंवराच्छ्रामणेरसंवरः, श्रामणेरसंवराच्चान्यो भिक्षुसंवर इति एकदेशविशेषयोगादन्योन्यव्यवस्थेत्यर्थः । *आहोस्वित् पृथगेव ते सकला उपजायन्ते* । अन्याः प्राणातिपातादिविरतय उपासकस्य, ततोऽन्याः श्रामणेरस्य, ततोऽन्याश्च भिक्षोः—इत्येकस्मिन् भिक्षुसन्ताने *तिस्रः प्राणातिपातादिविरतयः* । एवमदत्ता-

---

१. ०त्यागे०—का० ।　　२. ०शतेर०—का० ।　　३. जायन्ते—का० ।

को नु तासां विशेषः ? निदानविशेषाद् विशेषः ।

कथं कृत्वा ? यथा यथा हि बहुतराणि शिक्षापदानि समादित्सते, तथा तथा बहुतरेभ्यो मदप्रमादेभ्यो[1] निवर्तमानो बहुतरेभ्यः प्राणातिपातादीनां निदानेभ्यो निवर्तते, विरतीनां च निदानेषु प्रवर्तत इति निदानविशेषाद् विरतीनां विशेषः। एवं चासति भिक्षुसंवरं प्रत्याचक्षाणस्त्रीनपि संवरान् विजह्याद्, द्वयोरपि तत्रान्तर्भावात् । न चैतदिष्टम् । तस्मात् पृथगेव ते संवराः ।

ते चाविरोधिनः ॥ १४ ॥

ते च त्रयोऽपि सह वर्तन्ते । नोत्तरसंवरसमादानात् पूर्वकस्य त्यागः । मा भूत् भिक्षुसंवरपरित्यागादनुपासक एवेति ॥ १४ ॥

कथं चायमुपासको भवति, कथमुपवासस्थो यावद् भिक्षुः ?

पञ्चाष्टदशसर्वेभ्यो वर्ज्येभ्यो विरतिग्रहात् ।
उपासकोपवासस्थश्रमणोद्देशभिक्षुता ॥ १५ ॥

यथासंख्यमनुदेशो वेदितव्यः । पञ्चभ्यो वर्जनीयेभ्यो धर्मेभ्यो विरतिसमापादनादुपासकसंवरस्थो[2] भवति—प्राणातिपाताद्, अदत्तादानात्, काममिथ्याचारात्, मृषावादात्, सुरामैरेयमद्यपानाच्च ।

अष्टाभ्यो विरतिसमादानादुपवासस्थः—प्राणातिपाताद्, अदत्तादानाब्रह्मचर्यमृषावादमद्यपानेभ्यः, गन्धमाल्यविलेपननृत्यगीतवादित्राद्, उच्चशयनमहाशयनाद्, अकालभोजनाच्च ।

दानविरतयः। इत्येवमादि। *एवं शेषा* इति। नृत्यगीतविरत्यादयः।

मदप्रमादेभ्य इति । उच्चशयनादिमद्यपानादिभ्यः। *बहुतरेभ्यः प्राणातिपातादीनां निदानेभ्य* इति। उपासकाच्छ्रामणेरो बहुतरेभ्यः प्राणातिपातादिनिदानेभ्यो निवर्तते । तद्यथा—विकालभोजनं प्राणातिपातनिदानं भवेत्, तस्माच्छ्रामणेरो निवर्तते, नोपासक इत्येवमादि योज्यम् । *एवं चासति* । एवं च यदि न स्यादित्यर्थः। *भिक्षुसंवरं प्रत्याचक्षाणस्त्यजन् त्रीनपि* उपासकसंवरादीन् *विजह्यात्* । *द्वयोरप्युपासकश्रामणेरसंवरयोस्तत्र भिक्षुसंवरेऽन्तर्भावात्* ॥ १४ ॥

विरतिसमापादनादिति । विज्ञप्त्यविज्ञप्तिविरतिरिति वक्ष्यति। समापादना-

---

१. मदप्रमादपदेभ्यः—का० । २. ०समादानादु०—का० ।

दशभ्यो विरतिसमादानाच्छ्रामणेरो भवति—एभ्य एव, जातरूपरजतप्रतिग्रहाच्च । नृत्यगीतवादित्रगन्धमाल्यविलेपनं चात्र द्वयीकृत्य दश भवन्ति ।

सर्वेभ्य एव वर्जनीयेभ्यः कायवाक्कर्मभ्यः विरतिसमादानात् भिक्षुरित्युच्यते ॥ १५ ॥

स एव प्रातिमोक्षसंवरः—

शीलं सुचरितं कर्म संवरश्चोच्यते,

विषमकर्मणां विरतिसमादानाच्छीलम्; शीतलत्वादिति निरुक्तिः । "सुखशीलसमादानं कायो न परिदह्यते" (   ) इति **गाथावचनात्** । विद्वत्प्रशस्तत्वात् **सुचरितम्** । क्रियास्वभावत्वात् **कर्म** ।

ननु चाविज्ञप्तिरक्रियेत्युच्यते, सा कथं क्रिया भवति, न कुर्वन्ति तया समाचया लज्जिनः पापमित्यक्रियेत्युच्यते?

सापि तु विज्ञप्तिचित्ताभ्यां क्रियत इति क्रिया भवति ।

क्रियाहेतुत्वात्, क्रियाफलत्वाच्चेत्यपरे । संवर इति कायवाचोः संवरणात् ।

एवं तावदविशेषेण प्रातिमोक्षसंवरः संशब्द्यते ।

पुनः ।

दिति । प्रतिसंस्थापनादित्यर्थः । पापकर्मणो हि सत्त्वेषु *विषमं* सम्प्रवर्तते ॥१५॥

सापि तु विज्ञप्तिचित्ताभ्यां क्रियत इति । विज्ञप्त्या च क्रियते प्रातिमोक्षसंवरसंगृहीता अविज्ञप्तिः, चित्तेन च क्रियते ध्यानानास्रवसंवरसंगृहीता अविज्ञप्तिः । समाधिना क्रियत इत्यर्थः । तदेवं *क्रियत इति क्रियेति* कर्मसाधनम् ।

क्रियाहेतुत्वादिति । क्रियाया हेतुत्वात् । संवरस्थो हि संवरपरिरक्षणार्थं क्रियां विज्ञप्तिलक्षणामारभते । *क्रियाफलत्वाच्चेति* । विज्ञप्तिलक्षणायाः क्रियायाः फलत्वादित्यर्थः । समाधिसम्भूता कथं क्रिया भवति ? समाधिजायाश्चेतनायाः फलत्वात् सापि क्रिया । प्रतिमोक्षसंवराधिकाद्वा । न तत्र चिन्ता[1] ।

एवं तावद् अविशेषेण प्रातिमोक्षसंवरः संशब्द्यत इति । आद्योऽपि क्षणो द्वितीयादयोऽपि च क्षणाः प्रातिमोक्षसंवर इत्युच्यते ।

---

१. चिन्ता—इति मुद्रितः पाठः ।

आद्ये विज्ञप्त्यविज्ञप्ती प्रातिमोक्षक्रियापथः ॥ १६ ॥

संवरसमादानस्य प्रथमे विज्ञप्त्यविज्ञप्ती प्रातिमोक्ष इत्युच्यते; पापस्य तेन प्रातिमोक्षणाद् । उत्सर्जनादित्यर्थः । स्वार्थे वृद्धिविधानाद् वैकृत-वैशसवत् ।

प्रातिमोक्षसंवर इत्यपि कायवाक्संवरणात् कर्मपथ इत्युच्यते; **मौलसंगृहीतत्वात्** ।

द्वितीयादिषु क्षणेषु प्रातिमोक्षसंवर एव, न प्रातिमोक्षः । पृष्ठं च न मौलः **कर्मपथः ॥ १६ ॥**

अथैषां संवराणां केन कः समन्वागतः ?

प्रातिमोक्षान्विता अष्टौ,

प्रातिमोक्षसंवरेणाष्टौ निकायाः समन्वागताः—भिक्षुः, भिक्षुणी यावदुप-**वासस्थोऽष्टमः** ।

किं खलु बाह्यकानां समादानशीलं नास्ति ? अस्ति, न तु प्रातिमोक्षसंवरः । **किं कारणम् ?** नहि तदत्यन्तं पापस्य प्रतिमोक्षणाय संवर्तते; भवसन्निश्रितत्वात् ।

प्रातिमोक्षस्वभावस्त्वाद्यक्षण एव । तदर्थमाह—पुनः *आद्ये विज्ञप्त्यविज्ञप्ती प्रातिमोक्ष इत्युच्यते । पापस्य तेन प्रतिमोक्षणादिति ।* प्रथमेनैव क्षणेन पापं **प्रतिमोक्ष्यते** = *उत्सृज्यते ।* त्यज्यते इत्यर्थः । प्रतिमोक्ष इति प्राप्ते प्रातिमोक्ष इति **वचनं** *स्वार्थे वृद्धिविधानात् ।* स्वार्थे प्रत्यये कृते वृद्धिकरणादित्यर्थः । ***वैकृतवैशसवत् ।*** यथा विकृतमेव वैकृतम्, विशसमेव मारणं वैशसम् । एवं **प्रतिमोक्ष एव प्रतिमोक्ष** इति ।

प्रातिमोक्षसंवर इत्यपीति । प्रातिमोक्षश्चासौ संवरश्च । *कायवाचोः संवरणार्थ* इत्यर्थः । ***कर्म**पथ इत्यप्युच्यत* इति । मौलः कर्मपथ इत्यर्थः । *द्वितीयादिषु प्रातिमोक्षसंवर एव ।* प्रातिमोक्षजातीयः, प्रातिमोक्षाद्वा जातः संवरः प्राति-मोक्षसंवरः । *न प्रातिमोक्षः ।* यस्मात् न तेन पापं प्रतिमोक्ष्यते; प्रथमक्षण एव प्रतिमोक्षितत्वात् ॥ १६ ॥

***अष्टावेव** निकाया* इत्यवधारणे पृच्छति—*किं खलु बाह्यकानामिति* विस्तरः । *समादानशीलमिति* विशेषणं शीलद्वैविध्यात् । द्विविधं हि शीलम्—समादान-शीलम्, धर्मताप्रतिलम्भितं च । तत्र समादानशीलं यद् गृह्यते । इदं चेदं च न करिष्यामीति । धर्मताप्रतिलम्भिकम्—ध्यानसंवरः, अनास्रवसंवरश्च । *भव-सन्निश्रितत्वादिति ।* मोक्षार्थिनामपि तेषां मिथ्यादृष्ट्याद्युपहतत्वात् । भवविशेष

ध्यानजेन तदन्वितः ।

ध्यानाद् ध्याने वा जातो ध्यानजः । यो ध्यानेन समन्वागतः, सोऽवश्यं ध्यानसंवरेण । सामन्तकमप्यत्र ध्यानं कृत्वोच्यते । यथा ग्रामसामन्तकमपि ग्राम इत्युच्यते—अस्त्यस्मिन् ग्रामे शालेयं क्षेत्रम्, अस्ति मैहेयमिति ।

अनास्रवेणार्यसत्त्वाः,

आर्यपुद्गला **अनास्रवेण** संवरेण समन्वागताः । ते पुनः शैक्षाशैक्षाः । **यदुक्तम्**—"सहभूहेतावुच्यमाने द्वौ संवरौ चित्तानुवर्तिनौ" ( ) इति ।

कतमौ तौ ? एषामेव त्रयाणाम्

अन्त्यौ चित्तानुवर्तिनौ ॥ १७ ॥

ध्यानसंवरः, अनास्रवसंवरश्च । न प्रातिमोक्षसंवरः । किं कारणम् ? अन्यचित्ताचित्तकस्याप्यनुवृत्तेः ।

पुनस्तावेव ध्यानानास्रवसंवरौ प्रहाणसंवराख्यां लभेते ॥ १७ ॥

कस्यामवस्थायाम् ? इत्याह—

अनागम्ये प्रहाणाख्यौ तावानन्तर्यमार्गजौ ।

अनागम्ये तौ ध्यानानास्रवसंवरौ नवस्वानन्तर्यमार्गेषु 'प्रहाणसंवरौ' इत्युच्येते; ताभ्यां दौःशील्यस्य तत्समुत्थापकानां च क्लेशानां प्रहाणात् ।

एव च तेषां केषाञ्चिन्मोक्ष इति । भवसन्निश्रितमेव शीलम् । ततोऽस्ति तेषां समादानशीलम्, *न प्रातिमोक्षसंवर* इति ।

सामन्तकमप्यत्र ध्यानं कृत्वोच्यत इति । यस्मात् सामन्तकेऽपि ध्यानसंवरोऽनास्रवसंवरश्चेष्यते, तस्माद् ध्यानसामन्तकमप्यत्र ध्यानशब्देनोच्यत इतीष्यते । *अपि*शब्दान्मौलमपि गृह्यत एव ।

सहभूहेतावुच्यमान इति । "चैत्ता द्वौ संवरौ तेषाम्" (अभि० को० २.५१) इत्यत्र । *त्रयाणामिति* । प्रातिमोक्षसंवरध्यानसंवरानास्रवसंवराणाम् । *अन्यचित्ताचित्तकस्याप्यनुवृत्तेरिति* । "विज्ञप्ताचित्तकस्यापि" (अभि० १.११) इति वचनात् ॥ १७ ॥

"अनागम्ये" इति ग्रहणं कामावचरस्यैव दौःशील्यस्य प्रतिपक्षत्वात् । *आनन्तर्यमार्गेष्विति* । तेषां प्रहाणमार्गत्वात् । *तत्समुत्थापकानामिति* । दौःशील्यसमुत्थापकानाम् ।

अत एव 'स्याद्ध्यानसंवरो न प्रहाणसंवरः' इति चतुष्कोटिकं क्रियते—प्रथमा कोटिरनागम्यानन्तर्यमार्गवर्ज्यः सास्रवो ध्यानसंवरः, द्वितीया अनागम्यानन्तर्यमार्गेष्वनास्रवः, तृतीया अनागम्यानन्तर्यमार्गेषु सास्रवः, चतुर्थी अनागम्यानन्तर्यमार्गवर्ज्योऽनास्रवसंवरः।

एवं 'स्यादनास्रवसंवरो न प्रहाणसंवरः' इति चतुष्कोटिकं यथायोगं वेदितव्यम्।

यत्तर्हि भगवतोक्तम्—

"कायेन संवरः साधु साधु वाचाथ संवरः।

मनसा संवरः साधु साधु सर्वत्र संवरः॥" (   ) इति,

यच्चोक्तम्—"चक्षुरिन्द्रियेण संवरसंवृतो विहरति" (   ) इति,

एतौ मनइन्द्रियसंवरौ किंस्वभावौ? नैतावविज्ञप्तिशीलस्वभावौ। किं तर्हि?

सम्प्रजानस्मृती द्वे तु मनइन्द्रियसंवरौ॥ १८॥

प्रत्येकं द्विस्वभावज्ञापनार्थं पुनर्द्विग्रहणम्, मा यथासंख्यं विज्ञायीति; मनःसंवरोऽपि स्मृतिसम्प्रज्ञानस्वभाव इति। इन्द्रियसंवरोऽपि॥ १८॥

अतएवेति। यस्मादनागम्यानन्तर्यमार्गेष्वेव तद्व्यवस्थानम्। तस्माच्चतुःकोटिकं क्रियते। *प्रथमा कोटिरनागम्यानन्तर्यमार्गवर्ज्यो ध्यानसंवरः*। अनागम्यभूमिकेषु विमुक्तिप्रयोगविशेषमार्गेषु मौलप्रथमध्यानादिषु वा चतुर्थाद् ध्यानादानन्तर्यविमुक्तिप्रयोगविशेषमार्गेषु यो ध्यानसंवरः। अयं ध्यानसंवरः, न प्रहाणसंवरः; तेन दौःशील्यस्य तत्समुत्थापकानां च क्लेशानामप्रहाणात्। *द्वितीया—अनागम्यानन्तर्यमार्गेष्वनास्रवसंवरः*। अयं प्रहाणसंवरः; तेनैव दौःशील्यादिप्रहाणात्। न ध्यानसंवरः; अनास्रवत्वात्। *तृतीया—अनागम्यानन्तर्यमार्गेषु सास्रवसंवरः*। अयं प्रहाणसंवरश्च; तेन दौःशील्यादिप्रहाणात्। ध्यानसंवरश्च; सास्रवसमाधिजत्वात्। *चतुर्थी—अनागम्यानन्तर्यमार्गवर्ज्योऽनास्रवसंवरः*। अयं न ध्यानसंवरः; आस्रवत्वात्। नापि प्रहाणसंवरस्तेन दौःशील्याद्यप्रहाणात्। स पुनस्तथैवानागम्यभूमिकेषु विमुक्तिप्रयोगविशेषमार्गेषु विस्तरेण योऽनास्रवसंवरः। संवरनियमेनैवमुक्तम्। अन्यथाप्यन्ये धर्मा वक्तव्याः स्युः।

एवं स्यादनास्रवसंवरो न प्रहाणसंवर इति चतुष्कोटिकम्। प्रथमा कोटिरनागम्यानन्तर्यमार्गवर्ज्योऽनास्रवसंवरः।

मनःसंवरोऽपि स्मृतिसम्प्रज्ञानस्वभावः। *इन्द्रियसंवरोऽपि* स्मृतिसम्प्रज्ञानस्व-

इदं विचार्यते—कः कतमया विज्ञप्त्या, अविज्ञप्त्या वा कियन्तं कालं समन्वागत इति ? तत्र—

प्रातिमोक्षस्थितो नित्यमत्यागाद् वर्तमानया ।
अविज्ञप्त्यान्वितः,

यः प्रातिमोक्षसंवरस्थः पुद्गल उक्तः, स यावत् तामविज्ञप्तिं न त्यजति तावत् तया **वर्तमानया नित्यं** समन्वागतः ।

पूर्वात् क्षणादूर्ध्वमतीतया ॥ १९ ॥

प्रथमात् क्षणादूर्ध्वमतीतयापि समन्वागतः । 'अत्यागात्' इति सर्वत्राधिकृतं वेदितव्यम् ॥ १९ ॥

यथा प्रातिमोक्षसंवरस्थ उक्तः,

तथैवासंवरस्थोऽपि,

असंवरस्थोऽपि यावदसंवरं न त्यजति तावन्नित्यमविज्ञप्त्या वर्तमानया **एव**[1] समन्वागतो भवति[1] । क्षणादूर्ध्वमतीतयापि ।

ध्यानसंवरवान् सदा ।

अतीताजातया,

ध्यानसंवरस्य लाभी नित्यमतीतानागतया[2] अविज्ञप्त्या[2] समन्वागतः;

भाव इति । *द्विस्वभावज्ञापनार्थं द्विग्रहणम्;* द्विवचननिर्देशादेव हि द्वित्वसिद्धिः । कथं पुनर्गम्यते—एतावेवंस्वभावाविति ? आगमात् । "अन्यतरा किल देवता भिक्षुं विषयेष्विन्द्रियाणि विचारयन्तमवोचत्—भिक्षो भिक्षो व्रणं मा कार्षीरिति ? भिक्षुराह—पिधास्यामि देवते । देवताह—कुम्भमात्रं भिक्षो व्रणं कृत्वा केन पिधास्यसि ? भिक्षुराह—स्मृत्या देवते पिधास्यामि, सम्प्रजन्येन वा" (   ) इति ॥ १८ ॥

स यावत्तामविज्ञप्तिं न त्यजतीति । शिक्षानिक्षेपादि ।

"पूर्वात् क्षणादूर्ध्वमतीतया" इति । प्रथमे क्षणे *वर्तमानयैव समन्वागतो भवतीत्युक्तं* भवति ॥ १९ ॥

"ध्यानसंवरवान् सदा अतीताजातया" इति । ध्यानसंवरवान् किं पृथग्जनोऽथार्यः ? उभय इत्याह; अविशेषित्वात् । सो*ऽतीतानागतया अविज्ञप्त्या समन्वागतः ।*

---

१. का० पुस्तके नास्ति । २–२. ०नागताभ्यामविज्ञप्तिभ्यां—का० ।

अत्यागात्[1] । प्रथमे हि क्षणे स जन्मान्तरत्यक्तं ध्यानसंवरमतीतं लभते ।

आर्यस्तु प्रथमे नाभ्यतीतया ॥ २० ॥

आर्यस्तु पुद्गलोऽप्येवमनास्रवया । अयं तु विशेषः— **स प्रथमे तु**[2] क्षणे **नाभ्यतीतया**[3] समन्वागतः; मार्गस्य पूर्वमनुत्पादितत्वात् ॥ २० ॥

समाहितार्यमार्गस्थौ तौ युक्तौ वर्तमानया ।

तौ ध्यानानास्रवसंवरान्वितौ **समाहितार्यमार्गसमापन्नौ वर्तमानया**

किंलक्षणया ? ध्यानसंवराधिकाराद् ध्यानसंवरलक्षणयेति गम्यते । *स जन्मान्तरत्यक्तमिति* । उदाहरणप्रदर्शनपरमेतत् । इदं जन्म त्यक्तमपि हि गृह्यते ।

"आर्यस्तु प्रथमेनाभ्यतीतया" इति । आर्यः सदातीताजातया अविज्ञप्त्या समन्वागतः । किंलक्षणया—अनास्रवया । आर्याधिकारात् । अत एवाह—*आर्यपुद्गलोऽप्येवमनास्रवयेति* । *अयं तु विशेष* इति । तु-शब्दार्थं दर्शयति । स च भिन्नक्रमः । *प्रथमे तु क्षणे* दुःखधर्मज्ञानक्षान्तिक्षणे । *नाभ्यतीतया* अविज्ञप्त्या *समन्वागत* इत्यर्थः । कस्मात् ? अनादिमति संसारे *मार्गस्य पूर्वमनुत्पादितत्वात्* ।

ननु च फलप्राप्तिकाले, इन्द्रियसञ्चारकालेऽपि वा पूर्वमार्गत्यागे नैवातीतया अविज्ञप्त्या समन्वागम इष्यते ? एवं तर्हि, स चापि फलमार्गस्य प्रथमक्षणो भवति । तत्र नातीतयाऽविज्ञप्त्या समन्वागतो भवति; फलमार्गस्य पूर्वमनुत्पादितत्वादिति व्याख्यातव्यम् ।

आचार्यवसुमित्रस्त्वस्य चोद्यस्य परिहारमाह—अनास्रवसंवरोऽत्र प्रकृतः । स च दुःखधर्मज्ञानक्षान्तिकाल एव लब्धः । अतस्तेन प्रथमे क्षणे नातीतेन समन्वागतो द्वितीयादिष्वतीतानागतेनेति । ऊर्ध्वं तु यो मार्गान्तरलाभस्तत्रानास्रवसंवरसादृश्यमस्तीति न तदुच्यते इति ।

तदिह 'सादृश्यमस्ति' इति न बुध्यामहे—किं सास्रवसंवरोऽस्तीत्यपेक्ष्येदमुच्यते, आहोस्विदनास्रवोऽस्तीति ? यदि सास्रवोऽस्तीत्यभिप्रेयते ? दुःखधर्मज्ञानक्षान्तिकालेऽपि सोऽस्तीति नातीतया समन्वागत इति प्रतिषेधानुपपत्तिः । अथ फलप्राप्तिकालेऽतीतानास्रवसंवरोऽस्तीत्यभिप्रेयते ? विहीनः स कथमस्तीति शक्यं वक्तुमिति चिन्त्योऽस्याभिप्रायः ॥ २० ॥

"समाहितार्यमार्गस्थौ" इति । समाहितमार्गस्थश्च लौकिकसमाहितमार्गस्थ आर्यमार्गस्थश्च *समाहितार्यमार्गस्थौ* । ध्यानानास्रवसंवरान्विताविवत्यर्थः । अत्र चार्यमार्गाभिरूढ आर्यमार्गस्थो वेदितव्यः, नौस्थन्यायेन । तद् यथा—यो

१. आत्यागात्—का० । २. का० पुस्तके नास्ति । ३. नातीतया—का० ।

अविज्ञप्त्या समन्वागतौ यथाक्रमम्, न तु व्युत्थितौ ।

संवरासंवरस्थानां तावदेष वृत्तान्तः ॥

अथेदानीं मध्यस्थस्य ?

मध्यस्थस्यास्ति चेदादौ मध्यया,

यो नैवसंवरनासंवरे[1] स्थितः स मध्यस्थः । तस्य नावश्यमविज्ञप्तिरस्ति । यस्य त्वस्ति दौःशील्यशीलाङ्गादिसंगृहीता स **आदौ मध्यया** समन्वागतः ।

वर्तमाना ह्यविज्ञप्तिरतीतानागतयोर्मध्याद्—

ऊर्ध्वं द्विकालया ॥ २१ ॥

प्रथमात् क्षणादूर्ध्वमतीतया वर्तमानया च । अत्यागादिति[2] वर्तते ॥२१॥

किमसंवरस्थः कदाचित् कुशलया विज्ञप्त्या समन्वागतो भवति, संवरस्थो वा पुनरकुशलया भवति ? भवन् कदा कियन्तं वा कालम् ? इत्याह—

नावमभिरूढः स नौस्थः । एवं य आर्यमार्गमभिरूढः समापन्नः स आर्यमार्गस्थः । अन्यथा ह्यार्यमार्गसमन्वितोऽप्यार्यमार्गस्थ इति कृत्वा प्रकृतिस्थोऽप्यार्यो *वर्तमानया* अनास्रवया *अविज्ञप्त्या समन्वागत* इति प्राप्नोति ।

अन्यः पुनरेवं प्रसङ्गं परिहरन् व्याचष्टे—एकशेषोऽत्र क्रियते । समाहितश्च समाहितार्यमार्गश्च मार्गौ समाहितार्यमार्गौ, तयोः स्थितौ *समाहितार्यमार्गस्थौ* । *तौ यथाक्रमं वर्तमानया* ध्यानसंवराविज्ञप्त्या, अनास्रवसंवराविज्ञप्त्या *च समन्वागतौ* । *न तु व्युत्थितौ* । न तु तन्मार्गव्युत्थितौ तया । वर्तमानया समन्वागतौ; तस्याः चित्तानुपरिवर्तनीयत्वात् । एवं व्याख्यायते—यच्चोदितमाचार्यसङ्घभद्रेण । कथमविज्ञप्तेः प्रत्युत्पन्नता आर्यमार्गस्थवचनादेव गम्यते, तत्समापन्न एवायम् । न पुनस्तत्समन्वागमवचनप्रसङ्ग इति चेत् ? न; ध्यानाधिकारात् । तत्राविज्ञप्त्यभावाच्च ।

यो नैवसंवरनासंवरस्थितः स मध्यस्थ इति । *यो* न भिक्ष्वादिः । न च कैवर्तादिः । *स मध्यस्थः* । *दौःशील्यशीलाङ्गादिसंगृहीतेति* । *दौःशील्यं* प्राणातिपातादि । *शीलाङ्गं* प्राणातिपातविरत्यादि । यन्नसंवरनासंवरसंगृहीतम् । *आदिशब्देन* स्तूपवन्दना खटचपेटादिक्रियाविज्ञप्त्यादि गृह्यते ॥ २१ ॥

असंवरसंवरस्थौ पुद्गलावकुशल-कुशलधर्मप्रतिष्ठितौ इत्यनयोर्विपर्ययमसम्भावयन् पृच्छति—*किमसंवरस्थ* इति विस्तरः ।

---

१. नैव संवरे नासंवरे—का० ।　　२ अत्यागा०—का० ।

असंवरस्थः शुभयाऽशुभया संवरे स्थितः ।
अविज्ञप्त्यान्वितो यावत् प्रसादक्लेशवेगवान् ॥ २२ ॥

येन प्रसादवेगेनासंवरस्थस्य कुशलाविज्ञप्तिरुत्पद्यते स्तववन्दनादिक्रियां कुर्वतः, येन च क्लेशवेगेन संवरस्थस्याकुशलाविज्ञप्तिरुत्पद्यते वधबन्धनताडनादिक्रियां कुर्वतः; तौ यावदनुवर्तेते तावत्ते अप्यविज्ञप्ती । स आद्ये क्षणे वर्तमानयैवाविज्ञप्त्या समन्वागतो भवति । अन्येष्वतीतयाऽपि ॥ २२ ॥

अविज्ञप्त्यधिकारः समाप्तः ॥

विज्ञप्त्या तु पुनः सर्वे कुर्वन्तो मध्ययान्विताः ।

सर्वे संवरासंवरमध्यस्था यावद् विज्ञप्तिं कुर्वन्ति तावत् तया वर्तमानया समन्वागताः ।

अतीतया क्षणादूर्ध्वमात्यागात्,

प्रथमात् **क्षणादूर्ध्वमात्यागादतीतया** विज्ञप्त्या समन्वागतो भवति ।

नास्त्यजातया ॥ २३ ॥

अनागतया तु विज्ञप्त्या **न** कश्चित् समन्वागतः ॥ २३ ॥

निवृतानिवृताभ्यां च नातीताभ्यां समन्वितः ।

अतीताभ्यामपि निवृतानिवृताव्याकृताभ्यां विज्ञप्तिभ्यां **न कश्चित्** समन्वागतः । दुर्बलस्य हि धर्मस्य प्राप्तिरपि दुर्बला नानुबन्धीभवति ।

किंकृतं तस्या **दौर्बल्यम् ? चित्तकृतम् ।**

तौ यावदनुवर्तेते इति । प्रसादक्लेशवेगौ । *अन्येष्वतीतयापीति* । **द्वितीय-**क्षणादिषु *अतीतया* ॥ २२ ॥

"क्षणादूर्ध्वमात्यागाद्" इति । *यो यस्यास्त्यागस्तस्मादात्यागात् तयातीतया विज्ञप्त्या समन्वागतः* । कथम् ? संवरलक्षणायास्तावद् विज्ञप्तेस्त्यागः शिक्षानिक्षेपादिभिः । तस्मादात्यागादनया अतीतया विज्ञप्त्या समन्वागतः । **असंवर-**लक्षणायाः संवरसमादानादिभिस्त्यागः, तस्मादात्यागादनया समन्वागतः । नैवसंवरनासंवरलक्षणायाः प्रसादक्लेशवेगच्छेदादिभिस्त्यागः, तस्मादात्यागादनया समन्वागत इति । यो हि संवराद्यविज्ञप्तिसमन्वागतः सोऽवश्यं **मौल-**कर्मपथस्वभावया *क्षणादूर्ध्वमतीतयाविज्ञप्त्या* समन्वागतः ।

अनागतया तु विज्ञप्त्या न कश्चित् समन्वागत इति । **चित्ताननुपरिवर्त-**नीयत्वात् ॥ २३ ॥

चित्तस्यापि तर्हि निवृताव्याकृतस्य मा भूत्! नैतदेवम्; जडा हि विज्ञप्तिः, परतन्त्रा च। न चैवं चित्तम्। सा हि विज्ञप्तिर्दुर्बलेनोत्थापिता दुर्बलतरा भवति।

असंवरस्य इत्युक्तम्। कोऽयमसंवरो नाम?

असंवरो दुश्चरितं दौःशील्यं कर्म तत्पथः ॥ २४ ॥

असंवरस्येमे पर्यायशब्दाः। तत्र कायवाचोरसंवरणादसंवरः। सद्भिः कुत्सितत्वादनिष्टफलत्वाद् **दुश्चरितम्**। शीलविपक्षाद् **दौःशील्यम्**। कायवाक्कर्मत्वात् **कर्म**। मौलसंगृहीतत्वात् **कर्मपथः**।

स्याद्विज्ञप्त्या समन्वागतो नाविज्ञप्त्येति चतुष्कोटिकम् ॥ २४ ॥

तत्र तावत्—

विज्ञप्त्यैवान्वितः कुर्वन्मध्यस्थो मृदुचेतनः।

मृद्व्या चेतनया कुशलमकुशलं वा कुर्वन्नैवसंवरनासंवरस्थितो **विज्ञप्त्यैव** समन्वागतो भवति, नाविज्ञप्त्या प्रागेवाव्याकृतम्[1], अन्यत्रौपधिकपुण्यक्रियावस्तुकर्मपथेभ्यः।

चित्तस्यापीति। *चित्तस्यापि तर्हि निवृताव्याकृतस्य मा भूत्* प्राप्तिः। अनुबन्धिनी मा भूदित्यर्थः। कस्माद्? इत्याह—*जडा हि विज्ञप्तिः।* अनालम्बनत्वात्। *परतन्त्रा च।* चित्तपरतन्त्रत्वात्। *न चैवं चित्तमिति।* न जडम्, न परतन्त्रं चेत्यर्थः। कस्मात्? तद्विपर्ययात्। *सा* दुर्बलेन निवृताव्याकृतेन *चित्तेनोत्थापिता दुर्बलतरा भवतीति।*

मौलसंगृहीतत्वादिति। चेतनायाः तदर्थत्वात् ॥ २४ ॥

"*विज्ञप्त्यैवान्वितः कुर्वन् मध्यस्थो मृदुचेतनः*" इति। *मध्यस्थ*ग्रहणं संवरासंवरस्थनिरासार्थम्। संवरासंवरस्था हि विज्ञप्त्यविज्ञप्तिभ्यामवश्यं समन्वागताः। *मृदुचेतन*ग्रहणं तीव्रचेतननिरासार्थम्। तीव्रचेतनया[2] हि विज्ञप्तिं कुर्वन् विज्ञप्तिं समुत्थापयेत्। *प्रागेवाव्याकृतमिति।* मृद्व्या चेतनया प्रागेवाव्याकृतं कुर्वन्। यत्र हि मृद्व्या चेतनया कुशलमकुशलं वा कुर्वन् नैवसंवरनासंवरे स्थितो विज्ञप्त्यैव समन्वागतो भवति; अविज्ञप्तेरनुत्पादात्। प्रागेवाव्याकृतं कुर्वन् सुतरां विज्ञप्त्यैवासौ समन्वागतः, नाविज्ञप्त्या; अविज्ञप्त्युत्पादाशङ्काया अभावात्। *अन्यत्रेति* विस्तरः। *अन्यत्र* स्थाप्य *औपधिकेभ्यः पुण्यक्रियावस्तुभ्यः। कर्मपथेभ्यश्च* प्राणातिपातादिभ्यः। तत्र ह्यव्याकृतमपि कुर्वन्न विज्ञप्त्या

---

१. प्रागेवाव्याकृते—का०। २. ०चेतना—मुद्रितः पाठः।

त्यक्तानुत्पन्नविज्ञप्तिरविज्ञप्त्यार्यपुद्गलः ॥ २५ ॥

अविज्ञप्त्यैव समन्वागतो न विज्ञप्त्या; येनार्यपुद्गलेन जन्मान्तरपरिवृत्तौ न तावद् विज्ञप्तं भवति, विज्ञप्तं वा पुनर्विहीनम् ॥ २५ ॥

उक्तं संवरासंवरमध्यस्थानां विज्ञप्त्यविज्ञप्तिसमन्वागमनव्यवस्थानम् ॥

अथैते संवराः कथं लभ्यन्ते ?

ध्यानजो ध्यानभूम्यैव लभ्यते,

यदा ध्यानभूमिकं चित्तं प्रतिलभ्यते मौलीयं सामन्तकीयं वा सास्रवम्, तदा ध्यानसंवरोऽपि; सहभूतत्वात् ।

अनास्रवस्तया ।

आर्यया,

समन्वागतो भवति; "सततसमितं चरतो वा तिष्ठतो वा विस्तरेण यावदुपजायत एव पुण्यम्" इति *सूत्रे* वचनात् । प्राणातिपातादींश्च कर्मपथान् मृदुचेतनयापि कुर्वन् अविज्ञप्त्या समन्वागतो भवति ।

येनार्यपुद्गलेनेति विस्तरः । परिवृत्तजन्मनार्यपुद्गलेन *यदा न तावद् विज्ञप्तं भवति* । कललाद्यवस्थायामारूप्योपपत्तौ च । *विज्ञप्तं वा पुनर्विहीन*मव्याकृतचित्तोत्थापितविज्ञप्तिविहीनात् च । न हि तस्याः प्राप्तिरनुबन्धिनी भवति । कृतस्तूपादिकस्य वा, तद्वस्तुच्छेदात् । स हि तदानीमविज्ञप्तिमपि परित्यजति प्रागेव विज्ञप्तिमिति । आस्रवस्थाम् जन्मान्तरपरिवृत्तावार्यपुद्गलोऽनास्रवयैवाविज्ञप्त्या जन्मान्तरलब्धया समन्वागतः, न विज्ञप्त्या ।

ननु च पृथग्जनस्याप्ययं विधिः सम्भवति ? सम्भवति । अनावश्यकत्वात्तु पृथग्जनो नोक्तः । यो हि ध्यानलाभी परिवृत्तजन्मान्तरः रूपधातावकृतविज्ञप्तिः, कृतविज्ञप्तिविहीनो वा, स एव तथा सम्भवति, नान्य इति; कामावचरसत्त्वाभिसन्धिवचनाद्वा । अथवा उदाहरणरूप आर्यपुद्गल उक्तः, तेन पृथग्जनोऽपि तथा ग्रहीतव्यः। अतएव "विज्ञप्त्यैवान्वितः कुर्वन्मध्यस्थो मृदुचेतनः" इत्यत्रोक्तः—'अन्यत्रौपधिकपुण्यक्रियावस्तुकर्मपथेभ्यः' इति । सावशेषमेतद्वचनमिति कृत्वा । एवं द्वे कोटी सूत्रिते प्रथमद्वितीये । तृतीयचतुर्थ्यौ तु योज्ये—तृतीया संवरासंवरमध्यस्थास्तीव्रया चेतनया कुशलमकुशलं वा कुर्वन्तः; चतुर्थी येन जन्मान्तरपरिवृत्तौ पृथग्जनेन न तावद् विज्ञप्तं भवति, विज्ञप्तं वा विहीनमिति ॥ २५ ॥

सहभूतत्वादिति । यस्माद् ध्यानचित्तेन सह भवति ध्यानसंवरः ।

तथैव ध्यानभूम्याऽनास्रवया लभ्यमानयानास्रवः संवरो लभ्यते । तत्र षड् ध्यानभूमयोऽनास्रवा भवन्ति—चत्वारि ध्यानानि अनागम्यस्यानन्तरं चेति पश्चात् प्रवेदयिष्यामः ।

प्रातिमोक्षाख्यः परविज्ञपनादिभिः ॥ २६ ॥

प्रातिमोक्षसंवरस्तु परविज्ञप्तितो लभ्यते, यथेनं परो विज्ञापयति[1] असौ च परम् । स पुनः सङ्घाद्वा, पुद्गलाद्वा । सङ्घाद् भिक्षुभिक्षुणीशिक्षमाणासंवराः, पुद्गलादन्ये ।

दशविधा उपसम्पदिति **विनयविभाषिकाः** । तस्य उपसंग्रहणार्थमादि-शब्दः ।

१. स्वयम्भूत्वेन बुद्धानां प्रत्येकबुद्धानां च, २. नियामावक्रान्त्या पञ्चकानाम्, ३. एहिभिक्षुकया यशःप्रभृतीनाम्, ४. शास्तुरभ्युपगमात् **महाकाश्यपस्य**, ५. प्रश्नाराधनेन **सोदायिनः**, ६. गुरुधर्माभ्युपगमेन **महाप्रजापत्याः**, ७. दूतेन

परो विज्ञापयतीति । प्रत्याययति । *पुद्गलादन्य* इति । श्रामणेरश्रामणेर्युपासकोपासिकोपवाससंवराः ।

नियमावक्रान्त्या । आर्यमार्गावतारणेन । *पञ्चकानामाज्ञातकौण्डिन्यादीनाम्* । *एहिभिक्षुकयेति* । 'एहि भिक्षो चर ब्रह्मचर्यम्' इति भगवतो वचने । 'एहीति चोक्तः सुगतेन तायिना मुण्डश्च काषायधरो बभूव' इति । *शास्तुरभ्युपगमान्महाकाश्यपस्येति* । महाकाश्यपः किल यां यां देवताप्रतिमां वन्दते सा सा स्फुटति; तस्य महानुभावात् । स भगवन्तमुपसंक्रम्य न वन्दते—माऽस्य रूपविनाशो भूदिति । तमभिप्रायं विदित्वा भगवांश्चोदयति स्म—वन्दस्व काश्यप तथागतमिति । तेन भगवान् वन्दितः । ततः स भगवतो रूपमविकोपितं दृष्ट्वा—अयं मे शास्तेति स भगवन्तमभ्युपगतः । तदभ्युपगमात् अस्योपसम्पदिति । *प्रश्नाराधनेन सोदायिन इति* । सोदायिना प्रश्नविसर्जनेन भगवानाराधितः, तेनाराधनेन तस्योपसम्पत् । *गुरुधर्माभ्युपगमेनेति* । अष्टौ गुरुधर्माः—१. भिक्षोरन्तिकाद् भिक्षुणीनामुपसम्पत् भिक्षुणीभावः, २. अन्वर्धमासमववादो ग्राह्यो भिक्षोरन्तिकात्, ३. अभिक्षुके आवासे वर्षा नोपगन्तव्याः, ४. प्रवारणायामुभयसङ्घाभिः स्थानैः प्रवारयितव्यः, ५. न चोदयितव्यो भिक्षुरापत्तिमापन्नः नाक्रोष्टव्यः, ६. गुरुधर्मापत्तौ मानाप्यमर्धमासं चरितव्यम्, ७. वर्षशतोपसम्पन्नयापि भिक्षुण्या

१. विज्ञपयति—का० ।

धर्मदिन्नाया:, ८. विनयधरपञ्चमेन प्रत्यन्तिमेषु जनपदेषु, ९. दशवर्गेण मध्येषु जनपदेषु, १०. शरणगमनत्रैवाचिकेन षष्टिभद्रवर्गपूगोपसम्पादितानामिति । तेषां नावश्यं विज्ञप्त्यधीनः प्रातिमोक्षसंवरः ॥ २६ ॥

स पुनरेष प्रातिमोक्षसंवरः समादीयमानः कियन्तं कालं समादातव्यः ?

यावज्जीवं समादानमहोरात्रं च संवृतेः ।

सप्तनैकायिकस्य प्रातिमोक्षसंवरस्य **यावज्जीवं समादानम्,** उपवास-संवरस्य **अहोरात्र**मित्येष नियमः ।

किं कारणम् ? द्वौ हि कालपर्यन्तौ—अहोरात्रपर्यन्तः, जीवितपर्यन्तश्च । अहोरात्राणां पौनरुक्त्येन पक्षादयः ।

कालो नाम क एष धर्मः ? संस्कारपरिदीपनाधिवचनमेतत् । आलोकावस्था हि द्वीपेषु 'दिवसः' इत्युच्यते, तमोऽवस्था 'रात्रिः' । युक्तं तावज्जीवितादूर्ध्वं सत्यपि समादाने संवरस्यानुत्पत्तिः; विसभागत्वादाश्रयस्य तेन च तत्राप्रयोगाद्,

---

तत्क्षणोपसम्पन्नो भिक्षुर्वन्द्यः, ८. न च भिक्षुण्या कश्चिद् भिक्षुश्चोदयितव्यः— इत्येवमादयः । एषामभ्युपगमेन तस्या उपसम्पत् । *दूतेन धर्मदिन्नाया इति ।* तया किलान्तःपुरगतयैव प्रव्रज्यार्थं बुद्धाय दूतः प्रेषित इति । *विनयधरपञ्चमेनेति ।* चत्वारो भिक्षवः=सङ्घः, तत्र च ज्ञप्तिवाचकेन पञ्चमेनोपसम्पाद्यते *प्रत्यन्तिकेषु जनपदेषु । मध्यमेषु तु जनपदेषु दशमेन* ज्ञप्तिवाचकेनोपसम्पाद्यते । *षष्टिभद्रवर्ग-पूगोपसम्पादितानामिति ।* भद्रो वर्ग एषामिति । *भद्रवर्गाणां* षष्टिः कुलपुत्राः । तेषां *पूगेन समूहेनोपसम्पादितानाम् । शरणगमनत्रैवाचिकेन ।* 'बुद्धं शरणं गच्छामः' इति त्रिर्वचनेनोपसंपत् । *तेषां नावश्यं विज्ञप्त्यधीन* इति । तेषां विनयधराणामिदं मतम्—*नावश्यं विज्ञप्त्यधीनः प्रातिमोक्षसंवर* इति । बुद्धप्रभृतीनामविज्ञप्त्यधीनत्वात् । अथ वा *तेषामिति* येषां विज्ञप्तिर्नास्त्युपसम्पत्क्रियायाम् ॥ २६ ॥

"संवृतेः" इति । संवरस्य । "कालो नित्यः पदार्थोऽस्ति" इत्येके । तदाशंकया पृच्छति—*कालो नाम क एष धर्म* इति । काल इत्यस्याभिधानस्य किमभिधेय-मित्यर्थः । *संस्कारपरिदीपनाधिवचनमेतदिति ।* संस्काराणामतीतानागतप्रत्यु-त्पन्नानामभिद्योतकं नामेति । तद् यथा—अतीतः कालो यावत् प्रत्युत्पन्न इति त्रैयध्विकाः संस्कारा एव गम्यन्ते । *तेन च तत्राप्रयोगादिति ।* तेन

अस्मरणाच्च ।

अथाहोरात्रादूर्ध्वं पञ्चरात्रं दशरात्रं वा उपवाससमादानस्य कः प्रतिबन्धो बहूनामुपवाससंवराणामुत्पत्तौ ? इत्थमस्ति प्रतिबन्धो यद्भगवानाहोरात्रिकमेवोपवासं सूत्रे शास्ति स्म । इदमिदानीं सम्प्रधार्यम्—किं तावदहोरात्रादूर्ध्वं संवरस्यानुत्पत्तिं पश्यता तथागतेनाहोरात्रिक उपवासो देशितः, उताहो दुर्बलेन्द्रियाणामाहोरात्रिकेऽपि संवरसमादानेन सन्नियोजनार्थमिति ।

कुतस्त्वेतदेवं तर्क्यते ? अहोरात्रात् परेणापि संवरोत्पत्तौ युक्त्यविरोधात् । तदेतत् कस्यचिदप्यहोरात्रादूर्ध्वमदेशनां नेच्छन्ति वैभाषिकाः ॥

असंवरस्येदानीं कः कालनियमः ?

नासंवरोऽस्त्यहोरात्रम्,

यावज्जीवं पापकर्माभ्युपगमादसंवर उपजायते **नाहोरात्रम्**, यथोपवासः ।

किं कारणम् ?

न किलैवं प्रगृह्यते ॥ २७ ॥

न किल कश्चिदेवमसंवरं समादत्ते यथोपवासम्—कच्चिदहमहोरात्रमसंवृतः स्यामिति; कुत्सितत्वात् कर्मणः । एवं चैव न कश्चिदादत्ते—कच्चिदहं यावज्जीवमसंवृतः स्यामिति । यावज्जीवमप्यस्य लाभो न स्यात् । यद्यपि नैवमादत्ते, तथाप्यत्यन्तविपन्नेनाशयेन तां क्रियां प्रकुर्वन्नसंवरं प्रतिलभते, न कालान्तरविपन्नेन । उपवाससंवरस्तु समादानबलाधानादनात्यन्तिकेऽप्याशये लभ्यत एव; संवरार्थित्वात् ।

यदि पुनः कश्चिदसंवरेणाप्यर्थी कालान्तरमसंवरं समाददीत, सोऽवश्यं लभेत । न त्वेतद् दृष्टमिति नैवं व्यवस्थाप्यते ॥

विसभागेनाश्रयेण तत्र समादाने अप्रयोगात् । *अस्मरणाच्च* तेनाश्रयेण तत्समादानं न स्मरति ।

वैभाषिक आह—*कुतस्त्वेतदेवं तर्क्यते* । यथानन्तरमुक्तम् ।

आचार्य आह—*परेणापि संवरोत्पत्तौ युक्त्यविरोधादिति* नात्र युक्तिर्विरुध्यते । यथा जीवितादूर्ध्वं सत्यपि समादाने संवरोत्पत्तौ युक्तिविरोधो विसभागाश्रयत्वात् इत्येवमादि । न कालान्तरविपन्नमेति अहोरात्रादि यावत् क्रियाशयेन ॥

अविज्ञप्तिवदसंवरोऽपि नास्ति द्रव्यत इति **सौत्रान्तिकाः** । **स एव तु** पापक्रियाभिसन्धिरसंवरः । सानुबन्धो यतः कुशलचित्तोऽपि तद्वानित्युच्यते[1]; तस्यानिराकृतत्वात् ॥ २७ ॥

अथाहोरात्रं गृह्यमाण उपवासः कथं ग्रहीतव्यः ?

काल्य ग्राह्योऽन्यतो नीचैः स्थितेनोक्तानुवादिता ।

उपवासः समग्राङ्गो निर्भूषेणानिशाक्षयात् ।। २८ ।।

काल्यं तावत् सूर्योदयकाले; अहोरात्रिकत्वात् संवरस्य । यस्तु पूर्वकृत-समादानः, 'नित्यमष्टम्यामुपचेष्यामि' इति, स भुक्त्वापि गृह्णीयात् ।

अन्यतश्च ग्रहीतव्यः, न स्वयमेवापरापेक्षया सत्स्वपि प्रत्ययेष्वनतिक्रमार्थम् ।

नीचैः स्थितेनोत्कुट्टकेन वा जानुपातेन वा कपोतकमञ्जलिं कृत्वाऽन्यत्र स्थास्यात् । अगौरवस्य हि संवरो नोत्पद्यते ।

दातुश्च **वचनमनुब्रवीत** । न पूर्वं न युगपत् । एवं ह्यसौ परस्माद् गृहीतो भवति । अन्यथा हि दानग्रहणं न सिध्येत् ।

समग्राङ्गश्चाष्टाङ्ग एव ग्रहीतव्यः, न विकलाङ्गः ।

निर्भूषेण च । आजस्रिकमभ्यलङ्कारं मुक्त्वा । आजस्रिको ह्यलङ्कारो नात्यर्थं मदमादधाति ।

अविज्ञप्तिवदसंवरोऽपि नास्ति द्रव्यत इति । यथा 'नास्त्यविज्ञप्तिर्द्रव्यतः' इति प्रतिपादितम्, तथा असंवरोऽपि न द्रव्यतोऽस्ति । चेतनाव्यतिरिक्त इत्य-भिप्रायः । *पापक्रियाभिसन्धिरिति ।* पापक्रियाभिप्राय इत्यर्थः । *सानुबन्ध* इति । सवासन इत्यर्थः । सवासनश्चेतनाविशेषोऽसंवर इत्यर्थः । *यतोऽनुबन्धात् तद्वान्* *संवरवानित्युच्यते ।* असंवरिक इत्यर्थः । *तस्यानिराकृतत्वात् ।* तस्याभिसन्धेः सानुबन्धस्यानिराकृतत्वात् । तद्विरुद्धया चेतनयानुपहतत्वादित्यर्थः ॥ २७ ॥

स भुक्त्वापि गृह्णीयादिति । सूर्योदय एव संवर उत्तिष्ठते, समादाननियम-चित्तस्योत्थापकत्वात् । भुक्त्वा ग्रहणं त्वभिव्यक्त्यर्थम् ।

कपोतकमिति । अङ्गुष्ठरहितस्याङ्गुलिचतुष्कस्येतरहस्ताङ्गुष्ठप्रदेशिन्योरन्त रालविन्यासनात् *कपोतकः* ॥ २८ ॥

---

१. तद्वानुच्यते—का० ।

आगन्निपरिक्षयाच ग्रहीतव्यः, यावत् पुनः सूर्योदयात् ।

अतोऽन्यथा गृह्णतः सुचरितमात्रं स्यात्, न तूपवाससंवरः। एवं च कृत्वा औरभ्रिकपारदारिकयो रात्रिदिवसोपवासकयोः साफल्यं प्रयुज्यते।

अर्हतां समीपे वसन्त्यनेनेति **उपवासः**; तेषामनुशिक्षणात् ।

यावज्जीविकसंवरसमीपे वसन्त्यनेनेत्यपरे।

अल्पकुशलमूलानां कुशलमूलपोषणात् पोषध इति वा।

"पोषं दधाति मनसः कुशलस्य यस्मा-

दुक्तस्ततो भगवता किल पोषधोऽयम्" । ( ) इति ॥ २८ ॥

किमर्थं पुनरष्टाङ्गान्युपादीयन्ते ? यस्मात्

शीलाङ्गान्यप्रमादाङ्गं व्रताङ्गानि यथाक्रमम् ।

चत्वार्येकं तथा त्रीणि,

चत्वारि तावच्छी**लाङ्गानि** यावन्मृषावादविरतिः; प्रकृतिसावद्यविरतित्वात्।

एकमप्रमादाङ्गं मद्यपानाद् विरतिः। समात्तशीलोऽपि मद्यपः प्रमाद्येत ।

त्रीणि व्रताङ्गानि यावदकालभोजनाद् विरतिः; संवेगानुगुणत्वात् ॥

किं पुनरेभिरप्रमादाङ्गव्रताङ्गैरनुपात्तैः स्यात् ?

स्मृतिनाशो मदश्च तैः ॥ २९ ॥

मद्यं हि पिबतः कार्याकार्यस्मृतिरेव नश्येत्। उच्चशयनमहाशयननृत्य-गीतादिकं प्रतिसेवमानस्य **मदः** सम्भवेत् । मत्तस्य च दौःशील्यमदूरं भवेत् । काले पुनर्भुञ्जानस्योचितभक्तकालपरिहारादुपवासस्मृतिः संवेगश्चोपतिष्ठेत् । तदभावादुभयं न स्यादिति ।

केचित्तु स्वल्पकालभोजनात् प्रतिविरतिमेवोपवासं मन्यन्ते । तस्य शेषाण्यष्टाङ्गानीति । नृत्यगीतवादित्रं गन्धमाल्यविलेपनं च द्वयं कृत्वा ।

एवं तु सति **सूत्रपाठो** न युज्येत। अकालभोजनाद् विरतिमुक्त्वा "अनेनाहमष्टमाङ्गेन तेषामार्याणामर्हतां शिक्षायामनुशिक्षे, अनुविधीये" इति ।

शीलं पाराजिकाभावः सङ्घावशेषाद्यभावः । *व्रतमिति* नियमः । *तदभावा* *दिति* । अकालभोजनात् । *उभयं न स्यादिति* । स्मृतिः, संवेगश्च ।

कस्तर्हि सोऽन्य उपवासो यस्येमान्यङ्गानि ? समुदायस्यावयवा अङ्गानि । यथा रथस्याङ्गानि—चतुरङ्गः, बलकायः, पञ्चाङ्गम्, तूर्यम्; तथाऽष्टाङ्ग उपवासो द्रष्टव्यः—अकालभोजनात् प्रतिविरतिरुपवासः, उपवासाङ्गं च । यथा सम्यग्दृष्टि-र्मार्गः, मार्गाङ्गं च धर्मप्रविचयसम्बोध्यङ्गं बोधिर्बोध्यङ्गं समाधिर्ध्यानं ध्यानाङ्गं चेति **वैभाषिकाः** । न तु तेषामेव सम्यग्दृष्ट्यादीनां त एवाङ्गत्वाय कल्पन्त इति । पूर्वकाः सम्यग्दृष्ट्यादय उत्तरेषामङ्गानि यदि स्युः, प्रथमक्षणोत्पन्न आर्य-मार्गो नाष्टाङ्गः स्यात् ॥ २९ ॥

किं खल्वयमुपवासकस्यैवोपवासः, आहोस्विदन्यस्यापि ?

अन्यस्याप्युपवासोऽस्ति शरणं त्वगतस्य न ।

अनुपवासकोऽपि यस्तमहोरात्रं बुद्धधर्मसङ्घान् शरणं गत्वोपवासं गृह्णाति, तस्योत्पद्यते उपवाससंवरः, नान्यथा; अन्यत्राज्ञानात् ।

सूत्र उक्तम्—"यतश्च महानामन् गृही अवदातवसनः पुरुषः पुरुषेन्द्रियेण समन्वागतो बुद्धं शरणं गच्छति, धर्मम्, सङ्घं शरणं गच्छति, वाचं च भाषते—'उपवासकं च मां धारय', इयता उपवासको भवति" (   ) इति । तत् किं शरणगमनादेवोपवासको भवति ? भवतीति **बहिर्देशकाः** ।

न तु तेषामिति । विस्तरेणाचार्यो वैभाषिकमतं युक्त्या विरोधयति । *न तु तेषामेव सम्यग्दृष्ट्यादीनां* सम्यग्दृष्टि-धर्मविचयसम्बोध्यङ्ग-समाधीनाम् । *त एव सम्यग्दृष्ट्यादयोऽङ्गत्वाय कल्प्यन्ते* । युज्यन्त इत्यर्थः । कस्माद् ? युक्तिविरोधात् । *पूर्वकाः सम्यग्दृष्ट्यादयः उत्तरेषां* सम्यग्दृष्ट्यादीना*मङ्गानि यदि स्यु*रिति व्यव-स्थाप्यते । एवमस्यां कल्पनायां *प्रथमक्षणोत्पन्न आर्यमार्गो नाष्टाङ्गः स्यात्* । न हि तत्र पूर्वोत्पन्ना सम्यग्दृष्टिरङ्गमस्तीति सप्ताङ्गः स्यात् । बोध्यङ्गेष्वपि पश्चिमः क्षणो न बोध्यङ्गं स्यात् । न ह्यन्या परेण बोधिरस्ति, यस्यास्तदङ्गं स्यात् । अथ मतम्—अनागताया बोधेस्तदङ्गमिति ? अनागतबोधिर्न स्यात् । एवं समाधिर्योज्यः ॥ २९ ॥

अन्यत्राज्ञानादिति । दातुर्ग्रहीतुर्वा विस्मरणाद्, अव्युत्पत्तेश्च । सन्दिग्धस्य विपन्नाशयस्य वाऽनादरपूर्वकं शरणमवगच्छतः संवरो नोत्पद्यते इति ।

गृहीति उद्देशपदम् । *अवदातवसन* इति निर्देशपदम् । *पुरुष* इत्युद्देशपदम् । *पुरुषेन्द्रियेण समन्वागत* इति तन्निर्देशपदम् । यदि न विना संवरेणोपासको भवति ।

न विना संवरेणेति काश्मीराः ।

यत्तर्हि सूत्र उक्तम् ? नास्त्यत्र सूत्रविरोधः[1] । यस्मादस्योत्पद्यते, तत एव—

उपासकत्वोपगमात् संवृत,

उपासकत्वाभ्युपगमादेवास्योपासकसंवरो जायते । "यदेवाभ्युपगच्छति—'उपासकं मां धारय' इत्याद्यमेण यावज्जीवं प्राणापेतम्" इति । प्राणातिपाताद्यपेतमित्यर्थः; मध्यपदलोपात् ।

लघुसंवरस्यापि व्युत्पादनार्थं शिक्षापदानाम्

उक्तिस्तु भिक्षुवत् ॥ ३० ॥

यथैवं भिक्षुर्लब्धसंवरोऽपि पुनः शिक्षापदानि ग्राह्यते, श्रामणेरश्च व्युत्पादनार्थम्—इतश्चामुतश्च तव[2] संवर इति, तथोपवासकोऽपि । न तु विना संवरेणोपासकोऽस्ति ॥ ३० ॥

सर्वे चेत् संवृता एकदेशकार्यादयः कथम् ?

यत्तर्हि सूत्र उक्तम् । तदुक्तमियतोपासको भवतीति । तत् कथमिति वाक्यशेषः । आह—*नास्त्यत्र सूत्रविरोध इति* । महानामसूत्रस्य ।

"उक्तिस्तु भिक्षुवद्" इति । उपासकशिक्षापदोक्तिः भिक्षुरिव । यथैव हि भिक्षुर्लब्धसंवरोऽपि ज्ञप्तिचतुर्थेन कर्मणा *शिक्षापदानि यथास्थूलं ग्राह्यते* प्रत्याख्यते—*इतश्चामुतश्च* पाराजिकादिभ्यस्तव *संवरः*, अन्यानि च ते सब्रह्मचारिणः कथयिष्यन्तीति । *श्रामणेरश्च* । किम् ? शिक्षापदानि ग्राह्यते लब्धसंवरोऽपि पूर्वम् । यदेव हि तेनाभ्युपगतम्—'अहमेवंनामा तं भगवन्तं तथागतम् अर्हन्तं सम्यक्सम्बुद्धं शाक्यमुनिं शाक्याधिराजं प्रव्रजितमनुप्रव्रजामि, गृहस्थलिङ्गं परित्यजामि, प्रवज्यालिङ्गं समाददामि, श्रमणोद्देशं मां धारय' । एवं यावत् त्रिरपीति । *तथोपसकोऽपि* 'बुद्धशरणं गच्छामि, यावत् संघशरणं गच्छामि', द्विरपि, त्रिरपि इति अनेन लब्धसंवरोऽपि पुनः शिक्षापदानि ग्राह्यते—'प्राणातिपातं प्रहाय प्राणातिपाताद् प्रतिविरमामि' इति विस्तरेण ॥ ३० ॥

---

१. विरोधः—का० ।

२. ते— का० ।

यदि सर्व एवोपासका उपासकसंवरस्थाः, कथं भगवता एकदेशकारी, प्रदेशकारी, यद्भूयःकारी, परिपूर्णकारी चोपासक उक्तः ?

तत्पालनात् किल प्रोक्ताः,

यो हि यच्छिक्षापदं पालयति स तत्कारीत्युक्तः । सर्वे तु समं संवरस्थाः । इदमुत्सूत्रं वर्तते ?

किमत्रोत्सूत्रम् ? उपासकत्वाभ्युपगमादेव संवरलाभः, यस्मात् प्राणातिपात-मित्याहेति ?

न ह्येवं सूत्रपाठः उक्तः, यथा महानामसूत्रपाठः[1] । तत्रैव चोपासक-लक्षणापदेशः, नान्यत्र । यत्र त्वेष पाठः—"यावज्जीवं प्राणापेतं शरणगतमभि-प्रसन्नम्" इति । ततस्ते[2] दृष्टसत्याः पुद्गलाः[3] "अवेत्यप्रसादान्वयं प्राणैरपि सद्धर्मोपगमनं दर्शयन्ति स्म । जीवितहेतोरप्यभव्या वयमेनं धर्मं परित्यक्तुम्" इति । न त्वेष लक्षणापदेशः[4] संवरस्य ।

प्राणापेतं तु न क्वचित् पठ्यते । कश्चैतदपरिस्फुटार्थं पठेत् !

एकदेशकारी । य एकं शिक्षापदं रक्षति । *प्रदेशकारी* । यो द्वे रक्षति । *यद्-भूयस्कारी* । यस्त्रीणि चत्वारि वा रक्षति । *परिपूर्णकारी* । यः पञ्चापि रक्षति । *स तत्कारीत्युक्त* इति । एकदेशकारी, यावत् परिपूर्णकारीत्यर्थः । *न ह्येवं सूत्र-पाठ* इति । नह्येवं महानामसूत्रपाठो यावज्जीवप्राणापेतमिति उक्तः । *यथा महानामसूत्रपाठ इति* । "कियता भदन्त उपासको भवति ? यतश्च महानाम गृही विस्तरेण यावदुपासकं मां धारयेति इयतोपासको भवति" इति । *यत्र त्वेष पाठ इति* । यत्र सूत्रान्तरे एष पाठः । *यावज्जीवं प्राणापेतं शरणगतमभिप्रस-न्नमिति* । *ततस्ते दृष्टसत्याः पुद्गला अवेत्य प्रसादान्वयमवेत्य* प्रसादहेतुकं *प्राणैरपि* जीवितहेतोरपि *सद्धर्मोपगमनं दर्शयन्ति स्म* । *अभव्या वयमेनं धर्मं परित्यक्तुमिति* । *न त्वेष लक्षणापदेशः संवरस्य* । न त्वनेन सूत्रेण लक्षणमपदिश्यते इत्यर्थः । *प्राणापेतं तु न क्वचित् पठ्यत* इति । नापि महानामसूत्रे, नापि दृष्टसत्यसूत्रे । *कश्चैतदपरिस्फुटार्थं पठेदिति* । मध्यपदलोपविकल्पान्न ज्ञायते—किम् प्राणेभ्यो ऽपेतम्, प्राणैर्वापेतं प्राणपेतम्, उताहो प्राणातिपातादिभ्योऽपेतं प्राणापेत-

---

१. महानामसूत्रे पाठः—का०
२. तत्र ते—का० ।
३. का० पुस्तके नास्ति ।
४. ०णोपदेश.—का० ।

एकदेशकार्यादींस्तु खण्डितशिक्षानधिकृत्य प्रश्न एव न युज्यते, कुतो विसर्जनमावेणिकधर्माणाम् । को ह्युपासकसंवरं जानन् एतन्न ज्ञास्यते—यो हि यच्छिक्षापदं न खण्डयति स तत्कारी भवतीति ।

उपासकसंवरस्य तु परिमाणानभिज्ञांस्तन्मात्रशिक्षाक्षमान् प्रत्येष प्रश्नो युज्यते—"कियता भदन्तोपासक एकदेशकारी भवति यावत् परिपूर्णकारी भवति ?"

यदि तर्हि विना संवरेणोपासकः स्याद्, विकलेन वा, भिक्षुश्रामणेरावपि स्याताम्, कथं तावेदषामुपासकसंवरादीनामप्रतिनियमो भवति ? शास्तृप्रज्ञप्तिवशात् । उपासकत्वादिप्रतिनियमोऽपि शास्तृप्रज्ञप्तिवशादिष्यताम् । विनापि हि संवरेणोपासकः प्रज्ञपितः, न तु भिक्षुश्रामणेराविति । ते त्वेतन्नेच्छन्ति काश्मीराः ।

सर्वेषां तु संवराणाम्—

मृद्वादित्वं यथा मनः ।। ३१ ।।

मृदुमध्याधिमात्रत्वं ससन्तानचित्तवशात् । एवं च कृत्वार्हतोऽपि मृदुः प्रातिमोक्षसंवरः स्यात्, पृथग्जनस्याधिमात्रः ।

किं पुनः संवरग्रहणादेवोपासकः स्याद् विना शरणगमनैः ? न स्यादन्यत्राज्ञानात् ।। ३१ ।।

मिति । *प्रश्न एव न युज्यत* इति । योऽयं प्रश्नः—'कियता भदन्तोपासक एकदेशकारी भवति यावत् परिपूर्णकारी' इति, एष प्रश्नो न युज्यते । *कुतो विसर्जनमिति ।* "इह महानामन्नुपासकः प्राणातिपातं प्रहाय प्राणातिपातात् प्रतिविरतो भवति । इयता महानामन्नुपासकः शिक्षायामेकदेशकारी भवति । विस्तरेण द्वाभ्यां शिक्षापदाभ्यां प्रतिविरतः प्रदेशकारी भवति । त्रिभ्यः प्रतिविरतश्चतुर्भ्यो वा यद्भूयस्कारी भवति"—इत्येतद् विसर्जनं सुष्ठु न युज्यते । *तन्मात्रशिक्षाक्षमान् प्रत्येष प्रश्नो युज्यते* इति । एकस्य शिक्षापदस्य द्वयोस्ततः परेण वा क्षमानिति ।

विनापि संवरेणोपासकः प्रज्ञपित इति । महानामसूत्रे । "यतः खलु महानामन् गृही अवदातवसनः" इत्येवमादिना ।

अर्हतोऽपि मृदुः प्रातिमोक्षसंवरः स्यादिति । यदि समुत्थापकमस्य चित्तं मृदु स्यात् । *पृथग्जनस्याधिमात्र* इति । यद्यस्याधिमात्रं चित्तमिति । *अन्यत्रा-*

यो बुद्धधर्मसङ्घाञ्छरणं गच्छति, किमसौ शरणं गच्छति ?

बुद्धसङ्घकरान् धर्मानशैक्षानुभयांश्च सः ।
निर्वाणं चेति शरणं यो याति शरणत्रयम् ।। ३२ ।।

यो बुद्धं शरणं गच्छति, अशैक्षानसौ बुद्धकरकान् धर्माञ्छरणं गच्छति; येषां प्राधान्येन स आत्मभावो बुद्ध इत्युच्यते, येषां वा लाभेन सर्वावबोधसामर्थ्याद् बुद्धो भवति । के पुनस्ते ? क्षयज्ञानादयः सपरिवाराः; रूपकायस्य पूर्वं पश्चाच्चाविशेषात् । किं सर्वबुद्धान्, अथैकम् ? लक्षणतः सर्वबुद्धान्; मार्गस्याविलक्षणत्वात् ।

यः सङ्घं शरणं गच्छति, शैक्षाशैक्षानसौ सङ्घकरकान् धर्मान् गच्छति; येषां लाभेनाष्टौ पुद्गलाः सङ्घीभवन्ति, अभेद्यत्वात्[1] । किं सर्वसङ्घान्, अथैकम् ? लक्षणतः सर्वसङ्घान् मार्गस्याविलक्षणत्वात् । यत्तु सूत्र उक्तम्—"योऽसौ[2] भविष्य-

---

ज्ञानादिति । दातुर्ग्रहीतुश्च । तदानादरतस्तु शरणगमनैर्विना न स्यादुपासक इति ।। ३१ ।।

बुद्धकरकानिति । बुद्धप्रज्ञप्तिहेतून् । अत एवाह—*येषां प्राधान्येन स आत्मभावो बुद्ध इत्युच्यते ।* अन्येऽपि हि गुणाः अप्राधान्येनाश्रिता भवन्ति । *येषां वा लाभेनेति । क्षयज्ञानादयः सपरिवारा* इति । *आदि*शब्देनानुत्पादज्ञानमशैक्षी च सम्यग्दृष्टिर्गृह्यते । सपरिवारग्रहणेनानास्रवाः पञ्चस्कन्धा गृह्यन्ते । *रूपकायस्य पूर्वं पश्चाच्चाविशेषादिति ।* किम् ? न रूपकायं शरणं गच्छतीति सम्बन्धः । यादृशो बोधिसत्त्वावस्थायां रूपकायस्तादृशः पश्चादपीति ।

लक्षणतः सर्वबुद्धानिति । न कण्ठोक्तित इत्यभिप्रायः । *मार्गस्याविलक्षणत्वादिति ।* लौकिकस्य मार्गस्य पुण्यज्ञानसम्भारलक्षणस्य लोकोत्तरस्य च क्षयज्ञानादिलक्षणस्या*विलक्षणत्वात्* तुल्यत्वात्, नायुर्जात्यादिलक्षणानाम् । अतस्तुल्यलक्षणाः सर्वे बुद्धा इति ।

सङ्घीभवन्त्यभेद्यत्वादिति । सदेवकेनापि लोकेन मार्गं प्रत्यभेद्यत्वात् सङ्घीभवन्ति । समग्ररूपा भवन्तीति । *लक्षणत* इति । पूर्ववद्व्याख्यातव्यम् । *योऽसौ भविष्यतीति* विस्तरः । यत्र भगवांस्त्रपुसभल्लिकौ वणिजावामन्त्रयते स्म—"एतं युवां बुद्धं शरणं गच्छतं धर्मं च । योऽसौ भविष्यत्यनागतेऽध्वनि सङ्घो नाम, तमपि शरणं गच्छतम्" इति । यदा सङ्घो नास्ति तदैवमुक्तमनागतमेव सङ्घम-

---

१. अभेद्यत्वात्—का० । २. योऽप्यसौ—का० ।

त्यनागतेऽध्वनि सङ्घो नाम, तमपि शरणं गच्छतम्" इति। तत् प्रत्यक्षभाविनः संवरत्नस्योद्भावनार्थम्।

यो धर्मं शरणं गच्छति, असौ निर्वाणं शरणं गच्छति प्रतिसंख्यानिरोधम्; स्वपरसन्तानक्लेशानां दुःखस्य च शान्त्येकलक्षणत्वात्।

यद्यशैक्षा धर्मा एव बुद्धः, कथं तथागतस्यान्तिके दुष्टचित्तरुधिरोत्पादनादानन्तर्यं भवति? आश्रयविपादनात् तेऽपि विपादिता भवन्तीति वैभाषिकाः।

शास्त्रं तु नैवं वाचकम्—अशैक्षा धर्मा एव बुद्ध इति। किं तर्हि? बुद्धकरका इति। अत आश्रयस्य बुद्धत्वाप्रतिषेधादचोद्यमेवैतत्। अन्यथा हि लौकिकचित्तस्थो न बुद्धः स्यान्न सङ्घः, शीलमेव स[१] भिक्षुकरकं भिक्षुः स्यात्!

धिकृत्य। तत् कथं सर्वसङ्घानसौ शरणं गच्छतीत्यनेन विरुध्यते। *तत् प्रत्यक्षभाविन इति*। यत् संघरत्नं तयोस्त्रपुसभल्लिकयोः धर्मचक्रप्रवर्तनानन्तरं प्रत्यक्षीभविष्यति, तस्योद्भावनार्थंगुणतः प्रकाशनार्थं स एवाधिकृतो भविष्यतीत्यर्थः।

शान्त्येकलक्षणत्वादिति। *स्व-परसान्तानिकानां क्लेशानां दुःखस्य* च या शान्तिः तल्लक्षणमस्येति *शान्त्येकलक्षणं* निर्वाणम्, तद्भावः। तस्मादसौ सर्वं निर्वाणं गच्छति।

आश्रयविपादनादिति। तेषामशैक्षाणां यः *आश्रयो* रूपस्कन्ध. तस्य *विपादनाद्* विकोपनात् तदाश्रयिणोऽपि *ते* बुद्धकरका *धर्मा विपादिता भवन्ति*। *शास्त्रं तु नैवमिति* विस्तर.। अभिधर्मशास्त्रं नैवं *वाचकम्*। नैवं दर्शकम्। *अशैक्षा धर्मा एव बुद्ध* इति। *किं तर्हि? बुद्धकरका* इति। के ते बुद्धकरकाः? ये बुद्धत्वस्य बुद्धप्रज्ञप्तेश्च हेतवो लौकिकलोकोत्तरा *धर्माः ते बुद्ध* इति। *अत आश्रयस्य* लौकिकपञ्चस्कन्धलक्षणस्य *बुद्धत्वाप्रतिषेधादचोद्यमेवैतत्*। यदुक्तं यद्यशैक्षा धर्मा एव बुद्धः, कथं तथागतस्यान्तिके दुष्टचित्तरुधिरोत्पादनादानन्तर्यं भवतीति। *अन्यथा हीति* विस्तरः। यद्यशैक्षा एव धर्मा बुद्धः, शैक्षाशैक्षधर्मा एव सङ्घः। *लौकिकचित्तस्थो न बुद्धः स्यात्, न सङ्घः*। कस्मात्? न हि लौकिकं चित्तम् अशैक्षा धर्माः शैक्षाश्चेति। यदि वा शैक्षा धर्मा एव बुद्धकरका बुद्धः स्यात्, नाश्रयोऽपि। *शीलमेव स* भिक्षुसंवराख्यं *भिक्षुकरकं भिक्षुः स्यात्* नाश्रयः। आह—यद्याश्रयस्यापि बुद्धत्वम्, कस्मादेवमाह शास्त्रे—यो बुद्धं शरणं गच्छति अशैक्षानसौ बुद्धकरकान् धर्मान् शरणं गच्छतीत्यशैक्षधर्मानेवावधारयति?

---

१. च—का०।

यथा तु यो भिक्षून् पूजयति, भिक्षुकरकमसौ शीलं पूजयति। एवं यो बुद्धं शरणं गच्छति अशैक्षानसौ बुद्धकरकान् धर्मान् शरणं गच्छति। यो बुद्धं शरणं गच्छति, सोऽष्टादशावेणिकान्। बुद्धधर्मानित्यपरे।

किंस्वभावानि शरणगमनानि? वाग्विज्ञप्तिस्वभावानि। कः पुनः शरणार्थः? त्राणार्थः शरणार्थः; तदाश्रयेण सर्वदुःखात्यन्तनिर्मोक्षात्।

उक्तं हि भगवता—

"बहवः शरणं यान्ति पर्वतांश्च वनानि च।
आरामान् चैत्यवृक्षांश्च[1] मनुष्या भयतर्जिताः[2] ॥
न त्वेतच्छरणं श्रेष्ठं नैतच्छरणमुत्तमम्।
नैतच्छरणमागम्य सर्वदुःखात् प्रमुच्यते ॥
यस्तु बुद्धं च धर्मं च सङ्घं च शरणं गतः।
चत्वारि चार्यसत्यानि पश्यति प्रज्ञया यदा ॥
दुःखं दुःखसमुत्पादं दुःखस्य समतिक्रमम्।
आर्यं चाष्टाङ्गिकं मार्गं क्षेमं निर्वाणगामिनम् ॥
एतद्धि शरणं श्रेष्ठमेतच्छरणमुत्तमम्।
एतच्छरणमागम्य सर्वदुःखात् प्रमुच्यते ॥" ( ) इति।

अत एव शरणगमनानि सर्वसंवरसमादानेषु द्वारभूतानि ॥ ३२ ॥

एवं वैभाषिकेणोक्ते *आचार्यो* दृष्टान्तेन समाधिमाह—*यथा तु यो भिक्षून् पूजयतीति* विस्तरः। यथा तु यो भिक्षुं पूजयति शीलमुखेन। *भिक्षुकरकमसौ शीलं पूजयति*। न च पुनः शीलमेव भिक्षुः। *एवं यो बुद्धं शरणं गच्छतीति*। अशैक्षमुखेन। *अशैक्षानसौ बुद्धकरकान् धर्मान् शरणं गच्छति*। न पुनः स्वसान्तानिका अशैक्षा एव धर्मा बुद्धः। तस्माददोष एषः। यो बुद्धं शरणं गच्छति अशैक्षानसौ बुद्धकरकान् धर्मान् शरणं गच्छतीति। *सोऽष्टादशावेणिकानिति*। तेषामसाधारणत्वादिति अभिप्रायः।

वाग्विज्ञप्तिस्वभावानीति। ग्रहणकालमधिकृत्य। *चैत्यवृक्षांश्चेति*। चैत्यकल्पिता *वृक्षाः चैत्यवृक्षाः*। *तानीति*।

अत एवेति। यस्मादेत*च्छरणमागम्य सर्वदुःखात् प्रमुच्यते*, *अतः सर्वसंवरसमादानेषु* उपासकादिसंवरसमादानेषु *द्वारभूतानीत्यर्थः*॥ ३२ ॥

---

१ वृक्षांश्चैत्यांश्च—का०। २. ०वर्जिताः—का०।

किं पुन: कारणमन्येषु संवरेष्वब्रह्मचर्याद् विरतिः शिक्षापदं व्यवस्थापितम्, उपासकस्य तु काममिथ्याचारात् ?

मिथ्याचारातिगर्ह्यत्वात् सौकर्यादक्रियाप्तितः ।

काममिथ्याचारो हि लोकेऽत्यन्तं गर्हित:; परेषां दारोपघातात्, आपायिकत्वाच्च । न तथाऽब्रह्मचर्यम् । सुकरा च काममिथ्याचाराद् विरतिर्गृहानध्यावसनाम्, दुष्करा त्वब्रह्मचर्यादिति दुष्करं कर्तुं नोत्सहेरन् । आर्याश्चाकरणसंवरं काममिथ्याचारात् प्रतिलभन्ते; जन्मान्तरेष्वप्यनध्याचरणात्, न त्वब्रह्मचर्यादित्युपासकस्यापि तस्मादेव विरतिः शिक्षापदं व्यवस्थापितं मा भूत् परिवृत्तजन्मान्तरः शैक्ष उपासकसंवराङ्गेष्वसंवृत इति । अक्रियानियमो ह्यकरणसंवर. ।

य उपासकाः सन्तो भार्याः परिणयन्ति, किं तैस्ताभ्योऽपि संवर. प्रतिलब्धः ? अथ न ? प्रतिलब्धः, मा भूत् प्रादेशिकसंवरलाभ इति ।

कथं संवरक्षोभो न भवति ? यस्मात्

यथाभ्युपगमं लाभः संवरस्य न सन्ततेः ॥ ३३ ॥

यथा ह्येषामभ्युपगमस्तथा संवरलाभः ।

कथं चैषामभ्युपगम: ? काममिथ्याचाराद्विरमामीति, न त्वत्र सन्ताने मया ब्रह्मचर्यं न कर्तव्यमिति । अत एवैषां तदधिष्ठानात् काममिथ्याचाराङ्गादेव संवरलाभः, नाब्रह्मचर्यादिति नास्ति भार्याभूतायां संवरक्षोभः ॥ ३३ ॥

आपायिकत्वाच्च । यस्माच्च काममिथ्याचार एकान्तेनापायिक. अपायसंवर्तनीयो *न तथा ब्रह्मचर्यम्* । *अक्रियानियमो ह्यकरणसंवर* इति अक्रियायामकरणे नियम एकान्तता *अक्रियानियम.* । *सोऽकरणसंवर.* । अकरणलक्षण. संवरः अकरणसंवर. । न समादानिकसंवर इत्यर्थ । स च *सौत्रान्तिकनयेना*वस्थाविशेष एव । *वैभाषिकनयेन* तु शीलागमविज्ञप्तिरिति ।

य उपासकाः सन्त इति विस्तर. । ये गृहीतपञ्चशिक्षापदाः सन्तो *भार्याः परिणयन्ति* विवाहयन्ति । *कि तैरुपासकैस्ताभ्योऽपि* स्त्रीभ्य: *संवरः प्रतिलब्ध.* । प्रतिलब्धपूर्वक इत्यर्थ. । *अथ न* । प्रतिलब्ध इत्यधिकृतम् । *वैभाषिक* आह - *प्रतिलब्ध* इति । *मा भूत् प्रादेशिक* इति सर्वागम्यात् प्रतिविरतेः । काममिथ्याचारात् प्रतिविरमामीति अगम्य आचारात् प्रतिविरमामि, न त्वस्मात् सन्तानागम्याचारात् प्रतिविरमामीत्यभिप्रायः । अत एवाह—*न त्वत्र सन्तान*

अथ कस्मात् मृषावादाद् विरतिरेवोपासकसंवरशिक्षापदम्, न पैशुन्यादि-विरतिः ? एभिरेव च त्रिभिः कारणैः—

मृषावादातिगर्ह्यत्वात् सौकर्यादक्रियाप्तितः ।

मृषावादप्रसङ्गाच्च सर्वशिक्षाव्यतिक्रमे ।

सर्वत्र हि शिक्षातिक्रमे समनुयुज्यमानस्योपस्थितमिदं भवति—नाहमेव-महार्षमिति मृषावादस्य प्रसङ्गो भवति, अतो मृषावादाद् विरतिर्विधीयते। कथम्? कृतातिक्रमोऽप्यात्मनि माविष्कुर्यादिति ।

किं पुनः कारणं प्रतिक्षेपणसावद्याच्छिक्षापदस्य न व्यवस्थापितम् ?

प्रतिक्षेपणसावद्यान्मद्यादेव,

किं कारणं **मद्यादेव**, नान्यस्मात् ?

अन्यगुप्तये ॥ ३४ ॥

मद्यं पिबतोऽन्यान्यप्यङ्गान्यगुप्तानि स्युः ।

कथं पुनर्मद्यपानं प्रतिक्षेपणसावद्यं गम्यते ? प्रकृतिसावद्यलक्षणाभावात् । प्रकृतिसावद्यं हि क्लिष्टेनैव चित्तेनाध्याचर्यते । शक्यं तु मद्यं प्रतीकारबुद्ध्यैव पातुम्, यावन्न मदयेत् । क्लिष्टमेव तच्चित्तं यन्मदनीयं ज्ञात्वा पिबति ।

न तत् क्लिष्टं यदमदनीयमात्रां विदित्वा पिबति ।

प्रकृतिसावद्यं मद्यमिति **विनयधराः** । "कथं भदन्त ग्लान उपस्थातव्यः ? प्रकृतिसावद्यमुपाले[1] स्थापयित्वा" इत्युक्तं **भगवता** ।

शाक्येषु[2] ग्लानेषु मद्यपानं नाभ्यनुज्ञातम् ।

इति विस्तरः ॥ ३३ ॥

प्रतिक्षेपणसावद्यमिति । प्रतिषेधसावद्यं भवति । भगवत्प्रतिषिद्धं कर्माचरतः पापं भवति; भगवच्छासनानादरात् । *न तत्क्लिष्टं यदमदनीयमात्रां विदित्वा पिबतीत्याभिधार्मिकेणोक्ते प्रकृतिसावद्यं मद्यमिति विनयधराः* साधयन्ति । *प्रकृति-सावद्यमुपाले स्थापयित्वेति* । प्रकृतिसावद्येन कर्मणा न चिकित्स्यः, प्रज्ञप्तिसावद्येन तु चिकित्सनीय इत्यभिप्रायः । *शाक्येषु ग्लानेषु मद्यपानं नाभ्यनुज्ञातम्* । अतो

---

१. ०मुपालिन्—का० । २. शाक्येषु च—का० ।

इदं चोक्तम्—"मां भिक्षवः शास्तारमुद्दिशद्भिः कुशाग्रेणापि मद्यं न पातव्यम्" (　　　　) इति । अतः प्रकृतिसावद्यमिति ज्ञायते ।

आर्यैश्च जन्मान्तरगतैरप्यनध्याचारात् । प्राणिवधादिवत् । कायदुश्चरितवचनाद्, दुर्गतिगमनाच्चेति ।

नेत्याभिधार्मिकाः । उत्सर्गविहितस्यापि ग्लानेषु प्रज्ञप्तिसावद्यस्य पुनर्मद्यस्यापवादः प्रसङ्गपरिहारार्थं मदनीयमात्रानियमनात् ।

अत एव च कुशाग्रपानप्रतिषेधः । आर्यैरनध्याचरणं ह्रीमत्त्वात्,

गम्यते—प्रकृतिसावद्यं तदिति । यदि हि तत् प्रज्ञप्तिसावद्यं स्यात्, ग्लानशाक्योपस्थानाय तदनुज्ञायेत । न चानुज्ञायते, तेन तत् प्रकृतिसावद्यमिति ।

इदं चोक्तं मां शास्तारमुद्दिशद्भिः 'शाक्यमुनिर्नः शास्ता' इत्युपदिशद्भिः *कुशाग्रेणापि मद्यं न पातव्यमिति । प्रकृतिसावद्यं तदिति* भगवता तत् प्रतिषिद्धम् । न तु मदनीयमित्यवेत्य; कुशाग्रमात्रस्य मद्यस्यामदनीयत्वात् ।

आर्यैश्चेति विस्तरः । प्रकृतिसावद्यं मद्यं *जन्मान्तरगतैरप्यार्यैरनध्याचारात्* । *प्राणिवधादिवदिति* साधनम् । *कायदुश्चरितवचनाच्चेत्यपरं* साधनम् । 'प्रकृतिसावद्यं मद्यं कायदुश्चरितवचनात् प्राणिवधादिवत्' । चतुर्विधं हि नन्दिकसूत्रादिषु कायदुश्चरितमुक्तम्—प्राणातिपातः, अदत्तादानम्, काममिथ्याचारः, सुरामैरेयमद्यप्रमादस्थानमिति ।

उत्सर्गविहितस्यापीति विस्तरः । अनेन भगवद्वचनस्य पूर्वापरविरोधं परिहरन्ति । कथं भदन्तेति विस्तरेण मद्यपानस्य सामान्यवचनमुत्सर्गः, 'शाक्येषु ग्लानेषु मद्यपानं नाभ्यनुज्ञातम्' इत्यपवाद इति मद्यपानं ग्लानावस्थायामपि नानुज्ञातमिति गम्यते । अपवादः पुनः प्रसङ्गपरिहारार्थम्, सकृत् पीतं हि मद्यं व्यसनीभवेत् । उक्तं हि भगवता—त्रीणि स्थानानि प्रतिषेवमाणस्य नास्ति तृप्तिर्वा, अलन्ता वा, पर्याप्तिर्वा—मद्यम्, अब्रह्मचर्यम्, स्त्यानमिद्धं चेति । प्रसंगपरिहारः कस्माद् ? इत्याह—*मदनीयमात्रानियमात् ।* सैव हि मात्रा द्रव्यकालप्रकृतिशरीरावस्था अपेक्ष्य मदनीया चामदनीया च भवति ।

अत एव च कुशाग्रपानप्रतिषेध इत्यतिशयवचनम् । तदेवं न प्रकृतिसावद्यमिति मनसिकृत्वा भगवता तत्परिहरणीयमुक्तम् । किं तर्हि ? प्रसङ्गदोषादिति दर्शितम् । *आर्यैरनध्याचरणं ह्रीमत्त्वादिति ।* पञ्च शैक्षाणि बलानि सूत्रे पठ्यन्ते । कतमानि पञ्च ? श्रद्धाबलम्, वीर्यबलम्, ह्रीबलम्, अपत्राप्यबलम्, प्रज्ञाबलं चेति । अतो ह्रीमत्त्वान्न पिबन्ति, न तु प्रकृतिसावद्यत्वात् । यदि ह्रीमत्त्वात्तद-

तेन च स्मृतिनाशात् । अल्पकस्याप्यपानमनियमाद् विषवत् । दुश्चरितवचनं प्रमादस्थानत्वात् ।

अत एवात्रैव प्रमादस्थानग्रहणम्; नान्येषु; तेषां प्रकृतिसावद्यत्वात् । अत्यासेवितेन दुर्गतिगमनाभिधानम् । तत्प्रसङ्गेनाभीक्ष्णमकुशलसन्ततिप्रवृत्तेरापायिकस्य कर्मण आक्षेपाद्, वृत्तिलाभाद्वा ।

सुरामैरेयमद्यप्रमादस्थानमिति कोऽर्थः ? सुरा = अन्नासवः । मैरेयम् = द्रवासवः । ते वा कदाचिदप्राप्तप्रच्युतमद्यभावे भवत इति, अतो मद्यग्रहणम् ।

नद्याचरणमज्ञातमुदकादिवत् कस्मान्न पिबन्ति ? इत्यत आह—*तेन च स्मृतिनाशादिति* । मद्यं हि पिबतः कार्याकार्यस्मृतिर्नश्यतीति । यद्येवम्, अल्पकं तु पिबन्तु यावत्या मात्रया स्मृतिर्न नश्यतीति ? अत आह—*अल्पकस्याप्यपानम् । अनियमाद् विषवदिति* । यथा कालप्रकृतिशक्तियोगादल्पमपि विषं कदाचिन्मारयति, एवं मद्यमपि मदयतीति । *दुश्चरितवचन प्रमादस्थानत्वादिति* । मदेनाकुशलापरिहारात्, कुशलाकरणाच्च ।

अत्र प्रमादस्थानग्रहणं नान्येष्विति । *अत्रैव* शिक्षापदे *प्रमादस्थानग्रहणम्*; 'सुरामैरेयमद्यप्रमादस्थानं प्रहाय सुरामैरेयमद्यप्रमादस्थानात् प्रतिविरमामि' इति वचनात् । नान्येषु शिक्षापदेषु प्राणातिपातविरत्यादिषु प्रमादस्थानग्रहणम् । 'प्राणातिपातप्रमादस्थानं प्रहाय प्राणातिपातप्रमादस्थानात् प्रतिविरमामि' इति प्रमादस्थानं न पठ्यते, किं तर्हि ? 'प्राणातिपातं प्रहाय प्राणातिपातात् प्रतिविरमामि' इति । एवमदत्तादानादि योज्यम् । कस्माद् ? इत्याह—*तेषां प्रकृतिसावद्यत्वात्* । तेषां प्राणातिपातविरत्यादीनां शिक्षापदानां प्रकृतिसावद्यत्वात् । तदुक्तं भवति—प्रमादस्थानमेतदिति मद्यपानात् प्रतिविरन्तव्यम्, न तु प्रकृतिसावद्यमेतदिति । *अत्यासेवितेनेति* विस्तरः । "सुरामैरेयमद्यपानप्रमादस्थानेनासेवितेन भावितेन बहुलीकृतेन कायस्य भेदान्नरकेषूपपद्यते" इति *नन्दिकसूत्रे* वचनात् । *अत्यासेवितेन* मद्यपानेन *दुर्गतिगमनाभिधानम्* । *तत्प्रसङ्गेन* मद्यपानप्रसङ्गेन *अभीक्ष्णमजस्रमकुशलसन्ततिप्रवृत्तेः* । अकुशलानां या *सन्तति*स्तस्याः प्रवृत्तेः । *आपायिकस्या*पायप्रयोजनस्यापूर्वस्य *कर्मण आक्षेपा*दावेधः । यतः *वृत्तिलाभाद् वा* फलदानाय वा पूर्वोपचितस्य कर्मणो मरणावस्थायां वृत्तिलाभः । यतः तस्मादाक्षेपाद् वृत्तिलाभाद् वा दुर्गतिगमनाभिधानमिति सम्बन्धनीयम् ।

अन्नासव इति । तण्डुलकृतः । *द्रव्यासव* इति । इक्षुरसादिकृतः । *ते वेति* विस्तरः । सुरामैरेये *कदाचिदप्राप्तमद्यभावे* यदा नवे भवतः । कदाचित् *प्रच्युतमद्यभावे*; यदा अतिपुराणे भवतः । इत्यतो *मद्यग्रहणम्* । यदि मदनीयं ततो दोष

पूगफलकोद्रवादयोऽपि मदयन्तीति सुरामैरेयग्रहणम् । प्रज्ञप्तिसावद्यस्याप्यादरेण प्रहेयत्वे कारणज्ञापनार्थं प्रमादस्थानवचनम्; सर्वप्रमादास्पदत्वादिति ॥ ३४ ॥

य इमे त्रयः प्रातिमोक्षध्यानानास्रवसंवराः, किमेषां यत एको लभ्यते ततः शेषौ ? नेत्याह । किं तर्हि ?

सर्वोभयेभ्यः कामाप्तो वर्तमानेभ्य आप्यते ।

वर्तमानेभ्य एव स्कन्धायतनधातुभ्यः **कामाप्त** इति प्रातिमोक्षसंवरः । **सर्वेभ्य** इति मौलप्रयोगपृष्ठेभ्यः । **उभयेभ्य** इति सत्त्वासत्त्वाख्येभ्यः, प्रकृतिप्रतिक्षेपणसावद्येभ्यश्च वर्तमानेभ्य एव स्कन्धायतनधातुभ्यो लभ्यते; सत्त्वाधिष्ठानप्रवृत्तत्वात् । नातीतानागतेभ्यः; तेषामसत्त्वसंख्यातत्वात् ।

इत्यभिप्रायः । *पूगफलकोद्रवादयोऽपीति* । *आदि*शब्देन निष्पावादयो गृह्यन्ते । मद्यपानेनामद्यत्वेऽपि दोषः । सुरामैरेये न भवत इति सुरामैरेयस्वभावस्य मद्यस्य पाने दोष इत्यर्थः । *सर्वप्रमादास्पदत्वादिति* । सर्वप्रमादानां सर्वस्मृतिप्रमोषाणां प्राणातिपाताद्यकुशलानां हेतुभूतानां *स्थानमास्पदं* प्रतिष्ठेति प्रमादस्थानं मद्यपानम् ॥ ३४ ॥

यत एको लभ्यते इति । यतो मौलादिभ्यः सत्त्वासत्त्वाख्येभ्यश्च प्रातिमोक्षसंवरो लभ्यते । *ततः शेषौ* ध्यानानास्रवसंवरौ ।

मौलप्रयोगपृष्ठेभ्य इति । मौलप्रयोगपृष्ठेभ्योऽकुशलेभ्यः कर्मभ्यः मौलप्रयोगपृष्ठस्वभावाश्रयाणां यथाक्रमं प्रतिपक्षभूताः प्रातिमोक्षसंवराख्या विज्ञप्त्यविज्ञप्तयो लभ्यन्ते । *सत्त्वासत्त्वाख्येभ्यो* वस्तुभ्यः प्राणिवनस्पत्याद्यधिष्ठानलक्षणेभ्यः *प्रकृतिप्रतिक्षेपणसावद्येभ्यश्च* कर्मभ्यः प्राणातिपातवनस्पतिभङ्गादिलक्षणेभ्यः । तदेतदुभयमप्युभयाधिष्ठानम्, भवति—प्रकृतिसावद्यमपि सत्त्वाधिष्ठानमसत्त्वाधिष्ठानं च, प्रज्ञप्तिसावद्यमपि सत्त्वाधिष्ठानमसत्त्वाधिष्ठानं च । न पुनरेवं ग्रहीतव्यम्—प्रकृतिसावद्यं सत्त्वाधिष्ठानं प्रतिक्षेपणसावद्यमसत्त्वाधिष्ठानमिति । तत्र तावत् प्रकृतिसावद्यं सत्त्वाधिष्ठानं प्राणिवधादि, प्रज्ञप्तिसावद्यमपि सत्त्वाधिष्ठानं भिक्षोः स्त्रीहस्तादिग्रहणं सहागारशय्यादि च । प्रकृतिसावद्यमसत्त्वाधिष्ठानं जातरूपाद्यवहरणम्, प्रज्ञप्तिसावद्यमसत्त्वाधिष्ठानं वृक्षपत्रादिच्छेदो भिक्षो आहारादिषु च *विनयोक्तः* उपदेशः । *सत्त्वाधिष्ठानप्रवृत्तत्वादिति* । सत्त्वप्रज्ञप्त्यधिष्ठानप्रवृत्तत्वादित्यभिप्रायः । वर्तमाना एव हि धर्माः सत्त्वप्रज्ञप्त्यधिष्ठाना नातीतानागताः, तेषां निरूपाख्यकल्पत्वात् । अतएवाह—*नातीतानागतेभ्यः; तेषामसत्त्वसंख्यातत्वादिति* । ननु चासत्त्वप्रज्ञप्त्य-

मौलेभ्यः सर्वकालेभ्यो ध्यानानास्रवसंवरौ ॥ ३५ ॥

मौलेभ्य एव कर्मपथेभ्यो **ध्यानानास्रवसंवरौ** लभ्येते, न प्रयोगपृष्ठेभ्यः; कुत एव प्रज्ञप्तिसावद्येभ्यः **सर्वकालेभ्यश्च** स्कन्धायतनधातुभ्यो लभ्येते अतीतानागतेभ्योऽपि ।

अत एव चतुष्कोटिकं क्रियते—सन्ति तानि स्कन्धधात्वायतनानि येभ्यः प्रातिमोक्षसंवरः एव लभ्यते, न ध्यानानास्रवसंवराविति विस्तरः । प्रथमा कोटिः—प्रत्युत्पन्नेभ्यः सामन्तकपृष्ठेभ्यः प्रतिक्षेपणसावद्याच्च । द्वितीया—अतीतानागतेभ्यो मौलेभ्यः कर्मपथेभ्यः । तृतीया—प्रत्युत्पन्नेभ्यो मौलेभ्यः कर्मपथेभ्यः । चतुर्थी—अतीतानागतेभ्यः सामन्तकपृष्ठेभ्य इति ।

धिष्ठानप्रवृत्तोऽपि प्रातिमोक्षसंवरो भवति; सत्त्वासत्त्वाख्येभ्यः प्राप्यत इति वचनात् ? स चाप्येवं न प्रतिषिध्यते, यथैव हि सत्त्वाख्येभ्यो वर्तमानेभ्य एव लभ्यते इत्युच्यते, तथा वर्तमानेभ्य एवासत्त्वाख्येभ्योऽपि लभ्यते इति वक्तव्यम् । वर्तमानाधिष्ठानतामेव ह्यनेन वचनेनातिदिशति ।

न *प्रयोगपृष्ठेभ्यः* इति । समाहितावस्थायामेकान्तमौलत्वात्, असमाहितावस्थायां च न संवराभावात् । *कुत एव प्रज्ञप्तिसावद्येभ्य* इति । अभ्युपगमाभावात् । *सर्वकालेभ्यश्चेति ।* अतीतानागतयोरपि संवरयोर्लाभात्तत्सहभूचित्तवत् ।

अत एवेति । यस्मादेते संवरा एवं लभ्यन्ते । यथा विस्तरेणोक्तम्, *अतश्चतुष्कोटिकं क्रियते । विस्तर* इति । सन्ति तानि स्कन्धधात्वायतनानि येभ्यो ध्यानानास्रवसंवरौ लभ्येते, न प्रातिमोक्षसंवरः; सन्ति तानि येभ्यः प्रातिमोक्षसंवरः, न ध्यानानास्रवसंवरौ; सन्ति तानि येभ्य उभयं लभ्यते; सन्ति तानि येभ्यो नोभयं लभ्यते इति विस्तरार्थः । *प्रथमा कोटिः*—वर्तमानेभ्यः प्राणातिपातादिकर्मपथ*प्रयोगपृष्ठेभ्यः प्रतिक्षेपणसावद्याच्च* वृक्षभङ्गादिकाद् यः संवरः स प्रतिमोक्षसंवरः; "सर्वोभयेभ्यः" इति वचनात् । प्रयोगपृष्ठत्वात्तु न ध्यानानास्रवसंवरौ । *द्वितीया—अतीतानागतेभ्यो मौलेभ्यः कर्मपथेभ्यः* प्राणातिपातादिभ्यः कायिकवाचिकेभ्यः सप्तभ्यः संवरः यः, तौ ध्यानानास्रवसंवरौ; "मौलेभ्यः सर्वकालेभ्यः" इति वचनात् । न प्रातिमोक्षसंवरः अतीतानागतत्वात् । *तृतीया—प्रत्युत्पन्नेभ्यो मौलेभ्यः कर्मपथेभ्य* इति । प्रत्युत्पन्नकर्मपथत्वात् प्रातिमोक्षसंवरो भवति । मौलकर्मपथत्वाच्च ध्यानानास्रवसंवरौ । *चतुर्थी—अतीतानागतेभ्यः सामन्तकपृष्ठेभ्य* इति । अतीतानागतत्वान्न प्रातिमोक्षसंवरः, सामन्तकपृष्ठत्वान्न ध्यानानास्रवसंवरौ ।

न तु संवरकाले वर्तमानाः कर्मपथाः सन्तीति वर्तमानाधिष्ठानेभ्य इति वक्तव्यम् । अनागतानामेव संवरणं युज्यते, नातीतवर्तमानानाम् ॥ ३५ ॥

अथ किं संवरासंवरौ सर्वसत्त्वेभ्य एव लभ्येते सर्वाङ्गेभ्यः, सर्वकारणैश्च ? आहोस्विदस्ति भेदः ? नियतं तावत् लभ्यते

संवरः सर्वसत्त्वेभ्यो विभाषा त्वङ्गकारणैः ।

सर्वसत्त्वेभ्यः एव संवरो लभ्यते । केभ्यश्चिद् अङ्गेभ्यस्तु **विभाषा** । कश्चित् सर्वेभ्यो लभ्यते, भिक्षुसंवरः । कश्चिच्चतुर्भ्यः, ततोऽन्यः । कर्मपथा हि संवरस्याङ्गानि ।

कारणैरपि केनचित् पर्यायेण सर्वैः, केनचिदेकेन ।

केन तावत् सर्वैः ? यदलोभाद्वेषामोहाः कारणानीष्यन्ते ।

स्वसन्ताने वर्तमानेभ्यः कर्मपथेभ्यः संवरो न युज्यते इति पश्यन्नाह—*न तु संवरलाभकाले वर्तमानाः कर्मपथाः सन्तीति* । *वर्तमानाधिष्ठानेभ्यस्तेभ्यः कर्मपथेभ्य इति वक्तव्यमिति* शिक्षयत्याचार्यः । यतो वस्तुनः प्रतिविरमति; तस्य वर्तमानत्वासम्भवात् । *नातीतवर्तमानानामिति* । उत्पन्नत्वादेषां *संवरणं न युज्यते* । न ह्युत्पन्नानामनुत्पत्तिः शक्यते कर्तुम् । *अनागतानां* तु शक्यत इति । तेषामेव संवरणं युज्यत इत्याचार्याभिप्रायः ।

वैभाषिकाणां तु तथा वचनेऽयमभिप्रायो लक्ष्यते—प्राणातिपातादिप्रयोगमौलपृष्ठानां यथाक्रमं संवरणाय प्रातिमोक्षसंवरप्रयोगमौलपृष्ठानि प्रवर्तन्ते । मैतानि प्रवर्तिष्यन्त इति । अर्थत एवैतानि प्रतिपक्षभूतानि, तानि रुन्धन्तीवोत्पद्यन्ते । प्रयोगः—प्रयोगमेवं ब्रवीतीव त्वामहं संवृणोमि । मा त्वमुत्था इत्येवं यावत् । पृष्ठः—पृष्ठमेवं ब्रवीतीवेति योज्यम् । तथा स्कन्धधात्वायतनानां कर्मपथप्रयोगमौलपृष्ठस्वभावानां वर्तमानानां रुन्धानो वर्तमानेभ्यस्तेभ्यो लभ्यते । प्रातिमोक्षसंवर इत्युच्यत इति । तस्मान्नैवं वक्तव्यमिति ॥ ३५ ॥

कश्चित् सर्वेभ्य इति विस्तरः । *भिक्षुसंवरः सर्वेभ्यः* कर्मपथेभ्यो लभ्यते । सर्वकर्मपथा वर्जनीया इत्यर्थः । *कश्चिच्चतुर्भ्यस्ततोऽन्यः* । *ततो भिक्षुसंवरादन्यः* । *संवरः* श्रामणेरादिसंवरः चतुर्भ्य *एवाङ्गेभ्यो लभ्यते* । कायिकेभ्यः प्राणातिपातादिभ्यस्त्रिभ्यः, वाचिकाच्च मृषावादात् ।

यदलोभाद्वेषामोहाः कारणानीति । संवरकारणानि द्विधा इष्यन्ते—अलोभाद्वेषामोहा वा कारणानि, मृदुमध्याधिमात्राणि वा चित्तानीति । यदि पूर्वैः

केनैकेन ! यदि मृदुमध्याधिमात्राणि चित्तानि कारणानीष्यन्ते ।

पश्चिमं पर्यायं नियमय्योच्यते —

अस्ति संवरस्थायी सर्वसत्त्वेषु संवृतो न सर्वाङ्गैः, न सर्वकारणैः । यो मृदुना चित्तेन मध्येनाधिमात्रेण वा उपासकोपवासश्रामणेरसंवरं समादत्ते ।

अस्ति सर्वसत्त्वेषु संवृतः सर्वाङ्गैश्च, न तु सर्वकारणैः । यो मृदुना चित्तेन मध्येनाधिमात्रेण वा भिक्षुसंवरं समादत्ते ।

अस्ति सर्वसत्त्वेषु सर्वाङ्गैः, सर्वकारणैश्च । यस्त्रिविधेन चित्तेन त्रीन् संवरान् समादत्ते ।

अस्ति सर्वसत्त्वेषु सर्वकारणैश्च, न तु सर्वाङ्गैः । य उपासकोपवासश्रामणेर-संवरान् मृदुमध्याधिमात्रैः समादत्ते ।

यस्तु न सर्वसत्त्वेषु स्यादीदृशो नास्ति; यस्मात् सर्वसत्त्वानुगते कल्याणाशये स्थितः संवरं प्रतिलभते, नान्यथा; पापाशयस्यानुपरतत्वात् ।

पञ्च नियमान् कुर्वन् प्रातिमोक्षसंवरं प्रतिलभते, सत्त्वाङ्गदेशकालसमय-नियमात् । १. अमुष्मात् सत्त्वाद्विरमामीति सत्त्वनियमः । २. अमुष्मादङ्गादिति अङ्गनियमः । ३. अमुष्मिन् देश इति देशनियमः । ४. मासाद्यावदिति काल-नियमः । ५. अन्यत्र युद्धादिति समयनियमः । सुचरितमात्रं तु स्यात् तथा गृह्णतः ।

पर्यायोऽभिप्रीयते, *सर्वैः कारणैरलोभादिस्वभावैर्लभ्यते* संवरः; कुशले समुत्थापके चेतसि तेषां युगपद्भावात् । *यदि मृद्वादीनीति चित्तानि कारणानि इष्यन्ते* । एकेन कारणेन लभ्यते; तेषामयुगपद्भावात् ।

पश्चिमं पर्यायमिति । मृदुतादिकारणपक्षम् ।

अस्ति संवरस्थायीति विस्तरः । *सर्वसत्त्वेषु संवृतः* सर्वसत्त्वानुगते कल्याणाशये सति संवरोत्पत्तेः । *न सर्वाङ्गैः*; उपासकादिसंवरस्य सर्वाङ्गाप्रतिविरतत्वात् । *न सर्वकारणैः*, मृद्वादीनां कारणत्वेन युगपदसम्भवात् । भिक्षुसंवरस्तु सर्वाङ्गैरपि सर्वाङ्गप्रतिविरतत्वात् ।

यस्त्रिविधेन चित्तेन त्रीन् संवरान् समादत्त इति । तद्यथा—मृदुना चित्तेन उपासकसंवरं समादत्ते, मध्येन श्रामणेरसंवरम्, अधिमात्रेण भिक्षुसंवरमिति ।

सर्वकारणैश्च न तु सर्वाङ्गैरिति । उपासकादिसंवराणामेकैकस्य मृद्वाद्येकैक-कारणत्वात् । *तथा गृह्णत* इति पञ्चनियमक्रियया गृह्णतः ।

कथमशक्येभ्यः संवरलाभः ? सर्वसत्त्वजीवितानुपघाताध्याशयेनाभ्युपगमात्।

यदि पुनः शक्येभ्य एव संवरो लभ्यते, चयापचययुक्तः स्यात्, शक्याशक्यानामितरेतरसञ्चारात्। एवं च सति विनापि लाभत्यागकारणाभ्यां संवरस्य लाभत्यागौ स्यातामिति वैभाषिकाः।

नैवं भविष्यति। यथा ह्यपूर्वतृणाद्युत्पत्तौ शोषे वा संवरस्य वृद्धिह्रासौ न भवतः, तथा शक्याशक्यसंचारेऽपि न स्याताम्।

न सत्त्वानां पूर्वं पश्चाच्च भावात्, तृणादीनां चाभावात्[1]।

को न्वत्र विशेषः—न वा भवेदसत्सु तृणादिषु संवरः, तद्वदशक्यो वा भवेत् ?

यदा[2] परिनिर्वृता न भवन्त्येव, तदा कथं संवरह्रासो न स्यादिति नैष युक्तः परिहारः। तस्मात् पूर्वक एव हेतुः[3] साधुः।

कथमशक्येभ्य इति। ये हन्तुमेव न शक्यास्तेभ्योऽशक्येभ्यः सत्त्वेभ्यः कथं संवरलाभः ? अत्र *आचार्यः* समाधिमाह—*सर्वसत्त्वजीवितानुपघाताध्याशयेनाभ्युपगमादिति*। सर्वसत्त्वानां जीवितस्यानुपघातेनाध्याशयेन संवराभ्युपगमात्।

वैभाषिका अप्यस्यैव प्रश्नस्य परिहारान्तरमाहुः—*यदि पुनः शक्येभ्य एवेति* विस्तरः। *चयापचययुक्तः स्यात्*। शक्यतामागतेषु सत्त्वेषु संवरश्चीयेत, अशक्यतामागतेषु अपचीयेत। *शक्याशक्यानां* मनुष्यादिदेवादीना*मितरेतरसञ्चारात्*। देवादयो मनुष्यादीन् सञ्चरन्ति, मनुष्यादयश्च देवादीनिति।

इमं *वैभाषिक*परिहारं सावकाशं पश्यन्नाचार्य आह—*नैवं भविष्यतीति* विस्तरः। नैवं चयापचययुक्तः संवरो भविष्यति। कथं कृत्वा ? *यथा ह्यपूर्वतृणाद्युत्पत्तौ*। *शोषे वा*। तृणादीनाम्। यद्यपि तृणादिभ्योऽपि संवरो लभ्यते तथापि *संवरस्य वृद्धिह्रासौ न भवतः। एवं शक्याशक्यसंचारेऽपि न स्यातां वृद्धिह्रासौ*। चयापचयावित्यर्थः। तस्माच्छक्येभ्य एव संवरो लभ्यते। न चायं दोषः स्यादिति।

वैभाषिका आहुः—*न सत्त्वानामिति* विस्तरः। न तदेवम्, *यथा ह्यपूर्वतृणाद्युत्पत्ताविति* विस्तरेण यदुक्तम्। किं कारणम् ? सत्त्वानां *पूर्वं* सञ्चारात् *पश्चाच्च भावात्। तृणादीनां* स्वभावात् पूर्वं पश्चाच्चाभावात्। अतो न तृणादिदृष्टान्तेन चयापचयदोषो निवार्यते। एवं वैधर्म्यमात्रमुक्तम्, न साध्यसाधनार्थं इति।

आचार्यः पुनराह—*यदा परिनिर्वृता न सन्त्येवेति* विस्तरः। *तस्मात् पूर्वक*

१. स्वभावात्—का०। २. यदा च—का०। ३. परिहारः—का०।

एवं तर्हि पूर्वबुद्धपरिनिर्वृतेभ्य उत्तरेषां बुद्धानां प्रातिमोक्षसंवरस्यालाभात् कथं शीलन्यूनता न प्रसज्येत ? सर्वेषां सत्त्वेभ्यो लाभात्। यदि हि तेऽप्यभविष्यन्, तेभ्योऽपि तेऽलप्स्यन्त ।

उक्तं यतः संवरो लभ्यते ॥

असंवरस्तु सर्वेभ्यः सर्वाङ्गेभ्यो न कारणैः ॥ ३६ ॥

असंवरस्तु सर्वसत्त्वेभ्यो लभ्यते, सर्वकर्मपथेभ्यश्च । नास्ति हि विकलेनासंवरेणासंवरिकः। न तु सर्वकारणैः; युगपत् मृद्वादिचित्तासम्भवात् । यो मृदुना चित्तेनासंवरं प्रतिलभते सोऽधिमात्रेणापि चित्तेन प्राणिनं जीविताद् व्यपरोपयन् मृदुनैवासंवरेण समन्वागतो भवति, अधिमात्रया तु प्राणातिपातविज्ञप्त्या ।

एवं मध्याधिमात्रेण योज्यम् ।

तत्रेमे आसंवरिकाः, तद्यथा—औरभ्रिकाः, कौक्कुटिकाः, सौकरिकाः, शाकुनिकाः, मात्सिकाः, मृगलुब्धकाः, चौराः, वध्यघातकाः, बन्धनपालकाः,

---

एव हेतुः साधुरिति । सर्वसत्त्वजीवितानुपघाताध्याशयेनाभ्युपगमादिति । अतः शक्याशक्येभ्यः संवरो लभ्यत इति सिद्धम् ।

एवं तर्हि यदि सर्वसत्त्वेभ्यो लभ्यते प्रतिमोक्षसंवरः । *पूर्वबुद्धपरिनिर्वृतेभ्यस्तस्यालाभाच्छीलन्यूनता स्यात्* । सत्त्वानां पूर्वेभ्यो न्यूनत्वाद् । *आचार्य* आह—*सर्वेषां* बुद्धानां पूर्वं पश्चाच्चोत्पन्नानामविशेषेण *सर्वसत्त्वेभ्यो लाभाद्* । *यदि हि तेऽपि* अपरिनिर्वृता *अभविष्यन् सम्प्रति तेभ्योऽपि तेऽलप्स्यन्त* इति ।

सर्वकर्मपथेभ्य इति । कायिकवाचिकेभ्यः । *नास्ति हि विकलेनासंवरेणेति* । प्राणातिपातेनैव, नादत्तादानेनेत्येवमादि । *मृदुनैवासंवरेण समन्वागत* इति । पूर्वप्रतिलब्धत्वात् । *अधिमात्रया तु प्राणातिपातविज्ञप्त्या* । किम् ? समन्वागत इति वर्तते । न विपाकफलविशेष इति । *एवं मध्याधिमात्रेण च योज्यमिति* । यो मध्येन चित्तेनासंवरं प्रतिलभते सोऽधिमात्रेणापि चित्तेन प्राणिनो जीवताद् व्यवरोपयन् मध्येनैवासंवरेण समन्वागतो भवति, अधिमात्रया तु प्राणातिपातविज्ञप्त्या । एवं योऽधिमात्रेण यावदधिमात्रेणैवासंवरेण समन्वागतो भवति, अधिमात्रया च प्राणातिपातविज्ञप्त्या । इत्थमपि च योज्यम्—योऽधिमात्रचित्तेनासंवरं प्रतिलभते स मृदुनापि चित्तेन प्राणिनो जीविताद् व्यवरोपयन् अधिमात्रेणैवासंवरेण समन्वागतो भवति, मृद्व्या तु प्राणपतिपातविज्ञप्त्या इत्येवमादि ।

नागबन्धाः[1], श्वपाकाः, वागुरिकाश्च ।

राजानो दण्डनेतारो व्यावहारिकाश्च अर्थत आसंवरिकाः । असंवरे भवत्वात् तत्रस्थतया असंवर एषामस्तीति आसंवरिका वा । उरभ्रान् घ्नन्तीति औरभ्रिकाः । एवमन्येऽपि योज्याः ।

युक्तस्तावत् संवरस्य सर्वसत्त्वेभ्यो लाभः, सर्वसत्त्वहिताध्याशयेन ग्रहणात्; औरभ्रिकादीनां तु मातापितृपुत्रदारादिष्वविपन्नाशयानां जीवितहेतोरप्यहन्तुकामानां कथमसंवरः सर्वसत्त्वेभ्यो युज्यते ? मात्रादीनपि हि त उरभ्रीभूतान् हन्युः ।

न हि तावत्ते एव[2] त[2] इति विद्वांसो हन्युः । आर्यीभूतानां च पुनः पशू-भवितुं नास्त्यवकाश इति तेभ्यः कथं स्यात् ।

यदि वानागतात्मभावापेक्षया वर्त्तमानादसंवृतः स्याद्, उरभ्रादीनपि ते पुत्रीभूतान् सर्वथा न हन्युरिति न स्यात् तेभ्योऽसंवरः ।

कथं हि नाम जिघांसतामेव तेभ्यो न स्यादसंवरः ?

एतन्मात्रादिषु समानम् । कथं हि नामाजिघांसतामेव तेभ्यः स्यादसंवर इति ? यश्चौरभ्रिको जन्मनाप्यादत्ते स्वदारपरितुष्टो मूकश्च, कथमस्य पूर्वाङ्गेभ्यो

नागबन्धा हस्तिपकाः । *वागुरिका* इति । पम्पा नाम प्राणिजातिर्वा-गुराख्या, तां घ्नन्तीति वागुरिकाः ।

अर्थत आसंवरिका इति । राजानश्चाधिकरणस्थाश्च दण्डनेतृत्वादिहापठिता अपि आसंवरिका एव द्रष्टव्याः । *एवमन्येऽपि योज्या* इति । कुक्कुटान् घ्नन्तीति कौक्कुटिका इत्येवमादीनि ।

युक्तस्तावदिति विस्तरेणोक्त्वा यावत् *कथमसंवरः सर्वसत्त्वेभ्यो युज्यत* इति प्रश्निते *वैभाषिकः* परिहारमाह—*मात्रादीनपि हीति* विस्तरः । *आचार्य* आह—*न हि तावत् त एव त* इति । ते मात्रादय इति जानाना हन्युरित्यघात्येभ्यस्तेभ्योऽ-संवरः कथं युज्यते । किञ्च—*आर्यीभूतानां पुनः पशूभवितुं नास्त्यवकाशः* । तेषा-मुरभ्राद्युपपत्त्यसम्भवाद् । *तेभ्यः कथमसंवरः स्यात्* । *यदि वा अनागतात्मभावा-पेक्षया* उरभ्रादयो भविष्यन्तीति *वर्तमानान्मात्रादेरसंवरः स्यात्* । *उरभ्रानपि ते* औरभ्रिकाः पुत्रीभूताननागते जन्मनि *सर्वथा न हन्युरिति न स्यात्तेभ्योऽसंवरः* ।

वैभाषिक आह—*कथं हि नाम जिघांसतामिति* विस्तरः । *आचार्य* आह—*एतन्मात्रादिषु समानमिति* विस्तरः । *कथं हि नामाजिघांसतां* पुत्रादिभूताना-मौरभ्रिकादीनां *तेभ्यो* मात्रादिभ्यः *स्यादसंवर* इति ।

१. नागबन्धकाः—का० । २-२. त एव—का० ।

ऽसंवरः स्यात्? आशयस्याविपन्नत्वात्। मूकोऽपि च वाक्प्रापणीयमर्थं कायेन प्रापयितुं शक्त इति।

यस्तर्हि द्वे त्रीणि वा शिक्षापदानि समादत्ते। सर्वथा नास्ति विकलः प्रादेशिकश्चासंवरिक इति **वैभाषिकाः**।

यथाभ्युपगमं विकलोऽपि स्यात् प्रादेशिकोऽप्यसंवरः संवरश्च, अन्यत्राष्टविधादिति **सौत्रान्तिकाः**; तन्मात्रशीलदौःशील्यप्रतिबन्धात्॥ ३६॥

उक्तमिदमसंवरस्य येभ्यो लाभः॥

कथं तु लाभ इति नोक्तम्, तत इदमुच्यते—

असंवरस्य क्रियया लाभोऽभ्युपगमेन वा।

द्वाभ्यां कारणाभ्यामसंवरो लभ्यते— १. वधप्रयोगक्रियया तत्कुलीनैः; २. तत्कर्माभ्युपगमाच्चान्यत्र कुलीनैः—वयमप्यनया जीविकया जीविष्याम इति।

शेषाविज्ञप्तिलाभस्तु क्षेत्रादानादरेहणात्॥ ३७॥

क्षेत्रं वा तद्रूपं भवति, यत्रारामादिप्रदानमात्रेणाविज्ञप्तिरुत्पद्यते; यथा—औपधिकेषु पुण्यक्रियावस्तुषु। अथ वा समादानमादत्ते—बुद्धमवन्दित्वा न भोक्ष्ये, तिथिमासार्धमासभक्तानि वा नित्यं करिष्यामीत्यादि। आदरेण वा तद्रूपेण क्रियामीहते कुशलामकुशलां वा, यतोऽस्याविज्ञप्तिरुत्पद्यते॥ ३७॥

उक्तमेतद्यथा संवरासंवरेतराणां प्रतिलाभः॥

विकलः । कर्मपथाङ्गतः। *प्रादेशिकोऽपि स्यात्*। एकस्यापि अङ्गस्य अविरमात्। सत्त्वदेशकालसमयनियमयोगेन प्रदेशविरतत्वात्।

संवरश्च तथैव विकलोऽपि प्रादेशिकोऽपि स्यात्। *अन्यत्राष्टविधात्* पूर्वोक्तात् प्रातिमोक्षसंवरात्। कस्माद्? इत्याह—*तन्मात्रशीलदौःशील्यप्रतिबन्धादि*ति। असंवरस्तन्मात्रं शीलं प्रतिबध्नाति, संवरश्च तन्मात्रं दौःशील्यं प्रतिबध्नातीति॥ ३६॥

*तत्कुलीनैरि*ति आसंवरिककुलीनैः।

"*क्षेत्रादानादरेहनात्*" इति। *आदरेण* ईहनं क्रियारम्भः। क्षेत्रं *चादानं च* आदरेहनं चेति समासः। तस्मादविज्ञप्तिरुत्पद्यते। *तिथी*ति विस्तरः। तिथिभक्तम्। यावदर्धमासभक्तमित्यर्थगतिः। *आदि*शब्देन मण्डलकरणादि गृह्यते। *आदरेण वा तद्रूपेणे*ति। तीव्रक्लेशतया, तीव्रप्रसादतया चेत्यर्थः॥ ३७॥

त्याग इदानीं वक्तव्यः । तत्र तावत्—

प्रातिमोक्षदमत्यागः शिक्षानिक्षेपणाच्च्युतेः ।
उभयव्यञ्जनोत्पत्तेर्मूलच्छेदान्निशात्ययात् ॥ ३८ ॥

दाम्यन्त्यनेनेति दमः संवरोऽभिप्रेतः; तेनेन्द्रियदमनात् । चतुर्भिः कारणैः प्रातिमोक्षसंवरस्य त्यागः, स्थापयित्वोपवासम्—१. शिक्षापदानां विज्ञपुरुषस्यान्तिके प्रत्याख्यानाद्, २. आश्रयतः निकायसभागत्यागात्, ३. युगपदुभयव्यञ्जनप्रादुर्भावात्, ४. कुशलमूलसमुच्छेदाच्च ।

उपवाससंवरस्य त्वेभिश्चतुर्भिः, ५. आरात्रिक्षयाच्च । तान्येतान्यभिसमस्य पञ्च त्यागकारणानि भवन्ति ।

किं पुनः कारणमेभिः कारणैस्त्यागो भवति ? समादाननिरुध्यविज्ञप्त्युपादात्, आश्रयत्यागाद्, आश्रयविकोपनात्, निदानच्छेदात्, तावदेवाक्षेपाच्च ॥ ३८ ॥

पतनीयेन चेत्येके,

अन्ये पुनराहुः—चतुर्णां पतनीयानामन्यतमेन भिक्षुश्रामणेरसंवरत्याग इति ।

सद्धर्मान्तर्धितोऽपरे ।

सद्धर्मस्यान्तर्धानादित्यपरे; यस्मादन्तर्हिते सद्धर्मे सर्वशिक्षासीमाकर्मान्ताः प्रतिप्रस्रभ्यन्त इति ।

समादानविरुद्धविज्ञप्त्युत्पादादिति । यावज्जीवं प्राणातिपातादिभ्यः प्रतिविरमामीति यत् समादानं तेन विरुद्धाया विज्ञप्तेरुत्पादादिति प्रथमेन कारणेन प्रातिमोक्षसंवरत्यागः । *आश्रयत्यागादिति* । येनाश्रयेण संवरो गृहीतस्तस्य त्यागान्मरणादिति द्वितीयेन कारणेन तत्त्यागः । *आश्रयविकोपनादिति* । यादृशेन आश्रयेण संवर उपात्तस्तादृशो न भवति विकोपनात् इति तृतीयेन कारणेन तत्त्यागः । *निदानच्छेदादिति* । निदानं कुशलमूलानि, तस्य च्छेदात्, चतुर्थेन कारणेन तत्त्यागः । *तावदेवाक्षेपाच्चेति* । उपवाससंवरस्याहोरात्रमाक्षेपः, इति पञ्चमेन कारणेन तस्योपवाससंवरस्य त्यागः पूर्वोक्तैश्चतुर्भिः कारणैरिति ॥ ३८ ॥

पतनीयेन चेति । एभिश्च यथोक्तैः पञ्चभिः कारणैः । पतनीयेन चेति पतत्यनेनेति पतनीयम् । *तच्चतुर्विधम्*—अब्रह्मचर्यं यथोक्तप्रमाणम्, अदत्तादानम्, मनुष्यवधः, उत्तरिमनुष्यधर्ममृषावादश्चेति ।

धनर्णवत्तु काश्मीरैरापन्नस्येष्यते द्वयम् ॥ ३९ ॥

काश्मीरास्तु खलु वैभाषिकाः एवमिच्छन्ति—न मौलीमप्यापत्तिमापन्नस्यास्ति भिक्षुसंवरत्यागः। किं कारणम्? न ह्येकदेशक्षोभात् कृत्स्नसंवरत्यागो युक्त इति। नैव चान्यामप्यापत्तिमापन्नस्यास्ति शीलच्छेदः। किं तर्हि? द्वयमस्य भवति—शीलम्, दौःशील्यं च। यथा कस्यचिद्धनं स्याद्, ऋणं च। आविष्कृतायां तु तस्यामापत्तौ शीलवान् भवति, न दुःशीलः; यथा ऋणं शोधयित्वा धनवान् भवति, न ऋणवान् इति।

यत्तर्हि भगवतोक्तम्—"भिक्षुर्भवत्यश्रमणोऽशाक्यपुत्रीयो ध्वस्यते भिक्षुभावात्, कतमस्य भवति श्रामण्यं ध्वस्तं पतितं पराजितम्" इति? परमार्थभिक्षुत्वं सन्धायैतदुक्तम्।

इदमभिसाहसं वर्तते? किमत्राभिसाहसम्? यद् भगवता नीतार्थं पुनरन्यथा नीयते, दौःशील्याय च बहुक्लेशेभ्यः प्रत्यया दीयन्ते।

कथमेतन्नीतार्थम्? एष हि विनये निर्देशः—"चतुर्विधो भिक्षुः—१. संज्ञाभिक्षुः, २. प्रतिज्ञाभिक्षुः, ३. भिक्षत इति भिक्षुः, ४. भिन्नक्लेशत्वात् भिक्षुः।

"धनर्णवत्तु काश्मीरैरापन्नस्येष्यते"। आगमाद्, युक्तितश्च। तत्रायमागमः। *विनय* उक्तम्—"दुःशीलश्चेत् भिक्षुर्भिक्षुणीमनुशास्ति संघावशेषमापद्यते" (   ) इति। आपन्नपाराजिको हि भिक्षुर्दुःशीलोऽभिप्रेतः, नानापन्नपाराजिकः; प्रकृतस्थः शीलवानिति विपर्ययेण वचनात्। अतोऽवगम्यते—अस्त्यस्य दुःशीलस्यापि सतो भिक्षुभावः, यस्मात् सङ्घावशेषमापद्यत इत्युक्तमिति। युक्तिरपि—*न ह्येकदेशक्षोभात् सकलसंवरत्यागो युक्त* इति। *न मौलीमप्यापत्तिम् आपन्नस्येति*। पतनीयामप्यापत्तिमापन्नस्येत्यर्थः। *नैव चान्यापत्तिमिति*। सङ्घावशेषादिकम्। *आविष्कृतायामिति*। देशितायाम्।

यत्तर्हि भगवतोक्तमिति विस्तरेण यावत् *पराजितमिति*। तत् कथमिति वाक्याध्याहारः। *परमार्थभिक्षुत्वं सन्धायैतदुक्तमिति*। सत्यदर्शनाभव्यत्वेन तस्यापन्नस्य परमार्थभिक्षुत्वाप्राप्तेः।

बहुक्लेशेभ्यो नन्दप्रभृतिभ्यो मौल्याप्यापत्त्या न भिक्षुत्वं नश्यति इति विदित्वा तां कुर्युरिति वाक्यार्थः।

संज्ञाभिक्षुरिति। यस्यानुपसम्पन्नस्य भिक्षुरिति नाम। *प्रतिज्ञाभिक्षुरिति*। अब्रह्मचर्यादिप्रवृत्तो दुःशीलः। *भिक्षत इति भिक्षुरिति*। याचनकः। *भिन्नक्लेश-*

अस्मिंस्त्वर्थे ज्ञप्तिचतुर्थकर्मोपसम्पन्नो भिक्षुः" (   ) इति । न चासौ पूर्वं परमार्थभिक्षुरासीद्यतः पश्चादभिक्षुर्भवेत् ।

यच्चोक्तम्—एकदेशक्षोभादिति, अत्र शास्त्रैव दत्तोऽनुयोगः—"तद्यथा तालो मस्तकाच्छिन्नोऽभव्योऽङ्कुरितत्वाय, अभव्यो विरूढिं वृद्धिं विपुलतामाप्तुम्" (   ) इत्युपमां कुर्वता ।

कः पुनरुपमार्थः ? एकमेकदेशस्यापि मूलभूतस्य च्छेदादभव्यः संवरशेषो विरोढुमिति । स च गुर्वीं भिक्षुभावमर्यादामेदिनीं मौलीमापत्तिमापद्यमानस्तीव्रानपत्राप्ययोगात् संवरस्य मूलं च्छिनत्तीति युक्तः कृत्स्नसंवरत्यागः ।

यस्य चैकग्रासपरिभोगोऽपि, एकपादपार्ष्णिप्रदेशपरिभोगोऽपि च नाभ्यनुज्ञायते साङ्घिकयोराहारविहारयोः, सर्वभिक्षुसंभोगबहिष्कृतश्च शास्त्रा; यं चाधिकृत्योक्तम्—

"नाशयत कारण्डवकं कशंबकमपकर्षत ।
अथोत्प्लाविनं वाहयत अभिक्षुं भिक्षुवादिनम्" ।। (   ) इति ।

तस्य कीदृशो भिक्षुभावः ? यादृशोऽस्तु, अस्ति तु भिक्षुभावः । तथा हि—"चत्वारः श्रमणा न पञ्चमोऽस्ति चुन्द" इति ।

त्वाद् *भिक्षुरिति* । अर्हन् ।

अस्मिंस्त्वर्थ इति । यद् भगवतोक्तम्—'*अभिक्षुर्भवत्यश्रमणः*' इति विस्तरेण, एतस्मिन्नर्थे । यथोक्तेभ्यश्चतुर्भ्यो भिक्षुभ्योऽन्य एवायं पञ्चमो *ज्ञप्तिचतुर्थोपसम्पन्नो भिक्षुरिति* । यदप्युक्तम्—परमार्थभिक्षुत्वं सन्धायैतदुक्तम्, तत् प्रत्याह—*न चासौ पूर्वं परमार्थभिक्षुरासीद्, यतः पश्चादभिक्षुर्भवेत्* । "अभिक्षुर्भवत्यश्रमणः" इति वचनात् ।

इत्युपमां कुर्वतेति । *मस्तकच्छिन्नतालोपमां* कुर्वता शास्त्रैव दत्तोऽनुयोग इति सम्बन्धनीयम् । परिहृतः प्रश्न इत्यर्थः । *एकग्रासपरिभोग* आहारस्य । *एकपार्ष्णिप्रदेशपरिभोगो* विहारस्येति सम्बन्धः । *सर्वभिक्षुसम्भोगबहिष्कृतश्च शास्त्रेति* । सर्वस्मात् भिक्षुभिः सहसम्भोगादेकपंक्तिभोजनादिकाद् बहिष्कृतो बुद्धेन ।

नाशयत कारण्डवकमिति । *कारण्डवको* यवाकृतित्वात् यवस्तृणविशेषो यो यवदूषीत्युच्यते । एवमसावभिक्षुर्भिक्ष्वाकृतिरिति । *कशंबकं* नाम पूतिकाष्ठम् । एवमसौ पूतिभूतो भिक्षुः । तं शीलवत् सङ्घाद् *यूयमपकर्षतेति* भगवान् भिक्षून् आज्ञापयामास । *अथोत्प्लाविनं वाहयतेति* । *उत्प्लावी* नाम व्रीहिमध्येऽभ्यन्तर-

भगवानवोचत्—

"मार्गजिनो मार्गदेशिको मार्गे जीवति यश्च मार्गदूषी" इति ? अस्त्येतदुक्तम्; स त्वेष आकृतिमात्रावशेषत्वाच्छ्रमण उक्तो दग्धकाष्ठ-शुष्कह्रद-शुकनाशा-पूतिबीजालातचक्र-मृतसत्त्ववत् ।

यदि हि दौःशील्यादभिक्षुः स्यात् शिक्षादत्तको न स्यात् ?

न वयं ब्रूमः—सहाध्यापत्त्या सर्वः पाराजिको भवति । यस्तु पाराजिकः सोऽवश्यमभिक्षुः । कश्चित्तु सन्तानविशेषान्न पाराजिक एकचित्तेनाप्यप्रतिच्छादनादिति व्यवस्थापितं **धर्मस्वामिना** ।

यदि तर्हि पाराजिको न भिक्षुः, किं पुनर्न प्रव्राज्यते ? तीव्रानपत्राप्यविपादितत्वात् सन्ततेः संवराभव्यात्, न तु खलु भिक्षुभावापेक्षया । तथा ह्यसौ

तण्डुलहीनो व्रीहिरेव । तथासौ शीलसारहीनो भिक्ष्वाकृतिः, तं प्रवाहयत । निष्कामयतेत्यर्थः । इदमत्रोदाहरणम् ।

मार्गजिनः शैक्षाशैक्षः । *मार्गदेशिको* बुद्धः । *मार्गे जीवति* शीलवान् भिक्षुः, मार्गनिमित्तं जीवनात् । *मार्गदूषी* दुःशीलः । *दग्धकाष्ठे*ति विस्तरः । यथा यद् दग्धं न तत् काष्ठम्, पूर्वकाष्ठाकृतिमात्रावशेषसाधर्म्यात् तद् दग्धकाष्ठम् इत्युच्यते । *ह्रदश्च शुष्कोऽपि* ह्रद इत्युच्यते । *शुकनासा* गृहादिषु रूपकारकृता शुकनासाकृतित्वात् शुकनासेत्युच्यते । एवमसौ भिक्ष्वाकृतिसामान्यमात्रावशेषा च्छ्रमण उक्तः । *पूतिबीजम्* । अङ्कुराजनकत्वात् अबीजमपि बीजमित्युच्यते, तदाकारमात्रावशेषत्वात् । *अलातचक्रं* चक्रमिति । चक्राकृतित्वात् । *मृतसत्त्वश्च* । असत्त्वोऽपि सत्त्व इत्युच्यते; सत्त्वाकृतिमात्रावशेषत्वात् । तद्वदेष द्रष्टव्यः ।

*शिक्षादत्तको नाम भिक्षु*रधिमात्ररागतया स्त्रिया अब्रह्मचर्यं कृत्वा तदनन्तरमेव जातसंवेगः कष्टं मया कृतमित्येकस्मिन्नपि प्रतिच्छादनचित्तेऽनुत्पन्ने भिक्षुसङ्घमुपगम्याविष्करोति—इदं मया पापं कृतमिति । स आर्यसङ्घोपदेशात् सर्वभिक्षुनवकान्तिकत्वादि दण्डकर्म कुर्वाणः शिक्षादत्तक इत्युच्यते । तद् *यदि दौःशील्यादभिक्षुरेव स्यात्* । स न स्यात् । न हि तस्य पुनरुपसम्पादनं क्रियते, भिक्षुश्च स व्यवस्थाप्यते । तस्मात् न दौःशील्यात् अभिक्षुत्वमिति । *न ब्रूम* इति विस्तरः । *न वयं ब्रूमः—सहाध्यापत्त्याऽब्रह्मचर्यादेव सर्वः पाराजिको भवति । किं तर्हि ?* प्रतिच्छादनचित्तेन ।

किं न पुनः प्रव्राज्यते । अनिक्षिप्तशिक्ष इत्यध्याहार्यम् । *तीव्रानपत्राप्यविपादितत्वात्* । तीव्रेणानपत्राप्येन विपादितास्य सन्ततिः, तस्याः *सन्ततेरेवं*

निक्षिप्तशिक्षोऽपि न प्रव्राज्यते ।

कश्चायमनर्थे निर्बन्धो यद्यसौ तथाभूतोऽपि भिक्षुः, नमोऽस्तु तस्मै तादृशाय भिक्षुत्वाय !

सद्धर्मान्तर्धाने तु विनयकर्माभावादपूर्वसंवरलाभो नास्ति । लब्धस्य तु नास्ति त्यागः ॥ ३९ ॥

अथ ध्यानानास्रवसंवरयोः कथं त्यागः ?

भूमिसञ्चारहानिभ्यां ध्यानाप्तं त्यज्यते शुभम् ।

सर्वमेव ध्यानाप्तं कुशलं द्वाभ्यां कारणाभ्यां परित्यज्यते—१. उपपत्तितो वा भूमिसञ्चारादूर्ध्वं चावश्यम्, २. परिहाणितो वा समापत्तेः, निकायसभागत्वाच्च किञ्चित् ।

यथा च रूपाप्तं कुशलं भूमिसञ्चारहानिभ्यां त्यज्यते,

तथारूप्याप्तमार्यं तु फलाप्त्युत्तप्तिहानिभिः ॥ ४० ॥

अनास्रवं तु कुशलं त्रिभिः कारणैः परित्यक्ष्यते—१. फलप्राप्तितः पूर्वको मार्गः परित्यक्ष्यते, २. इन्द्रियोत्तापनेन मृद्विन्द्रियमार्गः, ३. परिहाणित उत्तरो मार्गः—फलम्, फलविशिष्टो वा । एवं यावत् संवरास्त्यज्यन्ते ॥ ४० ॥

विपादितत्वात् *संवरस्याभव्यत्वम्* । तस्मान्न पुनः प्रव्राज्यत इत्यधिकारः । *न तु खलु भिक्षुभावापेक्षया* । न तु खलु तस्य भिक्षुभावोऽस्तीत्यपेक्षया न प्रव्राज्यते । *तथा ह्यसौ* पराजयिको *निक्षिप्तशिक्षोऽपि न प्रव्राज्यते* । तीव्रानपत्राप्यविपादितत्वात् सन्ततेः ॥ ३९ ॥

"ध्यानाप्तम्" इति । रूपस्वभावं कुशलमरूपस्वभावं चाभिप्रेतम् । अत एव च *सर्वमेवेति* व्याचष्टे । *द्वाभ्यामिति* । उपपत्तितो वा, परिहाणितो वा । तेनाह—*उपपत्तितो* वेति विस्तरः । ऊर्ध्वमुपपद्यमानोऽधरं परित्यजति, अधश्चोपपद्यमान उपरिभूमिकमिति । *परिहाणितो वा समापत्तेः* । तत्समापत्तिसंगृहीतं कुशलं त्यज्यते । *निकायसभागत्यागाच्च किञ्चिदिति* । निर्वेधभागीयं यत् पृथग्जनावस्थायामुत्पादितं यावत् क्षान्तिरिति । तदसत्यपि भूमिसञ्चारे निकायसभागत्यागेन त्यज्यते । यदा कामधातौ मृत्वा तत्रैवोपपद्यते । वक्ष्यति हि—'भूमित्यागात् त्यजत्यार्यस्तान्यनार्यस्तु मृत्युतः' (अभि० को० ६.२२) इति । *पूर्वको मार्ग इति* । प्रयोगानन्तर्यविमुक्तिमार्गस्वभावः प्रतिपन्नकमार्गः । फलं *फलविशिष्टो*

असंवरः संवराप्तिमृत्युद्विव्यञ्जनोदयैः ।

त्रिभिः कारणैरसंवरच्छेदः—१. संवरमाप्तितः । यदि संवरं समादत्ते ध्यानसंवरं वा लभते, हेतुप्रत्ययबलेन समाधिलाभात्; तेनासंवरश्छिद्यते, प्रतिद्वन्द्वबलीयस्त्वात् । २. मरणेनाश्रयत्यागात् । ३. द्विव्यञ्जनोत्पादेनाश्रयविकोपनादिति ।

शस्त्रजालत्यागेऽप्यकरणाशयतः । संवरमन्तरेणासंवरच्छेदो नास्ति, निदानपरिवर्जनेऽप्यौषधमन्तरेण प्रवृद्धरोगाविनिवृत्तिवत् ।

य आसंवरिक उपवासं गृह्णाति, किमसौ तस्मात् संवरात् पुनरसंवरं गच्छति ? आहोस्विन्नैवसंवरं नासंवरम् ?

असंवरमित्येके; त्यागाशयस्यानात्यन्तिकत्वात् ।

प्रदीप्त इवायःपिण्डः पुनः श्यामतां नाप्रयुज्यमानो गच्छतीत्यपरे; तल्लाभस्य विज्ञप्त्यधीनत्वात् ।

अथ संवरासंवरविनिर्मुक्ता कथमविज्ञप्तिस्त्यज्यते ?

वेगादानक्रियार्थायुर्मूलच्छेदैस्तु मध्यमा ॥ ४१ ॥

वेति । उत्तरो मार्गोऽधिकृतः । तद् यथानागामी यद्यनागामिफलात् परिहीयते तेनानागामिफलमुत्तरो मार्गस्त्यज्यते । यदि त्वनागामी द्वितीयं ध्यानं लभते तस्माच्च परिहीयते, स तस्य फलविशिष्टो मार्गो द्वितीयभूमिकस्त्यज्यते ॥ ४० ॥

हेतुप्रत्ययबलेनेति । सभागहेतुबलेन, परतो घोषबलेन चेत्यर्थः । *ध्यानसंवरं वा लभत* इति । अनास्रवसंवरं वा लभत इति नोच्यते; ध्यानासंवरपूर्वोत्पादेनैव तत्त्यागात् । *अकरणाशयत* इति । एतत् कर्म न करिष्यामीत्याशयतोऽपि *शस्त्रजालत्यागे विना संवरग्रहणेनासंवरच्छेदो न भवति* । तद्यथा—*रोगनिदानपरिहारेऽपि तस्य प्रवृद्धस्य रोगस्यौषधेन* विना विनिवृत्तिर्न भवति, तद्वत् । तदुक्तं भवति—असंवरत्यागेच्छायां संवरो ग्रहीतव्यः, नान्यथेति ।

तल्लाभस्येति । असंवरलाभस्य ।

कथमविज्ञप्तिरिति । विज्ञप्तिरपीति वक्तव्यम् । स्वसमुत्थापिताया अतीताया विज्ञप्तेस्तत्काल एव प्राप्तिच्छेदात् ।

"वेगादानक्रियार्थायुर्मूलच्छेदैस्तु मध्यम" इति च पठितव्यम् । नैवसंवरनासंवर इत्यर्थः । अथाप्यविज्ञप्तिरपि केवलोच्यते ? तत्र विज्ञप्तेरवचने कारणं वक्तव्यमित्युच्यते; विज्ञप्तेरनावश्यकत्वात् । तथा हि वक्ष्यति—"अशुभाः षड्-

येन ह्यसौ प्रसादक्लेशवेगेनाविज्ञप्तिराक्षिप्ता भवति, तस्य च्छेदात् सापि च्छिद्यते । कुम्भकारचक्रेषुगतिवत् ।

आदानत्यागादपि च्छिद्यते । यदि समादानं त्यजति, अलं समादानेनेति ।

क्रियाविच्छेदादपि विच्छिद्यते यथासमात्तमकुर्वतः ।

अर्थविच्छेदादपि विच्छिद्यते । कतमस्यार्थस्य ? चैत्यारामविहारशयनासन-यन्त्रजालादिनो वस्तुनः ।

आयुषोऽपि, कुशलमूलानामपि च्छेदाद् विच्छिद्यते । यदा कुशलमूलानि समुच्छेत्तुमारभत इति । एभिः षड्भि कारणैरविज्ञप्तिर्मध्यमा त्यज्यते ॥ ४१ ॥

कामाप्तं कुशलारूपं मूलच्छेदोर्ध्वजन्मतः ।

कामावचरं कुशलमरूपस्वभावं द्वाभ्यां कारणाभ्यां परित्यज्यते—

१. कुशलमूलसमुच्छेदाद्, २. रूपारूप्यधातूपपत्तितो वा ।

प्रतिपक्षोदयात् क्लिष्टमरूपं तु विहीयते ॥ ४२ ॥

क्लिष्टं त्वरूपस्वभावं सर्वमेव प्रतिपक्षोदयाद् विहीयते । यस्योपक्लेश-

---

विज्ञप्तिर्द्विधैक" (अभि० को० ४.६८) इति । अविज्ञप्तिवचनेन च विज्ञप्ति-वचनसिद्धेस्तदवचनम् ।

अन्ये त्वाहुः—न निरुद्धाया नैवसंवरनासंवरसंगृहीताया विज्ञप्तेरनुबन्धिनी प्राप्तिरिति, अत एतदविज्ञप्तेरेव त्यागकारणमुच्यत इति ।

कुम्भकारचक्रेषुगतिवदिति । यथा कुम्भकारचक्रस्य इषोश्च गतिः । येन कारणेन संस्कारविशेषेण आक्षिप्तो भवति, तस्य छेदात् सापि छिद्यते; तद्वत् ।

अलं समादानेनेति । प्रत्याख्यानवचनेन । *यथा समात्तमकुर्वत* इति । तद् यथा बुद्धमवन्दित्वा मण्डलकमकृत्वा वा न भोक्ष्ये इति, तदकृत्वा भुञ्जानस्य सा मध्यमा अविज्ञप्तिश्छिद्यते ।

यन्त्रजालादीति । *आदि*शब्देन शस्त्रविषादि गृह्यते ।

कुशलमूलानि समुच्छेत्तुमारभत इति । कुशलमूलसमुच्छेदप्रारम्भावस्थायामेव छिद्यते, न समुच्छेदावस्थायामिति दर्शयति ॥ ४१ ॥

"कुशलारूपम्" इति । अरूपग्रहणं रूपच्छेदस्योक्तत्वात् । *मूलच्छेदोर्ध्वजन्मत* इति । अत्र वैराग्यतश्च किञ्चिदिति वक्तव्यम् । यथा कुशलं दौर्मनस्येन्द्रियमिति ।

सर्वमेवेति । कामरूपारूप्यावचरम् । *यः प्रहाणमार्ग* इति । दर्शनमार्गः, भावनामार्गश्च । लौकिको वा लोकोत्तरो वा यथासम्भवम् । *असौ सपरिवार*

प्रकारस्य यः प्रहाणमार्गस्तेनासौ सपरिवारः परित्यज्यते, नान्यथा ॥ ४२ ॥

अथ केषां सत्त्वानामसंवरो भवति ? केषां संवरः ?

नृणामसंवरो हित्वा षण्ढपण्डद्विधाकृतीन्[1] ।

कुरूंश्च,

मनुष्यगतावेवासंवरः, नान्यत्र । तत्रापि षण्ढपण्डकोभयव्यञ्जनानुत्तर-कौरवांश्च हित्वा ।

संवरोऽप्येवं देवानां च,

संवरो हि मनुष्याणामेव यथोक्तं हित्वा **देवानां** चेति गतिद्वये संवरः ।

षण्ढादीनां संवरो नास्तीति कथं गम्यते ? सूत्राद्, विनयाच्च ।

सूत्र उक्तम्---"यतश्च महानामन् गृही अवदातवसनः पुरुषः पुरुषेन्द्रियेण समन्वागतो बुद्धं शरणं गच्छति यावद्वाचं भाषते---'उपासकं मा धारय', इयता चोपासको भवति" (   ) इति ।

विनयेऽपि तद्रूपो नाशयितव्य उक्तः ।

किं पुनः कारणमेषां संवरो नास्ति ? उभयाश्रयक्लेशाधिमात्रतया प्रति-संख्यानाक्षमत्वात्, तीव्रह्रीव्यपत्राप्याभावाच्च ।

असंवरस्तर्हि कस्मान्नास्ति ? पापेऽप्यस्थिराशयत्वात् ।

यत्रैव च संवरः, तत्रासंवरोऽपि; प्रतिद्वन्द्वभावात् ।

इति । असावुपक्लेशप्रकारः स तत्सहभूप्राप्त्यनुचरः । *उपक्लेशप्रकारस्येति*ग्रहणं क्लेशस्याप्युपक्लेशत्वेन सर्वसंग्रहार्थम् । तथा हि शास्त्रे उक्तम्---"ये यावत् क्लेशा उपक्लेशा अपि ते स्युः, उपक्लेशा न क्लेशाः" इति ॥ ४२ ॥

उभयाश्रय इति विस्तरः । स्त्रीपुरुषाश्रयस्य *क्लेशस्याधिमात्रतया । प्रति-संख्यानस्य* तत्प्रतिपक्षभावनालक्षणस्य*ाक्षमत्वात् । तीव्रस्य च ह्रीव्यपत्राप्यस्या-भावा*देषां संवरो नास्तीति ।

प्रतिद्वन्द्वभावादिति । यस्मात् संवरस्यासंवरः प्रतिद्वन्द्वभूतः, तस्मात् *यत्रैव संवरस्तत्रैवासंवर* इति । तेषां षण्ढादीनामसंवराभावे द्वितीयं कारणम् ।

---

१. शण्ढ०---का० ।

उत्तरकौरवाणां समादानसमाध्यभावात्, पापक्रियाशयाभावाच्च संवरासंवराभावः।

आपायिकानामपि तीव्रं ह्रीव्यपत्राप्यं नास्ति; यद्योगाद् यद्विपादनाच्च संवरासंवरौ स्याताम्।

अपि खल्वाश्रय एव स तेषां तादृश ऊषरक्षेत्रभूतः षण्ढपण्डकोभयव्यञ्जनोत्तरकौरवापायिकानाम्, यत्राश्रये संवरोऽपि न विरोहति, असंवरोऽपि, ऊषर इव क्षेत्रे शस्यमप्यतिमात्रं कक्वमपीति।

यत्तर्हि सूत्र उक्तम्—"अण्डजो भिक्षवो नागोऽष्टम्यां पक्षस्य भावनादभ्युद्गम्याष्टाङ्गसमन्वागतमुपवासमुपवसति" (　　　) इति। सुचरिमात्रं तत् तेषाम्, न संवरः। तस्मादेव मनुष्याणामेव संवरः।

तत्र पुनः—

नृणां त्रयः ॥ ४३ ॥

मनुष्याणां सर्वे त्रयः प्रातिमोक्षादिसंवराः संविद्यन्ते ॥ ४३ ॥

कामरूपजदेवानां ध्यानजः,

ध्यानसंवरः कामरूपधातूपपन्नानां देवानामूर्ध्वं नास्ति।

अनास्रवः पुनः।

ध्यानान्तरासंज्ञिसत्त्ववर्ज्यानामप्यरूपिणाम् ॥ ४४ ॥

अनास्रवसंवरस्तु कामरूपधातूपपन्नानामप्यस्ति ध्यानान्तरिकासंज्ञिसत्त्वोपपन्नान् वर्जयित्वा।

आरूप्योपपन्नानामपि तेषां तु समन्वागमतोऽस्ति, न सम्मुखीभावतः ॥४४॥

समादानसमाध्यभावादिति। समादानाभावात् प्रातिमोक्षसंवरो नास्ति, समाध्यभावाच्च ध्यानानास्रवसंवरौ न स्तः। तदभावस्तु मान्द्येन कुशलेष्वव्युत्पत्तेः। *पापक्रियाशयाभावाच्चासंवरो नास्ति।*

यद्योगाद् यद्विपादनाच्चेति। येन ह्रीव्यपत्राप्येण योगाद्, यस्य ह्रीव्यपत्राप्यस्य विपादनाच्च। *यथाक्रमं संवरासंवरौ स्याताम्। तत्तीव्रं ह्रीव्यपत्राप्यमापायिकानां नास्तीति।* यद्यापायिकानां संवरासंवरौ न स्तः।

यत्तर्हि सूत्र उक्तमिति विस्तरः। तत् कथम्? प्रातिमोक्षसंवरो मनुष्याणामेव न देवानाम्; असंवेगात्। ध्यानानास्रवसंवरौ तु हेतुकर्मधर्मभावनाद् यथासम्भवम् ॥ ४३–४४ ॥

अतः परमिदानीं कर्मनिर्देशाधिकारात् सूत्रोद्दिष्टानां कर्मणां निर्देश आरभ्यते—

त्रीणि कर्माणि—कुशलं कर्म, अकुशलम्, अव्याकृतं कर्मेति। तत्र—

क्षेमाक्षेमेतरत् कर्म कुशलाकुशलेतरत्।

इदं कुशलादीनां लक्षणम्। क्षेमं कर्म कुशलम्, यदिष्टविपाकं निर्वाणप्रापकं च; दुःखपरित्राणात्।

तत्कालमत्यन्तं च अक्षेममकुशलम्, क्षेमप्रतिद्वन्द्वभावेन यस्यानिष्टो विपाकः।

ताभ्यामितरत् कर्म नैव क्षेमं नाक्षेमम्, यत्तत् कुशलाकुशलाभ्यामितरद् वेदितव्यम्। अव्याकृतमित्यर्थः। पुनः—

पुण्यापुण्यमनिञ्जं च सुखवेद्यादि च त्रयम्॥ ४५॥

त्रीणि कर्माणि—पुण्यम्, अपुण्यम्, आनिञ्ज्यं च। पुनः त्रीणि—सुखवेदनीयं कर्म, दुःखवेदनीयम्, अदुःखासुखवेदनीयं च॥ ४५॥

तत्र तावत्—

कामधातौ शुभं कर्म पुण्यमानिञ्ज्यमूर्ध्वजम्[1]।

'शुभम्' इति वर्तते। रूपारूप्यावचरं कुशलं कर्म **आनिञ्ज्यम्**।

ननु च त्रीणि ध्यानानि सेञ्जितान्युक्तानि **भगवता**—"यदत्र वितर्कितं विचारितमिदमत्रार्या इञ्जितमित्याहुः" इत्येवमादि? समाधौ सापक्षालतां तेषामधिकृत्यैवमुक्तम्। आनिञ्ज्यान्यपि तु तान्युक्तान्यानिञ्ज्यसूत्रे। आनिञ्ज्यप्रत्यय[2]-गामिनीं प्रतिपदमारभ्य।

तत्कालमत्यन्तं चेति। यदिष्टविपाकं तत् तत्कालम्। दुःखपरित्राणात् क्षेमम्। यन्निर्वाणप्रापकं तदत्यन्तं दुःखपरित्राणात् क्षेमम्। परिनिर्वृतस्य यन्नित्यकालं दुःखं नास्ति॥ ४५॥

ननु च त्रीणि ध्यानानि सेञ्जितान्युक्तानि भगवता। *यदत्र वितर्कितं विचारितमिदमत्रार्या इञ्जितमित्याहुरिति*। आदिशब्देन द्वितीय उक्तं यदत्र प्रीतिरविगता, इदमत्रार्या इञ्जितमित्याहुः। तृतीयेऽपि यदत्र सुखं सुखमिति चेतस आभोगः, इदमत्रार्या इञ्जितमित्याहुरिति। अथ कस्मात् सर्वमेव रूपारूप्यावचरं कुशलं कर्मानिञ्ज्यमुच्यते? *आनिञ्ज्यप्रत्ययगामिनीमिति*। आनिञ्ज्यानुकूलभागिनम्

---

१. ०मानेञ्ज०—का०। एवमुपर्यपि। २. आनिञ्जसम्प्रेय—का०।

किं पुनः कारणं सेञ्जितमेवान्यत्रानिञ्ज्यमुक्तम् ?

तद्भूमिषु यतः कर्मविपाकं प्रति नेञ्जति ॥ ४६ ॥

कामावचरं हि कर्म विपाकं प्रति कम्पते । कथं कम्पते ? अव्यवस्थानात् । अन्यगतिकमपि ह्यन्यस्यां गतौ विपच्यते । अन्यदेवनैकायिकं चान्यदेवनिकाये ।

यदेव हि प्रमाणबलवर्णकर्मान्यभूमिकसुखभोगादि संवर्तनीयं कर्म देवेषु विपच्यते, तदेव कदाचिदन्यप्रत्ययवशान्मनुष्यतिर्यक्प्रेतेषु विपच्यते ।

रूपारूप्यावचरं तु कर्मान्यभूमिकमन्यस्यां भूमौ विपक्तुं न जातूत्सहते । तस्माद् व्यवस्थितविपाकत्वाद् 'आनेञ्ज्यम्' इत्युच्यते । अपुण्यं तु कर्माकुशलमिति प्रसिद्धं लोके । यश्च लोकतोऽर्थः प्रसिद्धः, किं तत्र यत्नेन ॥ ४६ ॥

कृतः पुण्यादीनां कर्मणां निर्देशः ॥

सुखवेदनीयादीनां कर्तव्यः । स एष क्रियते—

सुखवेद्यं शुभं ध्यानादातृतीयात्,

कुशलं कर्म सुखवेदनीयं यावत् **तृतीयाद् ध्यानात्** । एषा हि भूमिः सुखाया वेदनाया यदुत कामधातुस्त्रीणि च ध्यानानि ।

अतः परम् ।

अदुःखासुखवेद्यं तु,

अकम्प्यानुकूलभागिनं *मार्गमारभ्येति* अर्थः ।

किं पुनः कारणं समाधिसापक्षालतया *सेञ्जितमेवान्यत्रानिञ्ज्यमुक्तम् ?* इत्याह—"*तद्भूमिषु यतः कर्म विपाकं प्रति नेञ्जति*" इति ।

भोगादि संवर्तनीयमिति । भोगः = द्रव्यसम्पत् । *आदिशब्देन* सौरूप्य-सौस्वर्यादिर्गृह्यते । *तदेवेति* विस्तरः । यत्तद् *देवेषु विपच्येत* । तद्बहुलीकृतमेवं शीलमयं भावनामयम् । तस्य चैवं भवति—'अहो बताहं देवसुभगानां मनुष्यसुभगानां वा सभागतायामुपपद्येय' इति । यावत् स तत्रोपपद्यत इति ॥ ४६ ॥

कामधातुस्त्रीणि च ध्यानानीति । कामधातुप्रथमध्यानयोः कायिकं सुखं चैतसिकं च सौमनस्यं सुखा वेदना । द्वितीये ध्याने सौमनस्यं सुखा वेदना । तृतीये ध्याने चैतसिकं सुखमिति ।

'शुभम्' इति वर्तते। तृतीयध्यानात् परेण कुशलं कर्मादुःखासुखवेदनीयम्; सुखदुःखवेदनाभावात्।

दुःखवेद्यमिहाशुभम् ॥ ४७ ॥

अकुशलं कर्म दुःखवेदनीयम्। इहग्रहणं कामधातावेव तद्भावज्ञापनार्थम्। न चैषां वेदनैव फलम्। किं तर्हि? ससम्भारा ॥ ४७ ॥

अधोऽपि मध्यमस्त्येके,

अन्ये पुनराहुः—तदेतन्मध्यमदुःखासुखवेदनीयं कर्मोक्तम्, एतच्चतुर्थध्यानादधोऽप्यस्ति। किं कारणम्?

ध्यानान्तरविपाकतः।

इतरथा हि ध्यानान्तरकर्मणो विपाको न स्याद्, ध्यानान्तरे वा कस्यचित् कर्मणः; तत्र सुखदुःखयोरभावात्।

ध्यानान्तरकर्मणो ध्यान एव सुखेन्द्रियं विपाक इत्येके।

नैव तस्य वेदना विपाक इत्यपरे।

तद्भावज्ञापनार्थमिति। तच्छब्देन दुःखमभिसम्बुध्यते। तस्य दुःखस्य कामधातावेवास्तित्वज्ञापनार्थ*मिहग्रहणम्*। *ससम्भारेति*[1]। सम्भ्रियते उत्पाद्यतेऽनेनेति सम्भारः=इन्द्रियविषयाश्रयलक्षणः, तेन ससम्भारा वेदना फलम् ॥ ४७ ॥

"ध्यानान्तरविपाकतः" इति। *ध्यानान्तरकर्मणो* ध्यानान्तरोत्पत्तौ *विपाकेन* वेदितेन भवितव्यम्। तत्र सुखा दुःखा वा वेदना नास्ति। तस्मादस्यादुःखासुखा वेदना विपाक इति। चतुर्थाद् ध्यानादधोऽप्यदुःखासुखवेदनीयं कर्मास्तीति। *ध्यानान्तरे वा कस्यचित् कर्मणो*ऽन्यस्य *विपाको* वेदना *न स्यात्* न सम्भवति। न हि सुखवेदनीयस्य मौलप्रथमध्यानभूमिकस्य कर्मणो ध्यानान्तरे स विपाक इति युज्यते वक्तुम्; सवितर्कत्वेन ध्यानान्तरतो मौलस्य निहीनत्वात्। नापि कामावचरस्य दुःखवेदनीयस्य कर्मणः; भूम्यन्तरत्वात्। अत एव चतुर्थध्यानादिभूमिकस्य। ततो वीतरागत्वाच्च। एतद्दोषपरिजिहीर्षया *ध्यानान्तरकर्मणो ध्यान एव सुखेन्द्रियं विपाक इत्येके ब्रुवते*।

नैव तस्य ध्यानान्तरकर्मणो *वेदना विपाकः*। किं तर्हि? रूपादीत्यपरे। किं तेषां ध्यानान्तरोपपत्तौ वेदना नास्ति? अस्ति। न तु सा विपाकस्वभावा। किं तर्हि? नैष्यन्दिकीति।

---

१. ससम्भारैरिति—मुद्रितः पाठः।

तदेतदुच्छास्त्रम् । शास्त्रे हि पठितम्—"स्यात् कर्मणश्चैतसिक्येव वेदना विपाको विपच्येत । स्यात् कुशलस्यावितर्कस्य कर्मणः" इति ।

अपूर्वाचरमः पाकस्त्रयाणां चेष्यते यतः ॥ ४८ ॥

यतश्चोक्तं सूत्रे—"स्यात् त्रयाणां कर्मणामपूर्वाचरमो विपाको विपच्येत । स्यात् सुखवेदनीयस्य रूपं दुःखवेदनीयस्य चित्तचैत्ता धर्माः । अदुःखासुखवेदनीयस्य चित्तविप्रयुक्ताः" इति, अतोऽप्यस्त्यदुःखासुखवेदनीयं कर्माधस्तात् । न हि कामधातोरन्यत्रास्ति युगपत् कर्मत्रयस्य विपाके संयोगः ।

किमिदानीं तत् कुशलम् ? आहोस्विदकुशलम् ? दुर्बलं तु तत् ।

एवं तर्हि "सुखवेद्यं शुभं ध्यानादातृतीयात्" (अभि० को० ४.४७), "इष्टविपाकं च कुशलम्" इत्यस्य विरोधः ? बाहुलिक एष निर्देशो द्रष्टव्यः ।

अत्राचार्य आह—*तदेतदुच्छास्त्रम्* । यदेतदुक्तम्—'ध्यानान्तरकर्मणो ध्यान एव सुखेन्द्रियं विपाकः' इति, यच्चोक्तम्—'नैव तस्य वेदना विपाकः' इति, तदेतदुभयमप्युच्छास्त्रम् । तत् प्रतिपादयन्नाह—*शास्त्रे हि पठित*मिति विस्तरः । *अवितर्कस्य कर्मण* इति । ध्यानान्तरकर्मण इत्यर्थः । अतः कुशलस्यावितर्कस्य कर्मणश्चैतसिक्येव वेदना विपाको विपच्यत इत्यवधारणान्न तस्य कर्मणो ध्यान एव सुखेन्द्रियं विपाकः, नापि वेदनातोऽन्य इति गम्यते । अवितर्कं हि कर्म ध्यानान्तरात् प्रभृत्यूर्ध्वमिति ।

"अपूर्वाचरमः" इति । न पूर्वम्, न पश्चाद् । युगपदित्यर्थः ।

सुखवेदनीयस्य रूपमिति चक्षुरादिकम् । *दुःखवेदनीयस्य चित्तचैत्ता* इति । पञ्चविज्ञानकायिकाः; दौर्मनस्यस्याविपाकत्वात् । *अदुःखासुखवेदनीयस्य चित्तविप्रयुक्ता* इति । जीवितेन्द्रियादयः । *न हि कामधातोरन्यत्रेति* । दुःखवेदनीयस्य कर्मणोऽन्यत्राभावात् ।

किमिदानीं तदिति । अदुःखासुखवेदनीयम् । *एवं तर्ही*ति विस्तरः । यद्यधोऽपि चतुर्थाद् ध्यानाददुःखासुखवेदनीयं कर्मास्ति कुशलम् । *सुखवेद्यं शुभं ध्यानादातृतीयादिति अस्य विरोधः* । न हि केवलं सुखवेदनीयं कुशलमातृतीयाद्ध्यानात् । किं तर्हि ? अदुःखासुखवेदनीयमप्यस्तीति । *इष्टविपाकं च कुशलमित्यस्य विरोधः* । न हि केवलमिष्टविपाकं कुशलम्, इष्टानिष्टविपरीतविपाकमकुशलमस्तीति । *बाहुलिक एष निर्देश* इति । बाहुल्येनैवं निर्दिष्टमित्यर्थः—सुखवेद्यं शुभं ध्यानादातृतीयादिति, इष्टविपाकं च कुशलमिति ।

कथं पुनरवेदनास्वभावं कर्म सुखादिवेदनीयमित्युच्यते ? सुखवेदनायै हितं सुखवेदनीयम्, सुखोऽस्य वेदनीय इति वा ।

कश्च वेदनीयः ? यो विपाकः । स ह्यसौ विद्यते सुखस्य वा वेदनीयं येन सुखं वेदयते, स्नानीयकषायवत् ।

एवं दुःखवेदनीयम्, अदुःखासुखवेदनीयं च द्रष्टव्यम् ॥ ४८ ॥

अपि च—

स्वभावसम्प्रयोगाभ्यामालम्बनविपाकतः ।
सम्मुखीभावतश्चेति पञ्चधा वेदनीयता ॥ ४९ ॥

१. स्वभाववेदनीयता वेदनानाम्; स्वभावेनैव वेदनीयत्वात् ।

२. सम्प्रयोगवेदनीयता स्पर्शस्य; "सुखवेदनीयः स्पर्शः" इति ।

३. आलम्बनवेदनीयता विषयाणाम् । यथोक्तम्—"चक्षुषा रूपाणि दृष्ट्वा रूपप्रतिसंवेदी भवति, नो तु रूपरागप्रतिसंवेदी" ( ) इत्येवमादि । वेदनया हि तामालम्बमानः प्रतिसंवेदयते ।

कथं पुनरवेदनास्वभावमिति । सुखमनुभूयते, न कर्मेत्येवमभिसमीक्ष्य इति । *सुखवेदनायै हितं सुखवेदनीयमिति* । सुखवेदनोत्पत्त्यनुकूलमित्यर्थः । *सुखोऽस्य वेदनीय इति वेति* । सुखोऽस्य विपाकोऽनुभवनीय इत्यर्थः ।

स्नानीयकषायवदिति । यथा येन स्नाति स स्नानीयः कषायः । एवं *येन सुखं* विपाकं वेदयते तत् कर्म वेदनीयम् । *सुखस्य* विपाकस्य *वेदनीयं* कर्म सुखवेदनीयम् । करणेऽपि कृत्यविधानादेतत् । *एवं दुःखवेदनीयमिति* । दुःखवेदनाहितं दुःखवेदनीयमिति विस्तरेण पूर्ववद् योज्यम् । *एवमदुःखासुखवेदनीयमिति* ॥ ४८ ॥

स्वभाववेदनीयेति । स्वभाववेदनानुभवलक्षणेन वेदनीयस्वभावः । एवं यावत् सम्मुखीभावेन वेदनीयतेति योज्यम् ।

सुखवेदनीयः स्पर्श इति । सुखवेदनाहितं सुखं वेदनीयमस्मिन्निति सुखवेदनीयः स्पर्शः ।

आलम्बनवेदनीयतेति । वेदनीया विषयाः । आलम्बनीया इत्यर्थः ।

रूपप्रतिसंवेदी नो तु रूपरागप्रतिसंवेदीति । रूपं प्रत्यनुभवति । नो तु रूपरागं प्रत्यनुभवतीत्यर्थः । अथवा नो तु स रूपं रागेण प्रत्यनुभवति, आलम्बत इति ।

४. विपाकवेदनीयता कर्मणः; "दृष्टधर्मवेदनीयं कर्म" इति विस्तरः ।

५. सम्मुखीभाववेदनीयता । यथोक्तम्—"यस्मिन् समये सुखां वेदनां वेदयते, द्वे अस्य वेदने तस्मिन् समये निरुद्धे भवतः" इति। नहि यस्मिन् समये सुखा वेदना वर्तते तस्मिन् पुनरन्या वेदनास्ति, स यां तां वेदयते । सम्मुखीकुर्वंस्तु तां वेदयत इत्युच्यते । अतो विपाकस्य वेदनीयत्वात् कर्माप्युच्यते सुखवेदनीयमित्येवमादि ॥ ४९ ॥

नियतानियतं तच्च,

तच्चैतत् सुखवेदनीयादि त्रिविधं कर्म **नियतं** चानियतं च वेदितव्यम् । नावश्यवेदनीयमनियतम् ।

नियतं त्रिविधं पुनः ।

दृष्टधर्मादिवेद्यत्वात्,

दृष्टधर्मवेदनीयम्, उपपद्यवेदनीयम्, अपरपर्यायवेदनीयं च—इत्येतत् त्रिविधं कर्म **नियत**मिति । एतच्चतुर्विधं कर्म भवति सहानियतवेदनीयेन ।

पञ्चधा कर्म केचन ॥ ५० ॥

अपरे पुनः पञ्चविधं **कर्मे**च्छन्ति—अनियतवेदनीयं द्विधा कृत्वा, विपाकेन नियतमनियतं चेति ।

तत्र दृष्टधर्मवेदनीयम्—यत्र जन्मनि कृतं तत्रैव विपच्यते । उपपद्यवेदनीयम्—द्वितीये जन्मनि । अपरपर्यायवेदनीयम्—तस्मात् परेण ।

जन्मान्तरेऽप्यस्ति दृष्टधर्मवेदनीयस्य कर्मणो विपाक आरम्भवशात् तन्नामव्यवस्थानमित्यपरे ।

---

*दृष्टधर्मवेदनीय*मिति । दृष्टे जन्मनि वेदनीयं विपाकलक्षणमस्येति दृष्टधर्मवेदनीयं कर्मेति विस्तरः ।

यस्मिन् समय इति विस्तरः । *यस्मिन् समये सुखां वेदनां वेदयते* अनुभवति। *द्वे अस्य वेदने*[1] दुःखा, अदुःखासुखा च, *तस्मिन् समये निरुद्धे भवत* इति ॥४९॥

आरम्भवशादिति । दृष्ट एव जन्मनि विपाकारम्भादित्यर्थः । *तन्नामव्यवस्थान*मिति । 'दृष्टधर्मवेदनीयम्' इत्येवं नामव्यवस्थानमित्यर्थः ।

१. वेदना—मुद्रितः पाठः ।

मा भूद् यदेवमिष्टकर्म तस्याल्पिष्ठो विपाक इति ? तदेवं नेच्छन्ति **वैभाषिकाः** । अस्ति हि कर्म सन्निकृष्टफलं न विप्रकृष्टफलम्, अस्ति विपर्ययाद्, चाषबीजवत् । यथा त्रिपक्षा सुवर्चला त्रिभिः पक्षैः फलं ददाति, यवगोधूमादयः षड्भिर्मासैरिति ॥ ५० ॥

चतुष्कोटिकमित्यन्ये,

दार्ष्टान्तिकास्तु चतुष्कोटिकं कुर्वन्ति—१. अस्ति कर्मावस्थानियतं न विपाके नियतम् । यत् कर्म दृष्टधर्मादिवेदनीयं विपाकेऽनियतम् । २. अस्ति विपाके नियतं नावस्थायाम् । यत् कर्मानियतवेदनीयं विपाके नियतम् । ३. अस्त्युभयनियतं यद् दृष्टधर्मादिवेदनीयं विपाके नियतम् । ४. अस्ति नोभयनियतं यत् कर्मानियतवेदनीयं विपाके अनियतम् ।

तेषां तत् कर्माष्टविधं दृष्टधर्मवेदनीयं नियतमनियतं च । एवं यावदनियतवेदनीयम् । नियतमेव तु दृष्टधर्मादिवेदनीयमनियतं चतुर्थमिति वर्णयन्ति ।

स्यादेकस्मिन् क्षणे चतुर्विधं कर्माक्षिपेत् । स्यात् त्रिषु परं प्रयोज्य काममिथ्याचारे स्वयं प्रयुक्तस्तेषां युगपत् परिसमाप्तौ[1] ।

एषां च पुनश्चतुर्णां कर्मणां

निकायाक्षेपणं त्रिभिः ।

अस्ति हीति विस्तरः । *सन्निकृष्टफलस्य कर्मणः सुवर्चला* दृष्टान्तः । विप्रकृष्टफलस्य *यवगोधूमादयः* ॥ ५० ॥

दार्ष्टान्तिकाः सौत्रान्तिकाः । तेषामेवं प्रथमद्वितीये कोट्यौ वर्णयतां *कर्माष्टविधम् । दृष्टधर्मवेदनीयं नियतमनियतं* च विपाकं प्रति । *एवं यावदनियतवेदनीयमिति* । उपपद्यवेदनीयं नियतमनियतं च विपाकं प्रति, अपरपर्यायवेदनीयमपि नियतमनियतञ्च, अनियतवेदनीयमपि यो दृष्टधर्माद्यनियतवेदनीयं तन्नियतम्, अनियतञ्च—इत्यष्टविधम् ।

चतुर्विधं कर्माक्षिपेदिति । दृष्टधर्मादिवेदनीयं चतुर्विधं कर्माक्षिपेदित्यर्थः । *कथम् ?* इत्याह—*स्यात् त्रिषु* प्राणातिपातादत्तादानमृषावादेषु *परं प्रयोज्य काममिथ्याचारे स्वयमात्मना प्रयुक्तः* । तेषां कर्मणां *युगपत् परिसमाप्तौ* । एकं दृष्टधर्मवेदनीयम्, अपरमुपपद्यवेदनीयम्, अपरं चापरपर्यायवेदनीयम्, अन्यच्चानियतवेदनीयमिति ।

---

१. समाप्तौ—का० ।

नहि दृष्टधर्मवेदनीयेन कर्मणा निकायसभाग आक्षिप्यते ।

कतमस्मिन् धातौ कतिविधं कर्माक्षिप्यते ? कस्यां वा गतौ ?

सर्वत्र चतुराक्षेपः,

सर्वेषु त्रिषु धातुषु सर्वासु च गतिषु चतुर्णां कर्मणामाक्षेपः कुशलानामकुशलानां च यथासम्भवम् ।

अस्योत्सर्गस्यायमपवादः—

शुभस्य नरके त्रिधा ॥ ५१ ॥

नरकेषु कुशलस्य कर्मणस्त्रिविधस्यैवाक्षेपः[1], न दृष्टधर्मवेदनीयस्य; अत्रेष्टविपाकाभावात्[2] ॥ ५१ ॥

यद्विरक्तः स्थिरो बालस्तत्र नोत्पद्यवेद्यकृत् ।

यतो भूमेः वीतरागपृथग्जनो भवति, असौ च स्थिरो भवत्यपरिहाणधर्मा, स तत्रोत्पद्यवेदनीयं कर्म न करोति ।

किमन्यत् करोति ?

नान्यवेद्यकृदप्यार्यः

कुशलानामकुशलानां च यथासम्भवमिति । यत्राकुशलस्य सम्भवः कामधातावेव, नान्यत्र ।

'सर्वासु गतिषु' इत्यस्योत्सर्गस्यायमपवादः—"*शुभस्य नरके त्रिधा*[3]" इति । त्रिधैवेत्यवधारणम् । *नरकेषु* कुशलस्य कर्मणः त्रिविधस्यैवाक्षेपः, न चतुर्विधस्य । *दृष्टधर्मवेदनीयं* स्थापयित्वा । *अत्र नरकेष्विष्टविपाकाभावात्* । शुभग्रहणमशुभनिरासार्थम् । अकुशलस्य हि चतुर्विधस्यापि नरकेष्वाक्षेपः सम्भवति ॥ ५१ ॥

"*यद्विरक्तः स्थिरो बालः*" इति । यतो विरक्तो यद्विरक्त इति समासः । *स्थिर*ग्रहणं परिहाणधर्मणो निरासार्थम् । तस्य हि तस्या भूमौ उपपद्यवेदनीयं कर्म सम्भवति । *बाल*ग्रहणमार्यनिवृत्त्यर्थम् । आर्यस्य हि तत्रोपपद्यवेदनीयम्, अपरपर्यायवेदनीयं च *न* सम्भवति, अनागामित्वात् ।

नान्यवेद्यकृदपीति । नापरपर्यायवेदनीयकृदपि । नोपपद्यवेदनीयकृदपीत्यर्थः ।

---

१. ०विधस्याक्षेपो—का० । २. तत्रे०—का० ।

३. त्रिविधेति—मुद्रितः पाठः ।

'स्थिरः' इति वर्तते । आर्यपुद्गलस्तु यतो वीतरागो न च परिहाणधर्मा, स तत्रोपपद्यवेदनीयं चापरपर्यायवेदनीयं च कर्म न करोति । न ह्यसौ भव्यः पुनराधस्तीं[1] भूमिमायातुमनियतं कुर्याद् दृष्टधर्मवेदनीयं चात्रोपपन्नः ।

कामेऽग्रे वास्थिरोऽपि न ॥ ५२ ॥

परिहाणधर्मापि त्वार्यपुद्गलः कामधातोर्भवाग्राद् वा[2] वीतरागः तयोरुपपद्यापरपर्यायवेदनीयं कर्माभव्यः कर्त्तुम् । किं कारणम् ? फलाद्धि स परिहीणो भवति । न चास्ति फलपरिहीणस्य कालक्रियेति पश्चात् प्रवेदयिष्यामः ॥ ५२ ॥

किमन्तराभवेऽप्यस्ति कर्मण आक्षेपः ? अस्तीत्याह—

द्वाविंशतिविधं कामेष्वाक्षिपत्यन्तराभवः ।

कामावचरो ह्यन्तराभवो द्वाविंशतिविधं कर्माक्षिपति । कथं कृत्वा ? पञ्च हि गर्भावस्थाः—कलल-अर्बुद-पेशी-घन-प्रशाखावस्थाः । पञ्च जातावस्थाः—बाल-कुमार-युव-मध्य-वृद्धावस्थाः । तत्रान्तराभवः कललवेदनीयं कर्माक्षिपति अनियतं नियतं च । एवं यावद् वृद्धवेदनीयमन्तराभववेदनीयं च ।

दृष्टधर्मफलं तच्च,

तच्चैतदन्तराभविकं कर्म यन्नियतमेकादशविधमुक्तं दृष्टधर्मवेदनीयं तद् वेदितव्यम् । किं कारणम् ?

तत्र युक्तिं दर्शयन्नाह—*न ह्यसौ भव्यः पुनराधस्तीं भूमिमायातुमिति* । न ह्यसावार्योऽपरिहाणधर्मा यतो वीतरागस्तत *आधस्तामधस्ताद्भूवां भूमिमायातुं* भव्यः । परिहाणधर्मा तु भव्यः । तद् यथा—यो भवाग्रलाभी परिहाणधर्मा यः परिहाय रूपधातावुपपद्येत । तस्योपपद्यवेदनीयमपरपर्यायवेदनीयं चापि सम्भवति, यथोक्तमुदायिसूत्रे *अनियतं कुर्यादिति* । अनियतवेदनीयमपरिहाणधर्माप्यार्यो दृष्टधर्मवेदनीयं च *यत्रोपपन्नस्तत्र कुर्यात्* ।

कामधातोर्भवाग्राद्वा वीतराग इति । कामवीतरागः, भवाग्रवीतरागोऽर्हन् । *तयोरिति* कामधातुभवाग्रयोः । *पश्चात् प्रवेदयिष्याम* इति । 'म्रियते न फलभ्रष्टः' (अभि० को० ६.६०) इत्यादि ॥ ५२ ॥

अन्तराभववेदनीयं च । किम् ? *नियतमनियतं* चेति ।

यन्नियतमेकादशविधमुक्तम् । *दृष्टधर्मवेदनीयं यत्तदिति* । कललवेदनीयं नियतम्, यावदन्तराभववेदनीयं नियतमिति ।

---

१. ०राधस्तनी—का० । २. का० पुस्तके नास्ति ।

निकायो ह्येक एव सः ॥ ५३ ॥

एक एव ह्यसौ निकायसभाग एककर्माक्षिप्तः, यश्चान्तराभवो याश्च तदन्वया दशावस्थाः ।

अत एवान्यदन्तराभववेदनीयं कर्म नोक्तम्; उपपद्यवेदनीयेन एव[1] तस्याक्षेपात् ॥ ५३ ॥

कीदृशं पुनः कर्म नियतं वेदितव्यम् ?

तीव्रक्लेशप्रसादेन सातत्येन च यत्कृतम् ।
गुणक्षेत्रे च नियतं तत् पित्रोर्घातकं च यत् ॥ ५४ ॥

यद्धि कर्म तीव्रेण क्लेशेन **कृतम्**, यच्च तीव्रेण प्रसादेन, यच्च **सातत्येन**, **गुणक्षेत्रे च, तन्नियतं** वेदितव्यम् ।

तत्र गुणक्षेत्रम्—त्रीणि रत्नानि । पुद्गलविशेषो वा कश्चित् फलसमापत्तिविशेषप्राप्तः । तत्र ह्यन्तरेणापि तीव्रक्लेशप्रसादानां सातत्यं च कुशलमकुशलं च कर्म नियतं सम्पद्यते ।

पितरौ पुनर्माता च पिता च, तयोश्चापि यत्[2] **घातिकं** कर्म यथा तथा च[3] तन्नियतं सम्पद्यते, नान्यत् ॥ ५४ ॥

याश्च तदन्वया दशावस्था इति । अन्तराभवपूर्विका इत्यर्थः ।

अत एवान्यदन्तराभववेदनीयं कर्म नोक्तमिति । चतुर्विधं कर्म—**दृष्टधर्मवेदनीयम्**, उपपद्यवेदनीयम्, अपरपर्यायवेदनीयम्, अनियतवेदनीयं चेति **अत्र नोक्तम्**; *उपपद्यवेदनीयेनैव तस्यान्तरा भवस्याक्षेपात्* ॥ ५३ ॥

"नियतानियतं कर्म" (अभि० को० ४.५०) इत्युक्तम्, अतो ब्रवीति—*कीदृशं पुनः कर्म नियतमिति* विस्तरः ।

फलसमापत्तिविशेषप्राप्त इति । दर्शनमार्गफलप्राप्तः, अर्हत्त्वफलप्राप्तश्च फल*विशेषप्राप्त* इष्यते । विशेषग्रहणमनास्रवमार्गप्राप्यफलग्रहणार्थम् । समापत्तिविशेषप्राप्तो निरोधारणामैत्रीसमापत्तिलाभी । अत्रापि विशेषग्रहणं तदन्यलौकिकसमापत्तिविशेषणार्थम् । *यथा तथा चेति* । यदि पुण्यबुद्धया, यदि द्वेषादिना । योऽपि हि पारसिकः पुण्यबुद्धया *मातरं* मारयति *पितरं* वा । तदकुशलमानन्तर्यं कर्म नियतं सम्पद्यते । *नान्यदिति* । यदतो विपरीतं मन्दक्लेशा-

---

१. च—का० ।　　२. यत्र—का० ।　　३. वा—का० ।

अथ दृष्टधर्मवेदनीयं कर्म कीदृशं वेदितव्यम् ?

दृष्टधर्मफलं कर्म क्षेत्राशयविशेषतः ।

दृष्टधर्मवेदनीयं कर्म क्षेत्रविशेषाद् वा भवति । यथा—सङ्घस्त्रीवादसमुदाचाराद् व्यञ्जनपरिवृत्तिः श्रूयते ।

आशयविशेषाद् वा । यथा—षण्ढस्य गवामपुंस्त्वप्रतिमोक्षणात् पुम्भावः ।

अथ वा—

तद्भूम्यत्यन्तवैराग्यात्,

तस्य वा कर्मणो या भूमिः कुशलस्याकुशलस्य वा, ततोऽत्यन्तवैराग्यात् तत् कर्म दृष्टधर्मवेदनीयं कर्म सम्पद्यते ।

तस्यां भूमौ जातस्य कीदृशं कर्म ? इत्याह—

विपाके नियतं हि यत् ॥ ५५ ॥

यद्धि कर्म **नियतं विपाके** न त्ववस्थायां नाप्यनियतम्, तस्यैव नियमः ।

यत् पुनरवस्थान्तरे नियतं तस्य तत्रैव नियतो विपाकः; तद्वतोऽत्यन्तवैराग्या-

---

प्रसादकृतमित्यादि ॥ ५४ ॥

सङ्घस्त्रीवादसमुदाचारादिति । भिक्षुणा किल केनचिद् व्यवहारपराजितेन सङ्घः 'स्त्रियो यूयम्' इति समुदाचरितः; तस्य दृष्ट एव धर्मे पुरुषव्यञ्जनमन्तर्हितम्, स्त्रीव्यञ्जनञ्च प्रादुर्भूतमिति । तदिदं क्षेत्रविशेषाद् दृष्टधर्मवेदनीयं भवति ।

आशयविशेषादिति । षण्ढेन *गवामपुंस्त्वं करिष्यमाणमभिवीक्ष्य* ममेदृशमपुंस्त्वे दुःखमिति तीव्रेणाशयेन तेषां गवामपुंस्त्वं *प्रतिमोक्षितम्* । तस्य दृष्ट एव धर्मे पुरुषेन्द्रियं प्रादुर्भूतम् । इदमाशयविशेषाद् दृष्टधर्मवेदनीयं कर्म संवृत्तम् ।

"तद् भूम्यत्यन्तवैराग्यात्" इति । *ततो भूमेरत्यन्तवैराग्यात् तद्* अदृष्टधर्मवेदनीयमपि *कर्म दृष्टधर्मवेदनीयं सम्पद्यते* । यथा अनागाम्यर्हतामवीतरागावस्थाकृतम्; पुनरधरभूम्यनागमनात्, अनुपादाय च परिनिर्वाणात् ।

न त्ववस्थायामिति । यदनियतं दृष्टधर्माद्यवस्थासु । न चानियतं विपाके; नियतत्वात् । तदेव दृष्टधर्मवेदनीयं भवति । अत एवाह—*यत् पुनरवस्थान्तरे* दृष्टधर्मादिके *नियतम्* । *तस्य तत्रैवावस्थान्तरे विपाकः* । *तद्वतोऽत्यन्तवैराग्या-*

सम्भवात् ।

यच्चानियतं तस्याविपाक एव, अत्यन्तवैराग्यात् ॥ ५५ ॥

कीदृशं पुनः क्षेत्रं यत्रावश्यं दृष्टधर्मवेदनीयं कर्म सम्पद्यते ? आह—बुद्धप्रमुखो भिक्षुसङ्घः, पुद्गलास्तु पञ्च ।

ये निरोधारणामैत्रीदर्शनार्हत्फलोत्थिताः ।
तेषु कारापकाराणां फलं सद्योऽनुभूयते ॥ ५६ ॥

निरोधसमापत्तिव्युत्थितः परां चित्तशान्तिं लभते; निर्वाणसदृशत्वात् समापत्तेः । स हि गतप्रत्यागत इव निर्वाणाद् भवति ।

अरणाव्युत्थितस्याप्रमाणसत्त्वारणाहिताध्याशयानुगतात्युदग्राप्रमाणपुण्यपरिभावनानुगता च सन्ततिर्वर्तते ।

मैत्रीव्युत्थितस्याप्रमाणसत्त्वसुखाध्याशयानुगतात्युदग्राप्रमाणपुण्यपरिभावनानुगता च सन्ततिर्वर्तते ।

दर्शनमार्गव्युत्थितस्याशेषदर्शनप्रहातव्यप्रहाणात् प्रत्यग्राश्रयपरिवृत्तिनिर्मला सन्ततिर्वर्तते ।

अर्हत्फलव्युत्थितस्याशेषभावनाप्रहातव्यप्रहाणात् प्रत्यग्राश्रयपरिवृत्तिशुद्धा सन्ततिर्वर्तते ।

सम्भवादिति । एवमस्यान्तरनियतविपाकेन कर्मणा तद्वत् पुद्गलस्यात्यन्तं तस्या भूमेर्वैराग्यासम्भवादित्यर्थः ॥ ५५ ॥

क्षेत्रविशेषादित्युक्तम्, अतः पृच्छति—*कीदृशं पुनः क्षेत्र*मिति ।

अरणाव्युत्थितस्येति विस्तरः । *अप्रमाणेषु सत्त्वेषु अरणया हितोऽध्याशयो*-ऽभिप्रायः, तेना*नुगता* । *अत्युदग्रेण* तीक्ष्णेन, *अप्रमाणेन पुण्येन परिभावनानुगता सन्ततिर्वर्तते* । अरणामुत्तरत्र वक्ष्यति—"अरणा प्रणिधिज्ञान०" (अभि० को० ७.३५) इत्यत्र ।

मैत्रीव्युत्थितस्येति विस्तरः । *अप्रमाणेषु सत्त्वेषु सुखमुत्पद्यता*मित्याशयः, तेना*नुगता अत्युदग्रे*ति पूर्ववच्च ।

*प्रत्यग्राश्रयपरिवृत्तिनिर्मले*ति । प्रत्यग्रा अभिनवा; अचिरव्युत्थितत्वात् । *प्रत्यग्राश्रयस्य* शरीरस्य परिवृत्त्या निर्मला *सन्ततिः* ।

अत एतेषु कृतानां कारापकाराणां फलं दृष्ट एव धर्मे नियतं प्राप्यते ।

शेषस्य तु भावनामार्गस्यापरिपूर्णस्वभावफलत्वाच्च तद्व्युत्थितानां न तथा प्रत्ययाश्रयपरिवृत्तिशुद्धाशयसन्ततिर्वर्तत इति न ते तथा पुण्यक्षेत्रं भवन्ति[1] ॥५६॥

विपाकः पुनर्वेदनाप्रधानः । तदिदानीं विचार्यते—स्यात् कर्मणश्चैतसिक्येव वेदना विपाको विपच्येत न कायिकी, स्यात् कायिक्येव न चैतसिकी स्याद् ? इत्याह—

कुशलस्यावितर्कस्य कर्मणो वेदना मता ।

विपाकश्चैतसिक्येव,

अवितर्कं कर्म ध्यानान्तरात् प्रभृति यावद् भवाग्रे । **तस्यावितर्कस्य कुशलस्य कर्मणश्चैतसिक्येव वेदना विपाकः** । कस्मान्न कायिकी ? तस्या अवश्यं सवितर्कसविचारत्वात्[2] ।

कायिक्येवाशुभस्य तु ॥ ५७ ॥

एतेषु पुद्गलेषु *कृतानां कारापकाराणामु*पकारापकाराणां कुशलाकुशलानाम् *फलं दृष्ट एव धर्मे* इहैव जन्मनि *प्राप्यत* इति । सद्योऽर्थं दर्शयति, सद्य इवेति कृत्वा ।

शेषस्य त्विति विस्तरः । *शेषो भावनामार्गः* सकृदागाम्यनागामिफलप्रापकः । अपरिपूर्णः स्वभावः फलं वा अस्येत्यपरिपूर्णस्वभावफलः, तस्य भावः, तस्मात् *अपरिपूर्णस्वभावफलत्वात्* । का पुनस्तस्य परिपूर्णस्वभावता, परिपूर्णफलता च ? अशैक्षत्वं परिपूर्णस्वभावता । स हि मार्गोऽशैक्षस्वभावश्च, येनार्हत्वं प्राप्यते । परिपूर्णफलताप्यर्हत्वाप्राप्तिः । स हि फलमार्गस्त्रिभिः फलैः फलवानिति । अथ वा—क्षयज्ञानं संगृहीतो मार्गः परिपूर्णस्वभावफलः । परिपूर्णस्वभावो यस्मादशैक्षमार्गः । परिपूर्णफलो निरवशेषफलत्वात् । *तद्व्युत्थितानामिति* । शेषभावनामार्गव्युत्थितानाम् । न ते तद्व्युत्थितास्*तथा पुण्यक्षेत्रं भवन्ति* । यथार्हत्वव्युत्थिताः । प्रागेव लौकिकमार्गव्युत्थिताः । भावनाप्रहातव्यानां हि क्लेशानां सावशेषनिरवशेषप्रहाणादयं विशेष उक्त इत्यवगन्तव्यम् ॥ ५६ ॥

तस्या अवश्यं सवितर्कसविचारत्वादिति । "सवितर्कविचारा हि पञ्चविज्ञानधातवः" (अभि० को० १.३२) इति नियमात्, वितर्कविचारयोश्च

---

१. भवति—का० । २. सवितर्कविचारत्वात्—का० ।

अकुशलस्य कर्मणः कायिक्येव वेदना विपाकः । कस्मान्न चैतसिकी ? तस्य हि दुःखा वेदना विपाकः । चैतसिकी च दुःखा वेदना दौर्मनस्यम् । न च दौर्मनस्यं विपाक इति व्याख्यातमेतत् ॥ ५७ ॥

यत् तर्हि सत्त्वानां चित्तक्षेपो भवति, कतमस्मिन्नसौ चित्ते भवति, केन वा कारणेन ?

चित्तक्षेपो मनश्चित्ते,

मनोविज्ञान इत्यर्थः । नहि पञ्चसु विज्ञानकायेषु चित्तं क्षिप्यते; अविकल्पकत्वात् ।

स च कर्मविपाकजः ।

स चैष चित्तक्षेपः सत्त्वानां **कर्मजः** । ये हि द्रव्यमन्त्रप्रयोगेण वा परेषां चित्तं क्षेपयन्ति, अकामकं वा विषं मद्यं वा पाययन्ति, त्रासयन्ति वा, मृगयादिष्वग्निं वा दावेषूत्सृजन्ति, प्रपाताद्वा पातयन्ति, अन्येन वा केनचित् परेषां स्मृतिं भ्रंशयन्ति, तेषां तस्य कर्मणो विपाकेनायत्यां चित्तं क्षिप्यते ।

ध्यानान्तरादिस्वभावात् । न चावितर्कस्य कर्मणः सवितर्कविचारोऽधरभूमिको विपाको युज्यत इति ।

तस्य हि दुःखा वेदना विपाक इति विस्तरः । तस्याकुशलस्य दुःखा वेदना विपाक इष्यते ; तस्यानिष्टफलत्वाच्च । *चैतसिकी च दुःखा वेदना दौर्मनस्यम्*, नान्यदस्ति । *न च दौर्मनस्यं विपाक इति व्याख्यातमेतदि*ति । *इन्द्रियनिर्देशे* 'विपाको जीवितं द्वेधा द्वादशान्त्याष्टकादृते दौर्मनस्याच्च'' (अभि० को० २.१०) इति ॥ ५७ ॥

'दौर्मनस्यं न विपाकः' इत्येतदमृष्यन्नाह—*यत्तर्ही*ति विस्तरः । यदि दौर्मनस्यं न विपाकः । *यत्तर्हि सत्त्वानां चित्तक्षेपो भवति । कतमस्मिन्नसौ चित्ते भवति केन वा कारणे*नेति । तस्यायमभिप्रायः—चित्तक्षेपो न पञ्चसु विज्ञानकायेषु; तेषामविकल्पकत्वात् । स चाकुशलहेतुकोऽनिष्टत्वादित्यतो विपाकेन दौर्मनस्येन भवितव्यमिति ।

*अविकल्पकत्वादि*ति । अभिनिरूपणानुस्मरणविकल्पाभ्यामविकल्पकत्वात् पञ्चानां विज्ञानकायानाम् । चित्तक्षेपस्य चासद्विकल्पलक्षणत्वात् ।

*अग्निं वा दावेषूत्सृजन्ती*ति । दावः=तृणादिगहनान्वितो देशविशेषः । *अन्येन वा केनचिदि*ति । अनिष्टवेदनादिना ।

भयोपघातवैषम्यशोकैश्च,

कथं तावद् भयेन ? अमनुष्यादयो मनुष्यान् विरूपेण रूपेणोपसंक्रामन्ति, तेभ्यो भीतानां चित्तं क्षिप्यते ।

कथमुपघातेन ? अमनुष्या एव कुपिता मनुष्याणां मर्मसु प्रहरन्ति ।

कथं महाभूतवैषम्येण ? वातपित्तश्लेष्माणः प्रकोपमापद्यन्ते ।

कथं शोकेन ? यथा वासिष्ठीप्रभृतीनाम् । यदि मनो विक्षिप्यते कर्मविपाकजश्च चित्तक्षेपः ।

वासिष्ठीप्रभृतीनामिति ।

"भगवान् मिथिलिकायां विहरति स्म मिथिलाम्रवणे । तेन खलु पुनः समयेन वशिष्ठसगोत्राया ब्राह्मण्याः षट् पुत्राः कालगताः । सा तेषां कालक्रियया नग्नोन्मत्ता क्षिप्तचित्ता तेन तेनानुहिण्डन्ती येन मिथिलाम्रवणं तेनोपसंक्रान्ता । तेन खलु पुनः समयेन भगवाननेकशताया भिक्षुपर्षदः पुरस्तान्निषण्णो धर्मं देशयति स्म । अद्राक्षीद् वसिष्ठसगोत्रा ब्राह्मणी भगवन्तं दूरादेव । दृष्ट्वा च पुनर्जेह्रीयमाणरूपा उत्कुटकाऽस्थात्, स्मृतिं च लब्धवती । अद्राक्षीद् भगवान् वसिष्ठगोत्रां ब्राह्मणीं दूरादेव । दृष्ट्वा च पुनरायुष्मन्तमानन्दमामन्त्रयते स्म—'अनुप्रयच्छानन्द वसिष्ठसगोत्रायै ब्राह्मण्यै उत्तरासङ्गम् । धर्ममस्यै देशयिष्यामि'। आयुष्मान् आनन्दो वसिष्ठसगोत्रायै ब्राह्मण्यै उत्तरासङ्गमदात् । अथ वसिष्ठसगोत्रा ब्राह्मणी उत्तरासङ्गं प्रावृत्य येन भगवांस्तेनोपसंक्रान्ता । उपसंक्रम्य भगवतः पादौ शिरसा वन्दित्वा एकान्ते निषण्णा । एकान्तनिषण्णां वसिष्ठसगोत्रां ब्राह्मणीं धर्म्यया कथया सन्दर्शयति समादापयति समुत्तेजयति सम्प्रहर्षयति" इत्येवमादि । विस्तरग्रन्थभयात् सर्वसूत्रं न लिखितम् । अयं तत्रार्थः–भगवांस्तस्यै दानकथादि कृत्वा चत्वार्यार्यसत्यानि देशितवान् यावत्तया स्रोतआपत्तिफलमधिगतम् । अधिगम्य च भगवतोऽन्तिकात् प्रक्रान्ता । तस्या अपरेण समयेन सप्तमः पुत्रः कालगतः । सा तत्कालक्रियया न शोचति । तामशोचन्तीं स्वभर्ताब्रवीत्—'त्वं पूर्वं पुत्रमरणेन परितप्तासि, इदानीं नासि परितप्ता, नूनं ते पुत्रास्त्वया भक्षिता यतो न परितप्यसे' ? इति सा तं प्रत्युवाच—

पुत्रपौत्रसहस्राणि ज्ञातिसङ्घशतानि च ।
दीर्घेऽध्वनि मया ब्रह्मन् खादितानि तथा त्वया ॥
पुत्रपौत्रसहस्राणां परिमाणं न विद्यते ।
अन्योन्यं खाद्यमानानां तासु तासूपपत्तिषु ॥

कथं न चैतसिकी वेदना विपाकः प्राप्नोति? नहि ब्रूमः—सदैव चित्तविपाक इति, अपि तु यो महाभूतानां प्रकोपः स विपाकः, तस्माज्जातम्, अतो विपाकजं चित्तम्[1]।

कर्मजेन हि धातुना वैषम्येण व्याकुलमवशं भ्रष्टस्मृतिकं चित्तं वर्तत इति क्षिप्तमित्युच्यते। एवं चेदं चतुष्कोटिकं युज्यते—अस्ति चित्तं क्षिप्तं न विक्षिप्तमिति विस्तरः। १. क्षिप्तं तावन्न क्षिप्तं विक्षिप्तचित्तस्य। २. क्लिष्टं चित्तं विक्षिप्तं न क्षिप्तं स्वस्थचित्तस्य क्लिष्टम्। ३. उभयं क्षिप्तचित्तस्य क्लिष्टम्। ४. नोभयं स्वस्थचित्तस्याक्लिष्टम्।

कतमेषां पुनः सत्त्वानां चित्तं क्षिप्यते?

अकुरुकामिनाम् ॥ ५८ ॥

अकुरूणां कामिनाम्। देवेष्वपि हि देवा उन्मत्ताः सन्ति प्रागेव मनुष्यतिर्यक्प्रेतेषु। नारकास्तु नित्यं क्षिप्तचित्ता एव। ते हि विविधयातनासहस्रव्यतिभिन्नमर्माणस्तीव्राभिर्वेदनाभिरभिनुन्ना[2] आत्मनमपि तावन्नाभिचेतयन्ति, किं पुनः कार्यमकार्यं वा! हाचित्तपरिदेवकश्चात्र नारक उदाहार्यः।

कः शोचेत् परितप्येत परिदेवेत वा पुनः।
ज्ञात्वा निःसरणं लोके जातेश्च मरणस्य च॥
साहं निःसरणं ज्ञात्वा जातेश्च मरणस्य च।
न शोचामि न तप्यामि कृते बुद्धस्य शासने"॥ (　　　)

इत्येवमादि।

कथं न चैतसिकी वेदना विपाकः प्राप्नोति। तस्याकुशलस्य कर्मण इति वाक्यशेषः। *महाभूतानां प्रकोपो विपाक* इति। विपक्ति = *विपाकः*। *तस्माज्जातमतो विपाकजं चित्तम्*। अत एव स च कर्मज इति।

*एवं चेद*मिति विस्तरः। यस्मात् कर्मजेन यावद् भ्रष्टस्मृतिकं चित्तं वर्तते तस्मादिदं *चतुष्कोटिकं युज्यत* इति। *उभयं क्षिप्तचित्तस्य क्लिष्टं* चित्तमित्येव तत्रोदाहरणम्। न हि क्लिष्टं चित्तं विपाको युज्यते; 'विपाकोऽव्याकृतो धर्मः' (अभि० को० २.५८) इति वचनात्।

अभिनुन्ना अभिपीडिताः। *हाचित्तपरिदेवकश्चात्र नारक* इहोदाहार्यः। क्षिप्तचित्ता नारका भवन्तीति।

---

१. का० पुस्तके नास्ति।　　　　२. अभितुन्ना—का०।

आर्याणामपि चित्तं क्षिप्यते भूतवैषम्येण, अन्यत्र बुद्धात्। न कर्मणा; नियतस्य पूर्वं विपाकाद्, अनियतस्याविपाकात्। न भयेन; पञ्चभयसमतिक्रमात्। नोपघातेन; मनुष्यप्रकोपकारणस्याप्रासादिकस्याकरणात्। न शोकेन; धर्मताभिज्ञत्वात् ॥५८॥

पुनस्त्रयो वङ्का उक्ताः सूत्रे—कायवङ्कः, वाग्वङ्कः, मनोवङ्कः। त्रयो दोषाः—कायदोषः, वाग्दोषः, मनोदोषः। त्रयः कषायाः—कायकषायः, वाक्कषायः, मनःकषाय इति। तत्र यथाक्रमं वेदितव्याः।

वङ्कदोषकषायोक्तिः शाठ्यद्वेषजरागजे।

शाठ्यजं कायकर्म कायवङ्क इत्युक्तम्; कुटिलान्वयत्वात्। एव वाङ्मनोवङ्कौ।

द्वेषजं कायकर्म कायदोष इत्युक्तम्; चित्तप्रदोषान्वयत्वात्। एवं वाङ्मनोदोषौ।

रागजं कायकर्म कायकषाय इत्युक्तम्, रञ्जनान्वयत्वात्। एवं वाङ्मनःकषायौ।

कृष्णशुक्लादिभेदेन पुनः कर्म चतुर्विधम् ॥ ५९ ॥

१. अस्ति कर्म कृष्णं कृष्णविपाकम्। २. अस्ति कर्म शुक्लं शुक्लविपाकम्। ३. अस्ति कर्म कृष्णशुक्लं कृष्णशुक्लविपाकम्। ४. अस्ति कर्म अकृष्णमशुक्लमविपाकम्। यत् तत्कर्म कर्मक्षयाय संवर्तते इति ॥ ५९ ॥

---

*अन्यत्र बुद्धा*दिति। महापुण्यसम्भारत्वान्न बुद्धस्य। तद्वद् *भूतवैषम्येणापि चित्तं क्षिप्यते*। न कर्मणेति। किम्? *आर्याणां क्षिप्यते चित्तम् अन्यत्र भूतवैषम्या*देव। किं कारणम्? इत्याह—*नियतस्य* कर्मणः *पूर्वं* पृथग्जनावस्थायामेव *विपाकात्*। *अनियतस्याविपाका*दार्यावस्थायाम्। अतएव चैतदनियतमित्युच्यते।

*पञ्चभयसमतिक्रमा*दिति। पञ्च भयानि—आजीविकाभयम्, अश्लोकभयम्, पर्षच्छारद्यभयम्, मरणभयम्, दुर्गतिभयं च। तत्राश्लोकभयमकीर्तिभयम्। पर्षच्छारद्यभयं सभायां साङ्कुचित्यम्। *अप्रासादिकस्ये*ति। अप्रसादनीयस्य कर्मणः। *धर्मता अभिज्ञत्वा*दिति। सर्वं सास्रवं दुःखम्, सर्वे संस्कारा अनित्याः, सर्वे धर्मा अनात्मान इति धर्मस्वभावाभिज्ञत्वात् ॥ ५८ ॥

*कुटिलान्वयत्वा*दिति। कुटिलहेतुकत्वात्। साध्यं हि कौटिल्यम्।

*रञ्जनान्वयत्वा*दिति। यथा कषायो रञ्जनहेतुस्तथा रागोऽपीत्यतस्तत्साधर्म्यादेवमुक्तम् ॥ ५९ ॥

तत्र—

अशुभं रूपकामाप्तं शुभं चैव यथाक्रमम् ।
कृष्णशुक्लोभयं कर्म तत्क्षयाय निरास्रवम् ॥ ६० ॥

अशुभं कर्म एकान्तेन कृष्णं क्लिष्टत्वात्, कृष्णविपाकं चामनोज्ञविपाकत्वात् । रूपाप्तं शुभमेकान्तेन शुक्लम्; अकुशलेनाव्यतिभेदात् । शुक्लविपाकं च मनोज्ञविपाकत्वात् ।

आरूप्याप्तं कस्मान्नोच्यते, यत्र किल द्विविधोऽस्ति विपाकः—आन्तराभविक, औपपत्तिभविकश्च[१] त्रिविधस्य च[१] कायवाङ्मनस्कर्मणो यत्रैव सम्भवस्तत्रैवोक्तमिति ।

तदपि तूक्तं सूत्रान्तरे—"कामाप्त शुभं कर्म कृष्णशुक्लमकुशलव्यवकीर्णत्वात्, कृष्णशुक्लविपाकं व्यवकीर्णविपाकत्वात्" ? सन्तानत एतद्व्यवस्थापितम्, न स्वभावत । न ह्येवञ्जातीयकमेक कर्मास्ति विपाको वा यत् कृष्णं च स्यात्, शुक्लं च; अन्योन्यविरोधात् ।

ननु चैवमकुशलस्यापि कर्मणः कुशलव्यवकीर्णत्वात् कृष्णशुक्लत्वं प्राप्नोति ?

कामाप्तमिति । अनेन शुभं विशिष्यते, नाशुभम्; तस्यावश्यं कामाप्तत्वात् ।

आरूप्याप्तं कस्मान्नोच्यत इति । तदपि ह्यकुशलेन न व्यतिभिद्यते । न व्यतिमिश्रयत इत्यर्थ. । *यत्र किलेति* विस्तरः । किंशब्द परमते । *यत्र किलान्तराभविकः* अन्तराभवे भवो *विपाकः* । एवमौपपत्तिभविकोऽपि । *त्रिविधस्य च कायवाङ्मनस्कर्मणो* विपाको ध्यानसंवरसंगृहीतयो. कायवाक्कर्मणो. द्वितोयादिष्वपि ध्यानेषु सद्भावादस्ति । *तत्रैवोक्तम्* । शुक्लं शुक्लविपाकमिति ।

तदपि तूक्तं सूत्रान्तर इति । तदप्यारूप्याप्तम् । अस्ति कर्म शुक्लं शुक्लविपाकम् । तद्यथा—प्रथमे ध्याने । एवं यावद् भवाग्र इति । अनेन स्वाभिप्रायं दर्शयति । येन *किल* शब्दं प्रयुक्तवान् । *सन्तानत एतद् व्यवस्थापितमिति* । एकस्मिन् सन्ताने कुशलं चाकुशलं च समुदाचरतीति कृत्वा कुशलमकुशलेन व्यवकीर्यते । *अन्योन्यविरोधादिति* । कुशलमकुशलेन विरुध्यते, अकुशलञ्च कुशलेनेति द्विरूपता न युज्यते ।

---

१. का० पुस्तके नास्ति ।

नावश्यमकुशलं कुशलेन व्यवकीर्यते; कामधातौ तस्य बलवत्त्वात् । कुशलं तु व्यवकीर्यते; दुर्बलत्वादिति ।

अनास्रवं कर्मैषां त्रयाणां कर्मणां क्षयाय प्रहाणाय संवर्तते । तद्ध्यकृष्णम-क्लिष्टत्वाद्, अशुक्लं विपाकशुक्लताभावात् ।

आभिप्रायिको ह्येषोऽशुक्लशब्दः । उक्तं तु **भगवता महत्यां शून्यताया-**मशैक्षान् धर्मानारभ्य —"इमे ते आनन्द धर्मा एकान्तकुशला एकान्तानवद्याः" इति । शास्त्रे च—"शुक्ला धर्माः कतमे ? कुशला धर्मा अनिवृताव्याकृताश्च" (   ) इति । अविपाकं धात्वपतितत्वात्, प्रवृत्तिविरोधाच्च ॥ ६० ॥

किं पुनः सर्वमनास्रवं कर्म सर्वस्यास्य त्रिविधस्य कर्मणः क्षयाय संवर्तते ? नेत्युच्यते । किं तर्हि ?

धर्मक्षान्तिषु वैराग्ये चानन्तर्यपथाष्टके ।
या चेतना द्वादशधा कर्म कृष्णक्षयाय[1] तत् ॥ ६१ ॥

नावश्यमकुशलं कुशलेन व्यवकीर्यत इति विस्तरः । व्यवकीर्यते, न त्ववश्यम् । *यस्मात् कामधातौ* प्रतिपक्षभूतस्य समाधेरभावादकुशलस्य *बलवत्त्वम्* । अत एव च कुशलस्य दुर्बलत्वम् । तथा हि कामधातौ मिथ्यादृष्ट्या कुशलमूलसमुच्छेदो भवति, न तु सम्यग्दृष्ट्या मिथ्यादृष्टिसमुच्छेदो भवति ।

आभिप्रायिको ह्येषोऽशुक्लशब्द इदि । विपाकशुक्लताभावादशुक्लम्, न तु नैव शुक्लमित्यर्थः । अपि च—यच्छुक्लमुक्तं तन्न भवतीत्यशुक्लम् । *महत्यां शून्यतायामिति* । महाशून्यतार्थसूत्रे । *अनिवृताव्याकृताश्च शुक्लाः* । अक्लिष्टत्वात् । *अविपाकं धात्वपतितत्वादिति* । अनास्रवा धर्माः, न धातुपतिताः । धातुपतितश्च विपाक इत्यतोऽनास्रवं कर्माविपाकम् । कस्माद् ? इत्याह—*प्रवृत्तिविरोधत* इति । अनास्रवं हि कर्म धातुपतितानां धर्माणां प्रवृत्तिं विरुणद्धि, न तु जन-यतीत्यविपाकम् ॥ ६० ॥

"कर्म-कर्मक्षयाय" इति । द्विः कर्मग्रहणं यत्तत् कर्मास्तीत्यपदिष्टम् । तत् कर्म सत् संविद्यमानमप्रच्युतस्वभावम् । *कर्मक्षयाय* संवर्तत इत्यस्य चतुर्थस्य कर्मणो द्योतनार्थम् । अथवा वीप्साप्रयोग एषः । कर्मणः कर्मणः क्षयाय संवर्तत

---

१. कर्मक्षयाय—इति स्फुटार्थासम्मतः पाठः प्रतिभाति ।

दर्शनमार्गे चतसृषु धर्मज्ञानक्षान्तिषु कामवैराग्ये चाष्टास्वानन्तर्यमार्गेषु या चेतना सेयं द्वादशविधा चेतना कृष्णस्य कर्मणः प्रहाणाय कर्म ॥६१॥

नवमे चेतना या सा कृष्णशुक्लक्षयाय च ।

नवमे कामवैराग्यानन्तर्यमार्गे या चेतना सा कृष्णशुक्लस्य कुशलस्य कर्मणः कृष्णस्य चाकुशलस्य नवमस्य प्रकारस्य प्रहाणाय ।

शुक्लस्य ध्यानवैराग्येष्वन्त्यानन्तर्यमार्गजा ॥ ६२ ॥

ध्यानाद्ध्यानाद् वैराग्यं कुर्वतो योऽन्त्यो नवम आनन्तर्यमार्गस्तत्र या चेतना इयं चतुर्विधा चेतना शुक्लस्य कर्मणः प्रहाणाय ।

किं पुनः कारणमन्त्येनैवानन्तर्यमार्गेण कुशलस्य कर्मणः प्रहाणम्, नान्येन ? न हि तस्य स्वभावप्रहाणम्; प्रहीणस्यापि सम्मुखीभावात्। किं तर्हि? तदालम्बनक्लेशप्रहाणात् । अतो यावदेकोऽपि तदालम्बनक्लेशप्रकार आस्ते, तावदस्य प्रहाणं नोपपद्यते ॥ ६२ ॥

अन्ये नरकवेद्यान्यकामवेद्यं द्वयं विदुः ।

अन्ये पुनराचार्याः पश्यन्ति—नरकवेदनीयं नरकाच्चान्यकामधातुवेदनीयं कर्म यथाक्रमं कृष्णं कृष्णशुक्लं चेति । नरके ह्यकुशलस्यैव कर्मणो विपाकस्तेन

इत्यर्थः । *चतसृष्विति* विस्तरः । *धर्मक्षान्तिग्रहणम्, कामवैराग्ये चानन्तर्यमार्गग्रहणं* कामावचरस्य *कृष्णस्य कर्मणः प्रहाणमार्गत्वात्* । अनास्रवमार्गस्यैवेहाधिकृतत्वाल्लौकिका आनन्तर्यमार्गास्तत्प्रहाणभूता अपि न गृह्यन्ते ॥ ६१ ॥

"*शुक्लस्य ध्यानवैराग्येषु*" इति । कुशलस्यैवेत्यवधार्यते; तत्र कृष्णाभावात् । क्लिष्टसंस्कारप्रहाणमष्टाभिः । नवमेन तु कुशलस्यापि ।

न हि तस्य स्वभावप्रहाणमिति । प्राप्तिच्छेदप्रहाणम् । *प्रहीणस्यापि* कुशलस्य *सम्मुखीभावात्* । *तदालम्बनक्लेशप्रहाणादिति* । तदालम्बनस्य क्लेशस्य प्रहाणात् तस्य कुशलस्य प्रहाणं भवति, तदालम्बनक्लेशप्रहाणं च नवमस्य तदालम्बननरकवेदनीयक्लेशप्रकारस्य प्रहाणे सति भवतीति नवमानन्तर्यमार्गचेतनैव कृष्णशुक्लस्य कर्मणः क्षयाय भवति। तदा हि नवमस्य क्लेशप्रकारस्य प्राप्तिच्छेदे विसंयोगप्राप्तिरुत्पद्यते । तस्य च कृष्णशुक्लस्य कर्मणोऽन्यस्यापि चानिवृताव्याकृतस्य सास्रवस्य धर्मस्य विसंयोगप्राप्तिरुत्पद्यते इति वर्णयन्ति । एवं चतुर्ध्यानवैराग्येष्वपि वक्तव्यम् ॥ ६२ ॥

तद्वेदनीयं कृष्णमित्युच्यते। अतोऽन्यत्र कामधातौ कुशलाकुशलस्य कर्मणो विपाकः, तेन तद्वेदनीयं कृष्णशुक्लमित्युक्तम्।

दृग्घेयं कृष्णमन्ये,

अन्ये पुनराहुः—दर्शनप्रहातव्यं कर्म **कृष्णम्**; कुशलेनामिश्रत्वात्।

अन्यत् कृष्णशुक्लं तु कामजम्॥ ६३॥

अन्यत्तु कामावचरं कर्म **कृष्णशुक्लम्**। किं तदन्यत्? भावनाप्रहातव्यम्। तद्धि कुशलं च, अकुशलं च सम्भवति॥ ६३॥

सूत्र उक्तम्—"त्रीणि मौनेयानि—कायमौनेयम्, वाङ्मौनेयम्, मनोमौनेयं च"। तत्र—

अशैक्षं कायवाक्कर्म मनश्चैव यथाक्रमम्।
मौनत्रयम्,

अशैक्षे **कायवाक्कर्मणी** काय-वाङ्मौनेये। **अशैक्षं** तु **मन एव** मनोमौनम्[1],

---

तेन तद्वेदनीयमिति। *तेन* नरकगतिनैयम्यकारणेन। तद्वेदनीयं नरकवेदनीयमित्यर्थः। *अतोऽन्यत्रेति* विस्तरः। ततो नरकगतेरन्यत्र *कामधातौ* मनुष्यादिगतावकुशलस्य *कुशलस्य च कर्मणो विपाकः*। *तेन* गतिनैयम्यकारणेन तदन्यकामधातुवेदनीयमुभयमप्यविशेष्य मिश्रीकृत्य *कृष्णशुक्लमित्युक्तम्*। न पुनरेवं ग्रहीतव्यम्—कुशलमपि कृष्णशुक्लमेवमकुशलमपीति।

कुशलेनामिश्रत्वादिति। न हि कुशलं दर्शनप्रहातव्यमस्ति।

"न दृष्टिहेयमक्लिष्टम्" (अभि० को० १.३९) इति नियमादत्र चोद्यते—कामावचरं दृग्घेयं कृष्णमिति विशेष्यं वक्तव्यम्, इतरथा हि रूप्यारूप्यावचरस्यापि दर्शनहेयस्य कृष्णविपाकत्ववचनप्रसङ्ग इति?

न वक्तव्यम्; *"अन्यत् कृष्णशुक्लं तु कामजम्"* इति। *कामजमित्यस्योभयविशेषणत्वात्*। *कामजं दृग्घेयं कृष्णम्*। कामजमन्यत् कृष्णशुक्लमिति। *तद्धीति* विस्तरः। तद्धि कामावचरं भावनाप्रहातव्यम्। *कुशलं चाकुशलं च सम्भवति*। तन्मिश्रीकृत्योभयमपि कृष्णशुक्लमित्युक्तम्। न पुनः प्रत्येकम्॥ ६३॥

त्रीणि मौनेयानीति। मुनिता वा मुनिकर्म वा *मौनेयम्*, कापेयवत्। *मौनत्रयमिति*। मुनेरिदं मौनम्। *अशैक्ष* इति विस्तरः। *अशैक्षं कायकर्माविज्ञप्तिस्वभावं कायमौनम्*। एवं *वाङ्मौनम्*। अथ कस्मादविज्ञप्तिरेव गृह्यते, न पुनर्विज्ञप्तिरपि?

---

१. मनोमौनेयं—का०।

न मनस्कर्मेति । किं कारणम् ? चित्तं हि परमार्थमुनिः । तत् किल कायवाक्कर्मभ्यामनुमीयत इति ।

अपि खलु कायवाक्कर्मणी विरतिस्वभावम्,[1] न मनस्कर्म; चित्ताविज्ञप्त्यभावात् । विरमार्थेन च मौनम् । अतो मन एव विरतं मौनमित्युच्यते ।

कस्मादशैक्षमेव, नान्यत्? अर्हतः परमार्थमुनित्वात्; सर्वक्लेशजल्पोपरतेः ।।

त्रीणि शौचेयानि उक्तानि सूत्रे—"कायशौचेयम्, वाक्शौचेयम्, मनःशौचेयं च" । तदेतत्—

त्रिधा शौचं सर्वं सुचरितत्रयम् ।। ६४ ।।

सर्वं कायसुचरितं कायशौचम् । सर्वं वाङ्मनःसुचरितं वाङ्मनःशौचम् । दुश्चरितमलापकर्षणात् तावत्कालमत्यन्तं च[2] ।

एषा च देशना मिथ्यामौनशौचाधिमुक्तानां[3] विवेचनार्थम् ।। ६४ ।।

विज्ञप्तेः सास्रवत्वेनाशैक्षात्वासम्भवात् । *मन एव मनोमौनमिति* । स्वार्थे वृद्धिविधानात् । *चित्तं हि परमार्थमुनिरिति* । सर्वक्लेशजल्पोपरतेरिति कारणं वक्ष्यते । *तत् किल कायवाक्कर्मभ्यामशैक्षाभ्यानुमीयते* अशैक्षमिति । कथं तथागतोऽनुमातव्यः ? "प्रशान्तेन कायकर्मणा प्रशान्तेन वाक्कर्मणा" इति सूत्रे वचनात् ।

किलशब्देन वैभाषिकमतं द्योतयित्वा*चार्यः* स्वमतमाह—*अपि खल्विति* विस्तरः । *चित्ताविज्ञप्त्यभावादिति* । यस्माच्चित्तस्याविज्ञप्तिर्नास्त्यतो *न मनस्कर्म विरतिस्वभावम्* । *विरमार्थेन च मौनमिति* । *विरमो* विरतिः । सर्वाकुशलविरमार्थेन मौनमित्यभिप्रायः । *अतो मन एव* सर्वाकुशलेभ्यो *विरतं मौनमित्युच्यते* ।

सर्वक्लेशजल्पोपरतेरिति । वितथालम्बनजल्पनात् क्लेशा *जल्पा* इत्युच्यन्ते । ते चार्हत उपरता इत्य*र्हन् परमार्थमुनिः* ।

शौचेयानीति । शुचिभावः शौचेयम्, शौचमित्यर्थः । *सर्व*ग्रहणं सास्रवानास्रवसुचरितपरिग्रहार्थम् । *तावत्कालमत्यन्तं* चेति । तावत्कालं दुश्चरितमलापकर्षकं सास्रवेण सुचरितत्रयेण । *अत्यन्तम्* । अनास्रवेण । तद्धि "भिक्षवः प्रहीणं यदार्यया प्रज्ञया" (   ) इति सूत्रात् ।

मिथ्यामौनशौचाधिमुक्तानां विवेचनार्थमिति । तूष्णीम्भावमात्रेण शुद्धिदर्शिनी

---

१. ०स्वभावेन—का० । २. वा—का० ।

३. ०धिमुक्तिकानां—का० ।

त्रीणि दुश्चरितान्युक्तानि । तत्र—

अशुभं कायकर्मादि मतं दुश्चरितत्रयम् ।

अकुशलं कायवाङ्मनस्कर्म, यथाक्रमं कायवाङ्मनोदुश्चरितम् ।

अकर्मापि त्वभिध्यादि मनोदुश्चरितं त्रिधा ॥ ६५ ॥

अकर्मस्वभावमप्यस्ति त्रिविधं **मनोदुश्चरितं** चेतनार्थान्तरभूतम्—**अभिध्या, व्यापाद:**, मिथ्यादृष्टिश्च ।

अभिध्यादय एव मनस्कर्मेति दार्ष्टान्तिका:; **सञ्चेतनीयसूत्रे** वचनात् । एवं तु सति कर्मक्लेशयोरैक्यं स्यात् ? किं स्याद्यदि कश्चित् क्लेशोऽपि कर्म स्यात् ? नैतदस्ति; सूत्रं विरुद्धं स्यात् । सूत्रे तु चेतनायास्तन्मुखेन प्रवृत्तेस्तैस्तां दर्शयतीति वैभाषिका: । अनिष्टफलत्वात् कुत्सित: कायवाङ्मनश्चारो दुश्चरितम् ॥ ६५ ॥

विपर्ययात् सुचरितम्,

इष्टं कुशलं कायवाङ्मनस्कर्म—अनभिध्याऽव्यापादसम्यग्दृष्टयश्च ।

मिथ्यामौनाधिमुक्ता: । कायमलापकर्षणमात्रेण शुद्धिदर्शिनो मिथ्याशौचाधिमुक्ता: । तेषां विवेचनं ततो दर्शनात् प्रच्यावनम्, तदर्थमेतानीति ॥ ६४ ॥

*सञ्चेतनीयसूत्रे वचनादि*ति । "सञ्चेतनीयं कर्म कृत्वोपचित्य नरकेषूपपद्यते । कथं च भिक्षव: सञ्चेतनीयं कर्म कृतं भवत्युपचितम् ? इह भिक्षव एकत्य: सञ्चित्य त्रिविधं कायेन कर्म करोत्युपचिनोति, चतुर्विधं वाचा, त्रिविधं मनसा" इति विस्तरेणोक्त्वाह—"कथं भिक्षवस्त्रिविधं मनसा सञ्चेतनीयं कर्म कृतं भवत्युपचितम् ? *यथापीहैकत्योऽभिध्यालुर्भवति व्यापन्नचित्तो यावन्मिथ्या*दृष्टि: । खलु भिक्षव इहैकत्यो भवति विपरीतदर्शी" (   ) इति विस्तर: । न चान्यदभिध्यादिव्यतिरिक्तं तत्र मनस्कर्मोक्तमिति *अभिध्यादय एव मनस्कर्मे*ति । *दार्ष्टान्तिका:* सौत्रान्तिकविशेषा इत्यर्थ: ।

*एवं तु सति कर्मक्लेशयोरैक्यं स्यादि*ति । अभिध्याव्यापादमिथ्यादृष्टय: क्लेशा:, त एव कर्मेति तदैक्यं स्यात् । *नैतदस्ति । कश्चित् क्लेशोऽपि कर्म स्या*दिति । "चेतना कर्म चेतयित्वा च" इति वचनात् । यद्येवं सञ्चेतनीयं सूत्रं कथं नीयते ? इत्याह–*सूत्रे त्वि*ति विस्तर: । *सूत्रे तु चेतनायास्तन्मुखेना*भिध्यादिमुखेन *प्रवृत्तेस्तै*रभिध्यादिभिस्*तां* चेतनां *दर्शयति* । "अभिध्यालु: खलु भिक्षवो भवति" इति विस्तरेण । *अन्यथा* "चेतनामतं भिक्षव: कर्म वदामि चेतयित्वा

परानुग्रहोपघाताभिसन्ध्यभावे कथं सम्यग्दृष्टिमिथ्यादृष्ट्योः कुशलाकुशलत्वम् ? तन्मूलत्वात् ।

यानि चैतानि दुश्चरितसुचरितान्युक्तानि,

तदौदारिकसंग्रहात् ।

दश कर्मपथा उक्ता यथायोगं शुभाशुभाः ॥ ६६ ॥

तेषामेव सुचरितदुश्चरितानां चौदारिकसंग्रहेण **दश कर्मपथाः सूत्र उक्ताः यथायोगम्**—कुशलाः सुचरितेभ्यः, अकुशला दुश्चरितेभ्यश्च[1] ।

किमत्र दुश्चरितमसंगृहीतम् ? किं वा सुचरितम् ? अकुशलेषु तत्कर्मपथेषु कायदुश्चरितस्य प्रदेशो न संगृहीतः प्रयोगपृष्ठभूतः क्लिष्टश्चान्योऽपि वधबन्धनादिः[2]; तस्य नात्यौदारिकत्वात् ।

यद्धि कायदुश्चरितं परेषां जीवितभोगदारेभ्यश्च्यावकं तत् कर्मपथ उक्तं ततो विवेचनार्थम् । वाग्दुश्चरितमपि यदेव प्रशस्तं[3] तत्कर्मपथ उक्तं तदर्थमेव । मनोदुश्चरितस्य च प्रदेशश्चेतना[4] ।

कुशलेष्वपि कायसुचरितस्य प्रदेशः प्रयोगपृष्ठमद्यादिविरतिदानेज्यादिकः, वाक्सुचरितस्य प्रियवचनादिकः, मनःसुचरितस्य चेतना ॥ ६६ ॥

च" (　　　) इत्येतद्विरुध्यते । कर्मक्लेशयोश्चैक्ये अभिधर्मविरोधः स्यात् ।

परानुग्रहोपघाताभिसन्ध्यभाव इति विस्तरः । *परेषामनुग्रहोपघातयोरभिसन्ध्यभावे कथं सम्यग्दृष्टिमिथ्यादृष्ट्योर्यथाक्रमं कुशलाकुशलत्वमिति* । अतो ब्रवीति—*तन्मूलत्वादिति* । यस्मात् परानुग्रहाभिसन्धेः परोपघाताभिसन्धेश्च सम्यग्दृष्टिमिथ्यादृष्टी मूलं कारणमित्यर्थः । अतस्तयोः कुशलाकुशलत्वम् ॥ ६५ ॥

यथायोगमिति । यथासम्भवम् । कथम् ? इत्याह—*कुशलाः सुचरितेभ्यः, अकुशला दुश्चरितेभ्यश्चेति* ।

क्लिष्टश्चान्योऽपीति । वधबन्धनादिः । *तस्य नात्यौदारिकत्वादिति* । तस्य प्रयोगपृष्ठभूतस्य क्लिष्टस्यान्यस्यापि अनत्यौदारिकत्वात् । *मनोदुश्चरितस्य च प्रदेशश्चेतना* । न संगृहीतेति वर्तते ।

मद्यादिविरतिदानेज्यादिक इति । प्रथमेनादिशब्देन ताडनबन्धनादिविरतिर्गृह्यते । द्वितीयेनापि स्नपनोद्वर्तनविषमहस्तप्रदानादिर्गृह्यते । *प्रियवचनादिक*

---

१. दुश्चरितेभ्य.—का० ।　　२. बन्धादिः—का० ।

३. प्रशादं—का० ।　　४. प्रदेशचेतना—का० ।

एषां च कर्मपथानाम्

अशुभाः षडविज्ञप्तिः,

अकुशलाः षट् कर्मपथा अवश्यमविज्ञप्तिस्वभावाः प्राणातिपातादत्तादान-मृषावाद-पैशुन्य-पारुष्य-सम्भिन्नप्रलापाः; परेण कारयतो मौलविज्ञप्त्यभावात् ।

द्विधैकः,

काममिथ्याचारो नित्यं विज्ञप्त्यविज्ञप्तिस्वभावः; तस्य स्वयमेव निष्ठापनात् । न हि तं परेण कारयतस्तादृशी प्रीतिर्भवतीति ।

तेऽपि कुर्वतः ।

तेऽपि षट् कर्मपथाः स्वयं कुर्वतो द्विविधा भवन्ति—विज्ञप्तिः, अविज्ञप्तिश्च । तत्कालमरणे पश्चान्मरणे त्वविज्ञप्तिरेव ।

कुशलानां पुनः कर्मपथानां

द्विविधाः सप्त कुशलाः,

कुशलाः सप्त रूपिणः कर्मपथा अवश्यं द्विप्रकाराः—विज्ञप्तिः, अविज्ञप्तिश्च; विज्ञप्त्यधीनत्वात् समादानशीलस्य ।

अविज्ञप्तिः समाधिजाः ॥ ६७ ॥

ध्यानानास्रवसंवरसंगृहीताः **समाधिजा** उच्यन्ते । ते **ह्यविज्ञप्तिरेव;**

इति । आदिशब्देन धर्मदेशनादिमार्गकथनादिर्गृह्यते । *मनःसुचरितस्य चेतना न संगृहीतेति* वर्तते ॥ ६६ ॥

षडविज्ञप्तिरिति । षडविज्ञप्तिरवश्यम्, न त्वविज्ञप्तिरेव षडित्यवधारणम् । *मौलविज्ञप्त्यभावादिति* । यस्मान्मौली कर्मपथसंगृहीता विज्ञप्तिर्नास्ति । आज्ञापन-विज्ञप्तिस्त्वस्ति प्रयोगसंगृहीतेति *वैभाषिकसिद्धान्तः* ।

"द्विधैकः" इति । द्विधैवैक इत्यवधारणार्थ आरम्भः ।

तत्कालमरण इति । विज्ञप्तिकालमरणे । कालान्तरमरणे त्वविज्ञप्तिरेव भवति ।

"द्विविधाः सप्तकुशलाः" इति । द्विविधा एवेत्यवधारणम् । *विज्ञप्त्यधीन-त्वात् समादानशीलस्येति* । शीलं हि द्विविधम्—समादानशीलम्, प्रातिमोक्ष-संवरः । धर्मताशीलं च ध्यानानास्रवसंवरौ । समादानशीलं विज्ञप्त्यधीनम्, तद्धि परस्मादादीयते । धर्मताशीलं तु न विज्ञप्त्यधीनम्; चित्तमात्राधीनत्वात् ।

चित्तमात्राधीनत्वात् ॥ ६७ ॥

सामन्तकास्तु विज्ञप्तिः,

कर्मपथसामन्तकास्तु विज्ञप्तिस्वभावा अवश्यम् ।

अविज्ञप्तिर्भवेन्न वा ।

यदि तीव्रेण पर्यवस्थानेन प्रमादेन वा घनरसेन प्रयोगमारमेत, स्याद-विज्ञप्तिः, अन्यथा न स्यात् ।

विपर्ययेण पृष्ठानि,

सामन्तकेभ्यो **विपर्ययेण** कर्मपथानां **पृष्ठानि** वेदितव्यानि। तानि अवश्यमविज्ञप्तिस्वभावानि । विज्ञप्तिस्तु भवेन्न वा । यदि कर्मपथं कृत्वा पुनस्तस्यानुधर्मं चेष्टेत; तस्य स्याद् विज्ञप्तिः, अन्यथा न स्यात् ।

अथ कुतो यावदेषां प्रयोग-मौल-पृष्ठानां व्यवस्थानम् ?

यदा तावदिह कश्चित् पशुं हन्तुकामो मञ्चकादुत्तिष्ठति, मूल्यं गृह्णाति, गच्छति, आमृशति, पशुं क्रीणाति, आनयति, कुष्णाति[1], प्रवेशयति, निहन्तुं शस्त्रमादत्ते, प्रहारमेकं ददाति, द्वौ वा यावन्न जीविताद् व्यपरोपयति तावत् **प्रयोगः** ।

येन तु प्रहारेण जीविताद् व्यपरोपयति तत्र या विज्ञप्तिः, तत्क्षणिका वाऽविज्ञप्तिरयं **मौलः** कर्मपथः ।

द्वाभ्यां हि कारणाभ्यां प्राणातिपातावद्येन स्पृश्यते—प्रयोगतः, मृते सति फलपरिपूरितश्च । ततः परमविज्ञप्तिक्षणाः[2] **पृष्ठं** भवन्ति । यावच्च तं पशुं

अत एवाह—*"अविज्ञप्तिः समाधिजा"* इति ॥ ६७ ॥

"सामन्तकास्तु विज्ञप्तिः" इति । कामावचरकर्मपथप्रयोगा अवश्यं विज्ञप्तिः, न त्ववश्यमविज्ञप्तिरिति ।

अत एवाह—*"अविज्ञप्तिर्भवेन्न वा"* इति । *पर्यवस्थानेनेति* । आह्रीक्यादिना । *घनरसेनेति* । घनवेगेन । *तस्यानुधर्मं चेष्टेतेति* । तस्य कर्मपथस्यानुधर्ममनुसदृशं कर्म । तद्यथा—मृतेऽपि प्राणिनि पुनः प्रहारदानम्, कोषणम्, मांसच्छेदनमित्येवमादि ।

द्वौ *कुष्णातीति* शब्दौ । परस्य चर्मापनयनमर्थः । पूर्वस्यार्थान्तरं द्रष्टव्यम् ।

फलपरिपूरितश्चेति । प्रयोगस्य मौलः कर्मपथः फलपरिपूरिः । यो हि प्रयुज्यते मौलं कर्मपथं न जनयति, तस्य प्रयोगफलमस्ति; न तु फलपरिपूरिः ।

---

१. पुष्णाति—का० । २. ऊर्ध्वं०—का० ।

कुष्णाति, शोधयति, विक्रीणीते, पचति, खादयति, अनुकीर्तयति वा, तावदस्य विज्ञप्तिक्षणा अपि पृष्ठं भवन्ति ।

एवमन्येष्वपि यथासम्भवं योज्यम् ।

अभिध्यादीनां नास्ति प्रयोगः, न पृष्ठम्; सम्मुखीभावमात्रात् कर्मपथः ।

इदमत्र वक्तव्यम्—किं तावत् मरणभवस्थे तस्मिन् प्राणिनि ये विज्ञप्त्यविज्ञप्ती ते कर्मपथः ? आहोस्विन्मृते ? किं चातः ? यदि तावन्मरणभवस्थे, सहमृतस्यापि हन्तुर्घातयितुर्वा प्राणातिपातावद्येन योगः प्राप्नोति, न चैष सिद्धान्तः ? अथ मृते, यदुक्तम्—"येन तु प्रहारेण जीविताद् व्यपरोपयति तत्र या विज्ञप्तिस्तत्क्षणिका चाविज्ञप्तिरयं[1] मौलः कर्मपथः" इति तत्र वक्तव्यम् ? यच्चापीदं शास्त्र उक्तम्—"स्यात् प्राणी हतः प्राणातिपातश्चानिरुद्धः । स्याद्यथा हि स[2] प्राणी[2] जीविताद् व्यपरोपितो भवति प्रयोगश्चाप्रतिप्रस्रब्धः" इति, अत्र पृष्ठं प्रयोगशब्देनोक्तमिति वैभाषिकीयोऽर्थविरोधः, मौलस्यैव तदानीमनिरुद्धत्वात् ?

एवमन्येष्वपीति । यथा तावदिह कश्चित् परस्वं हर्तुकामो मञ्चादुत्तिष्ठति, शस्त्रं गृह्णाति, परगृहं गच्छति, सुप्तो न वेत्याकर्णयति, परस्वं स्पृशति, यावन्न स्थानात् प्रच्यावयति तावत् प्रयोगः । यस्मिंस्तु क्षणे स्थानात् प्रच्यावयति तत्र या विज्ञप्तिस्तत्क्षणिका चाविज्ञप्तिरयं मौलः कर्मपथः । द्वाभ्यां हि कारणाभ्यामदत्तादानावद्येन स्पृश्यते—प्रयोगतः, फलपरिपूरितश्च । ततः परमविज्ञप्तिक्षणाः पृष्ठं भवन्ति । यावत्तत् परस्वं विभजते, विक्रीणीते, गोपायति, अनुकीर्तयति वा, तावदस्य विज्ञप्तिक्षणा अपि पृष्ठं भवन्तीति । एवमन्येष्वपि पञ्चसु यथासम्भवं योज्यम् ।

मरणभवस्थ इति । मृत एव । *न चैष सिद्धान्त* इति । "समं प्राक् च मृतस्यास्ति न मौलोऽन्याश्रयोदयात्" (अभि० को० ४.७२) इति सिद्धान्तात् । *तत्र वक्तव्यमिति* । व्यपरोपयतीति । विप्रकृतावस्थायामयोगात् । एवं तु वक्तव्यं स्यात्—मृते प्राणिनि या विज्ञप्तिस्तत्क्षणिका चाविज्ञप्तिरयं मौलः कर्मपथ इति । *यच्चापीदमिति* विस्तरः । वैभाषिकैरस्य शास्त्रवाक्यस्यैवमर्थो व्याख्यातः । *अत्र शास्त्रे प्रयोगशब्देन पृष्ठमुक्तमिति* । प्रयोग इव प्रयोगः । प्रयोगसदृशी या क्रियेत्यर्थः । अस्यार्थस्य *विरोधः* । कस्मात् ? *मौलस्यैव तदानीम*-

---

१. वा०—का० । २-२. तत्प्राणी—का० ।

यथा न दोषस्तथास्तु ।

कथं च न दोषः ? मौल एवात्र प्रयोगशब्देनोक्त इति ।

विज्ञप्तिस्तर्हि तदा कथं मौलः कर्मपथो भवति ? कथं च न भवितव्यम् ? असामर्थ्यात् ।

अविज्ञप्तिरिदानीं कथं भवति ? तस्मात् प्रयोगफलपरिपूरिकाले तदुभयं कर्मपथः स्यात् । कर्मपथोऽप्यन्यस्य प्रयोगः पृष्ठं च भवति । प्राणातिपातस्य दशापि कर्मपथाः प्रयोगः । यथा च शत्रोर्वधार्थं कृत्यं समुपस्थापयन् पशुना बलिं कुर्यात्, परकीयं कृत्वा दारेषु चास्य विप्रतिपद्येत तैरेव तद्घातनार्थम् । अनृतपिशुनपरुषसान्त्वैश्चास्य मित्रभेदं कुर्याद्, यान्यस्य परित्राणाय कल्पेरन् । अभिध्यां च तत्स्वे[1] कुर्यात् तत्रैव च व्यापादं तद्वधार्थं च मिथ्यादृष्टिं बृंहयेदिति ।

एवमन्येष्वपि यथायोगं योज्यम् ।

निरुद्धात् । मृते प्राणिनि मौलकर्मपथव्यवस्थापनादित्यत्राभिप्रायः ।

वैभाषिक आह—*यथा न दोषस्तथास्त्विति* । *कथं च न दोष* इत्या*चार्यः* ।

वैभाषिकः पुनराह—*मौल एवात्र प्रयोगशब्देनोक्त* इति । कुत्र ? योऽयं प्रश्नः स्यात्— 'प्राणी हतः प्राणातिपातश्चानिरुद्धः' इत्यत्र । 'पृष्ठं प्रयोगशब्देनोक्तम्' इति किमयं पक्षः परित्यक्त एव ? स च न परित्यक्त एव । उभयमपि हि सम्भवति । यदि मरणभवानन्तरक्षणवर्ती प्राणी भवति अत्र प्रयोगशब्देन मौल उक्त इतीष्यते । ततः परेण तु पृष्ठ इति ।

आचार्य आह—*विज्ञप्तिस्तर्हि तदा कथं मौलः कर्मपथो भवतीति* । मृते हि प्राणिनि विज्ञप्तिरकिञ्चित्करी । न हि तेन विज्ञप्तिप्रहारेण मृतस्य मारणं पुनरस्तीति मन्यमानोऽयं पृच्छति । कस्मादविज्ञप्तिं न पृच्छति ? यस्मादसावनिदर्शनत्वादप्रतिघत्वाच्च प्रहाराख्या न भवति । *कथं च न भवितव्यमिति* *वैभाषिकेणोक्ते* । स्वाभिप्रायमा*चार्यो* विवृणोति—*असामर्थ्या*दिति । प्राणिनि मृते तस्याः सामर्थ्यं न दृश्यत इति ।

वैभाषिक आह—*अविज्ञप्तिरिदानीं कथं भवति* । असति सामर्थ्ये *मौलः कर्मपथ* इति । यस्मादेवमविज्ञप्तिरसामर्थ्येऽपि मौलः कर्मपथो भवति, *तस्मात् प्रयोगफलपरिपूरिकाले* मौलकर्मपथपरिसमाप्तिकाले प्राणिनो मृतत्वावस्थायाम् । *तदुभयं* विज्ञप्त्यविज्ञप्त्याख्यं *कर्मपथः स्याद्* । युज्येतेत्यर्थः ।

एवमन्येष्वपि यथायोगं योज्यमिति । यथा परस्वं हर्तुकामः कार्यसिद्धये

---

१. स्व०—का०[1]।

न त्वभिध्यादयः प्रयोगा युज्यन्ते । न हि चित्तोत्पादमात्रेण प्रयुक्तो भवति; क्रियानारम्भात् ।

सूत्र उक्तम्—"प्राणातिपातो भिक्षवस्त्रिविधः—लोभजः, द्वेषजः, मोहजो यावन्मिथ्यादृष्टिः" (   ) इति । तत्र कीदृशः प्राणातिपातो लोभज इत्येवमादि वक्तव्यम् । नात्र सर्वेषां कर्मपथानां लोभादिभिर्निष्ठा ?

प्रयोगस्तु त्रिमूलजः ॥ ६८ ॥

प्रयोगस्तेषामकुशलमूलत्रयाज्जात इत्यादिसमुत्थानवचनादेवमुक्तः ।

तत्र लोभजप्राणातिपातो यथा—तच्छरीरावयवार्थमर्थार्थं क्रीतार्थं च प्राणिनं जीविताद् व्यपरोपयति आत्मसुहृत्परित्राणाय ।

द्वेषजो यथा—वैरनिपीडनार्थम् ।

मोहजो यथा— याज्ञिकानां धर्मबुद्ध्या राज्ञां च धर्मपाठकप्रामाण्याद्धिंसताम् । दुष्टानां किल निग्रहं कुर्वन्तो राजानः पुण्यभाजो भवन्तीति । पारसीकानां च । ते ह्येवमाहुः—"मातापितरौ जीर्णौ वा, ग्लानौ वा हन्तव्यौ" इति । ये चान्येऽप्येवमाहुः—"अहिवृश्चिकत्र्यम्बुकादयो मनुष्याणामुपघातातापका हन्तव्याः; मृगपशुपक्षिमहिषादयश्चोपभोगार्थत्वाद्" इति । यश्च मिथ्यादृष्टिप्रवर्तितः प्राणातिपातः ।

लोभजमदत्तादानम्—यो येनार्थी स तद्धरति, अन्यलाभसत्कारयशोऽर्थं वा, आत्मसुकृतपरित्राय वा । द्वेषजम्—यद्वैरनिपीडनार्थम् । मोहजं यथा —राज्ञां धर्म-

---

परकीयं हृत्वा तेन पशुना बलिं कुर्यात् । दारेषु चास्य विप्रतिपद्येत तैरेव तदपहारार्थम् । अनृत-पिशुन-परुष सान्त्वभेदैश्चास्य मित्रभेदं कुर्यात्, यान्यस्य परित्राणाय कल्पेरन् । अभिध्यां च तत् स्वे कुर्यात् । तद्द्रव्यस्वामिनि च व्यापादं मिथ्यादृष्टिं बृंहयेत् । एवं काममिथ्याचारादिषु यथासम्भवं योज्यम् । एषा दिक् ।

नात्र सर्वेषां कर्मपथानां लोभादिभिर्निष्ठेति । न च सर्वेषां लोभेन, किं तर्हि ? केषाञ्चिदेव काममिथ्याचारादीनाम् । नापि सर्वेषां व्यापादेन, किं तर्हि ? केषाञ्चिदेव प्राणातिपातादीनाम् । एवं न सर्वेषां मोहेन, किं तर्हि ? केषाञ्चिदेव मिथ्यादृष्ट्यादीनामेवेति ।

त्र्यम्बुकाः वरटाः । *आदिशब्देन* व्याघ्रादयः । *यश्च मिथ्यादृष्टिप्रवर्तित* इति ।

पाठकप्रामाण्यात् दुष्टनिग्रहार्थम् । यथा ब्राह्मणा आहुः—"सर्वमिदं ब्राह्मणा ब्राह्मणेभ्यो दत्तं ब्राह्मणानां दौर्बल्याद् वृषलाः परिभुञ्जते । तस्मादपहरन् ब्राह्मणः स्वमादत्ते, स्वमेव ब्राह्मणो भुङ्क्ते, स्वं वस्ते, स्वं ददाति च" (   ) इति । न चैषामपरस्वसंज्ञा भवति । यच्च मिथ्यादृष्टिप्रवर्तितम् ।

लोभजः काममिथ्याचारः—परदारादिषु तत्संरागादब्रह्मचर्यं लाभसत्कारार्थमात्मसुहृत्परित्राणाय । द्वेषजः—वैरनिपीडनार्थम् । मोहजो यथा—पारसीकानां मात्रादिगमनम्, गोसवे च यज्ञे । यथोक्तम्—"ब्राह्मणो गोसवेनेष्ट्वा संवत्सरगोव्रती भवति । उपहा उदकं चूषति, तृणानि च्छिनत्ति, उपैति मातरम्, उप स्वसारम्, उप सगोत्राम्" (   ) इति । ये चाहुः—"उदूखलपुण्यफलपक्वान्नतीर्थमार्गप्रख्यो मातृग्रामः" इति । मृषावादादयो लोभजा द्वेषजाश्च पूर्ववत् । मोहजो मृषावादः, यथाह—

"न नर्मयुक्तमनृतं हिनस्ति न स्त्रीषु राजन् न विवाहकाले ।
प्राणात्यये सर्वधनापहारे पञ्चानृतान्याहुरपातकानि" ॥

(   ) इति ।

यश्च मिथ्यादृष्टिप्रवर्तितो मृषावादः । पैशुन्यादयस्तु मिथ्यादृष्टिप्रवर्तिता

नास्ति परलोक इति कृत्वा निरपेक्षो हन्ति । *अयमपि मोहजः—अन्यलाभसत्कारयशोऽर्थमिति* । *अन्यलाभस्यार्थे* परस्वं हरति । यथाश्वहारिकः । *सत्कारस्य यशसो वार्थं* हरति । इदमपि लोभजमदत्तादानम् । *यच्च मिथ्यादृष्टिप्रवर्तितं* तदपि मोहजमदत्तादानम्, तत्र मोहप्राधान्यात् ।

उपैति मातरम् । अब्रह्मचर्यार्थे । *उपस्वसारम्* । उपैतीति वर्तते । उपस्वसारं भगिनीमित्यर्थः । *उपसगोत्रामुपैति* । समानगोत्रामित्यर्थः । उपहा=यजमानः । *ये चाहुरिति* विस्तरः । *उदूखलादितुल्यो मातृग्रामः* । यथोदूखलादयः साधारणा उपभोग्याः, एवं स्त्रीजनः । तस्मान्न दोषोऽस्त्यभिगच्छतामिति । *मृषावादादयो लोभजा द्वेषजाश्च पूर्ववदिति* । मृषावादपैशुन्यपारुष्यसम्भिन्नप्रलापा लोभजा अन्यलाभसत्कारयशोऽर्थं वा, आत्मसुहृत्परित्राणार्थं वा । द्वेषजा वैरनिर्यातनार्थम् ।

न नर्मयुक्तम् । *न परिहासयुक्तम्* ।

मिथ्यादृष्टिप्रवर्तित इति । 'नास्ति परलोकः' इति निर्मर्यादस्य यो मृषा-

मोहजाः । यश्च वेदाद्यसच्छास्त्रप्रलापः ॥ ६८ ॥

अभिध्यादयः कथं लोभजाः ?

तदनन्तरसम्भूतेरभिध्याद्यास्त्रिमूलजाः ।

लोभादनन्तरमुत्पन्ना लोभजाः, द्वेषादनन्तरं द्वेषजाः, मोहादनन्तरं मोहजाः ।

उक्ता अकुशलाः कर्मपथाः ॥

कुशलाः कथम् ? इत्याह—

कुशलाः सप्रयोगान्ता अलोभद्वेषमोहजाः ॥ ६९ ॥

सप्रयोगपृष्ठाः **कुशलाः** कर्मपथा **अलोभद्वेषमोहजाः**; कुशलचित्त-समुत्थितत्वात् । तस्य च अवश्यमलोभादिभिः सम्प्रयोगात् तत्राकुशलकर्मपथ-प्रयोगाद् विरतिः कुशलकर्मपथप्रयोगः । मौलाद् विरतिः मौलः । पृष्ठाद् विरति पृष्ठः ।

तद्यथा श्रामणेर उपसम्पाद्यमानो नानावासं प्रविशति, भिक्षून् वन्दते, उपाध्यायं याचते, यावदेकं कर्मवाचनं क्रियते द्वितीयं च — अयं प्रयोगः । तृतीयकर्मवाचने या विज्ञप्तिस्तत्क्षणिका चाविज्ञप्तिः— अयं मौलः कर्मपथः । तत ऊर्ध्वं यावन्निश्रया आरोच्यन्ते, तदधिष्ठानं च विज्ञपयति अविज्ञप्तिश्च यावदनुवर्तते—इदं पृष्ठम् ॥६९॥

वादोऽयं मोहजः । *पैशुन्यादयस्तु* । पैशुन्यपारुष्याबद्धप्रलापाः । मृषावादवत् *मोहजाः* । *यश्चेति* विस्तरः । *यश्च वेद-सांख्य-वैशेषिकाद्यसत्प्रलापः*, स चापि मोहजः *सम्भिन्नप्रलापः* ॥ ६८ ॥

तस्य चेति कुशलचित्तस्य । *नानावासं प्रविशतीति* । मण्डलं प्रविशतीत्यर्थः । *नानावासा* हि तस्मिन् महासीमामण्डले भवन्ति । *तृतीये कर्मवाचन* इति । ज्ञप्तिचतुर्थेन कर्मणा श्रामणेर उपसम्पाद्यते । तत्र ज्ञप्त्या इदन्नामानमुपसम्पाद-येत् सङ्घ इति । लिङर्थ उच्यते । कर्मवाचनेन लडर्थ उच्यते—इमं सङ्घ उपसम्पादयतीति । तत्र कर्मवाचनं त्रिरुच्यते । तृतीयस्य कर्मवाचनस्यापरि-समाप्तेः प्रयोगः *कर्मपथस्यावगन्तव्यः* । तस्यावसाने तु *या विज्ञप्तिस्तत्क्षणिका चाऽविज्ञप्तिरयं मौलः कर्मपथः । तत ऊर्ध्वं यावन्निश्रया आरोच्यन्त* इति । चत्वारो निश्रयाश्चीवरपिण्डपात-शय्यासनग्लानप्रत्ययभैषज्यलक्षणा यथोक्तेन विधिना तस्योपसम्पादितस्यारोच्यन्ते । *तदधिष्ठानं च विज्ञापयति* । निश्रया-धिष्ठानं च विज्ञप्तिं करोतीत्यर्थः । *अविज्ञप्तिश्च यावदनुवर्तते* । यावत् संवरो न त्यज्यत इत्यर्थः । इदं पृष्ठम् ॥ ६९ ॥

यदुक्तम्—"न सर्वेषां कर्मपथानां लोभादिभिर्निष्ठा" इति, अथ कस्य केन निष्ठा ?

वधव्यापादपारुष्यनिष्ठा द्वेषेण,

एषां प्राणातिपात-व्यापाद-पारुष्याणां **द्वेषेण** समाप्तिः; परित्यागपरुषचित्त-सम्मुखीभावात् ।

लोभतः ।

परस्त्रीगमनाभिध्याऽदत्तादानसमापनम् ॥ ७० ॥

लोभेन काममिथ्याचाराभिध्याऽदत्तादानानां समाप्तिः ॥ ७० ॥

मिथ्यादृष्टेस्तु मोहेन,

अधिमात्रमूतो हि तां निष्ठापयति ।

शेषाणां त्रिभिरिष्यते ।

के पुनः शेषाः ? मृषावादपैशुन्यसम्भिन्नप्रलापाः । एषां **त्रिभिरपि** निष्ठा—लोभेन, द्वेषेण, मोहेन वा ।

य एते कर्मपथाश्चतुर्भिः काण्डैरुक्तास्त्रयस्त्रय एकस्त्रयश्च, एषां यथाक्रमम्—

सत्त्वभोगावधिष्ठानं नामरूपं च नाम च ॥ ७१ ॥

सत्त्वाधिष्ठाना वधादयः । **भोगाधिष्ठानाः** परस्त्रीगमनादयः । **नामरूपा-धिष्ठाना** मिथ्यादृष्टिः । **नामकायाधिष्ठाना** मृषावादादयः ॥ ७१ ॥

"वधव्यापादपारुष्यनिष्ठाद्वेषेण" इति । द्वेषेणैवेत्यवधारणम् । *परित्यागपरुष-चित्तसम्मुखीभावादि*ति । परित्यागचित्तसम्मुखीभावात् । प्राणातिपातस्य निष्ठा द्वेषेण । *परुषचित्तसम्मुखीभावात्तु* व्यापादपारुष्ययोः ॥ ७० ॥

चतुर्भिः काण्डैरुक्ता इति । चतुर्भिर्भागैरुक्ता । कथम् ? "वधव्यापादपारुष्य-निष्ठा द्वेषेण" इत्येकः काण्डः । "लोभतः परस्त्रीगमनाभिध्यादत्तादानसमापनम्' इति" द्वितीयः । "मिथ्यादृष्टेस्तु मोहेन" इति तृतीयः । "शेषाणां त्रिभिरिष्यते" इति चतुर्थः काण्डः । *भोगाधिष्ठाना* इति । विषयाधिष्ठानाः । *नामरूपाधिष्ठाने*ति । पञ्चस्कन्धाधिष्ठानेत्यर्थः । नाम हि वेदनादयः स्कन्धाः । रूपं रूपस्कन्धः । अधिष्ठानम्, अधिकरणम्, विषय इत्यर्थान्तरम् । *नामकायाधिष्ठाना मृषावादादयो* वाङ्नाम्नि प्रवर्तन्त इति कृत्वा ॥ ७१ ॥

यः परं मरणान् नियमय्य समं तेन पूर्वं वा म्रियते, किमस्य मौलः कर्मपथो भवति ? उताहो न ?

समं प्राक् च मृतस्यास्ति न मौलः,

अत एवोच्यते—"स्यात् प्रयोगं कुर्यात् फलं च परिपूरयेन्न च प्राणातिपातावद्येन स्पृश्यते ? आह—स्यात्, यथापि तद्व्यपरोपकः पूर्वं स वा कालं कुर्यात्" (   ) इति । किं पुनस्तत् कारणम् ?

न हि वध्ये जीवति हन्तुः प्राणातिपातावद्येनास्ति योगः, नापि सहमृतस्य हन्तुः ।

अन्याश्रयोदयात् ।

येनाश्रयेण तत्प्रयोगः कृतः स उच्छिन्नः, अन्य एवाश्रयो निकायसभागभिन्न उत्पन्नः, तस्य प्रयोक्तृत्वात् कर्मपथेन योगो न उक्तः ।

यत्सेनापातमृगयावस्कन्धेषु परेषां वधार्थं बहवः समग्राः पतन्ति, एकश्च प्राणातिपातं करोति, कस्तेन समन्वागतो भवति ?

सेनादिष्वेककार्यत्वात्[1] सर्वे कर्तृवदन्विताः[1] ।। ७२ ।।

यथैव हि **कर्त्ता**, तथा **सर्वे** समन्वागता भवन्ति; **एककार्यत्वात्** । अर्थतो हि तेऽन्योन्यं प्रयोक्तारो भवन्ति ।

यस्तर्हि बलान्नीयते, सोऽपि समन्वागतो भवति ? अन्यत्र य एवं निश्चित्य यायात्—'यावज्जीवितहेतोरपि प्राणिनं न हनिष्यामि' इति ॥ ७२ ॥

कियता पुनः प्राणातिपातं स्वयं कुर्वतः कर्मपथो भवति ? कियता यावन्मिथ्यादृष्टिः कर्मपथः—इति लक्षणं वक्तव्यम् ? तदुच्यते—

"न मौलः" इति । प्रतिषेधात् पृष्ठमपि न भवतीति गम्यते । मौलपूर्वत्वात् पृष्ठस्य ।

न च प्राणातिपातावद्येन स्पृश्यत इति । न मौलेनेत्यभिप्रायः ।

"अन्याश्रयोदयात्" इति । विसभागाश्रयोदयादित्यर्थः ।

अर्थतो हि तेऽन्योन्यं प्रयोक्तार इति । न वाचा तेऽन्योन्यं प्रयोक्तारः, किं तर्हि ? प्राणातिपातकारणाभ्युपगमादर्थत इति दर्शयति । *एककार्यत्वात्* ॥ ७२ ॥

१-१. सेनादेश्चैककार्यत्वात् सर्वेकर्तृवदस्ति सः—इति पाठान्तरम् ।

प्राणातिपातः सञ्चिन्त्य परस्याभ्रान्तिमारणम् ।

यदि 'मारयिष्याम्येनम्' इति संज्ञाय परं मारयति, तमेव च मारयति नान्यं भ्रमित्वा—इयता **प्राणातिपातो** भवति । यस्तर्हि सन्दिग्धो मारयति—किमयं प्राणी न प्राणीति, स एवान्यो वेति, सोऽप्यवश्यमेतं निश्चयं लब्ध्वा तत्र प्रहरति । योऽस्तु सोऽस्त्विति कृतमेवानेन त्यागचित्तं भवति ।

कथं क्षणिकेषु स्कन्धेषु प्राणातिपातो भवति ? प्राणो नाम वायुः कायचित्तसन्निश्रितो वर्तते, तमतिपातयति[1] । यथा प्रदीपं निरोधयति, घण्टास्वनं वा ।

जीवितेन्द्रियं वा प्राणः, तन्निरोधयति । यद्येकस्यापि जीवितक्षणस्योत्पद्यमानस्यान्तरायं करोति, प्राणातिपातावद्येन स्पृश्यते, नान्यथा ।

कस्य तज्जीवितं यस्तदभावान्मृतो भवति ? 'कस्य' इति षष्ठीं **पुद्गलवादे** चिन्तयिष्यामि[2] । उक्तं तु **भगवता**—

संज्ञाय परिच्छिद्येत्यर्थः । *नान्यं भ्रमित्वेति* । न भ्रान्त्या *अन्यं* मारयतीत्यर्थः ।

क्षणिकेषु स्कन्धेष्विति । स्वरसेनैव विनश्वराणां स्कन्धानां कथमन्येनैषां निरोधः क्रियते इत्यभिप्रायः । *प्राणो नाम वायुः कायचित्तसन्निश्रितो वर्तत* इति । कथं चित्तसन्निश्रितो वायुः प्रवर्तते ? चित्तप्रतिबद्धवृत्तित्वात् । तथा हि—निरोधासंज्ञिसमापत्तिसमापन्नस्य मृतस्य च न प्रवर्तते । शास्त्रेऽप्युक्तम्—"य इमे आश्वासप्रश्वासाः, किं ते कायसन्निश्रिता वर्तन्त इति वक्तव्यम् ? चित्तसन्निश्रिता वर्तन्त इति वक्तव्यम् ? नैव कायचित्तसन्निश्रिता वर्तन्त इति वक्तव्यम् ? कायचित्तसन्निश्रिता वर्तन्त इति वक्तव्यम् ? आह—कायचित्तसन्निश्रिता वर्तन्त इति वक्तव्यमिति विस्तरः । *तमतिपातयति* इति । *तं* प्राणं विनाशयतीत्यर्थः । उत्पन्नस्य स्वरसनिरोधादनागतस्योत्पत्तिं प्रतिबध्नन् निरोधयतीत्युच्यते । *यथा प्रदीपं निरोधयति । घण्टास्वनं वा ।* क्षणिकमपि सन्तम् । कथं च स निरोधयति ? अनागतस्योत्पत्तिप्रतिबन्धात् ।

जीवितेन्द्रियं वा प्राण इति । चित्तविप्रयुक्तस्वभावमेनं दर्शयति ।

कस्य तज्जीवितम् । यस्तदभावान्मृत इति । यः प्राणी जीवितस्याभावान्मृतो भवति स बौद्धानां नास्ति; नैरात्म्यवादित्वात् । अत एवं पृच्छति । *कस्येति षष्ठीम् पुद्गलवादे* पुद्गलप्रतिषेधप्रकरणे—"असत्यात्मनि कस्येयं स्मृतिः ?

---

१. तमभिपातयति—का० । २. विचारयिष्यामः—का० ।

"आयुरूष्माऽथ विज्ञानं यदा कायं जहत्यमी ।
अपविद्धस्तदा शेते यथा काष्ठमचेतनम्" ॥ ( ) इति

तस्मात् सेन्द्रियः कायो जीवतीत्युच्यते, अनिन्द्रियो मृत इति ।

"अबुद्धिपूर्वादपि प्राणिवधात् कर्तुरधर्मः, यथा—अग्निसंयोगाद् दाहः" इति निर्ग्रन्थाः ।

तेषां परस्त्रीदर्शनसंस्पर्शने[1] एष[1] प्रसङ्गः । निर्ग्रन्थशिरोलुञ्चने च कष्टतपोदेशने च शास्तुः, तद्विसूचिकामरणे च दातुः, वैद्यानां चातुरपीडने, मरणे च मातृ-गर्भस्थयोश्च; अन्योन्यदुःखनिमित्तत्वात् । वध्यस्यापि च तत्क्रियासम्बन्धाद्, अग्निस्वाश्रयदाहवत् । कारयतश्चाप्रसङ्गः; तदसम्बन्धात् । परेणाग्निं स्पर्शयतस्तेनादाहवत् । अचेतनानां च काष्ठादीनां गृहपाते प्राणिनां वधात्

किमर्थैषा षष्ठी" इत्यत्र प्रदेशे *चिन्तयिष्यामि* । आस्तां तावदेतत् सामान्यासिकमित्यभिप्रायः ।

तस्मात् सेन्द्रियः कायो जीवतीति । सेन्द्रियस्यैव कायस्य तज्जीवितं नात्मन इति दर्शयति । *स एव चानिन्द्रियो मृत* इति ।

अबुद्धिपूर्वादिति विस्तरः । असञ्चिन्त्यकृतादपि *प्राणातिपातं कर्तुरधर्मो यथाग्निसंस्पर्शाद*बुद्धिपूर्वादसञ्चिन्त्यकृताद् दाह इति । *निर्ग्रन्था* नग्नाटकाः । *तेषां* निर्ग्रन्थानामेवंवादिनाम् । अबुद्धिपूर्वेऽपि *परस्त्रीदर्शनसंस्पर्शन एष प्रसङ्गः* । पापप्रसङ्ग इत्यर्थः । अग्निदृष्टान्तात् । *निर्ग्रन्थशिरोलुञ्चने* वा निर्ग्रन्थशिरःकेशोत्पाटने च । दुःखोत्पादनबुद्धयभावेऽप्यधर्मप्रसङ्गः । *कष्टतपोदेशने* च । निर्ग्रन्थशास्तुरधर्मप्रसङ्गो बुद्धयपेक्षयाम् । परस्य दुःखोत्पादनमधर्माय भवतीति कृत्वा । *तद्विसूचिकामरणे*[2] च । निर्ग्रन्थानां विसूचिकया अजीर्णेन मरणे । *दातु*रन्नदातुर*धर्मप्रसङ्गः* । अन्नदानेन मरणकारणात् । अबुद्धिपूर्वोऽपि हि प्राणिवधः कारणमधर्मस्येति । *मातृगर्भस्थयोश्च* । मातुः, गर्भस्थस्य च । *अन्योन्यदुःखनिमित्तत्वात्* । अधर्मप्रसङ्गः; तत एवाग्निदृष्टान्तात् । *वध्यस्यापि च तत्क्रियासम्बन्धात्* । प्राणातिपातक्रियासम्बन्धात् अधर्मप्रसङ्गः । वध्ये हि सति प्राणातिपातक्रिया वधकस्य भवति । *अग्निस्वाश्रयदाहवत्* । अग्निर्हि न केवलमन्यजनं दहति, किं तर्हि ? स्वाश्रयमपि इन्धनं दहतीति । तद्वत् । न हि तेषां चेतनाविशेषोऽपेक्ष्यते । *कारयतश्च* परेण वधादि अधर्मस्या*प्रसङ्गः* । *परेणाग्निं स्पर्शयतः* स्पर्शयितु*स्तेनादाहवत्* । आग्नेयधर्माभ्युपगमात् । *अचेतनानां च काष्ठादीनां* काष्ठ

१–१. परदारदर्शनेऽप्येष—का० । २. ०मरणेन—मुद्रितः पाठः ।

पापप्रसङ्गः । न वा दृष्टान्तमात्रात् सिद्धिरिति ।

उक्तः प्राणातिपातः ॥

अदत्तादानमन्यस्वस्वीक्रिया　　बलचौर्यतः ॥ ७३ ॥

'अभ्रान्त्या' इति वर्तते । यदि बलाद् वा चौर्येण वा परस्वं स्वीकरोति यत्रैव च बलचौर्याभिप्रायेणान्यत्र संज्ञाविभ्रमात्, इयताऽदत्तादानं भवति ।

स्तूपादपहरतो बुद्धाददत्तादानम् । सर्वं हि तद् भगवता परिनिर्वाणकाले परिगृहीतमिति । येषां संरक्ष्यमित्यपरे ।

अस्वामिकं च निधिमुद्धरतो विषयस्वामिकात् परिवर्तकं हरतः कृते कर्मणि सीमाप्राप्तेभ्यः, अकृते सर्वबुद्धशैक्षेभ्यः ॥ ७३ ॥

अगम्यगमनं　　काममिथ्याचारश्चतुर्विधः ।

चतुष्प्रकारमगम्यगमनं काममिथ्याचारः— १. अगम्यां गच्छति परपरिगृहीतां वा मातरं दुहितरं वा मातृपितृसम्बन्धिनीं वा, २. अनङ्गे वा गच्छति स्वामपि भार्याम् अपाने मुखे वा, ३. अदेशे वा गच्छति प्रकाशे चैत्येविहारे वा, ४. अकाले वा गच्छति ।

कः पुनः अकालः ? गर्भिणीं वा गच्छति, पाययन्तीं वा, सनियमां वा । यदि भर्तुरनुज्ञया सनियमा भवतीत्येके ।

'अभ्रान्त्या' इति वर्तते । यदि स्वसंज्ञी परस्त्रियं यायात्, न स्यात् कर्म-

---

लोष्टवंशादीनाम् । *गृहपाते* तत्रान्तःस्थितानां *प्राणिनां वधात् पापप्रसङ्गः ।* न हि बुद्धिविशेषः प्रमाणीक्रियते । *न वा दृष्टान्तमात्रादहेतुकात् सिद्धि*रस्यार्थस्येति ।

अन्यत्र संज्ञाविभ्रमादिति । यदि देवदत्तद्रव्यं हरामीति अभिप्रायमाणो यज्ञदत्तद्रव्यं हरति, नादत्तादानमित्यभिप्रायः ।

परिनिर्वाणकाले परिगृहीतमिति । दातृजनपुण्यानुग्रहार्थम् । अपरिग्रहे हि स्तूपे दानमफलं स्यात्; प्रतिग्राहकाभावात् । *परिवर्तकम् ।* मृतस्य भिक्षोः चीवरादि द्रव्यम् । *कृते कर्मणि* ज्ञप्तिकर्मणि ॥ ७३ ॥

गर्भिणीगमने गर्भोपरोधः । *पाययन्ती* स्तन्योपभोगावस्थपुत्रिका स्त्री । अब्रह्मचर्यकरणे हि तस्याः स्तन्यं क्षीयते । बालकस्य वा पुष्टये तत् स्तन्यं न भवतीति ।

पथः । यद्यन्यः परस्त्रीसंज्ञयान्यामभिगच्छेत् परदारप्रयोगाद्, वस्तुपरिभोगाच्च स्यादित्येके । अन्यत्र प्रयोगान्न स्यात् प्राणातिपातवदित्यपरे ।

भिक्षुणीं गच्छतः कस्यान्तिकात् काममिथ्याचारः ? विषयस्वामिनः । तस्य हि तन्न मर्षणीयम् । तस्यापि सनियमा स्वभार्येव तु सा न गम्या ।

कुमारीं गच्छतो यस्य निसृष्टा । नो चेद्यस्य रक्षा, अन्ततो राज्ञः ।

अन्यसंज्ञोदितं[1] वाक्यमर्थाभिज्ञे मृषावचः ॥ ७४ ॥

यदि यमर्थं ब्रवीति तस्मिन्नन्यथासंज्ञी भवति, यं चाधिकृत्य ब्रवीति स तस्य वाक्यस्यार्थाभिज्ञो भवति, तद्वाक्यं मृषावादः । अनभिज्ञे किं स्यात् ? सम्भिन्नप्रलापः स्यात् ।

'वाक्यम्' इत्युच्यते, कदाचिच्च बहवो वर्णा वाक्यं भवन्तीति कतमस्तत्र कर्मपथः ? पश्चिमः सहाविज्ञप्त्या, यत्र चार्थाभिज्ञो भवति । पूर्वे तु वर्णाः प्रयोगः ।

'अर्थाभिज्ञे' इत्युच्यते, किं तावदभिज्ञातार्थे श्रोतरि ? आहोस्विद् अभिज्ञातुं समर्थे ? किं चातः ? यद्यभिज्ञातार्थे मनोविज्ञानविषयत्वाद्, वाक्यार्थस्य श्रोतृविज्ञानेन सह निरोधाच्च वाग्विज्ञप्तेरविज्ञप्तिरेव स्यात् कर्मपथः ? अथाभिज्ञातुं समर्थे; एवं दोषो न भवति । कथं चाभिज्ञातुं समर्थोऽप्युत्पन्नभाव उत्पन्ने श्रोत्रविज्ञाने ? यथा न दोषस्तथास्तु ॥ ७४ ॥

प्राणातिपातवदिति । यथा देवदत्तं मारयामीत्यभिप्रायेण यज्ञदत्तं मारयतो प्राणातिपातो भवति, तद्वत् । इहान्यस्मिन् वस्तुनि प्रयोगोऽभिप्रेतः, अन्यच्च वस्तु परिभुक्तमिति *न स्यात्* काममिथ्याचार *इत्यपरे ।*

अन्ततो राज्ञ इति । यद्यन्यः कश्चिद् रक्षिता नास्ति । अन्ततः सर्वपश्चाद् राज्ञोऽन्तिकात् स काममिथ्याचारः । तस्य हि तन्न मर्षणीयमिति ।

आहोस्विदभिज्ञातुं समर्थ इति । योऽपि ह्यर्थमभिज्ञातुं समर्थः सोऽप्यर्थाभिज्ञ इति शक्यते वक्तुम्—अर्थमभिजानीत इति; विप्रकृतावस्थायामभिप्रेतत्वात् । *मनोविज्ञानविषयत्वाद् वाक्यार्थस्येति ।* 'नास्त्यत्र देवदत्तः', 'अस्ति वा' इत्युच्यमाने शब्दः श्रोत्रा विज्ञायते । तदनन्तरं तु चक्षुरादिसमूहो देवदत्तो वाक्यार्थो विकल्पेन मनोविज्ञानेन विज्ञायते, तेन*ाविज्ञप्तिरेव* मौलः *कर्मपथः स्यात् । वाग्विज्ञप्तेः श्रोत्रविज्ञानेन सह निरोधात् ।* इष्यते च विज्ञप्त्यविज्ञप्ति-

---

१. अन्यथासंज्ञिनो—का ।

षोडश व्यवहाराः सूत्र उक्ताः—"अदृष्टे दृष्टवादिता, अश्रुते, अमते, अविज्ञाते विज्ञातवादिता, दृष्टे अदृष्टवादिता, यावद् विज्ञातेऽविज्ञातवादिता इतीमेऽनार्या अष्टौ व्यवहाराः। दृष्टे दृष्टवादिता, यावद्विज्ञाते विज्ञातवादिता, अदृष्टेऽदृष्टवादिता, यावदविज्ञातेऽविज्ञातवादिता इतीमे आर्या अष्टौ व्यवहाराः। तत्रैषां दृष्टश्रुतमतविज्ञातानां किं लक्षणम्?

चक्षुःश्रोत्रमनश्चित्तैरनुभूतं त्रिभिश्च यत्।
तद् दृष्टश्रुतविज्ञातं मतं चोक्तं यथाक्रमम्॥ ७५॥

यच्चक्षुर्विज्ञानेनानुभूतं तद् दृष्टमित्युक्तम्। यच्छ्रोत्रविज्ञानेन तच्छ्रुतम्। यन्मनोविज्ञानेन तत् **विज्ञातम्**। यत् घ्राणजिह्वाकायविज्ञानैस्तन्मतम्। किं कारणम्? *गन्धरसस्प्रष्टव्यान्यव्याकृतत्वान्मृतकल्पानि।* अत एतेषु मताख्येति **वैभाषिकाः**।

किमत्र ज्ञापकम्? सूत्रम्, युक्तिश्च।

सूत्रं तावत्—"तत्किं मन्यसे माहकीमातः यानि त्वया चक्षुषा रूपाणि न दृष्टानि न दृष्टपूर्वाणि न पश्यसि, नापि ते एवं भवति पश्येयमिति; अपि नु ते तन्निदानमुत्पन्नम्, छन्दो वा रागो वा स्नेहो वा येन वा आलयो वा नियतिरध्यवसानं वा? नो भदन्त। ये त्वया श्रोत्रेण शब्दा न श्रुता न श्रुतपूर्वाः, विस्तरेण यावन्मनसा धर्मा न विज्ञाताः? विस्तरेण यावन्नो भदन्त। अत्र च ते माहकीमातर्दृष्टे दृष्टमात्रं भविष्यति, श्रुते मते विज्ञाते विज्ञातमात्रम्" ( ) इत्युक्तम्। अतस्त्रिषु विषयेषु दृष्टश्रुतविज्ञातशब्दापदेशाद् गन्धादिषु मताख्या गम्यते।

स्वभावो मौलः कर्मपथ इति॥ ७४॥

मृतकल्पानि। अत एतेषु मताख्येति। नैरुक्तं विधिमालम्ब्य *वैभाषिका* व्याचक्षते। स्वेन्द्रियैः प्राप्ता मता इत्याचार्यसङ्घभद्रः।

विस्तरेण यावन्मनसा धर्मा इति। ये त्वया घ्राणेन गन्धा न घ्राताः, जिह्वया रसा नास्वादिताः, कायेन स्प्रष्टव्यानि न स्पृष्टानि, यावत् ये त्वया मनसा धर्मा न विज्ञाता इति।

त्रिषु विषयेषु रूपशब्दधर्मेषु *दृष्टश्रुतविज्ञातापदेशाद्* यथाक्रमम्। *गन्धादिषु* गन्धरसस्प्रष्टव्येषु *मताख्या गम्यते।* ते मतशब्देनोच्यन्ते।

अत एवं चानिष्यमाणे दृष्टादिभावबाह्यत्वात् गन्धादिषु व्यवहारो न स्यादित्येषा युक्तिः।

सूत्रं तावज्ज्ञापकम्, अन्यार्थत्वात्। न ह्यत्र सूत्रे भगवान् व्यवहाराणां लक्षणं शास्ति स्म। किं तर्हि ? 'अत्र च तव'[1] षड्विधे विषये चतुर्षु व्यवहारेषु दृष्टादिव्यवहारमात्रं भविष्यति। न हि[2] प्रियाप्रियनिमित्ताध्यारोप:' इत्ययमत्र सूत्रार्थो दृश्यते।

किं पुनर्दृष्टम् ? किं च यावद्विज्ञातम् ?

केचित् तावदाहुः—यत् पञ्चभिरिन्द्रियैः प्रत्यक्षं तद् दृष्टम्। यत् परत आगमितं तच्छ्रुतम्। यद्[3] युक्त्यनुमानतो रुचितं तन्मतम्। यन्मनःप्रत्यक्ष-

---

एवं चानिष्यमाणे। गन्धादिषु मताख्येत्यनिष्यमाणे। *दृष्टादिभावबाह्यत्वात्*। गन्धादीनामरूपलक्षणत्वेन दृष्टभावबाह्यत्वाद्, अशब्दधर्मायतनलक्षणत्वेन च श्रुतविज्ञातभावबाह्यत्वात्। *गन्धादिषु व्यवहारो न स्यात्*। दृष्ट इति वा, यावद्विज्ञात इति वेत्येषा *युक्तिः*। तेषु मताख्येति।

आचार्य आह—*सूत्रं तावदिति* विस्तरः। *अन्यार्थत्वादिति*। यस्मात् सूत्रस्यान्य एवार्थः। सूत्रार्थं ब्रवीति—*अत्र च तव षड्विधे विषये* रूपादौ *चतुर्षु दृष्टादिव्यवहारेषु* दृष्ट-श्रुत-मत-विज्ञातव्यवहारेषु *दृष्टादिव्यवहारमात्रं भविष्यतीति*। रूपे दृष्टमिति व्यवहारो भविष्यति, यावद्विज्ञातमिति। एवं शब्दादिषु अत्र च ते माहकीमातर्दृष्टे[4] विषयषट्के दृष्टमात्रं भविष्यति। श्रुते विषयषट्के, मते, विज्ञाते विषयषट्के एवं विज्ञातमात्रमित्येवं तत् सूत्रपदं व्याख्यायत इत्यभिप्रायः। *न हि प्रियाप्रियनिमित्ताध्यारोपस्तव भविष्यतीति* सूत्रार्थः। ननु च यानि त्वया चक्षुषा रूपाणि न दृष्टानीत्येवोक्तानि, न तु न श्रुतानि यावन्न विज्ञातानीत्येवोक्तानि; एवं शब्दा न श्रुता इत्येवोक्ताः, न तु न दृष्टा यावन्न विज्ञाता इत्युक्ताः; एवं यावद्धर्मा न विज्ञाता इत्येवोक्ताः, न तु न दृष्टा यावन्न स्पृष्टा इति ? नैष दोषः; उदाहरणरूपमेतदुक्तं भगवता। यथा हि रूपाणि न दृष्टानीत्युक्तानि, तथा न श्रुतानि यावन्न विज्ञातानीति वक्तव्यानि। एवं शब्दादिषु वक्तव्यम्। तेनैवं लक्षणमुच्यते।

यत् पञ्चभिरिन्द्रियैरिति विस्तरः। *यत् पञ्चभिरिन्द्रियैः प्रत्यक्षं* रूपादि *तद् दृष्टम्*। *यत् परत आगमितं* विषयषट्कमपि *तच्छ्रुतम्*। *यद् युक्त्यनुमानतो रुचितम*भिप्रेतं *तन्मतम्*। *युक्त्यनुमान*मित्यव्यभिचार्यनुमानम्। तच्च षड्विषय-

---

१. ते—का०।
२. का० पुस्तके नास्ति।
३. यत् स्वयं—का०।
४. मालकीमात०—मुद्रितः पाठः।

भावेनाधिष्ठितं प्रत्यात्मवेद्यं तद् विज्ञातमिति ।

एते च पञ्च विषयाः प्रत्येकं दृष्टा इति वा कृत्वा व्यवह्रियन्ते, श्रुता मता विज्ञाता इति वा । षष्ठोऽन्यत्र दृष्टादिति नास्ति गन्धादिषु व्यवहाराभावप्रसङ्गः । तस्माद्विद् वुरप्येषा युक्तिर्न भवति ।

पूर्वाचार्या एवमाहुः—तद् दृष्टं यत् प्रत्यक्षीकृतं चक्षुषा । श्रुतं यच्छ्रोत्रेण परतश्चागमितम्[1] । मतं यत् स्वयं चिन्तितम् । विज्ञातं यत् प्रत्यात्मं[2] प्रतिसंवेदितमधिगतं चोत्पन्नम ।

प्रसङ्गेन शास्त्रं प्रवर्तयताम् । यः कायेनान्यथात्वं प्रापयेत् स्यान्मृषावादः ? स्यात् । अत एवोच्यते—"स्यान्न कायेन पराक्रमेत, प्राणातिपातावद्येन च स्पृश्येत । स्याद् वाचा पराक्रमेत स्यान्न वाचा पराक्रमेत, मृषावादावद्येन च स्पृश्येत । स्यात् कायेन पराक्रमेत, स्यान्न कायेन न वाचा पराक्रमेत, उभयावद्येन वा[3] स्पृश्येत । स्यात् ऋषीणां मनःप्रदोषेण । पोषधनिदर्शनं चात्र" इति ।

गोचरम् । *षष्ठोऽन्यत्र दृष्टादिति* । *षष्ठो विषयो* धर्माः । स दृष्टव्यवहारं वर्जयित्वा त्रिभिः श्रुतादिभिर्व्यवहारैर्व्यवह्रियते । *अतो नास्ति गन्धादिषु व्यवहाराभावप्रसङ्गः । तस्माद् युक्तिरप्येषा न युक्तिर्भवति* । या वैभाषिकैरुक्ता—'एवं चानिष्यमाणे' इत्येवमादिका; यस्मादन्यथापि गन्धादिषु व्यवहारो भवतीति ।

यत् प्रत्यक्षीकृतं चक्षुषेति । न पञ्चभिरिन्द्रियैः । यच्छ्रोत्रेण श्रुतं *परतश्चागमितमिति* उभयमप्यभीष्टम् । *प्रत्यात्मं प्रतिसंवेदितम्* । सुखाद्यसमाहितेन चित्तेन । *अधिगतं* तु समाहितेन । लौकिकेनैव, न लोकोत्तरेण । लौकिकं व्यवहाराधिकारात् । तदेवं *योगाचारनयेनापि* षडप्येते विषयाः प्रत्येकं यथासम्भवं दृष्टा इति वा व्यवह्रियन्ते, श्रुताः, मताः, विज्ञाता इति वेत्यतो नास्ति गन्धादिषु व्यवहाराभावप्रसङ्ग इति ।

यः कायेनान्यथेति । कायसंज्ञया योऽर्थं गमयति, तस्यापि *मृषावादः । पराक्रमेत* व्यायच्छेत । *वाचा पराक्रमेतेति* । वाचा परं मारयेदित्यर्थः । इह तु प्राणातिपातस्य कायिकत्वात् कायिक्येवाविज्ञप्तिर्मौलसंगृहीता, न वाचिकी । नाप्यत्र कायिकी विज्ञप्तिः स्यात् । *कायेन पराक्रमेतेति* । अत्र मृषावादस्य वाचिकत्वात् वाचिक्येवाविज्ञप्तिर्मौलसंगृहीतेत्यवगन्तव्यम् । *उभयावद्येन* वेति । काय-वागवद्येन । *ऋषीणां मनःप्रदोषेण* कायावद्येन योगो भवति । *पोषधनिदर्शनं*

---

१. ०श्चावरितम्—का० । २. प्रत्यात्म०—का० । ३. च—का० ।

यद्युभयथापि न पराक्रमेत न चाविज्ञप्तिकास्त्यविज्ञप्तिः **कामावचरी, कथं तयोः कर्मपथः सिद्ध्यति ? कर्तव्योऽत्र यत्नः ॥ ७५ ॥**

गतो मृषावादः ॥

पैशुन्यं क्लिष्टचित्तस्य वचनं परभेदने ।

यत् **क्लिष्टचित्तस्य** परेषां भेदाय **वचनम**प्रीतये तत् **पैशुन्यम्** । 'अर्थाभिज्ञे' इति वर्तते, 'अभ्रान्त्या' इति च ।

पारुष्यमप्रियम्

वचनम् । 'क्लिष्टचित्तस्य' इति वर्तते । 'अर्थाभिज्ञे' 'अभ्रान्त्या' इति च । यत् क्लिष्टचित्तस्य परेषामप्रियवचनमर्थाभिज्ञे तत्रैव च यद् विवक्षितं तत् **पारुष्यम्** ।

सर्वं क्लिष्टं भिन्नप्रलापिता ॥ ७६ ॥

'वाक्यम्' इत्यधिकारो वर्तते । **सर्वं क्लिष्टं** वचनं **सम्भिन्नप्रलापः** । सैव च

चात्रेति । वागवद्येन योगो भवति । भिक्षुपोषधे हि 'कच्चित्थ परिशुद्धाः' इति विनयधरेणानुश्राविते यदि कश्चिद् भिक्षुः सतीमापत्तिं नाविष्कुर्यात्, तूष्णीम्भावेनैवाधिवासयेत्, स मृषावादी भवेदिति ।

कथं तयोः कर्मपथः सिध्यतीति । कथं तयोर्ऋषिभिक्ष्वोः कायवाग्भ्यामपराक्रममाणयोः प्राणातिपातो मृषावादश्च यथाक्रमं कर्मपथः सिध्यतीति ? *कर्तव्योऽत्र यत्नः । वैभाषिकैः* कर्तव्यः समाधिरित्यर्थः ।

अत्राचार्यसङ्घभद्रः समाधिमाह—ऋषयोऽर्थंत आज्ञापयितारो भवन्ति । तेषां हि सत्त्वपरित्यागप्रवृत्तं पापाशयमवेत्यामनुष्यास्तदभिप्रसन्नाः कायेन पराक्रमन्ते । येन तेषामृषीणां कर्मपथ उत्पद्यते । कथम् ? परविज्ञप्त्येति । अवश्यं तथाविधस्य कायवाग्विकारा भवन्ति । अपि च शपन्ति ते तथा । तत्र चावश्यं काय-वाक्चेष्टया भवितव्यम् ।

अन्ये त्वाहुः—न कामधातावक्श्यमविज्ञप्तिः सर्वैव विज्ञप्त्यधीना भवति; फलप्राप्त्यैव सहपञ्चकादीनां प्रातिमोक्षसंवरोत्पत्तिसम्भवात् । इत्यकुशलाप्येवञ्जातीया काचिद् विज्ञप्तिमन्तरेणापि स्यात् । पूर्वविज्ञप्तं तैरिति अवश्यमितरत्रापि भविष्यति । ऋषीणां तावदुक्तं पोषधमृषावादेऽपि । यदपरिशुद्धः सङ्घमध्यं प्रविशति, निषीदति, स्वयमीर्यापथं कल्पयति, तत्सम्बद्धं वा यत्किञ्चिद् भाषते, सास्य पूर्वविज्ञप्तिरिति ॥ ७५ ॥

सर्वं क्लिष्टं वचनं सम्भिन्नप्रलाप इति । मृषावादादि त्रयमपि । न केवलमन्य-

सम्भिन्नप्रलापिता । तद्योगेन हि सम्भिन्नप्रलापी भवति ॥ ७६ ॥

अतोऽन्यत् क्लिष्टमित्यन्ये,

अतो मृषावादादित्रयात्[1] यदन्यत् क्लिष्टं वचनं स[2] सम्भिन्नप्रलाप इत्यपरे ।

लपनागीतनाट्यवत् ।

कुशास्त्रवच्च,

तद्यथा भिक्षुर्मिथ्याजीवी लपनां करोति, रक्ताश्च केचिद् गायन्ति, नाट्ये च नटाः परेषां रञ्जनार्थं प्रलपन्ति, कुशास्त्राणि च तद्दृष्टयोऽपि गदन्ति; एवं परिदेवसङ्क्षणिकादिकमपि यदन्यन्मृषावादादिभ्यः क्लिष्टं वाक्कर्म तत् सम्भिन्नप्रलापः ।

कथं चक्रवर्तिकाले गीतं चास्ति न च सम्भिन्नप्रलापः ? नैष्क्रम्योपसंहितानि हि तदानीं गीयन्ते स्म, न ग्राम्यरसोपसंहितानि ।

तदाप्यावाहविवाहाद्यभिलापसद्भावादस्ति सम्भिन्नप्रलापो न कर्मपथ इत्यपरे ।

क्लिष्टम् । *सैव च सम्भिन्नप्रलापितेति* । यस्य गुणस्य हि भावाद् द्रव्ये शब्दनिवेशस्तस्य तदभिधाने त्वतलाविति । तत्प्रत्ययेन क्लिष्टवचनलक्षणः सम्भिन्नप्रलाप उच्यते । *तद्योगेन हि* । सम्भिन्नप्रलापयोगेन हि । स पुद्गलः *सम्भिन्नप्रलापी भवति* ॥ ७६ ॥

मृषावादादित्रयात् यदन्यत्[3] *क्लिष्टं वचनं स सम्भिन्नप्रलाप* इत्युक्त्वोदाहरणं दर्शयन्नाह—

लपनागीतनाट्यवत् कुशास्त्रवच्चेति । *लपनां करोतीति* । लाभ-यशस्कामतया सेवाभिद्योतिकां वाचं निश्चारयतीत्यर्थः । *परिदेवसङ्क्षणिकादिकमिति* । आदिशब्देन परिदेवसङ्क्षणिकाभ्यां योऽन्यः क्लिष्टचित्तानां कश्चिदालापः ।

आवाहविवाहाद्यभिलापसद्भावादिति । आवाहः = दारिकाया दारकगृहगमनम् । विवाहः=दारकस्य दारिकागृहागमनम् । आवाहः=प्रवेशनकः, विवाहः= परिणयनमित्यपरे । *आदि*शब्देन रक्तचित्तानामालापः ।

---

१. ०वादादिकात् वाक्कर्मणोः—का० । २. तत्—का० ।

३. यदन्य०—मुद्रितः पाठः ।

अभिध्या तु परस्वविषमस्पृहा ॥ ७७ ॥

'अहो बत यत् परेषां तन्मम स्यात्' इति **परस्वेभ्यो** या **विषमेणान्यायेन स्पृहा** स्वीकरणेच्छा बलाद्वा चौर्याद्वा, साऽ**भिध्या** कर्मपथः ।

सर्वैव कामावचरी तृष्णा अभिध्येत्य**परे** । तथा **निवरणाधिकारे** कामच्छन्दमधिकृत्योक्तं **सूत्रे**—"सोऽभिध्यां लोके प्रहाय" इत्येवमादि ।

यद्यपि सर्वाभिध्या न तु सर्वा कर्मपथः; औदारिकदुश्चरितसंग्रहादित्य**परे** । मा भूच्चक्रवर्तिनामुत्तरकौरवाणां[1] चाभिध्या कर्मपथ इति ॥ ७७ ॥

व्यापादः सत्त्वविद्वेषः,

सत्त्वेषु विद्वेषो **व्यापदः** परपीडाकारप्रवृत्तः ।

नास्तिदृष्टिः शुभाशुभे ।

मिथ्यादृष्टिः,

शुभे चाशुभे च कर्मणि या नास्तीति दृष्टिः सा **मिथ्यादृष्टिः** । तद्यथा—"नास्ति दत्तम्, नास्तीष्टम्, नास्ति हुतम्, नास्ति सुचरितम्, नास्ति दुश्चरितमित्येवमादि यावन्न सन्ति लोकेऽर्हन्तः" इति । सैषा साकल्येन कर्मफलार्थापवादिका

---

*विषमेणान्यायेने*ति । उद्देशनिर्देशरूपौ पर्यायौ ।

*तथा ह्ये*ति विस्तरः । यस्मात् पञ्चानां निवरणानामधिकारेण । *कामच्छन्दं* कामतृष्णास्वभावम*धिकृत्योक्तम्*—"*सोऽभिध्यां लोके प्रहाय* विगताभिध्येन चेतसा बहुलं विहरति । व्यापादं स्त्यानमिद्धमौद्धत्यकौकृत्यं विचिकित्सां लोके प्रहाय तीर्णकांक्षो भवति, तीर्णविचिकित्सः । अकथङ्कथी कुशलेषु धर्मेषु । स पञ्चनिवरणानि प्रहाय" इत्येवमादि । अतो ज्ञायते—*सर्वैव कामावचरी तृष्णाभिध्ये*ति ।

*औदारिकदुश्चरितसंग्रहा*दिति । दशस्वकुशलेषु कर्मपथेषु यदौदारिकं दुश्चरितं तत् संगृहीतम्, न सर्वम् । एवं कुशलेषु । अतो *न सर्वाभिध्या कर्मपथः* । किं तर्हि ? या परस्वे विषमस्पृहा सा कर्मपथ इत्यपरेषामभिप्रायः । *मा भूच्चक्रवर्तिनामुत्तरकौरवाणां चाभिध्या कर्मपथ* इति । न हि तत्र कामावचरी तृष्णा नास्ति । न च तत्राकुशलाः कर्मपथा इष्यन्ते ॥ ७७ ॥

*सैषा साकल्येन कर्मफलार्थापवादिके*ति । तथा ह्येषा पठ्यते—"नास्ति दत्तम्, नास्तीष्टम्, नास्ति पूतम्, नास्ति सुचरितम्, नास्ति दुश्चरितम्, नास्ति

---

१. °र्तिनामप्युत्तर°—का० ।

मिथ्यादृष्टिर्भवति । आदिमात्रं तु श्लोके दर्शितम् । एवंलक्षणा एते दश कर्मपथाः ।

कर्मपथा इति कोऽर्थः ?

त्रयो ह्यत्र पन्थानः, सप्त कर्म च ॥ ७८ ॥

अभिध्यादयो हि **त्रयः** कर्मणः **पन्थान** इति कर्मपथाः । तत्सम्प्रयोगिणी हि चेतना तेषां वाहेन वहति, तेषां गत्या गच्छति; तद्वशेन तथाभिसंस्करणात् ।

सप्त तु प्राणातिपातादयः **कर्म च**; कायवाक्कर्मस्वभावत्वात्[1] । कर्मणश्च पन्थान इति कर्मपथाः; तत्समुत्थानचेतनायास्तानधिष्ठाय प्रवृत्तेरिति ।

कर्मपथाश्च कर्म च कर्मपथाश्चेति कर्मपथाः; असरूपाणामप्येकशेषसिद्धेः ।

सुचरितदुश्चरितानां कर्मणां फलविपाकः, नास्त्ययं लोकः, नास्ति परलोकः, नास्ति माता, नास्ति पिता, नास्ति सत्त्व उपपादुकः, न सन्ति लोकेऽर्हन्तः" इति । तत्र नास्ति दत्तं यावन्नास्ति दुश्चरितमिति कर्मापवादिका । तथा नास्ति माता, नास्ति पितेति कर्मापवादिकैव । नास्ति सुचरितदुश्चरितानां कर्मणां फलविपाकः, नास्त्ययं लोकः, नास्ति परलोकः, तथा नास्ति सत्त्व उपपादुक इति फलापवादिका । न सन्ति लोकेऽर्हन्त इत्यार्यापवादिका । *आदिमात्रं तु श्लोके दर्शितमिति* । "नास्तिदृष्टिः शुभाशुभे" इति उदाहरणमात्रत्वात् ।

कर्मणः पन्थान इति । चेतनाख्यस्य कर्मणः पन्थानः । कथम् ? इत्याह— *तत्सम्प्रयोगिणी हि चेतना* । अभिध्यादिसम्प्रयोगिणी । *तेषा*मभिध्यादीनां *वाहेन गत्या वहति* गच्छतीत्यर्थः । *तद्वशेन तथाभिसंस्करणात्* । यस्मादभिध्यादीनां यथाक्रमं सक्तिप्रतिकूलमिथ्यानितीरणाकाराणां वशेन । तदनुरूपा चेतनाभिसंस्करोति । चेतयत इत्यर्थः । अतस्तेषां वाहेन वहति ।

कर्म च, कायवाक्कर्मस्वभावत्वात् । *कर्मणश्च* चेतनाख्यस्य *पन्थान* इति कर्मपथाः । *तत्समुत्थानचेतनायाः* कायवाक्कर्मसमुत्थान-चेतनायाः । *तानधिष्ठाय* । तान् प्राणातिपातादीनधिष्ठाय *प्रवृत्तेः* । *असरूपाणामप्येकशेषसिद्धे*रिति । शब्दसरूपाणामर्थसरूपाणां वा एकशेष इष्यते, यथा—वृक्षश्च वृक्षश्च वृक्षौ, वक्रश्च कुटिलश्च वक्राविति । इह तु कर्म च कर्मपथश्चेति न कर्मशब्दस्य कर्मपथशब्दस्य च सारूप्यं शब्दतः; नाप्यर्थतः, कर्मार्थस्य कर्मपथार्थस्य च भिन्नत्वादेकशेषो न प्राप्नोति; यस्मात्त्वसरूपाणां साकल्येनैकदेशेन तु सरूपाणामेकशेषः सिध्यति । इष्यत इत्यर्थः । तद्यथा—"गुणो यङ्लुकोः" (पा० सू० ७.४.८२)

---

१. ०कर्मत्वात्—का० ।

एवमनभिध्यादयः प्राणातिपातविरत्यादयश्च ज्ञेयाः ।

प्रयोगपृष्ठानि कर्माणि कर्मपथाः; यस्मात् तदर्थं तन्मूलिका च तेषां प्रवृत्तिः । "तदौदारिकसंग्रहात्[1]" (अभि० को० ४.६६) इत्युक्तं प्राक् । येषां चोत्कर्षापकर्षेणाध्यात्मिकबाह्यानां भावानामुत्कर्षापकर्षौ लोके भवतः ।

ये तर्हि दार्ष्टान्तिका अभिध्यादीनेव मनस्कर्मेच्छन्ति, तेषां ते कथं कर्मपथाः ? त एव[2] प्रष्टव्याः । अपि तु शक्यं वक्तुम्—कर्म च ते पन्थानश्च

इति यङ् च यङ्लुक् यङ्लुकौ, तयोरिति ? न शक्यते वक्तुम्—यङ् च लुक् च यङ्लुकौ इत्ययम्, लुकोऽनिष्टत्वात्, एकदेशसारूप्यात् तु यङो यङ्लुगेकदेशस्य च यङ् इति सारूप्यात् सिध्यत्येकशेषो यङ्लुकोरिति । अतो ज्ञापकात् अयमपि सिध्यति-कर्म च कर्मपथाश्च कर्मपथा इति, पश्चात् पुनः सरूपैकशेषः । कर्मपथाश्चाभिध्यादयः, कर्मपथाश्च प्राणातिपातादय इति कर्मपथाः । अथवैवं योजना—कर्मणः पन्थानः कर्मपथाः, कर्म च ते कर्मपथाश्च कर्मकर्मपथाः । कर्मपथाश्चभिध्यादयः, कर्मकर्मपथाश्च प्राणातिपातादयः कर्मपथा इति ।

एवमनभिध्यादय इति विस्तरः । कुशला अपि कर्मपथा एवमेव योज्याः । अनभिध्यादयो हि कर्मणः पन्थान एव । *प्राणातिपातविरत्यादयश्च* । कर्म च कर्मणश्च पन्थान इति ।

यस्मात्तदर्थं इति विस्तरः । यस्मान्मौलकर्मपथार्थं *तेषां* तत्प्रयोगाणां *प्रवृत्तिः । यस्माच्च* मौलकर्मपथमूलि*का* तेषां तत्पृष्ठानां *प्रवृत्तिः;* अतो न तानि कर्मपथाः । यद्यपि कर्मपथोऽपि कर्मपथस्य प्रयोग उक्तः, स तु मौलत्वात् कर्मपथः, न तु प्रयोगपृष्ठभूतत्वादिति । *तदौदारिकसंग्रहादित्युक्तं[3] प्रागिति* । "तदौदारिकसंग्रहाद्दश कर्मपथा उक्ताः" (अभि० को० ४.६६) इति वचनात् । यानि प्रयोगपृष्ठानि तानि न संगृहीतानि । *येषां* चेति विस्तरः । *येषां* मौलानामुत्कर्षापकर्षेणाध्यात्मिकबाह्यानां भावानामुत्कर्षापकर्षौ लोके भवतः । न तु प्रयोगपृष्ठानाम् । *अतस्त एव कर्मपथाः ।* तेषां चोत्कर्षापकर्षेण तदुत्कर्षापकर्षेण तदुत्कर्षापकर्षं वक्ष्यति—'सर्वेऽधिपतिनिष्यन्दविपाकफलदा मताः' (अभि० को० ४. ८५) इत्यत्र । अतो न तानि प्रयोगपृष्ठानि कर्मपथाः ।

तेषां ते कथं कर्मपथा इति । न हि तेषामभिध्यादिभ्योऽन्यत् मनस्कर्मास्ति चेतना, यस्य कर्मणस्तेऽभिध्यादयः पन्थान इति कर्मपथाः स्युः । *त एव प्रष्टव्या* इति । तैरेव परिहारो वक्तव्यो य एवं मन्यन्ते । *अपि तु शक्यमिति*

---

१. यथौदारिक च ग्रहणादि—का० । २. एव हि—का० ।

३. यथौदारिकसंग्रहादि०—मु० पाठः ।

सुगतिदुर्गतीनामिति कर्मपथाः । इतरेतरावाहनाद् वा ॥ ७८ ॥

य एते दशाकुशलाः कर्मपथाः सर्वे एतेऽकुशलानां[1] कर्मणां समुदाचार-विरोधिनः ।

मूलच्छेदस्त्वसद्दृष्ट्या

कुशलमूलच्छेदस्तु मिथ्यादृष्ट्या भवत्यधिमात्रपरिपूर्णया ।

किं[2] तर्हि शास्त्र उक्तम्—"कतमान्यधिमात्राण्यकुशलमूलानि ? यैरकुशल-मूलैः कुशलमूलानि समुच्छिनत्ति कामवैराग्यं चानुप्राप्नुवन् यानि तत् प्रथमत उपलिखति" इति ? अकुशलमूलाध्याहृतत्वात् मिथ्यादृष्टेस्तेष्वेव तत्कर्मोपदेश एष क्रियते । तद्यथाग्निरेव ग्रामं दहति, चौरास्तु तस्याध्याहारका इति चौरैर्ग्रामो दग्ध इत्युच्यते ।

कतमेषां कुशलमूलानां समुच्छेदो भवति ?

कामाप्तोत्पत्तिलाभिनाम् ।

कामावचराणि कुशलमूलानि समुच्छिद्यन्ते; रूपारूप्यावचरैरसमन्वा-गतत्वात् ।

विस्तरः । स्वमतेन तत्पक्षं समर्थयति—*इतरेतरावाहनाद्* वेति । किम् ? तेऽभिध्यादयः कर्मपथा इति प्रकृतम् । अभिध्या व्यापादमिथ्यादृष्टी आवाहयति । ते च तामिति, कर्म च ते । कर्मणश्चैषामेकतरस्य पन्थान इति *कर्मपथाः* ॥ ७८ ॥

मिथ्यादृष्ट्या कुशलमूलसमुच्छेद इत्येतमर्थं वक्तुकाम उपोद्घातं ब्रवीति—*सर्वे एतेऽकुशलानामि*ति विस्तरः । *अधिमात्रपरिपूर्णये*ति । अधिमात्राधिमात्र-येत्यर्थः ।

*किन्तर्हि शास्त्र उक्तमि*ति । यदि मिथ्यादृष्ट्या कुशलमूलसमुच्छेदो नाकुशल-मूलैः । यत्तच्छास्त्र उक्तम् । *यैरकुशलमूलैः कुशलमूलानि समुच्छिनत्ती*त्यादि । तानि हि लोभादिस्वभावानि । न मिथ्यादृष्टिस्वभावानीत्यर्थः । *अकुशलमूलाध्या-हृतत्वादि*ति विस्तरः । अकुशलमूलैर्लोभादिभिरधिमात्रैर्मिथ्यादृष्टिरध्याहृता अपनीता, तस्मात् अकुशलमूलाध्याहृतत्वाद् *मिथ्यादृष्टेः । तेष्वेव तत्कर्मो-पदेशः ।* तेष्वेवाकुशलमूलेषु । मिथ्यादृष्टेः कुशलमूलसमुच्छेदकं यत् कर्म तस्योपदेशः ।

---

१. एते कुशलानां—का० । २. यत्—का० ।

प्रज्ञप्तिभाष्यं तर्हि कथं नीयते—"इयता अनेन पुद्गलेन **त्रैधातुकानि कुशलमूलानि** समुच्छिन्नानि भवन्ति" इति ! तत्प्राप्तिदूरीकरणमभिसन्धायैतदुक्तम्; सन्ततेस्तदभाजनत्वापादनात् ।

उपपत्तिप्रतिलाभिकान्येव च समुच्छिद्यन्ते; प्रायोगिकेभ्यः पूर्वं परिहीणत्वात् ।

किमालम्बनया मिथ्यादृष्ट्या समुच्छिद्यन्ते ?

फलहेत्वपवादिन्या,

या च हेतुमपवदते—नास्ति सुचरितं नास्ति **दुश्चरितमिति, या च** फलम्—नास्ति सुचरितदुश्चरितानां कर्मणां फलविपाक इति ।

आनन्तर्यविमुक्तिमार्गस्थानीये एते इत्यपरे ।

सास्रवालम्बनयैव नानास्रवालम्बनया, सभागधात्वालम्बनयैव च न विसभागधात्वालम्बनया; सम्प्रयोगमात्रानुशायित्वेन दुर्बलत्वादित्येके ।

प्रज्ञप्तिभाष्यं तर्हि कथं नीयते । यदि कामावचराणि कुशलमूलानि समुच्छिद्यन्ते । रूपारूप्यावचरैरसमन्वागतत्वादिति वर्ण्यन्ते । *तत्प्राप्तिदूरीकरणमिति* । रूपारूप्यावचराणां प्राप्तेर्दूरीकरणमभिप्रेत्य तस्य पुद्गलस्य एतदुक्तम्—त्रैधातुकानि कुशलमूलानि समुच्छिन्नानीति । कथं च पुनस्तत्प्राप्तिदूरीकरणम् ? *सन्ततेस्तदभाजनत्वापादनात्* । यस्मादसौ तत्सन्ततिः पूर्वं भाजनभूता तत्प्राप्तीनाम् । कुशलमूलसमुच्छेदादिदानीं तत्प्राप्तीनामभाजनमापादितेति । अतस्तत्प्राप्तिर्दूरीकृता भवति ।

प्रायोगिकेभ्यः पूर्वं परिहीणत्वादिति । श्रुतचिन्ताभावनामयेभ्यः प्रायोगिकेभ्यः पूर्वमेवासौ मृदुमृद्वव्स्थायां तेभ्यः परिहीणः । तदैव तस्य प्राप्तिच्छेद इत्यर्थः ।

आनन्तर्यविमुक्तिमार्गस्थानीये इति । हेत्वपवादिनी *आनन्तर्यमार्गस्थानीया* । फलापवादिनी *विमुक्तिमार्गस्थानीया* । तदुक्तं भवति—उभे अपि एते हेतुफलापवादिन्यौ मिथ्यादृष्टी कुशलमूलसमुच्छेदे व्याप्रियेते, नैकैवेति ।

अपरः पक्षः—*सास्रवालम्बनयैवेति* । दुःखसमुदयालम्बनया । *नानास्रवालम्बनया* निरोधमार्गालम्बनया इत्यर्थः । *सभागधात्वालम्बनयैव* चेति । कामधात्वालम्बनयैवेत्यर्थः । *न विसभागधात्वालम्बनया* । न रूपारूप्यधात्वालम्बनया । कुशलमूलानि समुच्छिद्यन्त इत्यधिकृतम्, कस्माद् ? इत्याह—*सम्प्रयोगमात्रानुशायित्वेन दुर्बलत्वादिति* । अनास्रवालम्बना विसभागधात्वालम्बना च या मिथ्यादृष्टिः सा सम्प्रयोगमात्रेण सम्प्रयुक्तेषु धर्मेष्वनुशेते, नालम्बनतः । तस्मादसौ दुर्बला भवति, अतो न तया समुच्छिद्यन्ते ।

एवं तु वर्णयन्ति—

सर्वथा[1]

नवप्रकाराण्यपि कुशलमूलानि सकृत् समुच्छिद्यन्ते।

दर्शनप्रहातव्या[2] इवेत्येके[2]। एवं तु वर्णयन्ति—

क्रमशः,

नवप्रकारया मिथ्यादृष्ट्या नवप्रकाराणि कुशलमूलानि समुच्छिद्यन्ते। भावनाहेयक्लेशवत् यावदधिमात्राधिमात्रया मृदुमृदूनीति।

एवमयं ग्रन्थः पालितो भवति—"कतमान्यणुसहगतानि कुशलमूलानि? आह—यैरकुशलमूलैः कुशलानि समुच्छिन्नानि सर्वपश्चात् विजहाति, यैः विकीर्णैः समुच्छिन्नकुशलमूल इति संख्यां गच्छति" (   ) इति।

अस्य तर्हि ग्रन्थस्य को नयः—"कतमान्यधिमात्राण्यकुशलमूलानि? यैरकुशलमूलैः कुशलमूलानि समुच्छिनत्ति" (   ) इति? समाप्तिमेतत् सन्धायोक्तम्; तैर्निरवशेषच्छेदात्।

एवं तु वर्णयन्ति। वैभाषिकाः। "*सर्वथा*" इति। या च हेतुमपवदते या च फलम्, या च सभागं धातुमालम्बते या च विसभागम्, या च सास्रवं या चानास्रवमालम्बते, सर्वयैव तया समुच्छिद्यन्ते।

दर्शनप्रहातव्या इवेति। यथा दुःखादिदर्शनहेयाः क्लेशा नवप्रकारा अपि दुःखादिसत्यदर्शनात् सकृत् प्रहीयन्ते, तद्वन्नवप्रकाराण्यपि कुशलमूलानि सकृत् समुच्छिद्यन्त *इत्येके*।

भावनाहेयक्लेशवदिति। यथा नवप्रकारेण मार्गेण नवप्रकारः क्लेशः प्रहीयते। मृदुमृदुना मार्गेण अधिमात्राधिमात्रक्लेशप्रकारः प्रहीयते, यावदधिमात्राधिमात्रेण मृदुमृद्वया मिथ्यादृष्ट्या अधिमात्राधिमात्रः कुशलमूलप्रकारः समुच्छिद्यते। *यावदधिमात्राधिमात्रया मृदुमृदुः* कुशलमूलप्रकार इति। *एवमयं ग्रन्थः परिपालितो भवति*। यदि भावनाहेयक्लेशवद् यथोक्तं तानि समुच्छिद्यन्ते। *अणुसहगतानि*। मृदुमृदूनि। *यैरकुशलमूलैः कुशलमूलानि समुच्छिनत्तीति*। अधिमात्रैरकुशलमूलैः कुशलमूलसमुच्छेद उक्तः, न मृदुमृद्वादिभिरित्यभिप्रायः। यदि क्रमशः समुच्छिद्यन्ते, *अस्य तर्हीत्यादि* कथम्? *समाप्तिमेतत् सन्धायोक्तमिति*।

---

१. सर्वथा—का०। २–२. ०तव्यवदित्येके—का०।

एकोऽपि हि प्रकारस्तेषामसमुच्छिन्नः सर्वेषां पुनरुत्पत्तौ हेतुः स्यादिति। दर्शनमार्गवदव्युत्थानेन च्छिनत्तीत्येके। एवं तु वर्णयन्ति— उभयथेति।

पूर्वं संवरं विजहाति पश्चात् कुशलमूलानि समुच्छिनत्तीत्येके। एवं तु वर्णयन्ति—यस्य चित्तस्य फलसंवरस्तत्त्यागात् तस्य त्याग इति।

अथ कुशलमूलानि समुच्छिद्यन्ते

नृषु ॥ ७९ ॥

मनुष्येष्वेव नापायेषु; क्लिष्टाक्लिष्टयोः प्रज्ञयोरदृढत्वात्। न देवेषु; कर्मफले[1] प्रत्यक्षत्वात्[1]। त्रिषु द्वीपेषु, नोत्तरकुरौ।

अपापाशयत्वात् जम्बूद्वीप एवेत्यपरे। तेषामयं ग्रन्थो विरुध्यते—

''जाम्बूद्वीपकः सर्वाल्पैरष्टाभिरिन्द्रियैः समन्वागतः। एवं पौर्व-

---

कुशलमूलसमुच्छेदसमाप्तिं सन्धाय कतमानि अधिमात्राणीति विस्तरेण एतदुक्तम्। मृदुमृद्वादिसमुच्छेदस्त्वनुक्तोऽपि ग्रहीतव्यः। तस्मात् समाप्तिमेव सन्धायैतदुक्तम्। *तैर्निरवशेषच्छेदात्।* यस्मात्तैर्नवभिर्मिथ्यादृष्टिप्रकारैः कुशलमूलानां निरवशेषच्छेदो भवति।

एकोऽपि हि प्रकारस्तेषामसमुच्छिन्न इति। मृदुमृदुनवमः प्रकारः *सर्वेषां* नवानामपि प्रकाराणां *पुनरुत्पत्तौ हेतुः स्याद*िति। अतः समाप्तिमेतत् सन्धायोक्तम्।

उभयथेति[2]। व्युत्थानेन च, अव्युत्थानेन च। *तत्त्यागात् तस्य त्याग* इति। यो मृदुमृदुना चित्तेन संवरः समात्त आसीत्, तस्य मृदुमृदोश्चित्तस्य मृदुमृदुकुशलमूलसम्प्रयुक्तस्य त्यागे समुच्छेदे तस्य संवरस्य त्यागो भवति। एवं यावद् योऽधिमात्राधिमात्रेण चित्तेन समात्तः संवरः। तत्त्यागात् तस्य त्याग इति।

कर्मफले प्रत्यक्षत्वादिति। अचिरोपपन्नस्य देवपुत्रस्य त्रीणि चित्तानि समुदाचरन्ति—कुतोऽहं च्युतः, कुत्रोपपन्नः, केन कर्मणेति। एवं कर्मफलप्रत्यक्षत्वान्न देवेषु कुशलमूलानि समुच्छिद्यन्ते।

*जम्बूद्वीप एवे*ति। तत्र विशेषेण तार्किकत्वादित्यभिप्रायः। *सर्वाल्पैरष्टाभिरिन्द्रियैः समन्वागतः।* पञ्चभिर्वेदनेन्द्रियैः कायजीवितमनइन्द्रियैश्च। समुच्छिन्नकुशलमूल एव। तस्य हि श्रद्धादीनि समुच्छिन्नानि। पृथग्जनत्वाच्च नाज्ञा-

---

१–१. कर्मफल०—का०। २. उभयेनेति—मुद्रितः पाठः।

विदेहको[1] गौदानीयकः[2]" (   ) इति ॥ ७९ ॥

तानि पुनः

छिनत्ति स्त्री पुमान्,

स्त्री च समुच्छिनत्ति, पुरुषश्च; मन्दच्छन्दवीर्यप्रज्ञत्वात् ।

न स्त्रीत्यपरे ।

अयं ग्रन्थो विरुध्येत—"यः स्त्रीन्द्रियेण समन्वागतो नियतमसावष्टाभिरिन्द्रियैः समन्वागतः" (   ) इति ।

तेषामपि तृष्णाचरितो न समुच्छिनत्ति; चलाशयत्वात् । कस्तर्हि ?

दृष्टिचरितः,

दृढगूढपापाशयत्वात् । अत एव न षण्ढादयः[3]; तृष्णाचरितपक्षत्वात्[4] । आपायिकवच्च ।

किंस्वभावः कुशलमूलसमुच्छेदः ?

सोऽसमन्वयः ।

स्यामीन्द्रियाणि सन्ति । चक्षुरादीन्यपि न सन्ति । वैकल्ययोगे, क्रममरणावस्थायां वा । *एवं पौर्वविदेहको गौदानीयक* इति । अतिदेशादस्त्यनयोरपि कुशलमूलसमुच्छेद इति दर्शयति ॥ ७९ ॥

"छिनत्ति स्त्री पुमान्" इति । *स्त्री पुमांश्चेति* च-शब्दो लुप्तनिर्दिष्टः । *यः स्त्रीन्द्रियेण समन्वागतो नियतमसावष्टाभिरिन्द्रियैः समन्वागतः* । चतुर्भिर्वेदनेन्द्रियैः, त्रिभिश्च कायजीवितमनइन्द्रियैः, स्त्रीन्द्रियेणाष्टमेन । श्रद्धादीनि समुच्छिन्नकुशलमूलावस्थायां व्यभिचार्यन्त इत्यभिप्रायः । *अयमेव चात्रार्थो विरुध्यते* । चक्षुरादीन्यपि व्यभिचार्यन्ते पूर्ववत् ।

तेषामपीति । तेषामपि समुच्छेत्तॄणामुक्तानां *तृष्णाचरितो न समुच्छिनत्ति* ।

दृढगूढपापाशयत्वादिति । दृढो गूढः पापश्चाशयोऽभिप्रायोऽस्येति समासः । दृढः=स्थिरः । गूढः = प्रच्छन्नः । पापः = अकल्याणः । *तृष्णाचरितपक्षत्वादिति* । तृष्णाचरितजातीयत्वादित्यर्थः । यथा तृष्णाचरितश्चलाशयः, तद्वत्ते षण्ढादय इति । *आपायिकवच्च* । यथा—आपायिकाः क्लिष्टाक्लिष्टयोः प्रज्ञयोरदृढत्वात् न कुशलमूलानि समुच्छिन्दन्ति, एवं शण्ठादयः ।

---

[1] पूर्व०—का० ।   [2] गोदानीयक—का० ।
[3] शण्ढा०—का० ।   [4] ०चरिते पक्षात्वात्—का० ।

यदा हि कुशलमूलानां प्राप्तिर्न पुनरुत्पद्यते, अप्राप्तिरप्युत्पद्यते । तस्मिन्नसमन्वागम उत्पन्ने समुच्छिन्नानि कुशलमूलान्युच्यन्ते ।

तेषां समुच्छिन्नानां कथं पुनः प्रतिसन्धिः ?

सन्धिः काङ्क्षास्तिदृष्टिभ्यां

यदा अस्य हेतुफले विचिकित्सा चोत्पद्यते, अस्तिदृष्टिर्वा, सम्यग्दृष्टिरित्यर्थः, तदा पुनः तत्प्राप्तिसमुत्पादात् प्रतिसन्धितानि कुशलमूलान्युच्यन्ते । नवप्रकाराणां युगपत् प्रतिसन्धानं क्रमेण तु सम्मुखीभावः, आरोग्यबललाभवत् । स पुनस्तेषां प्रतिसन्धिः ।

नेहानन्तर्यकारिणः ॥ ८० ॥

अन्यस्यैवेह स्यात्, आनन्तर्यकारिणस्तु नेह स्यात् । तमेव सन्धायोक्तम्–"अभव्योऽयं पुद्गलो दृष्ट एव धर्मे कुशलमूलानि प्रतिसन्धातुम्, नियतमयं नवकेभ्यश्च्यवमानो वा उपपद्यमानो वा कुशलमूलानि प्रतिसन्धास्यति" (   ) इति । उपपद्यमानोऽन्तराभवस्थः, च्यवमानश्च्युत्यभिमुखः । तत्र पुनर्यो हेतुबलेन समुच्छिनत्ति स च्यवमानः प्रतिसन्दधाति, यः प्रत्ययबलेन स उपपद्यमानः । एवं यः स्वबलेन परबलेन ।

पुनराह—य आशयविपन्नः समुच्छिनत्ति स दृष्टे धर्मे प्रतिसन्दधाति । य आशयप्रयोगविपन्नः स भेदात् कायस्येति । एवं यो दृष्टिविपन्नो दृष्टिशील-

---

प्रतिसन्धितानीति । प्रतिसन्धिकृतानि प्रतिसन्धितानि । प्रातिपदिकधातुः । *प्रतिसंहितानीत्यपरे* पठन्ति । *आरोग्यबललाभवदिति* । यथा *आरोग्यं* पूर्वं भवति क्रमेणैव तु *बल-लाभो* भवति, तद्वत् ।

"नेहानन्तर्यकारिणः" इति । आनन्तर्यकारिण एव नेह प्रतिसन्धिर्भवति—अर्थत एतदुक्तम्—अनानन्तर्यकारिण इह प्रतिसन्धिर्भवतीति । *अन्तराभवस्थ* इति । नरकगमनायान्तराभवस्थः । *च्युत्यभिमुख* इति । नरकात् च्युत्यभिमुखः । *हेतुबलेनेति* । सभागहेतुबलेन । यस्माद् येषां मिथ्यादृष्टी स्वयं रोचते । *प्रत्ययबलेनेति* । परतो घोषबलेन । यस्माद् येषां मिथ्यादृष्टी रोचते; हेतुबलस्य सारत्वात् । *एवं यः स्वबलेनेति* । *यः* स्वनर्कबलेन । स च्यवमानः । *यः परबलेन* । परतः श्रुतबलेन । स उपपद्यमानः । *य आशयविपन्न* इति । मिथ्यादृष्टिसम्मुखीभावेन *विपन्नो* विनष्टः । *स दृष्टे धर्मे* जन्मनि *प्रतिसन्दधाति* । *य आशयप्रयोगविपन्नः* । यो

विपन्न इति ।

स्यात् समुच्छिन्नकुशलमूलो न मिथ्यात्वनियत इति चतुष्कोटिकम् । प्रथमा कोटिः—पूरणादयः । द्वितीया—अजातशत्रुः । तृतीया—देवदत्तः । चतुर्थी—एतानाकारान् स्थापयित्वा ।

कुशलमूलसमुच्छेदिकाया मिथ्यादृष्टेरवीचौ विपाकः । आनन्तर्यकारिणां तु तत्र वा, अन्यत्र वा नरके ॥ ८० ॥

कर्मपथप्रसङ्ग एवायं वर्तते । तत्र वक्तव्यम्—कतिभिः कर्मपथैः सह चेतना युगपदुत्पन्ना वर्तत इति ?

युगपद् यावदष्टाभिरशुभैः सह वर्तते ।
चेतना,

एकेन तावत् सह वर्तते । विनाऽन्येनाभिध्यादिसम्मुखीभावे अक्लिष्टचेतसो वा तत्प्रयोगेण रूपिणामन्यतमनिष्ठागमने ।

मिथ्यादृष्टिसम्मुखीभावेनानन्तर्यक्रियया च *विपन्नः* । स भेदात् *कायस्य प्रतिसन्दधाति* । अत्र च यः स्वबलेन परबलेनेति पूर्वोक्तस्यैवायं पर्यायः । *एवं यो दृष्टिविपन्नो यो दृष्टिशीलविपन्न* इति अनन्तरपूर्वोक्तस्यैवायं पर्याय इत्यवगन्तव्यम् ।

पूरणादय इति । आदिशब्देन षट् शास्तारो गृह्यन्ते । तद्यथा—*पूरणकाश्यपः*, *मस्करी* गोशालीपुत्रः, *सञ्जयो* वैरटीपुत्रः, *अजितः* केशकम्बलः, *ककुदः* कात्यायनः, *निर्ग्रन्थो* ज्ञातिपुत्र इति । ते समुच्छिन्नकुशलमूलाः; नास्तिकत्वात् । न मिथ्यात्वनियताः, अनानन्तर्यकारित्वात् । आनन्तर्यकारिणो हि मिथ्यात्वनियताः । *अजातशत्रुस्तु* मिथ्यात्वनियतः; आनन्तर्यकारित्वात् । न समुच्छिन्नकुशलमूलः; सम्यग्दृष्टिकत्वात् । *देवदत्तः* समुच्छिन्नकुशलमूलश्च मिथ्यात्वनियतश्च; सङ्घभेदकत्वात्, तथागतदुष्टचित्तरुधिरोत्पादकत्वाच्च । *चतुर्थ्येतानाकारान् स्थापयित्वेति* । अस्मदादयः ॥ ८० ॥

विनान्येनाभिध्यादिसम्मुखीभाव इति । विनान्येन कर्मपथेन प्राणातिपातादिनाऽभिध्यादीनामन्यतमसम्मुखीभावे । *सा चेतना एकेन कर्मपथेन सह वर्तते* । अभिध्यया वा, व्यापादेन वा, मिथ्यादृष्ट्या वा । *अक्लिष्टचेतसो वेति* । कुशलाव्याकृतचित्तस्य । *तस्य प्रयोक्तुः प्रयोगेण । रूपिणा* प्राणातिपातादीनां काममिथ्याचारवर्ज्यानाम*न्यतमस्य निष्ठापने* । तेनेकेन सह चेतना वर्तते । अभिध्यादिव्यतिरिक्तक्लिष्टचित्तस्य वेति वक्तव्यम् । तस्यापि ह्ययं विधिः सम्भवति ।

द्वाभ्यां सह वर्तते । व्यापन्नचित्तस्य प्राणिवधे, अभिध्याविष्टस्य वाऽदत्तादाने, काममिथ्याचारे, सम्भिन्नप्रलापे च[1] ।

त्रिभिः सह वर्तते । व्यापन्नचित्तस्य प्राणिमारणापहरणे[2] युगपत् । न तर्हीदानीमदत्तादानस्य लोभेनैव निष्ठा सिध्यति ? अनन्यचित्तस्य तत्परिसमाप्तौ[3] स नियमो ज्ञेयः । अभिध्याद्याविष्टस्य च तत्प्रयोगेण रूपिद्वयनिष्ठागमने त्रिभिरेव ।

व्यापन्नचित्तस्य प्राणिवध इति विस्तरः । व्यापादेन प्राणातिपातेन चेति *द्वाभ्यां सह वर्तते । काममिथ्याचारे, सम्भिन्नप्रलापे* च द्वाभ्यां सह वर्तते । अभिध्यया काममिथ्याचारेण चेति द्वाभ्याम् । सम्भिन्नप्रलापेनाभिध्यादीनां चान्यतमेन चेति द्वाभ्यामेव ।

इदं चोद्यते—व्यापन्नचित्तस्य प्राणिवध इत्यभिध्याविष्टस्य चादत्तादान इति, किमिदं स्वयं कुर्वत उच्यते ? उताहो परेण कारयतः ? यदि स्वयं कुर्वतः; व्यापन्नचित्तस्याभिध्याविष्टस्य चेति विशेषणं न युज्यते; प्राणिवधे व्यापादस्यावश्यकत्वात्, अदत्तादाने चाभिध्यायाः, व्यभिचारे हि विशेषणमिष्यते ? अथ परेण कारयतः; अभिध्याव्यापादमिथ्यादृष्टयन्यतमचित्तस्य प्राणिवधे, अदत्तादानकाममिथ्याचारसम्भिन्नप्रलापेषु वेति वक्तव्यम् ? उच्यते—स्वयं कुर्वत इति । ननु चोक्तं विशेषणं न युज्यत इति ? नैष दोषः; न हीदं विशेषणमुच्यते, किं तर्हि ? स्वरूपाख्यानमेतत् । व्यापादाभिध्ययोर्द्वितीयभूतयोःतत्रास्तित्वं कथ्यत इति । एवमप्यभिध्याद्यन्यतरचित्तस्य तान् प्राणातिपातादीन् कारयतो द्वाभ्यां सह चेतना वर्तत इति सम्भवेत्, तस्मात्तदपि वक्तव्यम् ? सत्यं वक्तव्यमेतत् । उदाहरणमात्रं त्वेतदुक्तमित्यदोषः ।

*व्यापन्नचित्तस्य प्राणिमारणापहरणे युगपदि*ति । यत्र मारणेनैवापहरणं सिध्यति, तत्र हि व्यापादप्राणिवधादत्तादानकर्मपथा युगपद् भवन्तीति । न *तर्ही*ति विस्तरः । यदि परकीयद्रव्यापहरणकाले व्यापादो भवति । न तर्हीदानीमदत्तादानस्य *लोभेनैव निष्ठा सिध्यती*ति । लोभद्वेषयोर्युगपदभावात् । *अनन्यचित्तस्ये*ति विस्तरः । अपहरणचित्तस्यैव *तत्परिसमाप्तावदत्तादानपरिसमाप्तौ स नियमो ज्ञेयः* । "लोभतः परस्त्रीगमनाभिध्यादत्तादानसमापनम्" (अभि० को० ४.७०) इति । अन्यचित्तस्य तु मारणचित्तस्य नायं नियमः ।

---

१. वा०—का० । २. परकीयप्राणि०—का० ।
३. तत्समाप्तौ—का० ।

चतुर्भिः सह वर्तते—भेदाभिप्रायस्यानृतवचने, परुषवचने वा। तत्र हि मानस एको भवति, वाचिकास्त्रयः।

अभिध्यादिगतस्य वा तत्प्रयोगेणान्यरूपित्रयनिष्ठागमने।

एवं पञ्चषट्सप्तभिर्योजयितव्या।

अष्टाभिः सह वर्तते। षट्सु प्रयोगं कृत्वा स्वयं काममिथ्याचारं कुर्वतः समं निष्ठागमने। एवं तावदकुशलैः।

दशभिर्याबच्छुभैः,

कुशलैः पुनः कर्मपथैर्यावद् दशभिः सह चेतना वर्तत इति।

उत्सर्गं कृत्वाऽपवादं करोति—

नैकाष्टपञ्चभिः ॥ ८१ ॥

भेदाभिप्रायस्यानृतवचन इति। भेदाभिप्रायत्वात् तदेवानृतं पैशुन्यं भवति। तदेव सम्भिन्नप्रलापः, "सर्वं क्लिष्टं सम्भिन्नप्रलापिता" (अभि० ४७६) इति सिद्धान्तात्। एवं भेदाभिप्रायत्वात्तदेव परुषवचनं पैशुन्यं तथैव च सम्भिन्नप्रलाप इति। *चतुर्भिः सह वर्तते*। कथम्? इत्याह—*तत्र हि मानस एको भवति, वाचिकास्त्रय* इति। अनृतवचनेऽभिध्याव्यापादो वा भवेत्। वाचिकास्त्रयः—मृषावादपैशुन्यसम्भिन्नप्रलापाः। परुषवचनेऽपि मानस एको व्यापादः, वाचिकास्त्रयः—पारुष्यपैशुन्यसम्भिन्नप्रलापाः। नामत एवं त्रयो भवन्ति, न तु स्वभावतः। तदेव ह्यनृतवचनं पैशुन्यं सम्भिन्नप्रलाप इति चोच्यते। न तु त्रयः स्वभावा भवन्ति। एवं परुषवचनमपि त्रिनामकं भवतीति योज्यम्।

अपरे पुनर्व्याचक्षते—स्वभावभेदोऽप्यस्तीति। मृषावादपैशुन्यसम्भिन्नप्रलापाविज्ञप्तयो हि भिद्यन्ते, तथा पारुष्य पैशुन्य-सम्भिन्नप्रलापाविज्ञप्तयो भिद्यन्त इति। *अभिध्यादिगतस्येति* विस्तरः। अभिध्यादिगतस्य वा चतुर्भिः सह वर्तते। तत्र मानस एकोऽभिध्यादीनामन्यतमः। *तत्प्रयोगेणा*भिध्यादिगतंप्रयोगेणायं कर्मपथत्रयस्य प्राणिवधादिकस्य *निष्ठागमने* समाप्तिकाले।

एवं पञ्चषट्सप्तभिर्योजयितव्या। का? चेतना। कथम्? *पञ्चभिस्तावत्* सह वर्तते। अभिध्यादिगतस्य तत्प्रयोगेणान्यचतुष्टयनिष्ठागमने। एवमभिध्यादिगतस्यान्यपञ्चषट्निष्ठागमने *षड्भिः सप्तभिश्च* सह वर्तते।

अष्टाभिः सह वर्तते। षट्सु प्राणातिपातादिषु *प्रयोगं कृत्वा* अभिध्यागतस्य *स्वयं काममिथ्याचारं कुर्वतः समं निष्ठागमने*। नवभिः सह वर्तत इति नास्त्येतत्; मानसानां कर्मपथानां युगपदसम्भवात्।

एकेनाष्टाभिः पञ्चभिश्च कर्मपथैः सह न वर्तते ।

तत्र द्वाभ्यां सह वर्तते— कुशलेषु पञ्चसु विज्ञानेषु, आरूप्यसमाप्तौ च क्षयानुत्पादज्ञानयोः ।

त्रिभिः— सम्यग्दृष्टिसम्प्रयुक्ते मनोविज्ञाने ।

चतुर्भिः—अकुशलाव्याकृतचित्तस्योपासकश्रामणेरसंवरसमादाने ।

"नैकाष्टपञ्चभिः" इति । *नैकेन* मानसेन; कुशले चेतस्यनभिध्याव्यापादयोरवश्यम्भावात् । नापि रूपिणैकेन संवरसंगृहीतेन कर्मपथेन सह चेतना वर्तते; क्लिष्टाव्याकृतचित्तावस्थायामपि उपासकसंवरादिषु प्राणातिपातादत्तानकाममिथ्याचारमृषावादानामवश्यं सहभावात् । *न पञ्चभिरेव*; कुशले चेतस्यनभिध्याव्यापादयोर्द्वयोरवश्यं सहभावात् । संवरसंगृहीतानां च प्राणातिपातादीनामेषां चतुर्णामवश्यं सहभावात् । *नाष्टाभिरेव*; भिक्षुसंवरसंगृहीतानां कायिकवाचिनां क्लिष्टाव्याकृतावस्थायां सप्तानामेव सम्भवात् । कुशलचित्तावस्थायां च नवानां दशानां वा सम्भवात् । पारिशेष्याद् द्व्यादिभिः सह वर्तते इत्युक्तं भवति ।

तत्र द्वाभ्यामिति विस्तरः । *तत्र द्वाभ्यां सह* वर्तते । *कुशलेषु पञ्चसु विज्ञाने*ष्वनभिध्या चाव्यापादश्च स्तः, न सम्यग्दृष्टिः । 'पञ्चविज्ञानसहजा धीर्न दृष्टिरतीरणात्" (अभि० १.४१) इति सिद्धान्तात् । अतोऽनभिध्याव्यापादाभ्यां द्वाभ्यामेवात्र सह वर्तते । *आरूप्यसमापत्तौ च क्षयानुत्पादज्ञानयोरि*ति । आरूप्यसमापत्तिसंगृहीतयोश्च क्षयानुत्पादज्ञानयोराभ्यामेव द्वाभ्यां सह वर्तते; 'क्षयानुत्पादधीर्न दृक्" (अभि० ७.१) इति तत्र सम्यग्दृष्ट्यभावात् । आरूप्यसमापत्तिग्रहणं ध्यानासमापत्तिसंगृहीतयोः क्षयानुत्पादज्ञानयोः सप्तविधकायिकवाचिकानास्रवसंवरस्वभावकर्मपथनिवृत्त्यर्थम् । क्षयानुत्पादज्ञानग्रहणं सम्यग्दृष्टिनिरासार्थं च; क्षयानुत्पादज्ञानयोरसम्यग्दृष्टिस्वभावत्वात् ।

त्रिभिः सह वर्तते । *सम्यग्दृष्टिसम्प्रयुक्ते मनोविज्ञाने* । रूपिकर्मपथाभाव इति वाक्यशेषः । तत्र ह्यनभिध्याव्यापादसम्यग्दृष्टय एव त्रयः कर्मपथा भवन्तीति ।

चतुर्भिरिति विस्तरः । *अकुशलाव्याकृतचित्तस्ये*ति विशेषणान्मानसा न सन्तीति दर्शितं भवति । *उपासकश्रामणेरसंवरसमादाने च* । प्राणातिपातादत्तादानकाममिथ्याचारमृषावादविरतिलक्षणाश्चत्वार एव कर्मपथाः सन्ति; मद्यपानादिविरतीनां दशकर्मपथानन्तर्भावात् । पैशुन्यविरत्यादीनां चोपासकश्रामणेरसंवरासंग्रहात् । श्रामणेरसंवरसमादानवचनात् चोपवाससंवर-

षड्भिः—कुशलेषु पञ्चसु विज्ञानेषु[1], तत्समादाने ।

सप्तभिः—कुशले मनोविज्ञाने, तत्समादान एव, अकुशलाव्याकृतचित्तस्य च भिक्षुसंवरसमादाने ।

नवभिः—कुशलेषु पञ्चसु विज्ञानेषु, तत्समादाने, क्षयानुत्पादज्ञानसम्प्रयुक्ते च मनोविज्ञाने, तस्मिन्नेव च ध्यानसंगृहीते ।

दशभिः—ततोऽन्यत्र कुशले मनोविज्ञाने भिक्षुसंवरसमादान एव ।

सर्वा च ध्यानानास्रवसंवरसहवर्तिनी चेतना, अन्यत्र क्षयानुत्पादज्ञानाभ्याम् । संवरनिर्मुक्तेन त्वेकेनापि सह स्यादन्यचित्तस्यैकाङ्गविरतिसमादाने ।

समादानमुक्तरूपमवगन्तव्यम् । श्रामणेरसंवरसमादाने त्वब्रह्मचर्याद् विरतिस्तृतीय: कर्मपथ: । तत्र च काममिथ्याचारोऽन्तर्भूत एव ।

षड्भिः कुशलेषु पञ्चसु विज्ञानेषु तत्समादाने । उपासकश्रामणेरसंवरसमादाने तैश्चतुर्भिर्यथोक्तैरनभिध्याव्यापादाभ्यां चेति षड्भिः; पञ्चसु विज्ञानेषु सम्यग्दृष्टयभावात् ।

सप्तभिः कुशले मनोविज्ञाने तत्समादान एव । उपासकश्रामणेरसंवरसमादान एव तैरेव यथोक्तैः सम्यग्दृष्टया च सप्तमेन कर्मपथेन । मनोविज्ञाने हि कुशले सम्यग्दृष्टिरस्तीति । *अकुशलाव्याकृतचित्तस्य च भिक्षुसंवरसमादाने* सप्तभिरेव रूपिभिः, न मानसैः; अकुलाव्याकृतचित्तत्वात् ।

नवभिः कुशलेषु पञ्चसु विज्ञानेषु तत्समादाने । भिक्षुसंवरसमादाने । सम्यग्दृष्टेरेवाभावात् । *क्षयानुत्पादज्ञानसम्प्रयुक्ते च मनोविज्ञाने* तैरेव नवभिः सह वर्तते; तत्रापि सम्यग्दृष्टयभावात् । *तस्मिन्नेव चेति ।* क्षयानुत्पादज्ञानसम्प्रयुक्त एव ध्यानसंगृहीते मनोविज्ञाने । नवभिरेव । ध्यानसंवरसंगृहीते रूपिभिः सप्तभिः, अनभिध्याव्यापादाभ्यां च ।

दशभिस्ततोऽन्यत्रेति । क्षयानुत्पादज्ञानवर्जिते *कुशले मनोविज्ञाने भिक्षुसंवरसमादान एव । सर्वा* चेति विस्तरः । *सर्वा च ध्यानास्रवसंवरसहवर्तिनी क्षयानुत्पादज्ञानासम्प्रयुक्ता* चेतना सप्तभिः कायिकवाचिकैर्ध्यानानास्रवसंवरसंगृहीतैः, त्रिभिश्च मानसैरिति दशभिः सह वर्तते । संवरसंगृहीतैः कर्मपथैः सहैव चेतना वर्तत इति दर्शितम् ।

संवरनिर्मुक्तेन तु । अष्टविधसंवरनिर्मुक्तेन तु । *एकेनापि सह स्यात् ।* कथम् ? इत्याह—*अन्यचित्तस्येति ।* तत्संवरनिर्मुक्तकुशलकर्मपथसमुत्थापकाच्चित्तादन्य-

---

१. विज्ञानकायेषु—का० ।

पञ्चाष्टाभिरपि स्यात्, कुशले मनोविज्ञाने द्विपञ्चाङ्गसमादाने युगपत् ॥ ८१ ॥

कस्यां गतौ कति कर्मपथा अकुशलाः कुशला वा सम्मुखीभावतः, समन्वागमतो वा ?

सम्भिन्नालापपारुष्यव्यापादा[1] नरके द्विधा ।

इत्येते त्रयः कर्मपथा नरके द्वाभ्यां सप्रकाराभ्यां सन्ति—सम्मुखीभावतः, समन्वागमभावतश्च । परिवेदनात् सम्भिन्नप्रलापः । परस्परपरितापनात् पारुष्यं रूक्षसन्तानतया । परस्परद्वेषाद् व्यापादः ।

समन्वागमतोऽभिध्यामिथ्यादृष्टी,

न सम्मुखीभावतः । रञ्जनीयवस्त्वभावात्, कर्मफलप्रत्यक्षत्वाच्च । कर्मक्षयेण मरणान्न प्राणातिपातः, द्रव्यस्त्रीपरिग्रहाभावान्नादत्तादानकाममिथ्याचारौ, प्रयोजनाभावान्न मृषावादः । अत एव न पैशुन्यम्; नित्यभिन्नत्वाच्च ।

कुरौ त्रयः ॥ ८२ ॥

'समन्वागमतः' इति वर्तते । अभिध्याव्यापादमिथ्यादृष्टयो न सम्मुखीभावतः । अममपरिग्रहत्वात्[2] स्निग्धसन्तानत्वादाघातवस्त्वभावादपापाशयत्वाच्च ॥ ८२ ॥

चित्तस्य । क्लिष्टाव्याकृतचित्तस्येत्यर्थः । *एकाङ्गविरतिसमादाने* । प्राणातिपाताङ्गविरतेः, अदत्तादानविरतेर्वा समादाने । तेनैकेन कर्मपथेन सह वर्तते । *पञ्चाष्टाभिरपी*ति । कुशलमनोविज्ञानस्य पुद्गलस्य द्वयङ्गसमादाने युगपन्मानसैस्त्रिभिः । रूपिभ्यां द्वाभ्यामिति पञ्चभिः । *पञ्चाङ्गसमादाने* । युगपत्तैश्च रूपिभिः पञ्चभिः । मानसैश्च त्रिभिरित्यष्टाभिः । उदाहरणरूपं चैतदुक्तम् । अतोऽन्यथापि शक्यते वक्तुम्—क्लिष्टाव्याकृतचित्तस्य संवरासंगृहीतपञ्चाङ्गसमादाने पञ्चभिः सह वर्तते इति ॥ ८१ ॥

*रञ्जनीयवस्त्वभावादि*ति । नरके रञ्जनीयवस्त्वभावात् न सम्मुखीभावतोऽभिध्यास्ति । कर्मफलप्रत्यक्षत्वाच्च न मिथ्यादृष्टिः । *अत एवे*ति । प्रयोजनाभावान्न पैशुन्यम् । *नित्यभिन्नत्वाच्च* । अन्योन्यसौहार्दाद्यभावतः ।

अममपरिग्रहत्वान्न कुरौ सम्मुखीभावतोऽस्त्यभिध्याकर्मपथः । *स्निग्धसन्तानत्वादाघातवस्त्वभावाच्च* न व्यापादः । *अपापाशयत्वाच्च* न मिथ्यादृष्टिः । त्रयोऽप्येतेऽभिध्यादयो न सन्ति ॥ ८२ ॥

---

१ भिन्नप्रला०—का० । २. अममा०—का० ।

सप्तमः स्वयमन्यत्र,

असम्भिन्नप्रलापः सम्मुखीभावतोऽप्यस्ति । ते हि क्लिष्टचित्ताः कदाचिद् गायन्ति । अपापाशयत्वात् न प्राणातिपातादयः । नियतायुष्कत्वाद्, द्रव्यस्त्रीपरिग्रहाभावात्, प्रयोजनाभावाच्च ।

कथमेषामब्रह्मचर्यम् ? ते खलु यया स्त्रिया सार्धं रन्तुकामा भवन्ति तां बाहौ गृहीत्वा वृक्षमूलमुपसर्पन्ति । गम्या चेद्, वृक्षश्छादयति तां ते गच्छन्ति । अगम्या चेन्न छादयति, तां ते न गच्छन्ति ॥

कामेऽन्यत्र दशाशुभाः ।

'स्वयमपि' इति वर्तते ? नरकोत्तरकुरुभ्यामन्यत्र कामधातौ दशाकुशलाः कर्मपथाः सम्मुखीभावतोऽपि विद्यन्ते । तिर्यक्प्रेतदेवेष्वसंवरनिर्मुक्ताः । मनुष्येष्वसंवरसंगृहीता अपि ।

यद्यपि देवो देवं न मारयति, अन्यगतिस्थं तु मारयति ।

देवा अपि शिरोमध्यच्छेदाद् म्रियन्त इत्यपरे ।

उक्ता अशुभाः ॥

शुभास्त्रयस्तु सर्वत्र सम्मुखीभावलाभतः ॥ ८३ ॥

पञ्चसु गतिषु त्रैधातुके सर्वत्रानभिध्याऽव्यापादसम्यग्दृष्टयः सम्मुखीभावतः समन्वागमतश्च विद्यन्ते ॥ ८३ ॥

"स्वयमपि" इति । अस्य सम्मुखीभावत इति व्याख्यानम् । *अपापाशयत्वाच्च प्राणातिपातादयः* । षडपि सम्मुखीभावतः सन्ति । *नियतायुष्कत्वात्* न प्राणातिपातः । *द्रव्यस्त्रीपरिग्रहाभावाद्* यथाक्रमं नादत्तादानम्, काममिथ्याचारश्च । *प्रयोजनाभावाच्च* न मृषावादपैशुन्यपारुष्याणि ।

यदि परिग्रहो नास्ति *कथमेषामब्रह्मचर्यमि*ति पृच्छति ।

संवरनिर्मुक्ता इति । नैवसंवरसंगृहीता इत्यर्थः । *अन्यगतिस्थं तु मारयतीति* । प्रेतादिगतिस्थम् ।

देवा अपि शिरोमध्यच्छेदान्म्रियन्त इति । शिरश्छेदान्मध्यच्छेदाद् देवा अपि म्रियन्ते । 'देवो देवं न मारयति' इत्युक्ते अवध्या देवा इत्यभिप्रेतम् । देवानां ह्यङ्गप्रत्यङ्गानि छिन्नानि छिन्नानि पुनर्जायन्ते । यद्यप्येवम्, तथापि शिरोमध्यच्छेदाच्छिरश्छेदान्मध्यच्छेदाच्च न पुनः प्रतिसन्धानमित्यस्ति देवानां वधः इत्यभिप्रायः ॥ ८३ ॥

आरूप्यासंज्ञिसत्त्वेषु लाभतः सप्त,

कायिकवाचिकाः सप्त कुशला आरूप्येष्वसंज्ञिसत्त्वेषु समन्वागमत एव। आरूप्योपपन्नानामार्याणामतीतानागतानास्रवसंवरसमन्वागमात्। असंज्ञिसत्त्वानां च ध्यानसंवरसमन्वागमात्।

यद्भूम्याश्रयमार्येणानास्रवं शीलमुत्पादितं निरोधितं भवति, तेनारूप्येष्वतीतेन समन्वागतो भवति। पञ्चभूम्याश्रयेण त्वनागतेन।

शेषिते।

सम्मुखीभावतश्चापि हित्वा सनरकान् कुरून्॥ ८४॥

शेषः कृतः शेषितः। योऽन्यो धातुः शेषितो गतिर्वा, तत्रैते सप्त कुशलाः कर्मपथाः सम्मुखीभावतोऽपि संविद्यन्ते, अन्यत्र नरकोत्तरकुरुभ्यः। ते पुनस्तिर्यक्प्रेतेषु संवरनिर्मुक्ता रूपधातौ तु संवरसंगृहीताः, अन्यत्रोभयथा॥ ८४॥

त एते दशाकुशलाः कर्मपथाः कुशलाश्च

सर्वेऽधिपतिनिष्यन्दविपाकफलदा मताः।

अकुशलैस्तावत् सर्वैरेवासेवितभावितबहुलीकृतैः नरकेषूपपद्यते। तदेषां विपाकफलम्। स चेदित्थन्त्वमागच्छति मनुष्याणां सभागतां प्राणातिपातेनाल्पायुर्भवति, अदत्तादानेन भोगव्यसनी भवति, काममिथ्याचारेण ससपत्नदारः, मृषावादेनाभ्याख्यानबहुलः, पैशुन्येन मित्रभेदोऽस्य भवति, पारुष्येणामनोज्ञ-

---

यद्भूम्याश्रयमिति विस्तरः। पञ्च भूमयो यावच्चतुर्थध्यानभूमिः। यद् भूमिराश्रयोऽस्येति यद्भूम्याश्रयम्। *अनास्रवं शीलमार्येणोत्पादितं निरोधितम्।* उत्पादितं वर्तमानमध्वानं गमितम्। *निरोधित*मतीतमध्वानं गमितम्। एकभूम्याश्रयं यावच्चतुर्भूम्याश्रयं वा। *तेनारूप्येष्वतीतेन समन्वागतो भवति। पञ्चभूम्याश्रयेण त्वनागतेन।* कामावचराश्रयेण यावच्चतुर्थध्यानाश्रयेण च। यत्रोपपन्नो यत्र वा नोपपन्नस्तदाश्रयेण।

अन्यत्र नरकोत्तरकुरुभ्य इति। तत्र समादानशीलाभावात्। *अन्यत्रोभयथेति।* अन्यत्र कामधातौ देवेषूत्तरकुरुवर्ज्येषु च मनुष्येषु उभयथा—संवरनिर्मुक्ताः, संवरगृहीताश्च। त्रिविधः संवरः—प्रातिमोक्षसंवरः, ध्यानसंवरः, अनास्रवसंवरश्च यथासम्भवं ग्रहीतव्यः॥ ८४॥

*आसेवितभावितबहुलीकृतैरि*ति। प्रयोग-मौल-पृष्ठावस्थासु।

शब्दश्रवणम्, सम्भिन्नप्रलापेनानादेयवाक्यः, अभिध्यया तीव्ररागः, व्यापादेन तीव्रद्वेषः, मिथ्यादृष्ट्या तीव्रमोहः । तस्या मोहभूयस्त्वात् । इदमेषां निःष्यन्दफलम् ।

अल्पमप्यायुर्मनुष्येषु कुशलफलम् । तत् कथं प्राणातिपातस्य निःष्यन्दफलं भवति ? नोच्यते तदेवायुस्तस्य फलम्, किं तर्हि ? तेनाल्पायुर्भवतीति । अतोऽन्तरायहेतुः प्राणातिपातस्तस्यायुषो भवतीति वेदितव्यम् । प्राणातिपातेनात्यासेवितेन बाह्या भावा अल्पौजसो भवन्तीति । अदत्तादानेनाशनिरजोबहुलाः, काममिथ्याचारेण रजोऽवकीर्णाः, मृषावादेन दुर्गन्धाः, पैशुन्येनोत्कूलनिकूलाः, पारुष्येणोषरजाङ्गला प्रतिकुष्टाः पापभूमयः, सम्भिन्नप्रलापे विषमर्तुपरिणामाः, अभिध्यया शुष्कफलाः, व्यापादेन कटुकफलाः, मिथ्यादृष्ट्या अल्पफला अफला वा । इदमेषामधिपतिफलम् ।

किं तेनैव कर्मणायमिहाल्पायुर्भवति, अथान्येन ? तेनैवेत्येके । तद् विपाकफलम्, इदं निष्यन्दफलमिति ।

तत्र प्रयोगेणेह मौलेनेत्येके ।

किं तर्हि । तेनाल्पायुर्भवतीति । आयुषोऽल्पत्वात् निष्यन्दफलमिति दर्शयति । *बाह्या भावाः* । ओषधिभूम्यादयः । *अल्पौजसः* अल्पवीर्याः । *अशनिरजोबहुला* इति । *अशनिः* शिलावर्षम् । *रजो* धूलिवृष्टिः, क्षारवृष्टिर्वा, यतः शस्यादिविनाशः । *रजोऽवकीर्णा* इति । धूलिव्युत्थिताः । *उत्कूलनिकुलाः* । उन्नतनिम्नाः । *ऊषरजङ्गलाः* । ऊषराश्च जङ्गलाश्च ते । बाह्या भावा इत्यधिकृताः । ता भूमय इहाभिप्रेताः । *प्रतिकुष्टा* विगर्हिताः । *विषमर्तुपरिणामा* इति । विषम ऋतुपरिणाम एषामिति विषमर्तुपरिणामाः शस्यादय ओषधयः । यस्मिन्नृतौ वर्षितव्यं तत्र न वर्षति, यस्मिन् शीतेन भवितव्यं तस्मिन् न शीतम्, यस्मिन्नुष्णेन भवितव्यं तत्र तन्न भवतीति योज्यम् ।

तद्विपाकफलमिति सत्त्वसन्ताने । *इदं निष्यन्दफलमिति* । बाह्यं तद्वस्त्विति न तद्विपाकफलम् ।

तत्र प्रयोगेणेति विस्तरः । नरके प्राणातिपातप्रयोगेण तीव्रं दुःखमनुभवति । प्राणातिपातप्रयोगेण हि वध्यस्य प्राणिनोऽतीव-तीव्रं दुःखं भवति । *इह मौलेनाल्पायुर्भवति* । यथा तस्य वध्यस्य प्राणिन आयुरुपद्रूयत इति, तादृशमेवैतत् ।

परे सपरिवारग्रहणात्तु प्राणातिपातेनेत्युक्तमिति ।

यदप्येतन्निःष्यन्दफलमुक्तं नैतद् द्वयमतिवर्तते— विपाकफलमधिपतिफलं च । सादृश्यविशेषात्तु तथोक्तम् ।

किं पुनः कारणमेषां कर्मपथानामेतत् त्रिविधफलमभिनिर्वर्तते ? प्राणातिपातं हि तावत् कुर्वता मार्यमाणस्य दुःखमुत्पादितम्, मारितम्, ओजो नाशितम्, अतोऽस्य

दुःखनान्मारणादोजोनाशनात् त्रिविधं फलम् ॥ ८५ ॥

परस्य **दुःखनाद्** विपाकफलेन नरके दुःखितो भवति । **मारणान्निःष्यन्द**फलमाल्पायुर्भवति । **ओजोनाशनाद**धिपतिफलेनाल्पौजसो बाह्या ओषधयो भवन्ति । एवमन्येष्वपि योज्यम् ।

क्षणिको हि मौलः कर्मपथः । तत्र च न दुःखा वेदनास्तीति युक्तमिह मौलेनेति वक्तुम् ? आह—यदि तत्र प्रयोगेणेह मौलेन, कस्मादेवमुक्तम्—प्राणातिपातेनासेवितेन भावितेन बहुलीकृतेन नरकेषूपपद्यते, प्राणातिपातेन मौलेनेति सूत्रार्थं पश्यन्नेवं पृच्छति । *सपरिवारग्रहणादिति* । मौल एव प्राणातिपातः, तस्य प्रयोगः परिवारः । तस्मिन् प्रयोगे प्राणातिपातोपचारं कृत्वैवमुक्तम्—प्राणातिपातेनेति विस्तरः ।

नैतद् द्वयमतिवर्तते । विपाकफलम्, अधिपतिफलं चेति । स्वसन्ताने विपाकफलमन्यत्राधिपतिफलमिति कृत्वा । *सादृश्यविशेषात्तु तथोक्तमिति* । इष्टजीवितोपच्छेद भोगव्यसनादिलक्षणात् सादृश्यविशेषात्तु तथोक्तम् । स चेदित्थन्त्वमागच्छति मनुष्याणां सभागतां प्राणातिपातेनाल्पायुर्भवत्यदत्तादानेन भोगव्यसनो भवतीति विस्तरेण । भवति ह्यत्र हेतुविपाकफलयोः सादृश्यमिति । एवं कुशलेष्वपि वक्तव्यम् । निष्यन्दफलं फलद्वयं नातिवर्तते । सादृश्यविशेषात्तु तथोक्तम् । स चेदित्थन्त्वमागच्छति मनुष्याणां सभागतां प्राणातिपातविरत्या दीर्घायुर्भवतीति विस्तरेण ।

ओजो नाशितमिति । ओजो हृदयप्रदेशे भवति । *एवमन्येषामपि योज्यमिति* । अदत्तादानं हि कुर्वता द्रव्यस्वामिनो दुःखमुत्पादितम्, भोगव्यसनं कृतम्, ओजो नाशितम् । अतोऽस्य दुःखनाद्, भोगत्यजनाद्, ओजोनाशनाच्च त्रिविधं फलम् । कथमोजो नाशितम् ? तद्धेतुनाशनात्, भोगव्यसनेन च तस्योपघातात् । अत एवोक्तम्—अदत्तादानेनाशनिरजोबहुला इति तेन तदोजसः सोपघातता भवतीति । एवं परदारमभिगच्छता परस्य दुःखमुत्पादितम्, ससपत्नदारता, कृता, ओजो नाशितम् । येनौजसा तेजस्वीति लोके निरुच्यते । अत एवोक्तम्—

एवं कुशलानामपि कर्मपथानां फलत्रयं वेदितव्यम् । प्राणातिपातविरत्या आसेवितया भावितया बहुलीकृतया देवेषूपपद्यते । स चेदित्थन्त्वमागच्छति मनुष्याणां सभागतां दीर्घायुर्भवतीत्यकुशलविपर्ययेण सर्वं योजयितव्यम् ॥ ८५ ॥

यद् भगवता—"मिथ्यावाङ्मिथ्याकर्मान्तो मिथ्याजीवः" इत्युक्तम्, कोऽयमन्यस्ताभ्यां मिथ्याजीवः ? नायमन्योऽस्ति । तदेव तु

लोभजं कायवाक्कर्म मिथ्याजीवः,

द्वेषमोहजौ तु कायवाक्कर्मान्तौ । स चैष ताभ्याम्

पृथक् कृतः ।

दुःशोधत्वात्,

हारी हि लोभधर्मः । तत्समुत्थात् कर्मणश्चित्तं न सुरक्ष्यम् । अत आजीवो दुःखशोध इत्यादरोत्पादनार्थं तत्रासौ पृथग्निर्दिष्टः । आह चात्र—

"दुःशोधा गृहिणां दृष्टिर्नित्यं विविधदृष्टिना ।
आजीवो भिक्षुणा चैव परेष्वायत्तवृत्तिना ॥ (   ) इति ।

काममिथ्याचारेण रजोऽवकीर्णा इति । एवमन्येषामपि योज्यम् । एषा दिक् ।

अकुशलविपर्ययेण सर्वं योजयितव्यमिति । कथम् ? अदत्तादानविरत्यासेवितया भावितया बहुलीकृतया देवेषूपपद्यते । स चेदित्थन्त्वमागच्छति मनुष्याणां सभागतां स न भोगव्यसनो भवतीति । एवं काममिथ्याचारविरत्यासेवितया भावितयेति विस्तरेणोक्त्वा यावन्मनुष्याणां सभागतां नाभ्याख्यानबहुलो भवतीति अनया दिशा सर्वं योजयितव्यम् । प्राणातिपाताद् विरमता—परस्य दुःखं नोत्पादितम्, न मारितः, नौजो नाशितमित्यतस्त्रिविधं फलम् । एवमदत्तादानात् प्रतिविरमता—नार्थस्वामिनो दुःखमुत्पादितम्, न भोगव्यसनं कृतम्, नौजो नाशितमतोऽस्य त्रिविधं फलम् । काममिथ्याचाराद् विरमता—न परस्य दुःखमुत्पादितम्, न ससपत्नदारः कृतः, नाप्योजो भ्रंसितम् । अतोऽस्य त्रिविधं फलम् । एवमन्यत्रापि योजयितव्यम् ॥ ८५ ॥

विविधदृष्टिनेति । कौतुकमङ्गलतिथिमुहूर्तनक्षत्रादिदृष्टिना । *परेष्वायत्तवृत्तिनेति* । कायस्थितिहेतवश्चीवरपिण्डपातशयनासनादयो भिक्षोः परप्रतिबद्धाः । पिण्डपातं निःश्रित्येति वचनात् । तस्य पराधीनवृत्ते*र्भिक्षो*र्मिथ्याजीवा भवेयुः—कुहना, लपना, नैमित्तिकता, नैष्पेषिता, लाभेन लाभनिश्चिकीर्षा च । ते *दुःशोधा* भवन्ति । आजीवयोगा इति ।

परिष्कारलोभोत्थं चेत्,

यो मन्यते—जीवितपरिष्कारलोभोत्थमेव कायवाक्कर्म मिथ्याजीवः, नान्यत्; न ह्यात्मरतिनिमित्तं नृत्तगीतादि आजीवयोग इति, तत्

न सूत्रतः ॥ ८६ ॥

शीलस्कन्धिकायां हि भगवता हस्तियुद्धदर्शनादीन्यपि मिथ्याजीवे न्यस्तानि । किं कारणम् ? मिथ्याविषयपरिभोगात् ॥ ८६ ॥

गतमेतत् ॥

यानि पूर्वं पञ्च फलान्युक्तानि, तेषां कतमत् कर्म कतिभिः फलैः प्रहाणम् ?

प्रहाणमार्गे समले सफलं कर्म पञ्चभिः ।

प्रहाणार्थं मार्गः, प्रहीयन्ते वाऽनेन क्लेशा इति **प्रहाणमार्ग** आनन्तर्यमार्गः, तस्मिन् सास्रवे यत् **कर्म** तत् **पञ्चभिः फलैः सफलम्** । तस्य हि

शीलस्कन्धिकायामिति । शीलस्कन्धिका नाम निपातः । तत्रोक्तम्—"यथा त्रिदण्डिन् एके श्रमणब्राह्मणाः श्रद्धादेयं परिभुज्य विविधदर्शनसमारम्भानुयोगमनुयुक्ता विहरन्ति । तद्यथा—हस्तियुद्धे, अश्वयुद्धे, रथयुद्धे, पत्तियुद्धे, यष्टियुद्धे, मुष्टियुद्धे, सारसयुद्धे, वृषभयुद्धे, महिषयुद्धे, अजयुद्धे, मेषयुद्धे, कुक्कुटयुद्धे, वर्तकयुद्धे, लावकयुद्धे[१], स्त्रीयुद्धे, पुरुषयुद्धे, कुमारयुद्धे, कुमारिकायुद्धे, इङ्गलवशे, उत्सतिकायाम्, ध्वजाग्रे, बलाग्रे, सेनाव्यूहे, अनीकसन्दर्शने, महासमाजं वा प्रत्यनुभवन्त्येके । इत्यप्येवंरूपाच्छ्रमणो विविधदर्शनसमारम्भानुयोगात् प्रतिविरतो भवति । तथापि तत्र त्रिदण्डिन् एके श्रमणब्राह्मणाः श्रद्धादेयं परिभुज्य विविधशब्दश्रवणसमारम्भानुयोगयुक्ता विहरन्ति, तद्यथा—हस्तिशब्दे, अश्वशब्दे, रथशब्दे, पत्तिशब्दे, शङ्खशब्दे, भेरीशब्दे, आडम्बरशब्दे, नृत्यशब्दे, गीतशब्दे, शम्पाशब्दे, अच्छटशब्दे, पाणिस्वरे, कुम्भतूणीरे, खचिते, चित्राक्षरे, चित्रपदव्यञ्जने, लोकायतप्रतिसंयुक्ते, आख्यायिका वा श्रोतुमिच्छन्त्येके । इत्यप्येवंरूपाच्छ्रमणो विविधशब्दश्रमणसमारम्भानुयोगात् प्रतिविरतो भवति' (   ) इत्येवमादि । *मिथ्याविषयपरिभोगात्* । असम्यग्विषयपरिभोगात् ॥ ८६ ॥

यानि पूर्वं पञ्च फलान्युक्तानीति । अधिपतिफलम्, पुरुषकारफलम्, निष्यन्दफलम्, विपाकफलम्, विसंयोगफलञ्च । *प्रहाणार्थं मार्ग* इति । **भावसाधनम्**—प्रहाणाय मार्गः प्रहाणमार्ग इति । *प्रहीयतेऽनेनेति* । **करणसाधनम्** ।

---

१. लोचकयुद्धे—इति मुद्रितः पाठः ।

विपाकफलम्—स्वभूमाविष्टो विपाकः । निष्यन्दफलम्—समाधिजा उत्तरे सदृशा धर्माः । विसंयोगफलम्—विसंयोग एव यत्तत् प्रहाणम् । पुरुषकारफलम्—तदाकृष्टा धर्माः, तद्यथा—अधिमुक्तिमार्गस्तत्सहभुवश्च, यच्चानागतं भाव्यते तच्च प्रहाणम् । अधिपतिफलम्—स्वभावादन्ये सर्वसंस्काराः पूर्वोत्पन्नवर्ज्याः ।

चतुर्भिरमले,

अनास्रवे प्रहाणमार्गे यत् कर्म तच्चतुर्भिः फलैः सफलम्, विपाकफलं हित्वा ।

अन्यच्च सास्रवं यच्छुभाशुभम् ॥ ८७ ॥

यच्चान्यत् प्रहाणमार्गात् सास्रवं कुशलं कर्म यच्चाकुशलं तदपि, चतुर्भिर्विसंयोगफलं हित्वा ॥ ८७ ॥

अनास्रवं पुनः शेषं त्रिभिरव्याकृतं च यत् ।

प्रहाणो मार्ग इति च विग्रहः । *समाधिजा उत्तरे सदृशा धर्मा* इति । समाधिजग्रहणमसमाधिजनिरासार्थम् । सदृशग्रहणमनास्रवाव्याकृतनिरासार्थम् । *सहभुव* इति । सम्प्रयुक्ताश्च तत्र वेदनादयः, विप्रयुक्ताश्च जात्यादयः । *यच्चानागतं भाव्यत* इति । अनागतो धर्मस्तद्बलेन प्राप्यत इति । तस्य तत् *पुरुषकारफलम्* । अत एव *तच्च प्रहाणं* पुरुषकारफलं व्यवस्थाप्यते । न केवलं विसंयोगफलमिति । *पूर्वोत्पन्नवर्ज्या* इति । पूर्वोत्पन्नं फलं न युज्यत इति कृत्वा । तथा ह्युक्तम्—'अपूर्वः संस्कृतस्यैव संस्कृतोऽधिपतेः फलम्' (अभि० को० २.५८) इति ।

विपाकफलं हित्वेति । अनास्रवस्याविपाकत्वात् । तस्य हि निष्यन्दफलं समाधिजा उत्तरे सदृशा धर्माः । विसंयोगफलं विसंयोग एव यत्तत् प्रहाणम् । पुरुषकारफलं तदाकृष्टा धर्माः । तद्यथा—विमुक्तिमार्गः, सहभुवः । यच्चानागतं भाव्यते, तच्च प्रहाणम् अधिपतिफलम् । स्वभावादन्ये सर्वे संस्कृता पूर्वोत्पन्नवर्ज्याः ।

"यच्छुभाशुभम्" इति । प्रहाणमार्गाद् यदन्यसास्रवं कर्म समाहितम्, असमाहितञ्च । *तदपि चतुर्भिः फलैः* सफलम्, *विसंयोगफलं हित्वा* । अप्रहाणमार्गत्वादस्य विसंयोगफलं नास्ति । तस्य हि विपाकफलं स्वभूमाविष्टोऽनिष्टो वा विपाकः । निष्यन्दफलमुत्तरे सदृशा धर्माः । पुरुषकारफलं तदाकृष्टाः धर्माः, सहभुवोऽनन्तरभुवो वा । अधिपतिफलं शेषं पूर्ववत् ॥ ८७ ॥

"अनास्रवं पुनः शेषम्" इति । शेषग्रहणं प्रहाणमार्गनिरासार्थम् । तत् पुनः कथम् ? शेषं प्रयोगविमुक्तिविशेषमार्गेषु । तस्याप्रहाणमार्गत्वाद् विसंयोग-

प्रहाणमार्गादन्यदनास्रवं कर्म अव्याकृतं च कर्म त्रिभिः, विपाकविसंयोगफले हित्वा ।

चत्वारि द्वे तथा त्रीणि कुशलस्य शुभादयः ॥ ८८ ॥

'अनुक्रमम्' इति पश्चाद् वक्ष्यति। कुशलस्य कर्मणः कुशला धर्माश्चत्वारि फलानि, विपाकफलं हित्वा । अकुशला द्वे—पुरुषकाराधिपतिफले । अव्याकृतास्त्रीणि[1], निःष्यन्दविसंयोगफले हित्वा ॥ ८८ ॥

अशुभस्य शुभाद्या द्वे त्रीणि चत्वार्यनुक्रमम् ।

यथाक्रममित्यर्थः । अकुशलस्य कर्मणः कुशला धर्मा द्वे पुरुषकाराधिपतिफले । अकुशलास्त्रीणि, विपाकविसंयोगफले हित्वा । अव्याकृताश्चत्वारि, विसंयोगफलं हित्वा । अव्याकृते हि सत्कायान्तग्राहदृष्टी अकुशलानां सर्वत्रगाणां दुःखदर्शनहेयानां च निःष्यन्दफलम् ।

फलं नास्ति । अनास्रवत्वाच्च न विपाकफलम् । शेषं पूर्ववत् । *अव्याकृतञ्च* यन्निवृत्ताव्याकृतमनिवृत्ताव्याकृतं च तदपि *त्रिभिः* सफलम् । अप्रहाणमार्गत्वान्न तस्य विसंयोगफलम् । अव्याकृतत्वाच्च न विपाकफलम् । शेषं पूर्ववदेवास्ति ।

"चत्वारि द्वे तथा त्रीणि कुशलस्य" इति । *यथाक्रममेतत्* । कथम् ? *कुशलस्य कुशला धर्माश्चत्वारि फलानि ।* तस्यैवाकुशला द्वे फले । तस्यैवाव्याकृता स्त्रीणि[1] फलानीति । *विपाकफलं हित्वेति* । विपाकस्याव्याकृतत्वात् ॥ ८८ ॥

अकुशला द्वे इति । *पुरुषकाराधिपतिफले* । न निष्यन्दफलम्; यस्मात् कुशला धर्मा अकुशलानां न सभागहेतुरिति । न विपाकफलम्; अव्याकृतत्वाद् विपाकस्य, यस्माच्चाकुशला विपाकं प्रति व्याक्रियन्ते । न विसंयोगफलम्; अकुशलत्वात् । पारिशेष्यात् पुरुषकाराधिपतिफले एव । ते च पूर्ववद् व्याख्यातव्ये । *अव्याकृताश्चत्वारीति* । कथमकुशलस्याव्याकृता धर्मा निष्यन्दफलम् ? कथं च न भवितव्यम् ? विसदृशत्वात्, विसदृशा ह्यकुशलाव्याकृता धर्माः; सविपाकाविपाकत्वात् ? नैष दोषः; अकुशलनिवृताव्याकृतानां हि धर्माणां क्लिष्टसामान्येनास्ति सादृश्यम् । तस्मादकुशलानां निवृताव्याकृताः, निवृताव्याकृतानां चाकुशलाः निष्यन्दफलं युज्यन्ते । तेनाह—*अव्याकृते हीति* विस्तरः । *अकुशलानां सर्वत्रगाणां* दुःखसमुदयदर्शनप्रहातव्यानाम् । दुःख-

---

१. अव्याकृत०—मुद्रितः पाठः ।

अव्याकृतस्य द्वे त्रीणि त्रीणि चैते शुभादयः ॥ ८९ ॥

अव्याकृतस्य कर्मणः कुशला धर्मा **द्वे** पुरुषकाराधिपतिफले । अकुशलाः **त्रीणि,** विपाकविसंयोगफले हित्वा । अकुशला हि दुःखादिदर्शनहेया[1] अव्याकृतयोर्दृष्ट्योर्निःष्यन्दफलम् । अव्याकृता धर्मा एतान्येव त्रीणि ॥ ८९ ॥

सर्वेऽतीतस्य चत्वारि,

सर्वे इति त्रैयध्विकाः । **अतीतस्य** कर्मणस्त्रैयध्विकाः धर्माश्चत्वारि फलानि, विसंयोगफलं हित्वा ।

मध्यमस्याप्यनागताः ।

प्रत्युत्पन्नस्यापि कर्मणो**ऽनागता** धर्माश्चत्वारि फलान्येतान्येव ।

मध्यमा द्वे,

प्रत्युत्पन्ना धर्माः प्रत्युत्पन्नस्य द्वे पुरुषकाराधिपतिफले ।

दर्शनहेयानाञ्च रागादीनाम् । सत्कायान्तग्राहदृष्टी *निष्यन्दफलम्* । सभागसर्वत्रगयोर्निष्यन्दफलमिति ।

अकुशला हीति विस्तरः । *अकुशला* दुःखादिदर्शनहेयाः पञ्च नैकायिकाः । *अव्याकृतयोः* सत्कायान्तग्राहदृष्ट्योः *निष्यन्दफलम्* । *एतान्येव त्रीणि* । विपाकविसंयोगफले हित्वा ॥ ८९ ॥

अतीतस्य कर्मणस्त्रैयध्विकाः । अतीतानागतप्रत्युत्पन्ना *धर्माः* । *प्रत्येकं चत्वारि फलानि* । *विसंयोगफलं हित्वा* । तस्यानध्वपतितत्वात् । कथं कृत्वा ? अतीतस्य कर्मणः पश्चादतीतस्तद्विपाको विपाकफलम्, तदाकृष्टाः सहजातीताः पश्चादनन्तरातीता वा पुरुषकारफलम्, स्वभाववर्ज्याः तेन सहोत्पन्नाः पश्चादुत्पन्नाश्चातीताः अधिपतिफलम्, पश्चादुत्पन्नातीताः सदृशा धर्मा निष्यन्दफलम् । अतीतस्यानागतस्तद्विपाको विपाकफलम्, यद्बलेन प्राप्यतेऽनागतो धर्मस्तत् पुरुषकारफलम्, अधिपतिफलं यदनागतं तस्य फलम्, निष्यन्दफलं तत्सदृशमनागतम् । एवं प्रत्युत्पन्ना अपि तस्यातीतस्य चत्वारि फलानि योज्यानि ।

"मध्यमस्याप्यनागताः" इति । *प्रत्युत्पन्नस्याप्यनागता धर्माश्चत्वारि फलानि एतान्येव* । विसंयोगफलं हित्वेत्यर्थः । तान्यप्येवमेव योज्यानि ।

प्रत्युत्पन्ना धर्माः प्रत्युत्पन्नस्य द्वे पुरुषकाराधिपतिफले इति । तस्य हि सहोत्पन्नं तद्बलाज्जातमिति पुरुषकारफलम्, अधिपतिफलं च भवत्येव । अवि-

---

१. दुःखदर्शनादि०—का० ।

अजातस्य फलानि त्रीण्यनागताः ॥ ९० ॥

अनागतस्यानागतानि **त्रीणि फलानि,** निःष्यन्दविसंयोगफले हित्वा ॥९०॥

स्वभूमिकस्य[1] चत्वारि,

स्वभूमिकस्य कर्मणः स्वभूमिका धर्माश्चत्वारि फलानि विसंयोगफले हित्वा ।

त्रीणि द्वे वाऽन्यभूमिकाः ।

अन्यभूमिका धर्मा अनास्रवाश्चेत् **त्रीणि** फलानि, विपाकविसंयोगफले हित्वा; धात्वपतितत्वात् । सास्रवाश्चेद्, **द्वे** पुरुषकाराधिपतिफले ।

शैक्षस्य त्रीणि शैक्षाद्याः,

शैक्षस्य कर्मणः **शैक्षा** धर्मा**स्त्रीणि** फलानि, विपाकविसंयोगफले हित्वा । **अशैक्षा** अप्येवम् । **नैवशैक्षनाशैक्षा** अपि विपाकनिःष्यन्दफले हित्वा ।

संयोगस्वभावान्न विसंयोगफलम् । पूर्वोत्तरताभावान्न निष्यन्दफलम् । प्रवाहापेक्षत्वाद् विपाकस्य न वर्तमानं वर्तमानस्य विपाकफलम् ।

निष्यन्दविसंयोगफले हित्वेति । अनागतोऽनागतस्य न निष्यन्दफलम्; यस्मात् सभागसर्वत्रगहेतू नानागतौ भवतः, तस्य विप्रकीर्णत्वात् । सादृश्येन च 'अस्येदं फलम्' इति परिच्छेत्तुमशक्यत्वात् । न विसंयोगफलम्; यस्मादनागतो विसंयोगो न भवति । विपाकफलं तु भवेद्; अनागतस्य ह्यकुशलस्य कुशलसास्रवस्य वानागतं पश्चादुत्पत्स्यमानञ्च विपाकफलम् । पुरुषकारफलं सहजमनागतमनन्तरभावि चानागतम् । अधिपतिफलं तु सुगममिति न पुनरुच्यते ॥ ९० ॥

स्वभूमिका धर्मा न विसंयोगफलम् । विसंयोगस्याभूमिस्वभावत्वात् ।

अनास्रवाश्चेत् त्रीणि फलानीति । निष्यन्दफलस्य तृतीयस्य सम्भवात् । "अन्योन्यं नवभूमिस्तु मार्गः" (अभि० को० २.५२) इति हि सिद्धान्तः ।

शैक्षस्य कर्मणः शैक्षा धर्मास्त्रीणीति । यस्माद् विपाकफलं न शैक्षम् । विसंयोगश्चापि न शैक्षः । *नैवशैक्षनाशैक्षा अपि* त्रीणि । न *विपाकफलमस्यास्ति;* शैक्षस्याविपाकत्वात् । *न निष्यन्दफलम्* । नैवशैक्षनाशैक्षस्य शैक्षेणासदृशत्वाद् विसंयोगफलं तु भवति; विसंयोगस्य नैवशैक्षनाशैक्षस्वभावत्वात् । पुरुषकार-

---

१. स्वभूमिधर्माः—का० ।

अशैक्षस्य तु कर्मणः ॥ ९१ ॥

धर्माः शैक्षादिका एकं फलं त्रीण्यपि च द्वयम् ।

अशैक्षस्य कर्मणः शैक्षा धर्मा एकमधिपतिफलम् । **अशैक्षास्त्रीणि**, विपाक-विसंयोगफले हित्वा । नैवशैक्षनाशैक्षा द्वे पुरुषकाराधिपतिफले ।

ताभ्यामन्यस्य शैक्षाद्या द्वे द्वे पञ्च फलानि च ॥ ९२ ॥

शैक्षाशैक्षाभ्यामन्यस्य कर्मणो नैवशैक्षनाशैक्षस्य[1] **शैक्षा** धर्मा **द्वे** पुरुष-काराधिपतिफले। अशैक्षा अप्येवम्। नैवशैक्षनाशैक्षाः **पञ्च फलानि** ॥९१-९२॥

त्रीणि चत्वारि चैकं च दृग्घेयस्य तदादयः ।

दर्शनहेयस्य कर्मणो दर्शनहेया धर्मास्त्रीणि फलानि, विपाकविसंयोगफले हित्वा । भावनाहेयाश्चत्वारि, विसंयोगफलं हित्वा । अप्रहेया एकमधिपतिफलम् ।

ते द्वे चत्वार्यथ त्रीणि भावनाहेयकर्मणः ॥ ९३ ॥

भावनाहेयस्य कर्मणो दर्शनहेया धर्मा द्वे पुरुषकाराधिपतिफले । भावना-हेयाश्चत्वारि, विसंयोगफलं मुक्त्वा । अप्रहेयास्त्रीणि, विपाकनिःष्यन्दफले मुक्त्वा ॥ ९३ ॥

फलमपि भवति; शैक्षेण नैवशैक्षनाशैक्षाकृष्टिसम्भवात् । अधिपतिफलं चास्त्येव इति त्रीणि सम्भवन्ति ।

"अशैक्षस्य तु" इति विस्तरः। *अशैक्षस्य शैक्षा धर्मा एकमधिपतिफलम्* । न निष्यन्दफलम्; न्यूनत्वात् । "समविशिष्टयोः" (अभि० को० २.५२) इति वचनात् । न पुरुषकारफलम्, सहानन्तरोत्पादाभावात् । न ह्यशैक्षानन्तरं शैक्षमुत्पद्यते; परिहाणिकालेऽपि क्लेशसमुदाचारव्यवहितत्वात् । विपाकफलं विसंयोगफलं च नैवशैक्षनाशैक्षस्वभावमिति । न चाशैक्षस्य विपाको भवतीत्यतो न विपाकफलम् । *अशैक्षास्त्रीणीति* पुरुषकाराधिपतिनिष्यन्दफलानि । *न विपाकविसंयोगफले* । तयोर्नैवशैक्षनाशैक्षस्वभावत्वात् । यच्चाशैक्षस्वभावं तदिह चिन्त्यते । *नैवशैक्षनाशैक्षा द्वे पुरुषकाराधिपतिफले* इति । पुरुषकारफलम् । तद्यथा—तदाकृष्टा अनन्तरभाविनो धर्माः । अधिपतिफलं पूर्ववत् । यथोक्त-कारणत्वाच्च फलत्रयम् ।

अशैक्षा अप्येवमिति । द्वे पुरुषकाराधिपतिफले इत्यर्थः ॥ ९१-९२ ॥

"तदादयः" इति । दर्शनहेयादयः । *"ते"* इति । दर्शनहेयादयः ॥ ९३ ॥

---

१. नैवशैक्षा०—का० । एवमुपर्यपि ।

अप्रहेयस्य ते त्वेकं द्वे चत्वारि यथाक्रमम् ।

अप्रहेयस्य कर्मणो दर्शनहेया धर्मा एकमधिपतिफलम् । भावनाहेया **द्वे** पुरुषकाराधिपतिफले । अप्रहेयाश्चत्वारि, विपाकफलं मुक्त्वा ।

पुनर्यथाक्रमग्रहणमाद्यन्तवन्मध्येऽपि ज्ञापनार्थम् । एष हि पेयालधर्मः ।

कर्मनिर्देशप्रसङ्गेनेदमपि परिप्रश्न्यते—**शास्त्रेषु** अयोगविहितम्, योगविहितम्, नैवयोगविहितं नायोगविहितं च कर्मोक्तम्, तस्य किं लक्षणम् ?

अयोगविहितं क्लिष्टं विधिभ्रष्टं च केचन ॥ ९४ ॥

क्लिष्टं कर्मायोगविहितम्, अयोनिशोमनस्कारसम्भूतत्वादित्येके ।

विधिभ्रष्टमपीत्यपरे । येन यथा गन्तव्यं स्थातव्यं भोक्तव्यं प्रविचरितव्यमित्येवमादि, तच्चान्यथा विदधाति, तदयुक्तविधानादयोगविहितमिति ।

कुशलं कर्म योगविहितम्, अविधिभ्रष्टं **चेत्यपरे** ।

तदुभाभ्यामन्यत्[1] नोभयथा—नैवयोगविहितं नायोगविहितम् ॥ ९४ ॥

भावनाहेया द्वे इति । अनास्रवमार्गव्युत्थाने भावनाहेयाः कुशलाः पुरुषकारफलम् ।

*आद्यन्तवदि*ति विस्तरः । आद्यन्तयोरिवाद्यन्तवत् । मध्येऽपि ज्ञापनार्थम् *पुनर्यथाक्रमग्रहणम्* । कथम् ? आदौ यथाक्रमार्थोऽनुक्रमशब्दः प्रयुक्तः; 'अशुभस्य शुभाद्या द्वे त्रीणि चत्वार्यनुक्रमम्" (अभि० को० ४.८९) इति वचनात् । अन्तेऽपि प्रयुक्तः; 'अप्रहेयस्य ते त्वेकं द्वे चत्वारि यथाक्रमम्' (अभि० को० ४.९२) इति । यथैवमाद्यन्तयोर्यथाक्रमार्थ उक्तः, तथा मध्येऽप्यवगन्तव्यः । *एष हि पेयालधर्म* इति । एषोऽभिसंक्षेपन्यायः । अन्यथा हि 'अव्याकृतस्य द्वे त्रीणि त्रीणि चैते शुभादयः" (अभि० को० ४.८६) इत्येवमादिषु यथाक्रममिति सर्वत्र वक्तव्यम् ।

*अयोनिशो मनस्कारसम्भूतत्वादि*ति । अयोन्या अन्यायेन क्लेशयोगेन यः प्रवृत्तो मनस्कारः, तत्र सम्भूतः, तद्भावः, तस्मादिति ।

येन यथा गन्तव्यम् । येन पुद्गलेन यथा गन्तव्यं तथा न गच्छतीत्यस्यायोगविहितं कर्म ।

*विधिभ्रष्टमपी*ति । अपि-शब्देन क्लिष्टं चापीति गृह्यते । *तदुभाभ्यामन्यन्नो-*

---

१. उभाभ्या०—का० ।

किमेकं कर्म एकमेव जन्माक्षिपति ? अथ नैकमपि ? तथा किमेकमपि कर्मैकं जन्माक्षिपति ? अथानेकम् ? एष हि सिद्धान्तः—

एकं जन्माक्षिपत्येकम्,

एकमेव जन्माक्षिपति एकमेव च कर्म, नानेकम् । जन्मेति निकायसभागस्याख्या । तत्र हि लब्धे जात इत्युच्यते ।

यत्तर्हि **स्थविरानिरुद्धेनोक्तम्**—"सोऽहं तस्यैकपिण्डपातस्य विपाकेन सप्तकृत्वस्त्रयस्त्रिंशेषु देवेषूपपन्नो यावदेतर्ह्यापि शाक्यकुले जातः" ( ) इति ? तेन ह्यसौ समृद्धिं लब्ध्वा जातिस्मरः पुनरन्यत् पुण्यं कृतवान् । तत उत्थानं दर्शयति स्म । यथा मनुष्यो दीनारोत्थोऽनेन सहस्रं निर्वर्त्याह[1]—'एकेन दीनारेणाहमैतदैश्वर्य[2] प्राप्तः' इति ।

अपरे त्वाहुः—तस्य तं पिण्डपातमधिष्ठानं कृत्वा दानचेतनानां प्रवाहो महानुत्पन्नः कयाचित् किञ्चित् फलं परिगृहीतमिति । अनेकेनाप्येकमाक्षिप्यते—मा भूत् खण्डशो निकायसभागस्याक्षेप इति । एकेन तु कर्मणा क्लिष्टस्य निकायसभागस्येष्यते कर्म ।

अनेकं परिपूरकम् ।

यथा चित्रकर एकया वर्त्या रूपमालिख्य बह्वीभिः परिपूरयति; तथा हि तुल्येऽपि मानुष्ये कश्चित् सकलेन्द्रियाङ्गप्रत्यङ्गो भवति वर्णाकृतिप्रमाणबलसम्पदा विभ्राजमानः, कश्चिदेषां केनचिद् विकलः ।

भयथेति । न योगविहितः, नायोगविहितः । किञ्च तदन्यदव्याकृतं कर्म विधिभ्रष्टाविधिभ्रष्टाभ्यां चान्यदव्याकृतमिति ॥ ९४ ॥

जन्मेति निकायसभागस्याख्येति । चित्तविप्रयुक्तस्य संस्कारस्य, न तु जातेरित्यभिप्रायः ।

यत्तर्हीति । यद्येकमेव कर्मैकमेव जन्माक्षिपति । *यत् स्थविरानिरुद्धेनोक्तं* सोऽहं तस्येति विस्तरेण । तत् कथं न विरुध्यत इति वाक्यार्थः । तेन जन्मान्तरे *तगरशिखिने* प्रत्येकबुद्धाय पिण्डपातो दत्तः । तेनैवमुक्तम्—"सोऽहं तस्य" इति विस्तरेण । *निर्वर्त्येति* । विठपित्वेत्यर्थः ।

तुल्येऽपि मानुष्ये कश्चित् सकलेन्द्रियो भवति, कश्चिद् विकलेन्द्रियः । परिपूर-

---

१. निर्विश्याह—का० । २. ०दीश्वर्यं—का० ।

न च केवलं कर्मैवाक्षेपकं जन्मनः । किं तर्हि ? अन्यदपि सविपाकम् । सर्वथा तु—

नाक्षेपिके समापत्ती अचित्ते प्राप्तयो न च ॥ ९५ ॥

सविपाकाभ्यामप्यचित्तसमापत्तिभ्यां निकायसभागो नाक्षिप्यते; कर्मासहभूत्वात्[1], प्राप्तिभिश्च, कर्मणानेकफलत्वात्[2] ॥ ९५ ॥

त्रीण्यावरणान्युक्तानि भगवता—कर्मावरणम्, क्लेशावरणम्, विपाकावरणं च; तेषां कः स्वभावः ?

आनन्तर्याणि कर्माणि तीव्रक्लेशोऽथ दुर्गतिः ।
कौरवासंज्ञिसत्त्वाश्च मतमावरणत्रयम् ॥ ९६ ॥

पञ्चानन्तर्याणि कर्मावरणम् । तद्यथा—मातृवधः, पितृवधः, अर्हद्वधः, सङ्घभेदः, तथागतशरीरे दुष्टचित्तरुधिरोत्पादनम् ।

तीव्रक्लेशता क्लेशावरणम् । द्विविधो हि क्लेशः—तीव्रश्च य आभीक्ष्णिकः, तीक्ष्णश्च योऽधिमात्रः । तत्र यस्तीव्रः स आवरणम्, यथा षण्ढादीनाम् । शक्यो ह्यधिमात्रवेगोऽपि क्लेशः कादाचित्को निहन्तुम्, न तु समूहोऽप्याजस्रिकः । आजस्रिके हि क्लेशे तन्निर्घाताय पराक्रमकालं न लभते । तस्य मृदुं प्रतीत्य मध्य उपजायते । मध्यं प्रतीत्याधिमात्रः । तस्माद् एवावरणम् ।

त्रिविधा दुर्गतिः विपाकावरणम्—सुगतेश्च प्रदेशः, औत्तरकौरवाः,

कस्य कर्मणो भेदात् तदनुपपन्नम् । आक्षेपकर्मफलत्वाच्चक्षुरादीनाम् । षडायतनं ह्याक्षिप्यत इति । वर्णादयस्तु परिपूरकस्य कर्मणः फलमिति । युक्तं वक्तुम्—तुल्येऽपि मानुष्ये कश्चिद्वर्णवान्, कश्चिन्नेति । तदुत्पत्तिविरोधिप्रत्ययपरिहारे परिपूरककर्मसामर्थ्यान्न विरोधः । अन्यथा हि न कश्चिद् विकलेन्द्रियः स्यात् सति जन्माक्षेप इति ।

अन्यदपि सविपाकमिति । वेदनादिकम् । *कर्मासहभूत्वादिति* । यस्मात् कर्मणा चेतनाख्येन सह ते समापत्ती न भवतः । नापि कायवाक्कर्मभ्याम्; अचित्तकत्वात् । *प्राप्तिभिश्च* नाक्षिप्यते सविपाकाभिरपि । *कर्मणाऽनेकफलत्वात्* । तदाक्षेपकेण कर्मणा सह भवन्त्योऽपि प्राप्तयो न तेन सहैकफला इति । वृक्षप्रपटिका इव हि प्राप्तयो बहिरवस्थायिन्यो भवन्ति ॥ ९५ ॥

कर्मावरणमिति । कर्मैवावरणम्, क्लेश एवावरणम्, विपाक एवावरणमिति ।

---

१. ०भूतत्वात्—का० । २. कर्मणोऽ०—का० ।

असंज्ञिसत्त्वाश्च ।

कस्यैतान्यावरणानि ? आर्यमार्गस्यार्यमार्गप्रायोगिकाणां च कुशलमूलानाम् ।

अन्यान्यपि ह्यपायादिनियतानि अण्डजसंस्वेदजस्त्रीत्वाष्टमभवनियतानि कर्माणि वक्तव्यानि स्युः ? यान्येव तु पञ्चभिः कारणैः सुदर्शकानि सुप्रज्ञकानि—अधिष्ठानतः, फलतः, गतितः, उपपत्तितः, पुद्गलतश्च, तान्येवोक्तानि नान्यानि ।

क्लेशावरणं चैषां सर्वजघन्यम् । ततः कर्मावरणम् । ताभ्यां हि द्वितीयेऽपि जन्मन्यचिकित्सो भवति; उत्तरोत्तरावाहनादिति वैभाषिकाः ।

---

*आर्यमार्गप्रायोगिकाणां च कुशलमूलाना*मिति । ऊष्मगतादीनाम् । *अपायादिनियतानी*ति । नरक-तिर्यक्-प्रेतनियतानि । *आदि*शब्देनासंज्ञिसमापत्तिमहाब्रह्मसंवर्तनीयं च नियतं कर्म गृह्यते । षण्ढपण्डकोभयव्यञ्जनसंवर्तनीयं च वक्तव्यम् । *तथा अण्डज-संस्वेदज-स्त्रीत्वाष्टमभवनियतानि कर्माणि वक्तव्यानि* । आर्या हि नरकादिषु नोपपद्यन्ते । अण्डजां संस्वेदजां च योनिं न प्रतिपद्यन्ते । स्त्रीत्वमष्टमं च भवं न निवर्तयिष्यन्ति; सप्तकृत्वो भवपरमत्वात् । *सुदर्शकानी*ति । सुखेन दृश्यन्ते परेभ्य इति सुदर्शानि, सुदर्शान्येव सुदर्शकानि । एवं सुखेन प्रज्ञाप्यन्ते आत्मनेति सुप्रज्ञेयानि, सुप्रज्ञेयान्येव *सुप्रज्ञपकानि* । स्वार्थे कः । पर्याये द्वयं चैतत्—सुदर्शकानि, सुप्रज्ञपकानीति । *अधिष्ठानत* इति । कर्मपथोऽधिष्ठानम् । त्रयाणामानन्तर्याणां प्राणातिपातः कर्मपथोऽधिष्ठानम् । एकस्य मृषावादः कर्मपथोऽधिष्ठानम् । पञ्चमस्य प्राणातिपातप्रयोगोऽधिष्ठानम् । एवमधिष्ठानतः सुदर्शकानि सुप्रज्ञपकानि । *फलतः* । सर्वेषामनिष्टफलत्वात् । *गतितः* । नरकगतिप्रापकत्वात् । *उपपत्तितः* । उपपद्य वेदनीयत्वात् । *पुद्गलतः* । गरिष्ठक्लेशसमुदाचारात् सुप्रज्ञातः पुद्गलः । अयं पितृघातको यावदयं तथागतशरीरे दुष्टचित्तरुधिरोत्पादक इति ।

अपरे पुनर्व्याचक्षते—*अधिष्ठानतः* । पूर्ववत् । *फलतः* । नरकफलत्वात् । *गतितः* । मनुष्यगतिकरणात् । 'त्रिषु द्वीपेष्वानन्तर्यम्' (अभि० को० ४.९७) इति वचनात् । *उपपत्तितः* । तथैवोपपद्यवेदनीयत्वात् । *पुद्गलतः* । स्त्रीपुंसौ, न षण्ढः पण्डको वा । इत्येवं पञ्चभिः कारणैः सुदर्शकानि सुप्रज्ञपकानि । न तु पुनस्तान्यपायादिनियतानि कर्माणि पञ्चभिः कारणैः सुदर्शकानीति । *न तान्युक्तानि* ।

*उत्तरोत्तरवाहनादि*ति । यस्मात् क्लेशावरणं सर्वपापिष्ठम् । ततः कर्मावरणं लघु । ततो विपाकावरणम् । विपाकावरणस्य हि दृष्ट एव धर्मे व्यापारः, न द्वितीय इति ।

आनन्तर्याणीति कोऽर्थः ? नान्तरायितुं शक्यानि विपाकं प्रति जमान्तरफलेन कर्मान्तरेणेत्यानन्तर्याणि । न तिरस्कर्तुमित्यर्थः । न वा तत्कारिणः पुद्गलस्येत-श्च्युतस्यानन्तरमस्ति नरकोपपत्तिगमनं प्रतीत्यनन्तरः । तद्भाव आनन्तर्यम् । यस्य धर्मस्य योगात् सोऽनन्तरो भवति, श्रामण्यवत् ॥ ९६ ॥

अथैषामावरणानां कतमत् कस्यां गतौ वेदितव्यम् ? एकान्तेन तावत्

त्रिषु द्वीपेष्वानन्तर्यम्,

नोत्तरकुरौ, नान्यासु गतिषु। कुत एवान्यत्र घातौ? तेष्वपि स्त्रीपुरुषाणामेव।

षण्ढादीनां तु नेष्यते ।

किं कारणम् ? यदेवासंवराभावे[1] कारणमुद्दिष्टम् । अपि च—

अल्पोपकारालज्जित्वात्,

यथाक्रमं मातापित्रोः, तेषां च । अल्पोपकारौ किलैषां मातापितरौ; विकलात्मभावाधिपतित्वाद्, अल्पस्नेहत्वाच्च । तेषामपि न तीव्रं ह्यपत्राप्यं माता-पित्रोरन्तिके प्रत्युपस्थितम्, यद्विपादनादानन्तर्येण स्पृश्येरन् ।

अत एव तिर्यक्प्रेतानामपि नेष्यते ।

यस्य धर्मस्य योगात् पितृवधादेः *सोऽनन्तरो भवति*। तस्याभिधाने भावप्रत्ययः—आनन्तर्यमिति । *श्रामण्यवत्* । यथा येनानास्रवेण योगाच्छ्रमणो भवति तदभिधाने भावप्रत्ययः—'श्रामण्यममलो मार्गः' (अभि० को० ६.५१) इति, तद्वत् ॥ ९६ ॥

नोत्तरकुराविति। नियतायुष्कत्वात्, प्रकृतिशीलत्वात्, तत्र शासनाभावाच्च ।

यदेवासंवराभावे करणमिति । पापेऽप्यस्थिराशयत्वात् । यत्रैव च संवरस्तत्रा-संवरोऽपि । प्रतिद्वन्द्वभावादित्यसंवरः । *षण्ढादीनां* न भवतीति ।

यद्विपादनादिति । यस्य ह्रीव्यपत्राप्यस्य विपादनाद् विकोपनादानन्तर्येण स्पृश्येरन् षण्ढादयः । *तेषां मातापित्रोरन्तिके न तीव्रं* भवतीति । अतस्तेषामानन्तर्यं नेष्यते। यदि *विकलात्मभावहेतुत्वादल्पोपकारत्वमिति*। अतस्तेषामानन्तर्यं नेष्यते। जात्यन्धादीनामपि स्त्रीपुंसानां मात्रादिवधादानन्तर्यं न स्यात् ? न; अधिगम-धर्मविरुद्धस्यात्मभाववैकल्यस्य विवक्षितत्वात् । यद्वैकल्यमधिगमधर्मविरोधि, तदधिकृतम् । तेनैव मात्राल्पस्नेहत्वम्, न जात्यन्धादिवैकल्येन ।

अतएव तिर्यक्प्रेतानामपि नेष्यते । अल्पोपकारालज्जित्वादेव ।

---

1. तदेवा०—का० ।

पटुबुद्धीनां स्यादश्वाजानेयवदिति भदन्तः। मनुष्यस्याप्यमानुषं[1] मातापितरं[1] मारयतो न स्यादानन्तर्यम् ॥

उक्तं कर्मावरणम् ॥

शेषे गतिषु पञ्चसु ॥ ९७ ॥

के पुनः शेषे ? क्लेशविपाकावरणे। मनुष्येषु विपाकावरणम्। कौरवा देवेष्वसंज्ञिसत्त्वाः।

किंस्वभावान्यानन्तर्याणि ? चत्वारि कायकर्म, एकं वाक्कर्म, त्रीणि प्राणातिपातः, एकं मृषावादः, एकं प्राणातिपातप्रयोगः। अनुपक्रमधर्माणो हि तथागताः ॥ ९७ ॥

हेतौ फलोपचारात् सङ्घभेद आनन्तर्यमुक्तम्, भिद्यते वा अनेनेति कृत्वा।

सङ्घभेदस्त्वसामग्री स्वभावो विप्रयुक्तकः।

अश्वाजानेयवदिति। पटुबुद्धीनां स्यादानन्तर्यम्। तिर्यक्प्रेतानामपीत्यधिकृतम्। *अश्वाजानेयवदिति*। श्रूयते यथा—कश्चिदेव विशिष्टाश्व आजानेयो मातरं न गच्छतीति वाससा मुखं प्रच्छाद्य मातरं गमितस्तेन पश्चात् ज्ञात्वा स्वमङ्गजातमुत्पाटितमिति। एवमाजानेयोऽश्वः पटुबुद्धिः। अस्यानन्तर्यं स्यादित्यभिप्रायः। *मनुष्यस्याप्यमानुषं मातापितरं मारयतो न स्यादानन्तर्यम्*। नेव भवेदानन्तर्यमित्यर्थः। कथम् ? अल्पोपकारालज्जित्वादेव। न हि मनुष्यानुरूपमुपकारममनुष्ययोर्मातापित्रोरन्तिके तीव्रं ह्रीव्यपत्राप्यं सन्तिष्ठते; गतिवैलक्षण्येनाल्पस्नेहत्वात्।

चत्वारि कायकर्मेति। मातृवधादीनि। *एकं वाक्कर्मेति*। सङ्घभेदः। *त्रीणि प्राणातिपात इति*। मातृवधादीनि। *एकं मृषावादः*। सङ्घभेदः। *एकं प्राणातिपातप्रयोगः*। तथागतशरीरे दुष्टचित्तरुधिरोत्पादनं कस्मान्न प्राणातिपातः ? इत्याह—*अनुपक्रमधर्माणो हि तथागता इति*। अपरोपक्रम-मरणधर्माण इत्यर्थः ॥ ९७ ॥

हेतौ फलोपचारादिति। मृषावादो हेतुः सङ्घभेदस्य चित्तविप्रयुक्तलक्षणस्य, तस्मिन् *हेतौ फलोपचारः*। चित्तविप्रयुक्तो धर्मः फलमुपचर्यते। सङ्घभेद इति। *भिद्यते वानेनेति*। करणसाधनपरिग्रहाद्वा मृषावादः सङ्घभेद इत्युच्यते। मृषावादेन हि सङ्घो भिद्यते, न तु सङ्घभेद इति भावसाधनपरिग्रहः।

"*सङ्घभेदस्त्वसामग्री*" इति। मुख्यवृत्त्या *वैभाषिकाणां* द्रव्यसत्ता। तेनाह—

---

१. अमानुषौ मातापितरौ—का०।

अक्लिष्टाव्याकृतो धर्मः,

असामग्री नानाचित्तविप्रयुक्तः[1] संस्कारोऽनिवृताव्याकृतः **सङ्घभेदः**।
स किमानन्तर्यं भविष्यति ! नैव च तेन भेत्ता समन्वागतः। किं तर्हि ?

सङ्घस्तेन समन्वितः ॥ ९८ ॥

यो हि भिन्नस्तस्य भेदः, न भेत्तुः ॥ ९८ ॥

अथ भेत्ता केन समन्वागतः

तदवद्यमृषावादस्तेन[2] भेत्ता समन्वितः।

सङ्घभेदावद्येन भेत्ता समन्वागतः। तत् पुनर्मृषावादः। स पुनः सङ्घभेदसहजे वाग्विज्ञप्त्यविज्ञप्ती। स च तेनावद्येन समन्वागतो भेत्ता।

अवीचौ पच्यते कल्पम्,

अन्तरकल्पमवीचौ महानरके विपच्यते। अन्यैस्तु नावश्यमवीचौ।

अथ येन बहून्यानन्तर्याणि कृतानि भवन्ति, अनन्तरमेव तानि विपच्यन्ते। किन्तु तैस्तस्य भवन्ति[3]

अधिकैरधिका रुजः ॥ ९९ ॥

स हि भूयोभिरानन्तर्यैस्तस्मिन्नवीचौ घनतरं सुकुमारतरं चाश्रयं लभते, कारणाश्च बहुतरास्तीव्रतराश्च, येन द्वित्रिचतुष्पञ्चगुणां वेदनां वेदयते ॥ ९९ ॥

कः पुनरेष सङ्घं भिनत्ति ?

भिक्षुर्दृक्चरितो वृत्ती भिनत्ति,

भिक्षुर्भिनत्ति, न गृही न भिक्षुण्यादयः। स च दृष्टिचरित एव, न

"स्वभावोऽपि विप्रयुक्तकः। अक्लिष्टाव्याकृतो धर्मः" इति। *स किमानन्तर्यं भविष्यतीति*। नैवासावेवंलक्षणमानन्तर्यं भवतीत्यर्थः। *नैव च तेन* विप्रयुक्तेन धर्मेण *भेत्ता समन्वागतः*। तेन नासावानन्तर्यमित्यभिप्रायः ॥ ९८ ॥

स पुनर्मृषावादः सङ्घभेदसहजो विप्रयुक्तधर्मसहजो वाग्विज्ञप्त्यविज्ञप्तिस्वभाव इत्यर्थः ॥ ९९ ॥

भिक्षुर्भिनत्तीति। बुद्धस्य भिक्षुत्वात्। तत्प्रतिस्पर्धिवृत्तित्वाच्च भेत्तुः। *न गृही न*[4] *भिक्षुण्यादय* इति। तेषामनादेयाश्रयत्वात्। *स च दृष्टिचरित एव*। दृढगूढाशयत्वात्। सत्कायदृष्ट्यादिषु पञ्चसु चरितः प्रवृत्तो *दृष्टिचरितः*।

---

१. नान०—का०। २. तदवद्यं—पाठा०।
३. भवति—का०। ४. मुद्रितपुस्तके नास्ति।

तृष्णाचरितः । वृत्तस्थो न भिन्नवृत्तः, तस्यानादेयवाक्यत्वात् ।

क्व भिनत्ति ? यत्र भगवान् सन्निहितस्ततः

अन्यत्र,

नहि शास्तुरेव सन्निधौ शक्यो भेत्तुम्; तथागतानां दुष्प्रसहत्वाद्, आदेयवाक्यत्वाच्च ।

कान् भिनत्ति ?

बालिशान् ।

पृथग्जनानेव, नार्यान्; प्रत्यक्षधर्मत्वात् ।

तानपि न क्षान्तिलाभिन इत्यपरे ।

कियता भिन्नः सङ्घो भवति ?

शास्तृमार्गान्तरक्षान्तौ[1] भिन्नः,

यदा तेभ्यस्तथागतादन्यः शास्ता क्षमते, तदुपदिष्टाच्च मार्गादन्यो मार्ग इयता भिन्नः सङ्घो वक्तव्यः ।

कियन्तं कालं भिन्न आस्ते ? तामेव रात्रिं

न विवसत्यसौ ॥ १०० ॥

अपर्युषित एव हि सङ्घभेदे सङ्घोऽवश्यं प्रतिसन्धीयते ॥ १०० ॥

योऽयं सङ्घभेद उक्तः

चक्रभेदः स च मतः,

दृष्टिर्वा चरितमस्येति दृष्टिचरितः । स ह्यूहापोहसामर्थ्यादन्यं शास्तारं मार्गान्तरञ्च ग्राहयितुं समर्थः । न *तृष्णाचरित* इति । संक्लेशव्यवदानपक्षयोरस्थिराशयत्वात् ।

*दुष्प्रसहत्वादि*ति । दुरभिभवत्वात् ।

*प्रत्यक्षधर्मत्वादि*ति । आगमाधिगमधर्मयोः साक्षात्कारित्वादित्यर्थः ।

न क्षान्तिलाभिन इति । न निर्वेधभागीयक्षान्तिलाभिन इत्यर्थः । दृष्टिसत्यकल्पत्वात् ।

"*न विवसत्यसौ*" । न तां रात्रिं परिवसतीत्यर्थः ॥ १०० ॥

---

१. ०न्तरक्-शान्तो—स्फु० मु० पाठ. ।

धर्मचक्रं हि तदा भगवतो भिन्नं भवति; मार्गप्रवृत्तिविष्ठापनात् । अत एव चक्रभेदश्चोच्यते, सङ्घभेदश्च ।

क्व पुनश्चक्रभेदो भवति ?

जम्बूद्वीपे,

नान्येषु द्वीपेषु ।

कतिभिर्भिक्षुभिः ?

नवादिभिः ।

नवादिं कृत्वा । परेणानियमः । अष्टौ भिक्षवः संघो भवति । नवमो भेत्ता । अवश्यं हि संघेन द्वयोः पक्षयोः स्थातव्यम् । एवं भिन्नो भवति ।

अन्यस्तु संघभेदः कर्मभेदाद् भवति । यद्येकसीमायां व्यग्राः कर्माणि[1] कुर्वन्ति । स चैष —

कर्मभेदस्त्रिषु द्वीपेषु,

येष्वेव शासनम् ।

कतिभिर्भिक्षुभिः ?

अष्टाभिरधिकैश्च सः ॥ १०१ ॥

चक्रभेदस्तु षट्सु कालेषु न भवति ॥ १०१ ॥

भिन्नं भवतीति । कथं भिन्नम् ? इत्याह—*मार्गप्रवृत्तिविष्ठापनादिति* । मार्गप्रवृत्तिविबन्धनादित्यर्थः । यावद्धि सङ्घो न प्रतिसन्धीयते, तावन्मार्गप्रवृत्तिर्विष्ठिता भवति । न कस्यचित् सन्ताने मार्गः सम्मुखीभवतीत्यर्थः ।

चक्रभेदनिमित्तत्वात् *सङ्घभेदश्चक्रभेद* इत्युच्यते ।

अवश्यं हि सङ्घेन द्वयोः पक्षयोः स्थातव्यमिति । बुद्धपक्षे भेत्तृपक्षे च *स्थातव्य*मित्यर्थः । संघो हि चत्वारो भिक्षवः । संघद्वयेन च भवितव्यमित्यष्टाभिर्भिक्षुभिर्भवितव्यम्, नवमेन च भेत्रा ।

अन्यस्तु सङ्घभेद इति । चक्रभेदादन्यः । नात्रानन्तर्यमित्यभिप्रायः । यस्मादसौ *कर्मभेदाद् भवति* । *व्यग्रा* इति । नानामतयः । *कर्माणि* । पोषधादीनि सङ्घकर्माणि ।

"*अष्टाभिरधिकैश्च सः*" इति । सङ्घद्वयेनात्रापि भवितव्यम् । न भेत्ता शास्तृमानी भवतीत्यष्टाभिरेव भिक्षुभिर्भवितव्यम्, न नवादिभिरिति ॥१०१॥

१. कर्म—का०।

कतमेषु ?

आदावन्तेऽर्बुदात् पूर्वं युगाच्चोपरते मुनौ ।
सीमायां चाप्यबद्धायां चक्रभेदो न जायते ॥ १०२ ॥

आदावचिरप्रवर्तिते धर्मचक्रे ।

अन्ते परिनिर्वाणकाले भगवतः । एतयोर्हि द्वयोरवस्थयोः संघ एकरसो भवति ।

मध्येऽप्यर्बुदात् पूर्वं न भिद्यते, यावच्छासने शीलार्बुदं दृष्टयर्बुदं च नोत्पन्नं भवति ।

युगाच्च पूर्वं न भिद्यते यावच्छ्रावकाग्रयुगं नोत्पन्नं भवति । भिन्नन्याय-परिवासात् तेन च प्रतिसन्धानीयत्वात् ।

उपरते मुनौ, शास्तरि परिनिर्वृते प्रतिद्वन्द्वाभावात् ।

सीमायामबद्धायाम्, यावत् सीमा न बद्धा भवति । एकसीमायां हि

---

*एकरसो भवती*ति । अव्यग्र एकमतिर्भवतीत्यर्थः । पूर्वस्यामवस्थायां प्रीति-प्रामोद्यजातः, पश्चिमायामतीव मनसि उद्विग्नसञ्जातसंवेगः ।

*अर्बुदात् पूर्वमि*ति । दोषः = *अर्बुदम्, दृष्टयर्बुदं शीलार्बुदं वा ।* अत्र दृष्टयर्बुदं यथोक्तम्—"यथाहं भगवतो भाषितस्यार्थमाजानामि । य इमे भगवताऽऽन्तरायिका धर्मा आख्याताः ते प्रतिषेव्यमाणा नालमन्तराय" इति । तथा "तदेव चित्तं सन्धावति संसरति" (   ) इत्यादि । *शीलार्बुदम् ।* दौःशील्यम् ।

*तेन च प्रतिसन्धानीयत्वादि*ति । तेन च श्रावकयुगेन यस्मात् प्रतिसन्धानीय इत्यर्थः । अवश्यं च सर्वेषां बुद्धानां श्रावकयुगं भवति । एकः प्रज्ञावतामग्रः, द्वितीय ऋद्धिमताम् । इह शाक्यमुनेरार्यशारद्वतीपुत्रः प्रज्ञावतामग्रः । आर्यो *महामौद्गल्यायन* ऋद्धिमताम् ।

*प्रतिद्वन्द्वाभावादि*ति । यस्मात् परिनिर्वृते भगवति तस्य भेत्तुः प्रतिद्वन्द्व-भूतो नास्ति ।

*सीमायामबद्धायामि*ति । मण्डलसीमायाम् । एकस्यां हि सीमायां पृथक्कर्म-करणात् सङ्घद्वैधं भवति । ननु च प्रकृतिसीमास्ति ग्रामनगरादि ? सत्यमस्ति; असिसीमायां सत्यां सा प्रकृतिसीमा व्यवस्थाप्यत इति । तस्या अपि बन्धो

पञ्चद्वयावस्थानात् संघभेद इति । एषु कालेषु चक्रभेदो न भवति । न च पुनः सर्वेषां बुद्धानां चक्रभेदः; कर्माधीनत्वात् ॥ १०२ ॥

कस्मात् मातृवधादिष्वानन्तर्यम् , नान्यत्र ?

उपकारिगुणक्षेत्रनिराकृतिविपादनात् ।

मातापितृवधे तावदुपकारिणो निराकरणात् । कथं तावुपकारिणौ ? आत्मभावस्य तत्प्रभवत्वात् । किं तयोर्निराकरणम् ? परित्यागः । गुणक्षेत्रत्वादर्हद्वधाद् आनन्तर्यम् ।

यदि पुनर्मातुर्व्यञ्जनं परिवृत्तं स्यात्, पितुर्वा, तत्रैकस्मिन्नाम्नायो

व्यञ्जनान्तरितोऽपि स्यात्,

अत एवोच्यते—"स्यात् पुरुषं जीविताद् व्यपरोपयेन्न पितरम्, नार्हन्तम् । आनन्तर्यावद्येन च स्पृश्येत । स्यान्मातुर्व्यञ्जनं परिवृत्तं स्यादिति । स्यात् स्त्रीं जीविताद् व्यपरोपयेन्न मातरम्, नार्हन्तीम्, आनन्तर्यावद्येन च स्पृश्येत । स्यात् पितुर्व्यञ्जनं परिवृत्तं स्यात्" ( ) इति ।

अन्यस्याः स्त्रियाः कललं प्रसूतमन्यया योन्या पीतम् । कतरा तस्य माता

व्यवस्थाप्यत एवेति वेदितव्यम् । *कर्माधीनत्वादिति* । येन शिष्यसङ्घभेद-संवर्तनीयं कर्म कृतं भवति, तस्यैव तद्भेदो भवति, नान्यस्य । *शाक्यमुनिना* च किल बोधिसत्त्वावस्थायां पञ्चाभिज्ञस्य ऋषेः पर्षद्भेदः कृत आसीत् । येनास्य देवदत्तेन सङ्घो भिन्न इति ॥ १०२ ॥

गुणक्षेत्रत्वादिति । गुणानामाश्रयत्वादित्यर्थः । अथवा–गुणैः क्षेत्रं गुणक्षेत्रम् । गुणयोगाद्धि तत् पुण्यस्य क्षेत्रं भवति । यथा क्षेत्रे बीजमुप्तं महाफलं भवति, एवं पुण्यबीजमत्रोप्तं महाफलं भवति । *नान्यत्रेति* । न सामान्यस्त्रीवधादिषु ।

उपकारि-गुणक्षेत्रनिराकृति-विपादनाद्" इति । उपकारिक्षेत्रस्य, गुणक्षेत्रस्य वा निराकृतेः परित्यागात् मातृपितृवधादिष्वानन्तर्यम् । तस्य विपादनाच्च विकोपादानन्तर्यम् । तथागतशरीरे दुष्टचित्तरुधिरोत्पादनम् । संघस्यापि यद् भेदनं तदपि तद्विपादनम् । तदेतदुक्तं भवति—उपकारिक्षेत्रत्वात् गुणक्षेत्रत्वाच्च । तन्निराकरणविपादानान् मातृवधादिष्वेवानन्तर्यम्, नान्यत्रेति ।

यदि पुन*र्मातुर्व्यञ्जनपरिवृत्तं स्यात्, पितुर्वेति* । व्यञ्जनपरावृत्त्या तन्मातृत्वं तत्पितृत्वं वा विनष्टमिति ।

यां व्रतः स्यादानन्तर्यम् ?

माता यच्छोणितोद्भवः ॥ १०३ ॥

यस्याः शोणितादसावुद्भूतः सत्त्वः, सास्य माता । द्वितीया तु सर्वकृत्येष्ववलोक्या । सा ह्याप्यायिका[1], पोषिका, संवर्धिका च ।

यदि मातरि प्रयोगं कृत्वाऽन्यां मारयेत्, न स्यादानन्तर्यम् । अमातृप्रयोगेण मारयेत्, तथापि न स्यात् । मञ्चतलावलीनमातृमारणं चात्रोदाहार्यम्, धावकस्य च पुत्रेण मशकप्रयोगेण पितुर्मारणं च ।

एकेन प्रहारेण मातरमन्यां च मारयतो द्वे अविज्ञप्ती भवतः । विज्ञप्तिस्त्वानन्तर्यमेव; तस्य कर्मणो बलीयस्त्वात् ।

परमाणुसञ्चितत्वाद् विज्ञप्तिरपि द्विधेति भदन्तघोषकः । अनर्हत्संज्ञयाऽपि अर्हद्घाते भवत्यानन्तर्यम्, 'अहम् हन्मि' इत्याश्रयावधारणात् । यः पितरमर्हन्तं हिंस्यात्, तस्याप्येकमेव स्यादानन्तर्यम्; आश्रयैकत्वात् ।

इदमवदानं कथं नीयते—"गच्छ शिखण्डिनं ब्रूहि, द्वे आनन्तर्ये भवता कृते—यच्च पिता जीविताद् व्यपरोपितः, यच्चार्हन्" (   ) इति ।

मातुर्मरणाभावात् पितुर्मारणाभावाद्वा न स्यादानन्तर्यमिति, तदभावाशङ्कया पृच्छति । *"यच्छोणितोद्भवः"* इति । यस्याः शोणिताद्दुद्भवोऽस्येति यच्छोणितोद्भवः । *सर्वकृत्येष्ववलोक्येति* । सर्वमातृयोग्येषु कार्येषु द्रष्टव्येत्यभिप्रायः; मातृकल्पत्वात् । *आपायिका* कटाहारिका । *पोषिका* स्तन्यदायिका । *संवर्द्धिका* औदारिकाहारादिकल्पिका । अपरे व्याचक्षते—*आप्यायिका* स्तन्यधातृकेति योऽर्थः । *पोषिका* औदारिकाहाराभ्यासतः । *संवर्द्धिका* स्नानोद्वर्तविषमपरिहारत इति ।

मञ्चतलावलीनेति । मञ्चोपरि प्रावरणकल्पनेन पुरुषोऽत्र सुप्त इति मन्यमानेन पुत्रेण तत्र शस्त्रप्रहारेण *मञ्चतलावलीना माता मारितेत्युदाहार्यम्* । *धावकस्य* च राजकस्य पुत्रेण 'मशकं मारयामि' इति *मशकप्रयोगेण पितुर्मारणमिति* । *द्वे अविज्ञप्ती* । आनन्तर्याविज्ञप्तिः, केवलप्राणातिपाताविज्ञप्तिश्च । *विज्ञप्तिस्त्वानन्तर्यमेव* । तत्संगृहीतैव, सा नान्येत्यर्थः । *तस्याप्येकमेवेति* । अर्हद्वधाख्यम् ।

गच्छ शिखण्डिनं ब्रूहीति । रौरुके नगरे उद्रायणो नाम राजा शिखण्डिनं नाम पुत्रमभिषिच्य प्रव्रजितः । प्रव्रज्य अर्हत्त्वमधिगतवान् । स रौरुकाभ्यासमा-

---

[1] ह्यापायिका—का०टी०।

द्वाभ्यां कारणाभ्यामिति वक्तव्यम्। द्वाभ्यां वा मुखाभ्यां परिभाषितः ॥ १०३ ॥

किमवश्यं तथागतस्यास्ति कुदुष्टचित्तरुधिरोत्पादनादानन्तर्यम्? यथाभिप्रायस्य स्यात्।

बुद्धे न ताडनेच्छस्य,

यदि ताडनाभिप्राय उत्पादयेत्, न स्यात्।

यद्यनर्हति प्रहरेत्, स च प्रहारादूर्ध्वमर्हन् स्यात्

प्रहारान्नोर्ध्वमर्हति।

'स्यादानन्तर्यम्' इति वर्तते। न हि तेन तत्र प्रयोगः कृतः।

किमानन्तर्ये प्रयोगं कृत्वा तस्मिन्नव्यावर्तिते वैराग्यम्, फलं वा न प्राप्नुयात्?

नानन्तर्यप्रयुक्तस्य वैराग्यफलसम्भवः ॥ १०४ ॥

अन्यकर्मफलपथप्रयोगं तु कृत्वार्यमार्गोत्पत्तौ न पुनः कर्मपथोत्पत्तिः, आश्रयस्यात्यन्तं तद्विरुद्धत्वात् ॥ १०४ ॥

एषामानन्तर्याणां कतमत् महासावद्यम्?

सङ्घभेदे मृषावादो महावद्यतमो मतः।

यः सङ्घभेदनिमित्तं मृषावादो धर्माधर्मज्ञस्य विपर्ययद्योतनात्, स सर्वेषां

गतवान्। पुना राज्यमाकांक्षतीति अमात्यप्रक्रामितेन तेन शिखण्डिना राज्ञा स्वपिता मारितः। तेन तु मार्यमाणावस्थायां स मारको मनुष्य उक्तः—गच्छ शिखण्डिनं ब्रूहीत्येवमादि। *द्वाभ्यां कारणाभ्यामिति वक्तव्यमिति*। 'गच्छ शिखण्डिनं ब्रूहि—द्वाभ्यामानन्तर्यकारणाभ्यां भवता कृतमानन्तर्यम्' इति तेन वक्तव्यम्। *द्वाभ्यां वा मुखाभ्यां परिभाषित* इति। मुखद्वित्वादानन्तर्यद्वित्वोपचार इत्यभिप्रायः। कारणद्वित्वाद्धि गुरुतरं तदानन्तर्यम् ॥ १०३ ॥

आश्रयस्यात्यन्तं तद्विरुद्धत्वादिति। उत्पन्नार्यमार्गस्य आश्रयस्य तैः कर्मपथैर्विरुद्धत्वात्। एकावदानं चात्रोदाहरणम्—छेकः किल शाक्यमनुष्यो विरूढकभयाद् विषमं वनप्रदेशमाश्रित्य लुब्धकवृत्तिमशिश्रियत्। भगवता च त्रायस्त्रिंशेषु त्रैमास्यं कुर्वता ततोऽवतीर्य छेकाय सपरिजनाय धर्मो देशितः। तेन स्रोतआपत्तिफलमधिगतम्। तत्पुत्रैश्च फलप्राप्तैः पूर्वं प्रतानितानि कूटजालादीनि मृगेभ्यः। तत्प्रयोगेण च मार्यमाणेष्वपि मृगेषु फलप्राप्तया न ते पुनरकुशलैः कर्मपथैः स्पृष्टा इति ॥ १०४ ॥

दुश्चरितानां महावद्यतमः। किं कारणम्? तथागतधर्मशरीरप्रहारितत्वात्, लोकानां च स्वर्गापवर्गमार्गान्तरायकत्वात्। संघे हि भिन्ने लोकस्य नियामावक्रान्तिफलप्राप्तिवैराग्यास्रवक्षयाः प्रतिबध्यन्ते, ध्यानाध्ययनस्वाध्यायचिन्ताकर्माण्यपि न प्रवर्तन्ते, सदेवनागमनुष्यं जगच्चाकुलं विमनस्कं वर्तते, यावत् पुनर्न प्रतिसन्धितो भवति, यस्माच्चावीचौ कल्पं विपाकः।

शेषाणामानन्तर्याणां यथाक्रमं पञ्चमतृतीयप्रथमानि गुरुतराणि, सर्वलघुः पितृवधः।

यत्तर्हि भगवता त्रयाणां दण्डानां मनोदण्डो महासावद्य उक्तः, पुनर्मिथ्यादृष्टिः परमवद्यानामित्युक्तम्, आनन्तर्याणि नियमस्य सङ्घभेदो महासावद्य उक्तः? त्रीणि कर्माणि नियमस्य मनोदण्डः, दृष्टीर्नियमस्य मिथ्यादृष्टिः। अथ वा विपाकविस्तरम्, महाजनव्यापादनम्, कुशलमूलसमुच्छेदं चाधिकृत्य यथाक्रमम्।

सुचरितानां पुनः कतमत् महाफलतमम्?

भवाग्रचेतना लोके महाफलतमा शुभे॥ १०५॥

कुशले पुनः कर्मणि **भवाग्रचेतना** सर्वेषां **महाफलतमा**। तस्या अशीतिकल्पसहस्राण्यतिप्रशान्तो विपाकः। विपाकफलं चाधिकृत्यैतदुक्तम्।

विसंयोगफलं त्वधिकृत्य वज्रोपमसमाधिचेतना सर्वेषां महाफला; सर्वसंयोजनपर्यादानफलत्वात्। अत एव **लोक** इत्युक्तम्।

पञ्चमतृतीयप्रथमानि गुरुतराणीति। इयमानन्तर्यकर्मपथानुपूर्वी—मातृवधः, पितृवधः, अर्हद्वधः, संघभेदः, तथागते दुष्टचित्तरुधिरोत्पादनमिति। पञ्चमं दुष्टचित्तरुधिरोत्पादनम्, तत् सङ्घभेदवर्जेभ्योऽवशिष्टेभ्यश्चतुर्भ्यो गुरुतरम्। तृतीयमर्हद्वधः, तन्मातृपितृवधाभ्यां गुरुतरम्। प्रथमं मातृवधः, तत् पितृवधाद् गुरुतरम्। तेनाह—*सर्वलघुः पितृवध* इति।

नियमस्येति। तदेवावधार्यत्यर्थः। *विपाकविस्तरमधिकृत्य* संघभेदो महासावद्य उक्तः; अन्तरकल्पविपाकदानात्। *महाजनव्यापादनमधिकृत्य* मनोदण्डः; दण्डकारण्यादिशून्यकरणात्। न ह्यन्येन कायकर्मणा वाक्कर्मणा वा तावतो महाजनस्य व्यापादः सम्भवतीति। *कुशलमूलसमुच्छेदमधिकृत्य* मिथ्यादृष्टिर्महासावद्या। न ह्यन्यदकुशलमूलं कुशलमूलानि समुच्छिनत्ति; समुदाचारमात्रविरोधित्वादिति।

किमानन्तर्यैरेवावश्यं नरकेषूपपद्यते ? आनन्तर्यसभागैरप्यवश्यमुपपद्यते । न त्वनन्तरमेवेत्यपरे ॥ १०५ ॥

कतमानि तानि ? इत्याह—

दूषणं मातुरर्हन्त्या नियतिस्थस्य मारणम् ।
बोधिसत्त्वस्य शैक्षस्य सङ्घायद्वारहारिका ॥ १०६ ॥
आनन्तर्यसभागानि पञ्चमं स्तूपभेदनम् ।

एतानि पञ्च पञ्चानामानन्तर्याणां यथाक्रमं सभागानि—१. यदि मातरमर्हन्तीं दूषयत्यब्रह्मचर्यकरणात्, २. नियतिपतितं बोधिसत्त्वं मारयति, ३. शैक्षं मारयति, ४. संघस्य सुखायद्वारिकं हरति, ५. स्तूपभेदं करोति ।

अन्यदपि तु कर्म सविपाकं त्रिषु कालेष्वत्यर्थं विघ्नयति ॥

कतमेषु त्रिषु ?

क्षान्त्यनागामितार्हत्त्वप्राप्तौ कर्मातिविघ्नकृत् ॥ १०७ ॥

मूर्धभ्यः क्षान्तिमाकिरत आपायिकानि कर्माणि विघ्नायोपतिष्ठन्ते; तद्विपाकभूम्यतिक्रमात् । यथा पुरुषस्य देशत्यागं कुर्वतो धनिका उत्तिष्ठन्ते[1] ।

न त्वनन्तरमेवेति । नरकेऽवश्यमुत्पत्त्या तानि तत्सादृश्यात् सभागान्युच्यन्ते, न तु तत्रानन्तरोत्पत्त्या । अन्यथा ह्यानन्तर्याण्येव स्युरित्यपरेषामभिप्रायः । अनन्तरभावित्वेऽपि न तान्यानन्तर्याण्येव सम्भवन्ति; अतुल्यकालविपाकत्वादिति प्रथमपाक्षिकाणां परिहारः ॥ १०५ ॥

"दूषणं मातुरर्हन्त्याः" । मातृवधानन्तर्यसभागम् ॥ १०६ ॥

नियतिपतितबोधिसत्त्वमारणं पितृवधानन्तर्यसभागम् । *शैक्षमारणम*र्हद्वधानन्तर्यसभागम् । *सङ्घायद्वारहारिका* सङ्घभेदानन्तर्यसभागम् । *स्तूपभेदनं* तथागतदुष्टचित्तरुधिरोत्पादनानन्तर्यसभागम् ।

सङ्घायद्वारहारिका पुनरक्षयनीव्यपहार इत्याचार्यवसुमित्रः । एवं तु व्याचक्षते—सुखायद्वारहारिकेति । यत् सुखोपयोगिकं येन सङ्घो जीविका कल्पयति तस्यापहार इति ।

तद्विपाकभूम्यतिक्रमादिति । क्षान्तिलाभ्यनपायग इत्यपायभूम्यतिक्रमात् ।

---

१. उपतिष्ठन्ते—का० ।

अनागामिफलं प्राप्नुवतः कामावचराणि विप्रायोपतिष्ठन्ते, तथैव स्थापयित्वा दृष्टधर्मवेदनीयं कर्म ।

अर्हत्त्वं प्राप्नुवतो रूपारूप्यावचराणि तथैव ॥ १०६–१०७ ॥

यदुक्तम्—"बोधिसत्त्वस्य मारणम्" इति,

बोधिसत्त्वः कुतो यावत्,

कुत उपादाय **बोधिसत्त्वो** वक्तव्यः ?

यतो लक्षणकर्मकृत् ।

यतः प्रभृति **लक्षण**विपाकानि **कर्माण्यारभते कर्तुम्**, स हि तदानीं नियतिपतितो भवति । कथं कृत्वा ? स हि तस्मात् कालात् प्रभृति नित्यं भवति ।

सुगतिः कुलजोऽव्यक्षः पुमान् जातिस्मरोऽनिवृत् ॥ १०८ ॥

प्रशस्ता गतिरस्येति **सुगतिः**; देवमनुष्योपपत्तेः ।

तस्यां च सुगतौ क्षत्रिय-ब्राह्मण-गृहपतिमहाशाल**कुलजो** भवति, नान्यः कुलीनः ।

विकलान्यक्षाण्यस्येति व्यक्षः, न व्यक्षोऽ**व्यक्षः** । अविकलेन्द्रियः इत्यर्थः । पुरुष एव न स्त्री, कुत एव षण्ढादिः । **जातिस्मरश्च** भवति ।

सर्वस्यां जातौ निवर्तत इति निवृत्, न निवृद**निवृत्** । अनिवर्तक इत्यर्थः । सत्त्वहितार्थं सर्वदुःखप्रकारैः सर्वसत्त्वविप्रतिपत्तिभिश्चाखेदितत्वात् । यत्तल्लोक उच्यते—'आपणक्रीतो दासः' इति । बोधिसत्त्वास्ते ते हि महात्मनः सर्वसम्पत्प्रकर्षविशेषप्राप्ता अपि सन्तो निष्कारणकरुणापारतन्त्र्यात् सर्वसत्त्वेषु चण्डालकुमारकसदृशमात्मानं निर्मानतया व्यवस्थाप्य सत्त्वेभ्यः सर्वकदर्थनानां[1] सोढारो भवन्ति, सर्वश्रमयन्त्रणानां चोद्वोढारः । यच्चैतल्लक्षणविपाकं कर्मेत्युक्तम् ॥ १०८ ॥

तथैवेति । तद्विपाकभूम्यतिक्रमात् । यथा पुरुषस्य देशत्यागं कुर्वतो धनिका उत्तिष्ठन्ते, तथैवेत्यर्थः ॥ १०७ ॥

महाशालकुलज इति । महाप्राकारकुलज इत्यर्थः । क्षत्रियमहाशालकुलजो यावद् गृहपतिमहाशालकुलज इति । महागृहपतिकुलज इत्यर्थः । *कदर्थना* । महापरिभवपूर्विका विहेठना । ययोः कायवाचोः प्रवृत्त्या परस्य दुःखदौर्मनस्ये

---

१. सर्वकदर्थनां—का० ।

जम्बूद्वीपे पुमानेव सम्मुखं बुद्धचेतनः ।
चिन्तामयं कल्पशते शेष आक्षिपते हि तत् ॥ १०९ ॥

जम्बूद्वीप एव बोधिसत्त्वो लक्षणविपाकं कर्माक्षिपति, नान्यत्र; जाम्बूद्वीपकानां तीक्ष्णबुद्धित्वात् ।

पुरुष एव, न स्त्री ।

सम्मुखीभूत एव शास्तरि, बुद्धालम्बनयैव **चेतनया** ।

चिन्तामयं तत्कर्म; न श्रुतमयम्, न भावनामयम् ।

कल्पशते च शेष आक्षिपति न बहुभवेषु । भगवता तु शाक्यमुनिनोत्तप्तवीर्यतया नव कल्पा अपावर्तिता एकनवत्या कल्पैराक्षिप्तम् ।

अत एव चोक्तम्—"इतोऽहं ग्रामणि[1] एकनवतं[1] कल्पमुपादाय न समनुस्मरामि नाभिजानामि यदेककुलमपि पक्षभिक्षाप्रदानहेतोः क्षतं वा स्यादुपहतं वा" ( ) इति ।

ततः प्रभृति प्रकृतिजातिस्मरत्वात् प्रथमकल्पासंख्येयनिर्यात एव बोधिसत्त्व एतांश्चतुरो दोषान् व्यावर्तयति, द्वौ च गुणौ प्रतिलभत इति **पूर्वाचार्याः** ॥१०९॥

तेषां च लक्षणानाम्

एकैकं पुण्यशतजम्,

किं पुण्यस्य परिमाणम् ?

भवतः, तदपेक्षया तन्निग्रहो *यन्त्रणेत्युच्यते* ॥ १०८ ॥

एकनवतं कल्पमुपादायेति । एकनवतेः पूरणः कल्प एकनवतः, तदुपादाय । असिबद्धकेन ग्रामण्या निर्ग्रन्थश्रावकेण भगवानुक्तः—"किमनर्थायासि भो गौतम कुलानां प्रतिपन्नो यस्त्वमीदृशे दुर्भिक्ष इयता भिक्षुसंघेन सार्द्धमशनिवदुत्सादयन् भिक्षामटसि" इति । स भगवताभिहितः—"इतोऽहं ग्रामणि *एकनवतं कल्पमुपादाय*" ( ) इति विस्तरः ।

एतांश्चतुरो दोषान् व्यावर्तयतीति । दुर्गतिदोषम्, अकुलीनतादोषम्, विकलेन्द्रियतादोषम्, स्त्रीभावदोषं चेति । *द्वौ च गुणौ प्रतिलभते* । जातिस्मरतागुणम्, अनिवर्तकतागुणं चेति ॥ १०९ ॥

१–१. ग्रामणीरेक०—का० ।

सन्निकृष्टं बोधिसत्त्वं स्थापयित्वा यावत् सर्वसत्त्वानां भोगफलमित्येके ।

यावत् सर्वसत्त्वानां कर्माधिपत्येन त्रिसाहस्रमहासाहस्रको लोको निवर्तत[1] इत्यपरे ।

बुद्धा एव च तत्परिमाणज्ञा इत्यपरे ।

अन्य बोधिसत्त्वभूतो भगवान् कियतो बुद्धान् पर्युपासयामास ? प्रथमे कल्पासंख्येये पञ्चसप्ततिसहस्राणि, द्वितीये षट्सप्ततिम्, तृतीये सप्तसप्ततिम् ।

अथ कस्य कल्पासंख्येयस्यान्ते कतमो बुद्ध आसीत् ? प्रतिलोमानुक्रमेण यथाक्रमम्—

सन्निकृष्टं बोधिसत्त्वं स्थापयित्वेति । यो लक्षणविपाककर्मकारी । *त्रिसाहस्रमहासाहस्रको निवर्तत* इति । येन सर्वसत्त्वकर्माधिपत्येन त्रिसाहस्रमहासाहस्रप्रादुर्भाव., तस्य तत् परिमाणमिति । उक्तं पुण्यस्य परिमाणम् ।

तेषामेवं कृतपरिमाणानां शतेनैकं महापुरुषलक्षणं निर्वर्तते । एवं यावद् द्वात्रिंशत्तममपीति । केचित् तं व्याचक्षते—बुद्धालम्बनमनस्कारसम्मुखीभावात् पञ्चाशच्चेतना भवन्ति । 'अहमपीत्थं स्याम्' इत्यपराः पञ्चाशदित्येवं पुण्यशतं भवतीति ।

अपरे वर्णयन्ति—कामधातुर्विंशतिस्थानानि, रूपधातुः षोडश, आरूप्याश्चत्वारः, अष्टौ च शीतनरका इत्यष्टचत्वारिंशद्विकल्पं त्रैधातुकं भवति । तदालम्बनमस्य बोधिसत्त्वस्य करुणाचित्तमुत्पद्यते । ततस्तत्सम्प्रयुक्ताश्चेतना अष्टचत्वारिंशद् भवन्ति । अतोऽनन्तरं बुद्धालम्बनचेतनोत्पद्यते । यथानेनास्मात् त्रैधातुकात् सत्त्वा मोचिता इत्येका चेतना । अतोऽनन्तरं द्वितीया चेतनोत्पद्यते । 'अहमप्येवं मोचयेयम्' इत्यात्मालम्बनेति पञ्चाशच्चेतना भवन्ति । तासां पुनर्द्विःसम्मुखीभावाच्चेतनाशतं भवतीति ।

अन्य आहुः—प्राणातिपातविरतिर्बुद्धस्य भगवतः पञ्चभिः कारणैरुपेता भवति । पञ्च कारणानि—मौलकर्मपथपरिशुद्धिः, सामन्तकपरिशुद्धिः, वितर्कानुपघातः, स्मृत्यनुपरिगृहीतत्वम्, निर्वाणपरिणामितत्वं चेति । तदालम्बना अपि चेतनाः पञ्च भवन्ति । एवं दश कर्मपथालम्बना दश पञ्चकाश्चेतनानां पञ्चाशच्चेतना भवन्ति । तासां द्विःसम्मुखीभावाच्चेतनाशतं भवतीत्येतत् पुण्यशतम् । 'यथा अयमसाधारणदशकुशलकर्मपथनिर्जातो भगवान्, एवमहमपि स्याम्' इति कृत्वा । तदेवं सत्येकैकं पुण्यशतजमित्येतत् सिध्यति ।

पर्युपासयामासेति । लिट्याम्-प्रत्ययान्तस्यासेरेतद्रूपम् । पर्युपासितवा-

---

१. ०ऽभिनिवर्तत—का० ।

असंख्येयत्रयान्त्यजाः[1] ।

विपश्यी दीपकृद् रत्नशिखी,

रत्नशिखिनि सम्यक्सम्बुद्धे प्रथमोऽसङ्ख्येयः समाप्तः । दीपङ्करे भगवति द्वितीयः । विपश्यिनि तथागते तृतीयः ।

सर्वेषां तु तेषां—

शाक्यमुनिः पुरा ॥ ११० ॥

शाक्यमुनिर्नाम सम्यक्सम्बुद्धः पूर्वं बभूव । यत्र भगवता बोधिसत्त्वभूतेन आद्यं प्रणिधानं कृतम्—'एवम्प्रकार एवाहं बुद्धो भवेयम्' इति, नोऽप्येवं कलियुग एवोत्पन्नवानार्यवत्, तस्याप्येवं वर्षसहस्रान्तं शासनं बभूव ॥ ११० ॥

अथ कस्यामवस्थायां बोधिसत्त्वः कां पारमितां परिपूरयते ?

सर्वत्र सर्वं ददतः कारुण्याद् दानपूरणम् ।

यदा सर्वस्मै सर्वं ददाति आ अक्ष्णः, आ मज्जायाः, **कारुण्यात्** नाभ्युदयविशेषं लिप्समानः—इयता **दानपारमिता** परिपूर्णा भवति ।

अङ्गच्छेदेऽप्यकोपात्तु रागिणः क्षान्तिशीलयोः ॥ १११ ॥

यदायमवीतरागोऽपि च्छिद्यमानेष्वङ्गेषु नाल्पमपि कुप्यति, तदा अस्य **क्षान्तिशीलपारमिते** परिपूर्णे भवतः ॥ १११ ॥

तिष्यस्तोत्रेण वीर्यस्य,

तिष्यं तथागतरत्नगुहायां तेजोधातुसमापन्नदृष्ट्वा भगवान् बोधिसत्त्वभूत एकेन पादेन स्थित्वा सप्त दिवसान् स्तुतवानेकगाथया—

"न दिवि भुवि वा नास्मिन् लोके न वैश्रवणालये ।

नित्यर्थः । *यत्र भगवतेति* विस्तरः । प्रभासनाम्ना कुम्भकारकुमारभूतेनासुखोदरकाभ्यङ्गपरिचर्याभिरुपस्थानं कृत्वाद्यं प्राणिधानं कृतम् ॥ ११० ॥

तदास्य क्षान्तिशीलपारमिते परिपूर्णे इति । चेतसा तावदकोपतः क्षान्तिपारमितापरिपूरिः, कायवाग्भ्यां दुश्चरिताकरणाच्छीलपारमितापरिपूरिरिति ॥

न दिवि भुवि वेति विस्तरः । दिवि भुवि वेति उद्देशपदन्यायेनोक्तम् ।

---

१. ०न्तजाः—स्फु० मुद्रितः पाठः ।

न मरुभवने दिव्यस्थाने[1] न दिक्षु विदिक्षु च[2] ॥
चरतु वसुधां स्फीतां कृत्स्नां सपर्वतकाननाम् ।
पुरुषवृषभस्त्वत्तुल्योऽन्यो महाश्रमणः कुतः" ॥ ( ) इति ।

तदा किल **वीर्यपारमिता** परिपूर्णा, नव च कल्पाः प्रत्युदावर्तिताः ।

धीसमाध्योरनन्तरम् ।

बोधेः पूर्वसमनन्तरं **ध्यानप्रज्ञापारमितयोः** परिपूरिः । वज्रोपमसमाधौ स्वस्याः सम्पदः पारगमनात् पारमिताः ।

सूत्र उक्तम्—"त्रीणि पुण्यक्रियावस्तूनि । दानमयं पुण्यक्रियावस्तु, शीलमयम्, भावनामयम्" ( ) इति । कथमेतत् त्रयं पुण्यक्रियावस्तु ?

पुण्यं क्रियाऽथ तद्वस्तु त्रयं कर्मपथा यथा ॥ ११२ ॥

पुण्यमप्येतत् त्रयं **क्रिया**पि, **वस्त्व**पि, यथायोगमिति पुण्यक्रियावस्तु । तद्यथा—कर्म च ते पन्थानश्च पन्थान एव च कर्मण इति **कर्मपथा** उक्ताः ।

नास्मिँल्लोके न वैश्रवणालये न मरुभवने दिव्यस्थान इति । तद्वाक्यस्यर्थनिर्देशपदानि । *अस्मिन् लोक* इति । मनुष्यलोके । *वैश्रवणालय* इति । चातुर्महाराजिकस्थाने । *मरुभवन* इति । मरूद्भवे । त्रायस्त्रिंशभवन इत्यर्थः । *दिव्यस्थाने* । यामादिस्थाने । लोकधात्वन्तरेष्वपि तत्सदृशस्याभावज्ञापनार्थमाह—*न दिक्षु विदिक्षु* चेति ।

अथ न श्रद्धीयते, चरतु नरः कश्चिद् *वसुधामिमां कृत्स्नां स्फीतां* बहुसत्त्वाध्यासितां सह पर्वतैः काननैश्च । सपर्वतकाननां स्वयं प्रत्यवेक्षताम् इत्यभिप्रायः ।

नव च कल्पाः प्रत्युदावर्तिता इति । तेन वीर्यारम्भेणैकनवत्या कल्पैः *परिपूर्णा वीर्यपारमिते*ति कृत्वा । अत एवोक्तम्—एकनवत्यां कल्पेष्वाक्षिप्तमिति ।

*बोधेः पूर्वसमनन्तरमि*ति । क्षयानुत्पादज्ञानलक्षणाया बोधेः पूर्वसमनन्तरम् । किं कारणम् ? परिपूर्णपारमितो हि बोधिमधिगच्छति, नापरिपूर्णपारमित इति ।

*यथायोगमि*ति । किञ्चित् पुण्यञ्च क्रिया च वस्तु च, किञ्चित् पुण्यं च क्रिया च, किञ्चित् पुण्यमेव क्रिया च, किञ्चित् पुण्यं च वस्तु च, किञ्चिद्वस्त्वेवेति । कथम् ? इत्याह—*तद्यथे*ति विस्तरः । *कर्म च ते पन्थानश्च* । प्राणातिपातादयः

---

१. दिव्ये स्थाने—का० । २. वा—का० ।

तत्र दानमये तावत् पुण्यक्रियावस्तुनि कायवाक्कर्म त्रिधा भवति—तत्-समुत्थापिका चेतना, पुण्यं च, क्रिया च । तत्सहभुवो धर्माः पुण्यमेव ।

शीलमयं तु—कायवाक्कर्मैवेति त्रिधा भवति ।

भावनामयम्—मैत्री, पुण्यं च, पुण्यक्रियायाश्च वस्तु । तत्सम्प्रयुक्तायाश्चेतनाया मैत्रीमुखेनाभिसंस्करणात् तत्सहभूश्चेतना, शीलं च, पुण्यं च, क्रिया च । अन्ये तत्सहभुवः पुण्यमेव, पुण्यस्य वा कारणं पुण्यक्रिया पुण्यप्रयोगस्तस्या एतानि त्रीणि वस्तूनि । एषां सम्पादनार्थं पुण्यप्रयोगारम्भादिति ।

कुशलचेतनापरमार्थेन पुण्यक्रिया । तस्या एतानि वस्तूनीत्यपरे ॥११२॥

किमिदं दानं नाम ? यदपि दीयते तद् दानम् । इह तु

दीयते येन तद्दानम्,

सप्त कर्मपथाः, कर्मस्वाभाव्यात् चेतनापथत्वाच्च । त्रयस्त्वभिध्यादयः *पन्थान एव* कर्मणश्चेतनाख्यस्येति कर्मपथाः ।

कायवाक्कर्म त्रिविधेति । पुण्यं तावदिष्टविपाकत्वात् । क्रिया कर्मस्वभावत्वात् । वस्तु तत्समुत्थानचेतनायास्तदधिष्ठाय प्रवृत्तेः । *तत्समुत्थापिका चेतना* कायवाक्कर्मसमुत्थापिका । *पुण्य*मिष्टविपाकत्वात् । *क्रिया* मनस्कर्मत्वात् न वस्तु, क्रियानधिष्ठानत्वात् । *तत्सहभुवो* वेदनादयः । इष्टविपाकत्वात् *पुण्यमेव*, न तु क्रियाधिष्ठानं वा; तल्लक्षणाभावात् ।

शीलमयमिति । पूर्ववत् त्रैधं योज्यम् ।

मैत्री पुण्यमिति पूर्ववद् योज्यम् । *पुण्यक्रियायाश्च वस्तु* । *तत्सम्प्रयुक्ताया* मैत्रीसम्प्रयुक्तायाश्चे*तनाया मैत्रीमुखेन* मैत्रीवशेना*भिसंस्करणाद्* अभिसञ्चेतनात् *तत्सहभूः* मैत्रीसहभूश्चे*तना शील*ञ्च ध्यानसंवरसंगृहीतम्, *पुण्यं च क्रिया च पूर्ववत्* । 'न हि ध्यानसंवरं प्रवर्तयेयम्' इत्यधिष्ठाय चेतना प्रवर्तते । तेन न क्रियाधिष्ठानम् । *अन्ये तत्सहभुवो* वेदनादयः *पुण्यमेव* पूर्ववत् । तदेवम् दानमये—पुण्यं च क्रिया च वस्तु च, पुण्यं क्रिया च, पुण्यं च, पुण्यक्रियावस्तु । शीलमये—पुण्यं च क्रिया च क्रियावस्तु च पुण्यक्रियावस्तु । भावनामये—पुण्यक्रियावस्तु च, पुण्यं क्रिया च, पुण्यं चेति पुण्यक्रियावस्तु । अवयवसरूपाणामप्येकशेष इष्यते; "गुणो यङ्लुकोः" (पा० सू० ७.४.८२) इति यथा ॥ ११२ ॥

यदपि दीयते तद्दानमिति । देयं वस्तु, कर्मणि ल्युडिति कृत्वा । *"दीयते येन तद्दानम्"* इति । इह तु कुशलमिष्टं *दानमिति* । देयस्य हि वस्त्रादेरव्याकृतत्वम् ।

भवति स्म । रागादिभिरपि दीयते, न चात्र तदिष्टम्, अतो विशेषणार्थमाह—

पूजानुग्रहकामया[1] ।

परेषां पूजानुग्रहकामताभ्यां येन दीयते । किं पुनस्तत्स्याद्येन दीयते ?

कायवाक्कर्म सोत्थानम्,

किं पुनस्तदुत्थानम् ? येन कलापेन तदुत्थाप्यते । आह चात्र—

"शुभेन मनसा द्रव्यं स्वं ददाति यदा पुमान् ।
तत् क्षणं कुशलाः स्कन्धाः दानमित्यभिधीयते ॥" ( ) इति ।

महाभोग्यफलं च तत् ॥ ११३ ॥

तच्चैतद् दानमयं पुण्यक्रियावस्तु **महाभोग्यफलम्** । स्वभावे चैष मयड् वेदितव्यः । तद्यथा—तृणमयं गृहम्, पर्णमयं भाजनमिति ॥ ११३ ॥

तत् खल्वेतद् दानम्—

स्वपरार्थोभयार्थाय नोभयार्थाय दीयते ।

तत्र यदवीतरागः आर्यः पृथग्जनो वा वीतरागश्चैत्ये दानं ददाति, तदस्यात्मन एवार्थाय; परेषां तेनानुग्रहाभावात् ।

यदार्यो वीतरागः परसत्त्वेभ्यो दानं ददाति स्थापयित्वा दृष्टधर्मवेदनीयं तत्र दानं परेषामर्थाय; तेन तेषामनुग्रहात् । नात्मनोऽर्थाय; तद्विपाकभूमेरत्यन्तसमतिक्रान्तत्वात् ।

रागादिभिरपीति । आदिशब्देन क्रोधेर्ष्यादीनां ग्रहणम् । *पूजानुग्रहकामतयेति* । चैत्यापरिनिर्वृतेभ्यः पूजा । इन्द्रियमहाभूतानुग्रहकामा तया ।

येन कलापेनेति । चित्तचैत्तकलापेन । *कुशलाः स्कन्धा* इति । पञ्च स्कन्धाः । कायवाग्विज्ञप्तिस्तदविज्ञप्तिरपि वा रूपस्कन्धो द्रष्टव्यः ।

स्वभावे चैष मयडिति । न विकारादिषु । *तद् यथा तृणमयं गृहमिति* । न तृणानां विकारोऽस्ति । तैस्तु निर्विकारैरेव तत्कृतमित्यतस्तृणमय तृणस्वभावं तदिति गम्यते । तत्स्वाभाव्येऽपि सति तद्विकारतां परिकल्प्य मयट् क्रियत इत्यभिप्रायः । "तत्प्रकृतिवचने मयट्" (पा० सू० ५.४ २०) इत्यनेन वा लक्षणेन मयड् विधीयते । *एवं पर्णमयं भाजनमित्येतदपि* वक्तव्यम् ॥ ११३ ॥

1. ०काम्यया—का० ।

यत्त्ववीतरागः पृथग्जनो वा वीतरागः परसत्त्वेभ्यो ददाति तद्दानमुभयेषामर्थाय।

यदार्यो वीतरागश्चैत्ये ददाति स्थापयित्वा दृष्टधर्मवेदनीयम्, तद्दानमुभयेषां नार्थाय। तद्धि केवलं गौरवं कृतज्ञाभ्यां दीयते।

सामान्येन दानं महाभोग्यफलमुक्तम्।

तद्विशेषः पुनर्दातृवस्तुक्षेत्रविशेषतः ॥ ११४ ॥

तत्र तावत्—

दाता विशिष्टः श्रद्धाद्यैः,

श्रद्धाशीलश्रुतादिगुणयुक्तो **दाता विशिष्टो** भवति। तद् दानदातृविशेषेण फलदानं प्रति विशिष्यते।

स च तादृशो दाता

सत्कृत्यादि ददाति,

सत्कृत्य स्वहस्तं काले परानुपहत्य ददाति।

अतः।

सत्कारोदाररुचिता कालानाच्छेद्यलाभिता ॥ ११५ ॥

अतोऽस्य दातुस्तत् तादृशं दानं दत्त्वा यथाक्रमं चत्वारो विशेषा भवन्ति— १. सत्कारलाभी भवति। २. उदारेभ्यो[1] भोगेभ्यो[1] रुचिं लभते। ३. काले[2] भोगान् लभते नातिक्रान्तिकालात्[3]। ४. अनाच्छेद्यांश्च भोगान् लभते। नास्य भोगाः परैराच्छाद्यन्ते, नाप्यग्न्यादिभिर्विनाश्यन्ते। उक्तं यथा—दाता विशिष्यते, तद्विशेषाच्च दानविशेषः ॥ ११५ ॥

स्थापयित्वा दृष्टधर्मवेदनीयमिति। तदुभयार्थमिति कृत्वा स्थाप्यते। *तद्विपाकभूमेरत्यन्तसमतिक्रान्तत्वात्।* कामधातोरत्यन्तसमतिक्रान्तत्वादित्यर्थः। कामधातुर्हि दानस्य विपाकभूमिरिति ॥ ११४ ॥

श्रुतादिगुणयुक्त इति। आदि-शब्देन त्यागप्रज्ञाल्पेच्छतादिगुणयुक्तः। "*सत्कृत्यादि ददाति*" इति। सत्कृत्येत्यादिरस्येति सत्कृत्यादि। क्रियाविशेषणमेतत्।

यथाक्रमं चत्वारो विशेषा इति। सत्कृत्य दाता *सत्कारलाभी भवति।* स्वहस्तदाता *उदारेभ्यो भोगेभ्यो रुचिं लभते।* कालदाता *काले भोगान् लभते; नातिक्रान्तकालात्।* यद् भोक्तुमेवासमर्थः। परानुपहत्य दाता *अनाच्छेद्यान्*

१—१. उदारेषु च भोगेषु—का०। २. कालेन च—का०। ३. ०कालेन—का०।

अथ वस्तु कथं विशिष्यते ?

वर्णादिसम्पदा वस्तु

'विशिष्टम्' इति वर्तते । यदि यद्दीयते तद् वर्णगन्धरसस्पर्शानामन्यतमेनापि सम्पन्नं भवति । एवं वस्तु विशिष्यते ।

तादृशं वस्तु दत्त्वा किं भवति ? यथाक्रमम्

सुरूपत्वं यशस्वि वा ।

प्रियता सुकुमारर्तुसुखस्पर्शाङ्गता ततः ॥ ११६ ॥

वर्णसम्पन्नं दत्त्वा **सुरूपो** भवति ।

गन्धसम्पन्नं दत्त्वा **यशस्वी** भवति; गन्धवद् यशसो दिक्षु विधारणात् ।

रससम्पन्नं दत्त्वा **प्रियो** भवति । रस इव स्वादुः ।

स्पर्शसम्पन्नं दत्त्वा **सुकुमाराङ्गश्च** भवति, ऋतुसुखस्पर्शानि चास्याङ्गानि भवन्ति, यथा स्त्रीरत्नस्य ॥ ११६ ॥

अथ क्षेत्रं कथं विशिष्यते ?

गतिदुःखोपकारित्वगुणैः क्षेत्रं विशिष्यते ।

गतिविशेषात् तावद् विशिष्यते । तथा ह्युक्तं **भगवता**—"तिर्यग्योनिगताय दानं दत्त्वा शतगुणो विपाकः प्रतिकाङ्क्षितव्यः । दुःशीलाय मनुष्यभूताय दानं दत्त्वा सहस्रगुणः" (   ) इति ।

दुःखविशेषाद् विशिष्यते । तथा ह्यौपधिकेषु पुण्यक्रियावस्तुषु, ग्लाने दानम्, ग्लानोपस्थापके दानम्, शीतलिकादिषु च दानमुक्त्वोक्तम्—"एभिः सप्तभिः औपधिकैः पुण्यक्रियावस्तुभिः समन्वागतस्य श्राद्धस्य कुलपुत्रस्य वा कुलदुहितुर्वा न लभ्यं पुण्यानां प्रमाणमुद्ग्रहीतुम्" (   ) इति ।

भोगान् लभते ॥ ११५ ॥

*ऋतु-सुख-स्पर्शानि चास्याङ्गानी*ति । शीते उष्णानि, उष्णे शीतानि, साधारणे साधारणानि ॥ ११६ ॥

शीतलिकादिषु चेति । आदि-शब्देन वर्दनिका-वर्षलिकादिषु यथासूत्रमुक्तमेतत् ।

उपकारित्वविशेषाद् यथा—मातापित्रोरन्येषां चोपकारिणाम्; ऋक्षमृग-जातकाद्युदाहरणात्।

गुणविशेषाद् यथा—"शीलवते दत्त्वा शतसहस्रगुणो विपाकः" ( ) इत्येवमादि।

सर्वेषां तु दानानाम्

अग्रं मुक्तस्य मुक्ताय,

"यद्वीतरागो वीतरागाय दत्त्वाऽतिदानम्, इदं श्रेष्ठमामिषदानेषु दानम्" ( ) इत्युक्तं भगवता।

बोधिसत्त्वस्य च,

यद्वा दानं बोधिसत्त्वे ददाति सर्वसत्त्वहितहेतोः, तद्मुक्तस्याप्यमुक्तेऽप्या-दानमग्रम्। तत् स्थापयित्वा यानि भगवतोऽन्यान्यष्टौ दानान्युक्तानि, तेषाम्—

अष्टमम् ॥ ११७ ॥

'अग्रम्' इति वर्तते। कतमान्यष्टौ? १. आसाद्य दानम्, २. भयदानम्, ३. 'अदान्मे दानम्, ४. दास्यति मे दानम्, ५. दत्तपूर्वं मे दानं पितृभिश्च पितामहैश्च' इति दानं ददाति, ६. स्वर्गार्थं दानम्, ७. कीर्त्यर्थं दानम्, ८. चित्तालङ्कारार्थं दानम्, चित्तपरिष्कारार्थम्, योगसम्भारार्थमुत्तमार्थस्य प्राप्तये दानं ददाति।

तत्रासाद्य दानं यत् आसन्नेभ्य उपगतेभ्यो दानं ददातीति पौराणाः।

भयदानं यद् विनाशाभिमुखं दृष्ट्वा वरं ददामीति ददाति।

यथा मातापित्रोरिति। उपकारित्वविशेषात् कारापकारौ महाफलौ तयो-र्भवतः—इत्यर्थोऽवगन्तव्यः। *ऋक्षमृगजातकाद्युदाहरणाद्* विपाक इति। एवम् ऋक्षमृगयोर्गुहां प्रविश्य गात्रोष्मशीतोपनयेनोह्यमाननद्युत्तारणेन चोपकारि-णोरपकारकरणेन सद्योऽङ्गपातात्। *आदि*शब्देन कपिजातकाद्युदाहार्यम्।

शीलवते दत्त्वा शतसहस्रगुणो विपाक इत्येवमादीति। आदिशब्देन स्रोत-आपत्तिफलप्रतिपन्नकाय दत्त्वा अप्रमेयो भवति विपाकः, ततोऽप्रमेयतरः स्रोत-आपन्नायेत्यादि।

तत् स्थापयित्वेति। अनन्तरोक्तं बोधिसत्त्वदानम्। तद्धि सम्यक्सम्बोध्यर्थं

शेषं सुगमत्वान्न विभक्तम् ॥ ११७ ॥

स्रोतआपत्तिफलप्रतिपन्नकाय दानं दत्त्वा अप्रमेयविपाकः, ततोऽप्रमेयतरः स्रोतआपन्नायेति विस्तरेणोक्तं सूत्रे ।

अपि तु—

मातृपितृग्लानधार्मकथिकेभ्योऽन्त्यजन्मने ।
बोधिसत्त्वाय चामेया अनार्येभ्योऽपि दक्षिणा ॥ ११८ ॥

एभ्यः पञ्चभ्यः पृथग्जनभूतेभ्योऽप्यप्रमेया फलतो **दक्षिणा** भवति । तत्रान्त्यजन्मा बोधिसत्त्वश्चरमभविकः ।

धार्मकथिकश्चतुर्विधे क्षेत्रविशेषे कतमस्मिन् पक्षे निक्षेप्तव्यः ? उपकारिपक्षे । स हि महाकल्याणमित्रम् अविद्यान्धायां प्रजायां प्रज्ञाचक्षुषो दाता, समविषमस्य प्रकाशयिता, अनास्रवस्य धर्मकायस्याभिनिवर्तयिता, समासतो **बुद्धकृत्यस्य कर्ता** ॥ ११८ ॥

कर्मणां तु गुरुलघुत्वं ज्ञातुकामेन समासतः षट् कारणानि ज्ञेयानि । तद्यथा—

पृष्ठं क्षेत्रमधिष्ठानं प्रयोगश्चेतनाशयः ।
एषां मृद्वधिमात्रत्वात् कर्ममृद्वधिमात्रता ॥ ११९ ॥

सर्वसत्त्वार्थश्च । शेषं *सुगमत्वान्न विभक्तमिति* । यदेतददान्मे दानमित्येवमादिकम् । *अदान्मे दानमिति* । दत्तमनेन पूर्वमिति दानं तृतीयम् । *दास्यति मे दानमिति* चतुर्थम् । *दत्तपूर्वं मे पितृभिश्च पितामहैश्चेति दानमिति* पञ्चमम् । *स्वर्गार्थं दान* षष्ठम् । *कीर्त्यर्थं* सप्तमम् । *चित्तालङ्कारार्थं यावदुत्तमार्थस्य प्राप्तये दानमित्यष्टमम्* । *चित्तालङ्कारार्थ*मृद्ध्यर्थम् । *चित्तपरिष्कारार्थम्* । अष्टौ चित्तपरिष्कारा मार्गाङ्गानि, तदर्थम् । *योगसम्भारार्थम्* । योगनिदानार्थम् । *उत्तमार्थस्य प्राप्तिः* । अर्हत्त्वं निर्वाणस्य वा प्राप्तिः, तस्यै प्राप्तये *दानम्* । चतुर्भेदमप्येकमष्टमं भवति । निर्वाणप्रापकमेवैतदिति कृत्वा सुगममुक्तमाचार्येण ॥ ११७ ॥

चतुर्विधे क्षेत्रविशेष इति । गतिदुःखोपकारिगुणक्षेत्रे *कतमस्मिन् पक्ष* इति । यस्मादस्य गतिक्षेत्रता च न सम्भवति । तस्मात् पृच्छति । *समविषमस्य प्रकाशयितेति* । धर्माधर्मस्य ॥ ११८ ॥

पृष्ठं नाम यत् कृतस्य पुनरनुक्रिया। **क्षेत्रं** नाम यत्र कारापकाराः क्रियन्ते। **अधिष्ठानं** कर्मपथः। **प्रयोगस्तदर्थं** कायवाक्कर्म। **चेतना** यया कर्मपथं निष्ठापयति। **आशयस्तदभिप्रायः**—'एवं चैवं च कुर्याम्', 'एवं चैवं च न करिष्यामि' इति।

कस्यचित् पृष्ठपरिग्रहेणैव तत्कर्म गुरु सम्पद्यते; विपाकनैयम्यावस्थानात्[1]। कस्यचित् क्षेत्रवशेनैव। तत्रैव क्षेत्रे पुनरधिष्ठानवशात् गुरु सम्पद्यते, नान्यथा। यथा—मातापित्रोः प्राणातिपातात्, न त्वेवमदत्तादानादिकात्।

एवमन्यदपि योज्यम्।

यस्य तु सर्वाण्यधिमात्राणि भवन्ति, तस्यात्यर्थमधिमात्रं गुरु कर्म वेदितव्यम्। यस्य मृदूनि, तस्यात्यर्थं मृदु वेदितव्यम्॥ ११९॥

कृतं च, उपचितं च कर्मोच्यते। कथं कर्मोपचितं भवति? पञ्चभिः कारणैः।

सञ्चेतनसमाप्तिभ्यां निष्कौकृत्यविपक्षतः।
परिवाराद् विपाकाच्च कर्मोपचितमुच्यते॥ १२०॥

कथं **सञ्चेतनतः**? सञ्चिन्त्य कृतं भवति नाबुद्धिपूर्वम्, न सहसा कृतम्।

कथं **समाप्तितः**[2]? कश्चिदेकेन दुश्चरितेनापायान्याति, कश्चिद् यावत् त्रिभिः। कश्चिदेकेन कर्मपथेन, कश्चिद् यावद् दशभिः। तत्र यो यावता गच्छति तस्मिन्नसमाप्ते कृतं तत् कर्म नोपचितम्, समाप्ते तूपचितम्।

---

*विपाकनैयम्यावस्थानादि*ति। नियतविपाकदानावस्थानादित्यर्थः। *कस्यचित् क्षेत्रवशेनैवे*ति। तद् यथा सामान्यपुरुषवधात् पितृवधः। *तत्रैव क्षेत्रे पुनरधिष्ठानवशादि*ति। कर्मपथवशात्। कथम्? इत्याह—*मातापित्रोः प्राणातिपातनात्* गुरु कर्म, *न त्वेवमदत्तादानादिकात्* गुरु। न हि मातापित्रोर्द्रव्यापहरणकर्म तद्वधवद् गुरु भवति; तद्वधस्यानन्तर्यस्वभावत्वात्। *आदि*शब्देन मृषावादपैशुन्यादिग्रहणम्। *एवमन्यदपि योज्य*मिति। कस्यचित् प्रयोगविशेषेण गुरु सम्पद्यते; विपाकनैयम्यावस्थानात्। कस्यचिच्चेतनाविशेषेण। कस्यचिदाशयविशेषेण॥ ११९॥

*नाबुद्धिपूर्वं न सहसा कृतमि*ति। अथ वा—*नाबुद्धिपूर्वं कृतम्* इदं कुर्यामित्यसञ्चिन्त्य कृतम्। तन्नोपचितम्। अव्याकृतं हि तत् कर्म। *न सहसा कृतमि*ति। बुद्धिपूर्वमपि न सहसा कृतम्। यदभ्यासेन भाष्याक्षेपान्मृषावादाद्यनुष्ठानं कृतं तदकुशलम्, न पुनरुपचित्तम्। *यावत् त्रिभिरि*ति। कायवाङ्मनोदुश्चरितैः।

---

१. ०नैयम्येनाव०—का०। २. समापत्तितः—का०।

कथं निष्क्रीकृत्यविपक्षतः ? निर्विमतिसारं च तत् कर्म भवति, निष्प्रतिपक्षं च ।

कथं परिवारतः ? अकुशलं चाकुशलपरिवारं च भवति ।

कथं विपाकतः ? विपाकदाने नियतं भवति ।

एवं कुशलमपि योज्यम् । अतोऽन्यथा कर्म कृतं भवति, नोपचितम् ॥ १२० ॥

चैत्ये सरागस्यात्मार्थं दानमित्युक्तम् । तत्रासत्युपभोक्तरि कथं पुण्यं भवति ? द्विविधं हि पुण्यम्—१. त्यागान्वयम्, त्यागादेव यदुपपद्यते; २. परिभोगान्वयं च, देयधर्मपरिभोगाद् यदुत्पद्यते ।

चैत्ये त्यागान्वयं पुण्यम्,

परिभोगान्वयं पुण्यं नास्ति । कथं तत्राप्रतिगृह्णति कस्मिंश्चित् पुण्यम् ? किं पुनः कारणं सति प्रतिग्रहीतरि भवितव्यम्, नासतीति ? कस्यचिदप्यनुग्रहाभावात् ?

इदमकारणम् । यदि हि पुण्यं परानुग्रहादेव स्यात्, मैत्र्याद्यप्रमाणसम्यग्दृष्टिभावनायां न स्यात् । तस्मादेष्टव्यं चैत्येऽपि पुण्यम् ।

निष्प्रतिपक्षं चेति । प्रतिदेशनादिप्रतिपक्षाभावतः ।

अकुशलं चाकुशलपरिवारं चेति । यः कृत्वाप्यनुमोदत इति ।

*विपाकदाने नियतमि*ति । पुष्टाकुशललक्षणसमुत्पादात् ।

*एवं कुशलमपि योज्यमि*ति । कथम् ? सञ्चेतनतः सञ्चिन्त्य कृतं भवति, नाबुद्धिपूर्वं कृतं भवति । तद्यथा—अव्याकृतेन चित्तेन पाषाणं ददामीति सुवर्णपिण्डं दद्यात् । कृतं तत्, न पुनरुपचितम् । अव्याकृतं हि तत् कर्म, न सहसा कृतम् । यथा भाष्याक्षेपात् सत्यवचनं कृतं तत् कुशलम्, न पुनरुपचितम् । कश्चिदेकेन सुचरितेन सुगतिं याति, कश्चिद् यावत् त्रिभिः; कश्चिदेकेन कर्मपथेन, कश्चिद् यावद्दशभिः । तत्र यो यावता गच्छति, तस्मिन्नसमाप्ते कृतं कर्म, नोपचितम् । समाप्ते तूपचितम् । एवं यावद् विपाकदाने नियतमिति सम्भवतो योज्यम् ॥ १२० ॥

*चैत्ये सरागस्ये*ति विस्तरः । "स्वपरार्थोभयार्थाय" (अभि० को० ४.११४) इत्यत्र । पुण्यमेव त्यागान्वयमपश्यन्नाह—*कस्यचिदप्यनुग्रहाभावा*दिति । सति हि प्रतिग्रहीतरि युक्तं त्यागान्वयं पुण्यम् । तत्र हि प्रीत्यनुग्रहेण ग्रहीता युज्यत

मैत्र्यादिवदगृह्णति ।

यथा मैत्र्यादिष्वन्तरेणापि प्रतिग्राहकं परानुग्रहं वा पुण्यं भवति स्वचित्त-प्रभवम्, तथा ह्यतीतेऽपि[1] गुणवति तद्भक्तिकृतं स्वचित्तात् पुण्यं भवति ।

दानमानक्रिया तर्हि व्यर्था प्राप्नोति ? न; तत्कर्मसमुत्थापिकाया भक्तेः प्रकृष्टतरत्वात् । यथा हि शत्रुवधाभिप्रायस्य तत्समुत्थितं[2] कायवाक्कर्म शत्रु-संज्ञया तस्मिन् मृतेऽपि कुर्वतो बहुतरमपुण्यं जायते, नाभिप्रायमात्रेण; तथा ह्यतीतेऽपि[1] शास्तरि तद्भक्तिसमुत्थां दानमानक्रियां कुर्वतो बहुतरं पुण्यं जायते, न भक्तिमात्रेण ।

यदि स्वक्षेत्रे दानक्रियाबीजमिष्टफलं भवति, कुक्षेत्रे[3] तर्ह्यनिष्टफलं भविष्यति ?

कुक्षेत्रेऽपीष्टफलता फलबीजाविपर्ययात् ।। १२१ ।।

इति । *"मैत्र्यादिवदगृह्णति"* इति । मैत्र्यादिष्वेव मैत्र्यादिवत् । अगृह्णति *असति प्रतिग्राहके पुण्यं भवति ।* असत्यपि परानुग्रहे; कुशलमूलादिबलाधानात् । *तथा ह्यतीतेऽपि गुणवति* तथागतादौ *तद्भक्तिकृतं* चैत्यदानं *पुण्यं भवति ।*

दानमानक्रिया तर्हि व्यर्था प्राप्नोतीति । यदि स्वचित्तादेव पुण्यं भवेत् चित्तेनैव दानमानावनुष्ठेयौ; तत एव पुण्यप्राप्तेः । *न; तत्कर्मसमुत्थापिकाया भक्तेः प्रकृष्टतरत्वात् ।* नैतदेवम् । कस्मात् ? यस्माद् दानमानौ भगवतश्चित्त-मात्रेण चिन्तयतो या भक्तिः, तत इयं दानमानौ कुर्वतो भक्तिः प्रकृष्टतरा; कायवाक्कर्मणोरपि प्रवर्तनात् । चित्तमात्रेण हि चिन्तयतो भक्तिः कायवाक्कर्मणी न प्रवर्तयतः । *यथा हीति* विस्तरः । यथा हि 'शत्रून् हन्मि' इति कृताभिप्रायस्य कस्यचित् *तत्समुत्थितं* तदभिप्रायसमुत्थितं *कायवाक्कर्म शत्रुसंज्ञया* 'शत्रुरयं न तावन्म्रियते' इत्यनया *संज्ञया तस्मिन् मृतेऽपि कुर्वतो बहुतरमपुण्यं जायते;* चेतना-नुबन्धात् । *नाभिप्रायमात्रेण* क्रियाशून्येन । *तथा ह्यतीतेऽपि* परिनिर्वृतेऽपि *भगवति तद्भक्तिसमुत्थां* शास्तृभक्तिसमुत्थां *दानमानक्रियां* पृष्ठभूतामिव *कुर्वतो बहुतरं पुण्यं जायते । न भक्तिमात्रेण ।* क्रियाशून्येनेति ।

कुक्षेत्रे तर्ह्यनिष्टफलं भविष्यतीति । तस्करादिभ्यो दानमनिष्टफलमिति *निर्ग्रन्थाः ।* सुक्षेत्रे हीष्टफलम्, कुक्षेत्रे तु विपरीतमिति ? अतो ब्रवीति—*"कुक्षेत्रे-ऽपीष्टफलता फलबीजाविपर्ययात्"* इति । न क्षेत्रविशेषादिष्टं फलमिति ब्रूमः । किं तर्हि ? विशिष्टमिति । न हि सुक्षेत्रे प्राणातिपातादिबीजस्येष्टं फलं भवतीति ।

१–१. ०भ्यतीते०—का० । २. तत्समुत्थापि०—का० । ३. तत्क्षेत्रे—का० ।

कुक्षेत्रेऽपि हि फलस्य बीजादविपर्ययो दृष्टः—मृद्वीकाबीजान्मृद्वीकाफलमेवोत्पद्यते मधुरम्, निम्बबीजान्निम्बमेव तिक्तम्। एवं कुक्षेत्रेऽपि परहिताध्याशयप्रवृत्तस्य दानबीजस्येष्टमेव फलं निर्वर्तते, नानिष्टम्। क्षेत्रदोषात् तु तद्बीजमल्पफलं वा भवति, अफलं वा ॥ १२१ ॥

गतं दानमयपुण्यक्रियावस्तु समसङ्गम् ॥

शीलमयं वक्तव्यम् ? तदुच्यते—

दौःशील्यमशुभं रूपं शीलं तद्विरतिः,

अकुशलं हि **रूपं दौःशील्यमुच्यते**। तस्माद् **विरतिः शीलम्**।

सा पुनर्विरतिः—

द्विधा।

यया च विरम्यते विज्ञप्त्या, यच्च तद्विरमणम् अविज्ञप्तिः।

न च केवलं दौःशील्याद् विरतिः शीलम्, किं तर्हि ?

प्रतिक्षिप्ताच्च बुद्धेन,

यदपि न प्रकृत्या दौःशील्यम्, भगवता च **बुद्धेन** प्रतिक्षिप्तमकालभोजनादिकम्, तस्मादपि द्विधा विरतिः शीलम्।

समात्तशिक्षस्य तु तदध्याचाराद् दौःशील्यं जायते ॥

उक्तं समासेन शीलम् ॥

विशुद्धं तु चतुर्गुणम् ॥ १२२ ॥

तत्तु शीलं चतुर्गुणं भवति। विपर्ययादविशुद्धम् ॥ १२२ ॥

कुक्षेत्रेऽपि हि फलस्य मृद्वीकाफलस्य *बीजात्* मृद्वीकाबीजात् *अविपर्ययो दृष्टः। मृद्वीकाफलमेव मधुरं दृष्टमित्यर्थः*। न तु निम्बफलमेवम्। *निम्बबीजान्निम्बफलमेवेति*। *तिक्तमिति*। मृद्वीकाबीजं कुशलस्योदाहरणम्, निम्बबीजमकुशलस्य ॥ १२१ ॥

"दौःशील्यमशुभं रूपम्" इति। प्राणातिपातादिलक्षणं प्रकृतिसावद्यं रूपं *दौःशील्यम्* ॥

"प्रतिक्षिप्ताच्च बुद्धेन" इति। प्रज्ञप्तिसावद्यत्वात्। *समात्तशिक्षस्य तु तदध्याचाराद् दौःशील्यमिति*। गृहीततद्विरमणस्य भगवद्वचनानादराद् दौःशील्यं जायते। अर्थादुक्तं भवति—असमात्तशिक्षस्य न दौःशील्यमिति।

अथ कथं चतुर्गुणम् ? इत्याह—

दौःशील्यतद्धेत्वहतं तद्विपक्षसमाश्रितम्[1] ।

दौःशील्येन तावदनुपहतं भवति यथोक्तेन दौःशील्येन। **हेतुनाप्यनुपहतं** भवति। लोभादिभिः क्लेशोपक्लेशैः दौःशील्यविपक्षाश्रितं च भवति। स्मृत्युपस्थानसन्निश्रितत्वात् समाश्रितं च भवति। नोपपत्तिविशेषाश्रितम्; निर्वाणपरिणामितत्वात्।

पञ्चभिः कारणैः इत्यपरे। १. मौलैः कर्मपथैर्विशुद्धं भवति, २. सामन्तकैर्विशुद्धम्, ३. वितर्कैरनुपहतम्, ४. स्मृत्यानुपरिगृहीतम्, ५. निर्वाणपरिणामितं चेति।

चतुर्विधं शीलमित्यपरे। १. भयशीलम्—यदाजीविकाश्लोकदण्डदुर्गतिभयात् पाल्यते। २. आशास्तिशीलम्—यद्भवभोगसत्कारतृष्णाकृतम्। ३. बोध्यङ्गानुलोमं शीलम्—यन्मोक्षार्थं सम्यग्दृष्टिकानाम्। ४. परिशुद्धं शीलम्—अनास्रवशीलम्; निर्मलत्वादिति॥

गतं शीलम्॥

समाहितं तु कुशलं भावना,

"विशुद्धं तु चतुर्गुणम्" इति। चत्वारो गुणा अस्येति चतुर्गुणम्॥ १२२॥

दौःशील्येन यथोक्तेनेति। "दौःशील्यमशुभं रूपम्" इत्यनेन। *लोभादिभिरिति*। न तैर्दौःशील्यहेतुभिः समुदाचरद्भिरुपहतं भवति। *दौःशील्यविपक्षाश्रितमित्यर्थः*।

मौलैः कर्मपथैर्विशुद्धमिति। प्राणातिपातादिभिर्मौलैरखण्डितमित्यर्थः। *सामन्तकैर्विशुद्धमिति*। प्राणातिपादिप्रयोगैरदूषितमित्यर्थः। *वितर्कैरिति*। कामवितर्कादिभिः। *स्मृत्यानुपगृहीतमिति*। कायादिस्मृत्युपस्थानैर्दृढीकृतम्। शीलस्मृत्या वानुपरिगृहीतम्।

आशास्तिशीलमिति। *आशास्तिः*=प्रार्थना। *यद्भवभोगसत्कारतृष्णाकृतमिति*। भवे भोगे च सत्कारे च या तृष्णा, तया यत् समात्तमित्यर्थः। *सम्यग्दृष्टिकानामिति*। बुद्धशासनप्रतिपन्नानाम्। अन्यतीर्थिकानां हि न बोध्यङ्गानुकूलम्; असद्दृष्टिकत्वात्।

"समाहितं तु कुशलम्" इति। समाहित-ग्रहणमसमाहितनिवृत्त्यर्थम्।

---

१. ०श्रमाश्रितम्—का०।

किमिदं **समाहितं** नाम ? समाधिस्वभावं सहभू यत् । किमर्थमेतत् भावनेत्युच्यते ?

चित्तवासनात् ॥ १२३ ॥

तद्धि समाहितं कुशलमत्यर्थं चित्तं वासयति; गुणैस्तन्मयीकरणात् सन्ततेः । पुष्पैस्तिलवासनावत् । दानं तावन्महाभोगतायैः संवर्तत इत्युक्तम् ॥ १२३ ॥

अथ शीलं भावना च ?

स्वर्गाय शीलं प्राधान्याद् विसंयोगाय भावना ।

दानमपि **स्वर्गाय शीलं प्राधान्यात्** । शीलमपि **विसंयोगाय** । **भावना** तु **प्राधान्यात्** ।

सूत्र उक्तम्—"चत्वारः पुद्गला ब्राह्मं पुण्यं प्रसवन्ति" ( )

कुशल-ग्रहणं समाहितास्वादनासम्प्रयुक्तक्लिष्टध्याननिवृत्त्यर्थम् । तत् समाहितं कुशलसदृशमुत्पद्यते ।

समाधिस्वभाव-सहभू यदिति । *समाधिस्वभावं* तेन च सह भवति *यदि*त्यर्थः ।

तद्धि समाहितमिति विस्तरः । *तत् समाहितं कुशलमत्यर्थं चित्तं संवासयति* । भावयति । असमाहितमपि वासयति । न त्वेवमत्यर्थमिति दर्शयति । कथम् ? इत्याह—*गुणैस्तन्मयीकरणात् सन्ततेः* । यस्मात् समाधि*गुणै*स्तन्मयीक्रियते चित्त*सन्ततिः* । अत्र दृष्टान्तमाह—*पुष्पैस्तिलवासनावदि*ति । यथा *पुष्पैस्तिला* भाव्यन्ते पुष्पगन्धमयीकरणात्, तद्वत् । तदिदमुक्तं भवति—भावना=वासना, तत्स्वभावं पुण्यं भावनामयमिति ॥ १२३ ॥

अथ शीलं भावना च । 'कस्मै संवर्तते' इति वाक्यशेषतोऽर्थं पृच्छति । *स्वर्गाय शीलं प्राधान्यादिति* । *शीलं प्राधान्येन स्वर्गाय* भवति । अन्यत्तु न प्राधान्येन स्वर्गाय भवति । किमन्यत् ? दानम् । *दानमपि हि स्वर्गाय* सम्भवति । *शीलमपि विसंयोगाय* सम्भवति; शमथविपश्यनयोः शीलप्रतिष्ठानत्वात् । *भावना प्राधान्येन विसंयोगाय* । साक्षाद् विसंयोगप्रापकत्वात्, प्रहाणमार्गसंगृहीतत्वाद् वा ।

पुण्यक्रियावस्तुप्रसङ्गेनेदमुपन्यस्यते—

सूत्र उक्तम्—चत्वारः पुद्गलाः ब्राह्मं पुण्यं प्रसवन्ति । अप्रतिष्ठिते पृथिवीप्रदेशे तथागतस्य शारीरं स्तूपं प्रतिष्ठापयति—अयं प्रथमः पुद्गलः ब्राह्मं पुण्यं प्रसवति । चातुर्देशे भिक्षुसंघे आरामं निर्यातयति, तत्रैव चारामे विहारं प्रतिष्ठापयति—अयं द्वितीयः पुद्गलो ब्राह्मं पुण्यं प्रसवति । भिन्नं तथागत-

इति। कतमत् तद् ब्राह्मपुण्यम्? यत्तल्लक्षणविपाकस्य कर्मणः परिमाणज्ञापनायोक्तमिति **वैभाषिकाः** ।

पूर्वाचार्यास्तु व्याचक्षते—

चतुर्णां ब्राह्मपुण्यत्वं कल्पं स्वर्गेषु मोदनात् ॥ १२४ ॥

यावता पुण्येन कल्पं स्वर्गेषु मोदते, इदं ब्राह्मं पुण्यम्; ब्रह्मपुरोहितानां कल्पायुष्कत्वात् । **निकायान्तरे** गाथां पठन्ति—

"ब्राह्मं पुण्यं प्रसवति कल्पं स्वर्गेषु मोदते" (   ) इति ॥१२४॥

आमिषदानमुक्तम् ॥

धर्मदानं वक्तव्यम् । तदिदमुच्यते—

धर्मदानं यथाभूतं सूत्राद्यक्लिष्टदेशना ।

सूत्रादीनां **यथाभूतमक्लिष्टदेशना धर्मदानम्** । अतो महतीं त आत्मनः

श्रावकसंघं प्रतिसन्दधाति—अयं तृतीयः पुद्गलः ब्राह्मं पुण्यं प्रसवति । मैत्रीसहगतेन चित्तेनावैरेणासपत्नेनाव्याबाधेन विपुलेन महद्गतेनाप्रमाणेन सुभावितेनैकां दिशमधिमुच्य स्फरित्वोपसम्पद्य विहरति, तथा द्वितीयाम्, तथा तृतीयाम्, तथा चतुर्थीम्, इत्यूर्ध्वमधस्तिर्यक् सर्वतः सर्वमिमं लोकं स्फरित्वोपसम्पद्य विहरति—अयं चतुर्थः पुद्गलो ब्राह्मं पुण्यं प्रसवति" (   ) इति । *यत्तल्लक्षणविपाकस्य कर्मणः परिमाणज्ञापनायोक्तमिति* । यदुक्तम्—सन्निकृष्टं बोधिसत्त्वं स्थापयित्वा यावत् सर्वसत्त्वानां भोगफलमित्येवमादि ।

इदं *ब्राह्मं पुण्यमिति* । ब्रह्मणामिदं ब्राह्मम् । ब्रह्मपुरोहिताश्चात्र ब्रह्मशब्देनोच्यन्ते । कस्मात्? *ब्रह्मपुरोहितानां कल्पायुष्कत्वात्* । ब्रह्मपुरोहितानां हि कल्पमायुरुक्तम् । अनेन च कर्मणा कल्पं स्वर्गेषु मोदते । *ब्राह्मं पुण्यं प्रसवति कल्पं स्वर्गेषु मोदत* इति *निकायान्तर*पाठवचनात् । तत्साधर्म्यादेतद् ब्राह्मं पुण्यमुच्यते । ननु च कामधातौ नास्ति कुशलस्य कर्मणः कल्पं विपाक इति? सत्यमेकस्य नास्ति; एकाधिष्ठानास्तु बह्व्यश्चातना भवन्ति । यासां क्रमेण कल्पप्रमाणं स्वार्गिकं फलमभिनिर्वर्तते; च्युतस्य पुनस्तत्रैव जन्मसन्धानात् । बृहत् पुण्यं ब्राह्ममित्यपरे ॥ १२४ ॥

सूत्रादीनामिति । आदिशब्देन द्वादशानामङ्गानां ग्रहणम् । सूत्र-गेय-व्याकरण-गाथा-उदान-निदानावदान-इतिवृत्तक-जातक-वैपुल्याद्भुतधर्मोपदेशा

पुण्यज्यानिं कुर्वन्ति, ये विपरीतधर्मं देशयन्ति। क्लिष्टचित्ता वा लाभसत्कारयशांसि वाञ्छन्तः।

उक्तं पुण्यक्रियावस्तुभेदेन त्रिविधं कुशलम्॥

पुनः—

पुण्यनिर्वाणनिर्वेधभागीयं कुशलं त्रिधा॥ १२५॥

पुण्यभागीयं यदिष्टविपाकं मोक्षभागीयम्, यस्मिन्नुत्पन्ने नियतं परिनिर्वाणधर्मा भवति। यस्य संसारादीनवनैरात्म्यनिर्वाणगुणद्योतिकां कथां श्रुत्वा रोमहर्षाश्रुपातौ भवतः, तस्यास्ति मोक्षभागीयं कुशलमूलमित्यवसेयम्। प्रावृषीवाङ्कुरप्ररोहात् खलविलेषु बीजास्तित्वम्।

निर्वेधभागीयमूष्मादि चतुर्विधं पश्चाद् व्याख्यास्यामः॥ १२५॥

यदिदं लोक उच्यते लिपिमुद्रागणना काव्यं संख्येति, क एषां स्वभावः?

योगप्रवर्तितं कर्म ससमुत्थापकं त्रिधा।
लिपिमुद्रे सगणनं काव्यं संख्या यथाक्रमम्॥ १२६॥

योगप्रवर्तितमिति उपायविशेषप्रवर्तितम्। **त्रिधा कर्मे**ति कायवाङ्मनस्कर्म। तत्र-**लिपिमुद्रे** तावद् योगप्रवर्तितं कायकर्म ससमुत्थानम्[1]। **गणना काव्यं** च

इति द्वादशानामङ्गानाम्। *अक्लिष्टदेशनेति*। अक्लिष्टचित्तसमुत्थापितेत्यर्थः।

पुण्यभागीयमिति। पुण्यस्य भागः प्राप्तिरिति पुण्यभागः। इष्टफलप्राप्तिरित्यर्थः। तस्मै हितं पुण्यभागीयम्। अतएवोक्तम्—*यदिष्टविपाकमिति*। तत्प्राप्त्यनुकूलमिति। अथवा त्रयो भागाः—पुण्यो भागः, अपुण्यो भागः, अनिञ्ज्यो भागः; तस्मै हितं पुण्यभागीयम्। अथवा—पुण्यं भजत इति पुण्यभाक्, पुण्यभागेव पुण्यभागीयम्। स्वार्थे क-प्रत्ययः। एवं *मोक्षभागीयम्*। अथ वा संसारभागः, मोक्षभागश्चेति द्वौ भागौ। तत्र यन्मोक्षभागाय हितं *तन्मोक्षभागीयम्*। मोक्षप्राप्तिर्वा मोक्षभागः, तस्मै हितम् तत्प्राप्त्यनुकूलमिति मोक्षभागीयम्। तस्य लक्षणं पश्चाद् वक्ष्यते। एवं *निर्वेधभागीयमपि* योज्यम्। *पश्चाद् व्याख्यास्याम* इति। "तत ऊष्मगतोत्पत्तिः" (अभि० को० ६.१७) इत्यत्र। कर्माधिकारेणैषां कर्मस्वभावानां लक्षणमुच्यते॥ १२५॥

यदिदं लोक इत्यादि। *ससमुत्थानमिति*। सचित्तचैतसिककलापम्। येन तत् कायकर्मोत्थाप्यते। *तत् कायकर्मससमुत्थानं योगप्रवर्तितम्*। *लिपिर्मुद्रा*

---

१. समुत्थापनम्—का०।

वाक्कर्म । इत्येतानि पञ्चस्कन्धस्वभावानि । संख्या मनस्कर्म, यन्मनसा सङ्कलनं धर्माणाम् ॥ १२६ ॥

धर्माणामिदानीं केचित् पर्याया उच्यन्ते—

सावद्या निवृता हीनाः क्लिष्टा धर्माः,

क्लिष्टानां धर्माणां **सावद्या निवृता हीना** इति पर्यायाः ।

शुभामलाः ।

प्रणीताः,

कुशलानास्रवाणां **प्रणीता** इति पर्यायः ।

हीनप्रणीतेभ्योऽन्ये मध्या इति सिद्धं भवति ।

संस्कृतशुभाः सेव्याः,

च । कारणे कार्योपचारात् । येन हि कायकर्मणा लिपिर्लिख्यते, मुद्रा वा खन्यते, सा *लिपिर्मुद्रा* च शास्त्रेऽभिप्रेते; न यथा लोके ह्यक्षरचिह्नं पुस्तकादौ लिपिरिष्यते । अक्षरानक्षरचिह्नं च मुद्रेति । *गणना काव्यञ्च वाक्कर्म ।* योगप्रवर्तितं ससमुत्थानमिति वर्तते । *पञ्चस्कन्धस्वभावानीति ।* लिपिमुद्रयोः कायकर्म रूपस्कन्धः । गणनाकाव्ययोर्वाक्कर्म रूपस्कन्धः । वेदनादयस्तूभयत्रापि समुत्थानभूताश्चत्वारः स्कन्धा इति । पञ्चस्कन्धस्वभावान्येतानि भवन्ति । *यन्मनसा संकलनं धर्माणामि*ति । एकं द्वे त्रीणीत्येवमादि सा संख्या । यत्तु वाचा न मनसा सा गणनेत्या*भिधार्मिकाः ।* इयं च संख्या सपरिवारग्रहणाच्चतुःस्कन्धस्वभावा ॥ १२६ ॥

लिप्यादिलक्षणनिर्देशानुषङ्गेण सावद्यादीनामपि *धर्माणां* लक्षणनिर्देशोपन्यासः । धर्मस्कन्धक*विभाषाया*मेते पर्याया निर्दिष्टाः । तत्प्रत्यासन्नेयमिति । *इमे पर्याया* उपन्यस्यन्त इत्यपरः सम्बन्धः । सहावद्येन क्लेशलक्षणेन वर्तन्त इति *सावद्याः ।* क्लेशच्छादितत्वा*न्निवृताः ।* क्लेशा अपि हि सम्प्रयोगिणा क्लेशान्तरेण निवृताः । निष्कृष्टत्वादार्यैस्त्यक्तत्वाद् वा *हीनाः । क्लिष्टास्तु* क्लेशयोगतोऽवगन्तव्याः ।

शुभामलाः । कुशलानास्रवाः । ते *प्रणीताः ।* शुद्धिप्रकर्षगतत्वात् । *हीनप्रणीतेभ्योऽन्ये मध्या इति सिद्धमि*ति । क्लिष्टा एव हीनाः । शुभामला एव च प्रणीता इत्यवधारणादतोऽन्ये न हीनाः । न प्रणीता इति मध्याः सिद्धाः ।

संस्कृतशुभाः सेव्या इति । अविशेषेण सास्रवा अनास्रवा वा सेवितव्याः ।

कुशलसंस्कृतानां सेवितव्या इति पर्यायः। शेषा असेवितव्या इति सिद्धं भवति।

कस्मादसंस्कृतं न सेव्यम्? अनभ्यसनीयत्वाद्, अफलत्वाच्च। फलार्थं हि सेवा भवति॥

सोत्तरा अन्ये सर्वधर्माः।

मोक्षस्त्वनुत्तरः॥ १२७॥

नहि निर्वाणाद् विशिष्टतरमस्ति। तच्च सर्वेभ्यो विशिष्टम्; कुशलनित्यत्वात्॥ १२७॥

अभिधर्मकोशभाष्ये कर्मनिर्देशो नाम
चतुर्थं कोशस्थानमिति॥

पर्युपासितव्याः। सन्तानाध्यारोपणतः। *शेषा असेवितव्या* इति। के शेषाः? असंस्कृताश्च, ये च न कुशलाः। क्लिष्टा निवृताव्याकृता इत्यर्थः।

*अनभ्यसनीयत्वादि*ति। पौनःपुन्येन कर्तुमशक्यत्वादित्यर्थः। अनुत्पाद्यत्वादित्यपरे। *अफलत्वाच्चे*ति। संस्कृतस्य हि हेतुफले। नासंस्कृतस्य ते इति। *सोत्तरा* इति सातिशया। अकुशला निवृताव्याकृतानामनिष्टविपाकाभावात्। निवृताव्याकृता अनिवृताव्याकृतैः संस्कृताः सोत्तरा; तेषामक्लिष्टत्वात्। तेऽपि कुशलसास्रवैः सोत्तराः; कुशलसास्रवाणामिष्टफलत्वात्। तेऽप्यनास्रवैः सोत्तराः; निष्क्लेशत्वात्। अनास्रवा अपि संस्कृता असंस्कृतैः सोत्तरा; असंस्कृतानां नित्यत्वात्। संस्कृतावप्याकाशाप्रतिसंख्यानिरोधौ प्रतिसंख्यानिरोधेन *सोत्तरौ*; प्रतिसंख्यानिरोधस्य कुशलनित्यत्वात्।

मोक्षस्त्वनुत्तरः। न हि निर्वाणाद् विशिष्टतममस्ति। तथा ह्युक्तम्—"ये केचिद् भिक्षवो धर्माः संस्कृता वा असंस्कृता वा विरागस्तेषामग्र आख्यायते" (   ) इति। प्रतिसंख्यानिरोधो हि नित्यत्वात् सर्वसंस्कृतेभ्य उत्कृष्टः। कुशलत्वाच्चासंस्कृताभ्यामाकाशाप्रतिसंख्यानिरोधाभ्यामुत्कृष्टतर इति॥१२७॥

आचार्ययशोमित्रकृतायां स्फुटार्थायामभिधर्मकोशव्याख्यायां
चतुर्थकोशस्थानं समाप्तम्॥

ये धर्मा हेतुप्रभवा हेतुं तेषां तथागतो ह्यवदत् ।
तेषां च यो निरोध एवंवादी महाश्रमणः ॥

अभिधर्मकोशस्य मूलपाठः

तृतीयं कोशस्थानम्

(लोकनिर्देशः)

नरकप्रेततिर्यञ्चो मानुषाः षड् दिवौकसः ।
कामधातुः स नरकद्वीपभेदेन विंशतिः ॥ १ ॥
ऊर्ध्वं सप्तदशस्थानो रूपधातुः पृथक् पृथक् ।
ध्यानं त्रिभूमिकं तत्र चतुर्थं त्वष्टभूमिकम् ॥ २ ॥
आरूप्यधातुरस्थान उपपत्त्या चतुर्विधः ।
निकायं जीवितं चात्र निःश्रिता चित्तसन्ततिः ॥ ३ ॥
नरकादिस्वनामोक्ता गतयः पञ्च तेषु ताः ।
अक्लिष्टाव्याकृता एव सत्त्वाख्या नान्तराभवः ॥ ४ ॥
नानात्वकायसंज्ञाश्च नानाकायैकसंज्ञिनः ।
विपर्ययाच्चैककायसंज्ञाश्चारूपिणस्त्रयः ॥ ५ ॥
विज्ञानस्थितयः सप्त शेषं तत्परिभेदवत् ।
भवाग्रासंज्ञिसत्त्वाश्च सत्त्वावासा नव स्मृताः ॥ ६ ॥
अनिच्छावसनान्नान्ये चतस्रः स्थितयः पुनः ।
चत्वारः सास्रवाः स्कन्धाः स्वभूमावेव केवलम् ॥ ७ ॥
विज्ञानं न स्थितिप्रोक्तं चतुष्कोटि तु संग्रहे ।
चतस्रो योनयस्तत्र सत्त्वानामण्डजादयः ॥ ८ ॥
चतुर्धा नरतिर्यञ्चो नारका उपपादुकाः ।
अन्तराभवदेवाश्च प्रेता अपि जरायुजाः ॥ ९ ॥
मृत्यूपपत्तिभवयोरन्तरा भवतीह यः ।
गम्यदेशानुपेतत्वान्नोपपन्नोऽन्तराभवः ॥ १० ॥
व्रीहिसन्तानसाधर्म्यादविच्छिन्नभवोद्भवः ।
प्रतिबिम्बमसिद्धत्वादसाम्याच्चानिदर्शनम् ॥ ११ ॥
सहैकत्र द्वयाभावाद् असन्तानाद् द्वयोदयात् ।
कण्ठोक्तेश्चास्ति गन्धर्वात् पञ्चोक्तेर्गतिसूत्रतः ॥ १२ ॥
एकाक्षेपादसावैष्यत्पूर्वकालभवाकृतिः ।
स पुनर्मरणात् पूर्वः, उपपत्तिक्षणात् परः ॥ १३ ॥
सजातिशुद्धदिव्याक्षिदृश्यः कर्मर्द्धिवेगवान् ।
सकलाक्षोऽप्रतिघवाननिवर्त्यः स गन्धभुक् ॥ १४ ॥
विपर्यस्तमतिर्याति गतिदेशं रिरंसया ।
गन्धस्थानाभिकामोऽन्य ऊर्ध्वपादस्तु नारकः ॥ १५ ॥

सम्प्रजानन् विशत्येकस्तिष्ठत्यप्यपरोऽपरः ।
निष्क्रामत्यपि सर्वाणि मूढोऽन्यो नित्यमण्डजः ॥ १६ ॥
गर्भावक्रान्तयस्तिस्रश्चक्रवर्तिस्वयम्भुवाम् ।
कर्मज्ञानोभयेषां वा विशदत्वाद् यथाक्रमम् ॥ १७ ॥
नात्मास्ति स्कन्धमात्रं तु क्लेशकर्माभिसंस्कृतम् ।
अन्तराभवसन्तत्या कुक्षिमेति प्रदीपवत् ॥ १८ ॥
यथाक्षेपं क्रमाद् वृद्धः सन्तानः क्लेशकर्मभिः ।
परलोकं पुनर्यातीत्यनादिभवचक्रकम् ॥ १६ ॥
स प्रतीत्यसमुत्पादो द्वादशाङ्गस्त्रिकाण्डकः ।
पूर्वापरान्तयोर्द्वे द्वे मध्येऽष्टौ परिपूरिणः ॥ २० ॥
पूर्वक्लेशदशाऽविद्या संस्काराः पूर्वकर्मणः ।
सन्धिस्कन्धास्तु विज्ञानं नामरूपमतः परम् ॥ २१ ॥
प्राक् षडायतनोत्पादात् तत्पूर्वं त्रिकसंगमात् ।
स्पर्शः प्राक् सुखदुःखादिकारणज्ञानशक्तितः ॥ २२ ॥
वित्तिः प्राङ्मैथुनात् तृष्णा भोगमैथुनरागिणः ।
उपादानं तु भोगानां प्राप्तये परिधावतः ॥ २३ ॥
स भविष्यद्भवफलं कुरुते कर्म तद्भवः ।
प्रतिसन्धिः पुनर्जातिर्जरामरणमाविदः ॥ २४ ॥
आवस्थिकः किलेष्टोऽयं प्राधान्यात् त्वङ्गकीर्तनम् ।
पूर्वापरान्तमध्येषु सम्मोहविनिवृत्तये ॥ २५ ॥
क्लेशास्त्रीणि द्वयं कर्म सप्त वस्तु फलं तथा ।
फलहेत्वभिसंक्षेपो द्वयोर्मध्यानुमानतः ॥ २६ ॥
क्लेशात् क्लेशः क्रिया चैव ततो वस्तु ततः पुनः ।
वस्तु क्लेशाश्च जायन्ते भवाङ्गानामयं नयः ॥ २७ ॥
हेतुरत्र समुत्पादः समुत्पन्नं फलं मतम् ।
विद्याविपक्षो धर्मोऽन्योऽविद्याऽमित्रानृतादिवत् ॥ २८ ॥
संयोजनादिवचनात् कुप्रज्ञा चेन्न दर्शनात् ।
दृष्टेस्तत्सम्प्रयुक्तत्वात् प्रज्ञोपक्लेशदेशनात् ॥ २९ ॥
नाम त्वरूपिणः स्कन्धाः स्पर्शाः षट् सन्निपातजाः ।
पञ्च प्रतिघसंस्पर्शः षष्ठोऽधिवचनाह्वयः ॥ ३० ॥
विद्याऽविद्येतरस्पर्शा अमलक्लिष्टशेषिताः ।
व्यापादानुनयस्पर्शौ सुखवेद्यादयस्त्रयः ॥ ३१ ॥
तज्जाः षड् वेदनाः पञ्च कायिकी चैतसी परा ।
पुनश्चाष्टादशविधा सा मनोपविचारतः ॥ ३२ ॥

कामे स्वालम्बनाः सर्वे रूपी द्वादशगोचरः ।
त्रयाणामुत्तरो ध्यानद्वये द्वादश कामगाः ॥ ३३ ॥
स्वोऽष्टालम्बनमारूप्या द्वयोर्ध्यानद्वये तु षट् ।
कामः षण्णां चतुर्णां स्व एकस्यालम्बनं परः ॥ ३४ ॥
चत्वारोऽरूपिसामन्ते रूपगा एक ऊर्ध्वगः ।
एको मौले स्वविषयः सर्वेऽष्टादश सास्रवाः ॥ ३५ ॥
उक्तं च वक्ष्यते चान्यदत्र तु क्लेश इष्यते ।
बीजवन्नागवन्मूलवृक्षवत् तुषवत् तथा ॥ ३६ ॥
तुषितण्डुलवत् कर्म तथैवौषधिपुष्पवत् ।
सिद्धान्नपानवद् वस्तु तस्मिन् भवचतुष्टये ॥ ३७ ॥
उपपत्तिभवः क्लिष्टः सर्वक्लेशैः स्वभूमिकैः ।
त्रिधान्ये त्रय आरूप्ये आहारस्थितिकं जगत् ॥ ३८ ॥
कवडीकार आहारः कामे त्र्यायतनात्मकः ।
न रूपायतनं तेन स्वाक्षमुक्तानतुग्रहात् ॥ ३९ ॥
स्पर्शसञ्चेतनाविज्ञा आहाराः सास्रवास्त्रिषु ।
मनोमयः सम्भवैषी गन्धर्वश्चान्तराभवः ॥ ४० ॥
निर्वृत्तिश्चेह पुष्टयर्थमाश्रयाश्रितयोर्द्वयम् ।
द्वयमन्यभवाक्षेपनिर्वृत्त्यर्थं यथाक्रमम् ॥ ४१ ॥
छेदसन्धानवैराग्यहानिच्युत्युपपत्तयः ।
मनोविज्ञान एवेष्टा उपेक्षायां च्युतोद्भवौ ॥ ४२ ॥
नैकाग्राचित्तयोरेतौ निर्वात्यव्याकृतद्वये ।
क्रमच्युतौ पादनाभिहृदयेषु मनश्च्युतिः ॥ ४३ ॥
अधोनृसुरगाजानां मर्मच्छेदस्त्वबादिभिः ।
सम्यङ् मिथ्यात्वनियता आर्यानन्तर्यकारिणः ॥ ४४ ॥
तत्र भाजनलोकस्य सन्निवेशमुशन्त्यधः ।
लक्षषोडशकोद्वेधम् असंख्यं वायुमण्डलम् ॥ ४५ ॥
अपामेकादशोद्वेधं सहस्राणि च विंशतिः ।
अष्टलक्षोच्छ्रयं पश्चाच्छेषं भवति काञ्चनम् ॥ ४६ ॥
तिर्यक् त्रीणि सहस्राणि सार्धं शतचतुष्टयम् ।
लक्षद्वादशकं चैव जलकाञ्चनमण्डलम् ॥ ४७ ॥
समन्ततस्तु त्रिगुणं तत्र मेरुर्युगन्धरः ।
ईषाधारः खदिरकः सुदर्शनगिरिस्तथा ॥ ४८ ॥
अश्वकर्णो विनतको निमिन्धरगिरिस्ततः ।
द्वीपा बहिश्चक्रवाडः सप्त हैमाः स आयसः ॥ ४९ ॥
चतूरत्नमयो मेरुर्जलेऽशीतिसहस्रके ।
मग्ना ऊर्ध्वं जलान्मेरुर्भूयोऽशीतिसहस्रकः ॥ ५० ॥

अर्धार्धहानिरष्टासु समोच्छ्रायघनाश्च ते ।
सीताः सप्तरान्तराण्येषामाद्याशीतिसहस्रिका ॥ ५१ ॥
आभ्यन्तरः समुद्रोऽसौ त्रिगुणः स तु पार्श्वतः ।
अर्धार्धेनापराः शीताः शेषं बाह्यो महोदधिः ॥ ५२ ॥
लक्षत्रयं सहस्राणि विंशतिर्द्वे च तत्र तु ।
जम्बूद्वीपो द्विसाहस्रस्त्रिपार्श्वः शकटाकृतिः ॥ ५३ ॥
सार्धत्रियोजनं त्वेकं प्राग्विदेहोऽर्धचन्द्रवत् ।
पार्श्वत्रयं तथास्यैकं सार्धं त्रिशतयोजनम् ॥ ५४ ॥
गोदानीयः सहस्राणि सप्त सार्धानि मण्डलः ।
सार्धे द्वे मध्यमस्याष्टौ चतुरस्रः कुरुः समः ॥ ५५ ॥
देहा विदेहाः कुरवः कौरवाश्चामरावराः ।
अष्टौ तदन्तरद्वीपाः शाठा उत्तरमन्त्रिणः ॥ ५६ ॥
इहोत्तरेण कीटाद्रिनवकाद्धिमवांस्ततः ।
पञ्चाशद् विस्तृतायामं सरोऽर्वाग् गन्धमादनात् ॥ ५७ ॥
अधः सहस्रैर्विंशत्या तन्मात्रोऽवीचिरस्य हि ।
तदूर्ध्वं सप्त नरकाः सर्वेऽष्टौ षोडशोत्सदाः ॥ ५८ ॥
कुकूलं कुणपं चाथ क्षुरमार्गादिकं नदी ।
तेषां चतुर्दिशं शीता अन्येऽष्टावर्बुदादयः ॥ ५९ ॥
अर्धेन मेरोश्चन्द्रार्कौ पञ्चाशत्सैकयोजनौ ।
अर्धरात्रोऽस्तगमनं मध्याह्न उदयः सकृत् ॥ ६० ॥
प्रावृण्मासे द्वितीयेऽन्त्यनवम्यां वर्धते निशा ।
हेमन्तानां चतुर्थे तु हीयतेऽहर्विपर्ययात् ॥ ६१ ॥
लवशो रात्र्यहर्वृद्धी दक्षिणोत्तरगे रवौ ।
स्वच्छाययाऽर्कसामीप्याद् विकलेन्दुसमीक्षणम् ॥ ६२ ॥
परिषण्डाश्चतस्रोऽस्य दशसाहस्रिकान्तराः ।
षोडशाष्टौ सहस्राणि चत्वारि द्वे च निर्गताः ॥ ६३ ॥
करोटपाणयस्तासु मालाधराः सदामदाः ।
महाराजिकदेवाश्च पर्वतेष्वपि सप्तमु ॥ ६४ ॥
मेरुमूर्ध्नि त्रयस्त्रिंशाः स चाशीति सहस्रदिक् ।
विदिक्षु कूटाश्चत्वारः उषिता वज्रपाणिभिः ॥ ६५ ॥
मध्ये सार्धद्विसाहस्रपार्श्वम् अध्यर्धयोजनम् ।
पुरं सुदर्शनं नाम हैमं चित्रतलं मृदु ॥ ६६ ॥
सार्धद्विशतपार्श्वोऽत्र वैजयन्तो बहिः पुनः ।
तच्चैत्ररथपारुष्यमिश्रनन्दनभूषितम् ॥ ६७ ॥
विंशत्यन्तरितान्येषां सुभूमीनि चतुर्दिशम् ।
पूर्वोत्तरे पारिजातः सुधर्मा दक्षिणावरे ॥ ६८ ॥

तत ऊर्ध्वं विमानेषु देवाः कामभुजस्तु षट् ।
द्वन्द्वालिङ्गनपाण्याप्तिहसितेक्षणमैथुनाः ॥ ६९ ॥

पञ्चवर्षोपमो यावद् दशवर्षोपमः शिशुः ।
सम्भवत्येषु सम्पूर्णाः सवस्त्राश्चैव रूपिणः ॥ ७० ॥

कामोपपत्तयस्तिस्रः कामदेवाः समानुषाः ।
सुखोपपत्तयस्तिस्रो नवत्रिध्यानभूमयः ॥ ७१ ॥

स्थानात् स्थानादधो यावत् तावदूर्ध्वं ततस्ततः ।
नोर्ध्वं दर्शनमस्त्येषामन्यत्रर्द्धिपराश्रयात् ॥ ७२ ॥

चतुर्द्वीपकचन्द्रार्कमेरुकामदिवौकसाम् ।
ब्रह्मलोकसहस्रं च साहस्रश्चूडिको मतः ॥ ७३ ॥

तत् सहस्रं द्विसाहस्रो लोकधातुस्तु मध्यमः ।
तत् सहस्रं त्रिसाहस्रः समसंवर्तसम्भवः ॥ ७४ ॥

जाम्बूद्वीपाः प्रमाणेन चतुःसार्धत्रिहस्तकाः ।
द्विगुणोत्तरवृद्धया तु पूर्वगोदोत्तराह्वयाः ॥ ७५ ॥

पादवृद्धया तनुर्यावत् सार्धक्रोशो दिवौकसाम् ।
कामिनां रूपिणां त्वादौ योजनार्धं ततः परम् ॥ ७६ ॥

अर्धार्धवृद्धिरूर्ध्वं तु परीत्ताभेभ्य आश्रयः ।
द्विगुणद्विगुणो हित्वाऽनभ्रकेभ्यस्त्रियोजनम् ॥ ७७ ॥

सहस्रमायुः कुरुषु द्वयोरर्धार्धवर्जितम् ।
इहानियतमन्ते तु दशाब्दा आदितोऽमितम् ॥ ७८ ॥

नृणां वर्षाणि पञ्चाशदहोरात्रो दिवौकसाम् ।
कामेऽधराणां तेनायुः पञ्चवर्षशतानि तु ॥ ७९ ॥

द्विगुणोत्तरमूर्ध्वानामुभयं रूपिणां पुनः ।
नास्त्यहोरात्रमायुस्तु कल्पैः स्वाश्रयसम्मितैः ॥ ८० ॥

आरूप्ये विंशतिः कल्पसहस्राण्यधिकाधिकम् ।
महाकल्पः परीत्ताभात् प्रभृत्यर्धमधस्ततः ॥ ८१ ॥

कामदेवायुषा तुल्या अहोरात्रा यथाक्रमम् ।
सञ्जीवादिषु षट्स्वायुस्तैस्तेषां कामदेववत् ॥ ८२ ॥

अर्धं प्रतापनेऽवीचावन्तः कल्पं परं पुनः ।
कल्पं तिरश्चां प्रेतानां मासाह्ना शतपञ्चकम् ॥ ८३ ॥

वाहाद् वर्षशतेनैकतिलोद्धारक्षयायुषः ।
अर्बुदा विंशतिगुणप्रतिवृद्धायुषः परे ॥ ८४ ॥

कुरुबाह्योऽन्तरा मृत्युः परमाण्वक्षरक्षणाः ।
रूपनामाब्दपर्यन्ताः परमाणुरणुस्तथा ॥ ८५ ॥

लोहाप्शशाविगोच्छिद्ररजोलिक्षा तदुद्भवाः ।
यवस्तथाङ्गुलीपर्वं ज्ञेयं सप्तगुणोत्तरम् ॥ ८६ ॥

चतुर्विंशतिरङ्गुल्यो हस्तो हस्तचतुष्टयम् ।
धनुः पञ्चशतान्येषां क्रोशोऽरण्यं च तन्मतम् ॥ ८७ ॥
तेऽष्टौ योजनमित्याहुर्विंशं क्षणशतं पुनः ।
तत्क्षणस्ते पुनः षष्टिर्लवस्त्रिंशद् गुणोत्तराः ॥ ८८ ॥
त्रयो मुहूर्ताहोरात्रमासा द्वादशमासकः ।
संवत्सरः सोनरात्रः कल्पो बहुविधः स्मृतः ॥ ८९ ॥
संवर्तकल्पो नरकासम्भवाद् भाजनक्षयः ।
विवर्तकल्पः प्राग् वायोर्यावन्नारकसम्भवः ॥ ९० ॥
अन्तःकल्पोऽमिताद् यावद् दशवर्शायुषस्ततः ।
उत्कर्षा अपकर्षाश्च कल्पा अष्टादशापरे ॥ ९१ ॥
उत्कर्ष एकस्तेऽशीतिसहस्राद् यावदायुषः ।
इति लोको विवृत्तोऽयं कल्पांस्तिष्ठति विंशतिम् ॥ ९२ ॥
विवर्ततेऽथ संवर्त आस्ते संवर्तते समम् ।
तेऽह्यशीतिर्महाकल्पस्तदसंख्यत्रयोद्भवम् ॥ ९३ ॥
बुद्धत्वम्, अपकर्षे तु शताद् यावत् तदुद्भवः ।
द्वयोः प्रत्येकबुद्धानां खड्गः कल्पशतान्वयः ॥ ९४ ॥
चक्रवर्तिसमुत्पत्तिर्नाधोऽशीतिसहस्रकात् ।
सुवर्णरूप्यताम्रायश्चक्रिणस्तेऽधरक्रमात् ॥ ९५ ॥
एकद्वित्रिचतुर्द्वीपा न च द्वौ सह बुद्धवत् ।
प्रत्युद्यान-स्वयंयान-कलहास्त्रजितोऽवधाः ॥ ९६ ॥
देशस्थोत्तमपूर्णत्वैर्लक्षणातिशयो मुनेः ।
प्रागासन् रूपिवत् सत्त्वा रसरागात् ततः शनैः ॥ ९७ ॥
आलस्यात् सन्निधिं कृत्वा साग्रहैः क्षेत्रपो भृतः ।
ततः कर्मपथाधिक्यादपह्रासे दशायुषः ॥ ९८ ॥
कल्पस्य शस्त्ररोगाभ्यां दुर्भिक्षेण च निर्गमः ।
दिवसान् सप्त मासांश्च वर्षाणि च यथाक्रमम् ॥ ९९ ॥
संवर्तन्यः पुनस्तिस्रो भवन्त्यग्न्यम्बुवायुभिः ।
ध्यानत्रयं द्वितीयादि शीर्षं तासां यथाक्रमम् ॥१००॥
तदपक्षालसाधर्म्यान्न चतुर्थेऽस्त्यनिञ्जनात् ।
न नित्यं सह सत्त्वेन तद्विमानोदयव्ययात् ॥१०१॥
सप्ताग्निनाद्भिरेकैवं गतेऽद्भिः सप्तके पुनः ।
तेजसा सप्तकः पश्चाद् वायुसंवर्तनी ततः ॥१०२॥

चतुर्थं कोशस्थानम्

(कर्मनिर्देशः)

कर्मजं लोकवैचित्र्यं चेतना तत्कृतं च तत् ।
चेतना मानसं कर्म तज्जे वाक्कायकर्मणी ॥ १ ॥
ते तु विज्ञप्त्यविज्ञप्ती कायविज्ञप्तिरिष्यते ।
संस्थानं न गतिर्यस्मात् संस्कृतं क्षणिकं व्ययात् ॥ २ ॥
न कस्यचिदहेतोः स्याद्धेतुः स्याच्च विनाशकः ।
द्विग्राह्यं स्यान्न चाऽणौ तद् वाग्विज्ञप्तिस्तु वाग्ध्वनिः ॥ ३ ॥
त्रिविधामलरूपोक्तिवृद्ध्यकुर्वत्पथादिभिः ।
क्षणादूर्ध्वमविज्ञप्तिः कामाप्तातीतभूतजा ॥ ४ ॥
स्वानि भूतान्युपादाय कायवाक्कर्म सास्रवम् ।
अनास्रवं यत्र जातोऽविज्ञप्तिरनुपात्तिका ॥ ५ ॥
नैष्यन्दिकी च सत्त्वाख्या निष्यन्दोपात्तभूतजा ।
समाधिजोपचयिकानुपात्ताभिन्नभूतजा ॥ ६ ॥
नाव्याकृतास्त्यविज्ञप्तिस्त्रिधाऽन्यदशुभं पुनः ।
कामे रूपेऽप्यविज्ञप्तिर्विज्ञप्तिः सविचारयोः ॥ ७ ॥
कामेऽपि निवृता नास्ति समुत्थानमसद् यतः ।
परमार्थशुभो मोक्षः स्वतो मूलह्र्यपत्रपा ॥ ८ ॥
सम्प्रयोगेण तद्युक्ताः समुत्थानात् क्रियादयः ।
विपर्ययेणाकुशलं परमाव्याकृते ध्रुवे ॥ ९ ॥
समुत्थानं द्विधा हेतुतत्क्षणोत्थानसंज्ञितम् ।
प्रवर्तकं तयोराद्यं द्वितीयमनुवर्तकम् ॥ १० ॥
प्रवर्तकं दृष्टिहेयं विज्ञानमुभयं पुनः ।
मानसं भावनाहेयं पञ्चकं त्वनुवर्तकम् ॥ ११ ॥
प्रवर्तके शुभादौ हि स्यात् त्रिधाप्यनुवर्तकम् ।
तुल्यं मुनेः शुभं यावत् नोभयं तु विपाकजम् ॥ १२ ॥
अविज्ञप्तिस्त्रिधा ज्ञेया संवरासंवरेतरा ।
संवरः प्रातिमोक्षाख्यो ध्यानजोऽनास्रवस्तथा ॥ १३ ॥
अष्टधा प्रातिमोक्षाख्यो द्रव्यतस्तु चतुर्विधः ।
लिङ्गतो नामसञ्चारात् पृथक् ते चाविरोधिनः ॥ १४ ॥

पञ्चाष्टदशसर्वेभ्यो वर्ज्येभ्यो विरतिग्रहात् ।
उपासकोपवासस्थश्रमणोद्देशभिक्षुता ॥ १५ ॥
शीलं सुचरितं कर्म-संवरश्चोच्यते पुनः ।
आद्ये विज्ञप्त्यविज्ञप्ती प्रातिमोक्षः क्रियापथः ॥ १६ ॥

प्रातिमोक्षान्विता चाष्टौ ध्यानजेन तदन्वितः ।
अनास्रवेणार्यसत्त्वा अन्त्यौ चित्तानुवर्तिनौ ॥ १७ ॥
अनागम्ये प्रहाणाख्यौ तावानन्तर्यमार्गजौ ।
सम्प्रजानस्मृती द्वे तु मनइन्द्रियसंवरौ ॥ १८ ॥

प्रातिमोक्षस्थितो नित्यमात्यागाद् वर्तमानया ।
अविज्ञप्त्यान्वितः पूर्वात् क्षणादूर्ध्वमतीतया ॥ १९ ॥
तथैवासंवरस्थोऽपि ध्यानसंवरवान् सदा ।
अतीताजातयाऽऽर्यस्तु प्रथमे नाभ्यतीतया ॥ २० ॥

समाहितार्यमार्गस्थौ तौ युक्तो वर्तमानया ।
मध्यस्थस्यास्ति चेदादौ मध्ययोर्ध्वं द्विकालया ॥ २१ ॥
असंवरस्थः शुभयाऽशुभया संवरे स्थितः ।
अविज्ञप्त्यान्वितो यावत् प्रसादक्लेशवेगवान् ॥ २२ ॥

विज्ञप्त्या तु युताः सर्वे कुर्वन्तो मध्ययान्विताः ।
अतीतया क्षणादूर्ध्वमात्यागान्नास्त्यजातया ॥ २३ ॥
निवृतानिवृताभ्यां च नातीताभ्यां समन्वितः ।
असंवरो दुश्चरितं दौःशील्यं कर्म तत्पथः ॥ २४ ॥

विज्ञप्त्यैवान्वितः कुर्वन् मध्यस्थो मृदुचेतनः ।
त्यक्तानुत्पन्नविज्ञप्तिरविज्ञप्त्यार्यपुद्गलः ॥ २५ ॥
ध्यानजो ध्यानभूम्यैव लभ्यतेऽनास्रवस्तया ।
आर्यया प्रातिमोक्षाख्यः परविज्ञपनादिभिः ॥ २६ ॥

यावज्जीवं समादानमहोरात्रं च संवृतेः ।
नासंवरोऽस्त्यहोरात्रं न किलैवं प्रगृह्यते ॥ २७ ॥
काल्यं ग्राह्योऽन्यतो नीचैः स्थितेनोक्तानुवादिना ।
उपवासः समग्राङ्गो निर्भूषेणानिशाक्षयात् ॥ २८ ॥

शीलाङ्गान्यप्रमादाङ्गं व्रताङ्गानि यथाक्रमम् ।
चत्वार्येकं तथा त्रीणि स्मृतिनाशो मदश्च तैः ॥ २९ ॥
अन्यस्याप्युपवासोऽस्ति शरणं त्वगतस्य न ।
उपासकत्वोपगमात् संवृदुक्तिस्तु भिक्षुवत् ॥ ३० ॥

सर्वे चेत् संवृता एकदेशकार्यादयः कथम् ।
तत्पालनात् किल प्रोक्ता मृद्वादित्वं यथा मनः ॥ ३१ ॥
बुद्धसंघकरान् धर्मान् अशैक्षानुभयांश्च सः ।
निर्वाणं चेति शरणं यो याति शरणत्रयम् ॥ ३२ ॥
मिथ्याचारातिगर्ह्यत्वात् सौकर्यादक्रियाप्तितः ।
यथाभ्युपगमं लाभः संवरस्य न सन्ततेः ॥ ३३ ॥
मृषावादप्रसङ्गाच्च सर्वशिक्षाव्यतिक्रमे ।
प्रतिक्षेपणसावद्यात् मद्यादेवान्यगुप्तये ॥ ३४ ॥
सर्वोभयेभ्यः कामाप्तो वर्धमानेभ्य आप्यते ।
मौलेभ्यः सर्वकालेभ्यो ध्यानानास्रवसंवरौ ॥ ३५ ॥
संवरः सर्वसत्त्वेभ्यो विभाषा त्वङ्गकारणैः ।
असंवरस्तु सर्वेभ्यः सर्वाङ्गेभ्यो न कारणैः ॥ ३६ ॥
असंवरस्य क्रियया लाभोऽभ्युपगमेन वा ।
शेषाविज्ञप्तिलाभस्तु क्षेत्रादानादरेहणात् ॥ ३७ ॥
प्रातिमोक्षदमत्यागः शिक्षानिक्षेपणाच्च्युतेः ।
उभयव्यञ्जनोत्पत्तेर्मूलोच्छेदान्निशात्ययात् ॥ ३८ ॥
पतनीयेन चेत्येके सद्धर्मान्तर्धितोऽपरे ।
धनर्णवत्तु काश्मीरैरापन्नस्येष्यते द्वयम् ॥ ३९ ॥
भूमिसञ्चारहानिभ्यां ध्यानाप्तं त्यज्यते शुभम् ।
तथारूप्याप्तमार्यं तु फलाप्त्युत्तप्तिहानिभिः ॥ ४० ॥
असंवरः संवराप्तिमृत्युद्विव्यञ्जनोदयैः ।
वेगादानक्रियार्थायुर्मूलच्छेदैस्तु मध्यमा ॥ ४१ ॥
कामाप्तं कुशलारूपं मूलच्छेदोर्ध्वजन्मतः ।
प्रतिपक्षोदयात् क्लिष्टमरूपं तु विहीयते ॥ ४२ ॥
नृणामसंवरो हित्वा षण्ढपण्डद्विधाकृतीन् ।
कुरूंश्च संवरोऽप्येवं देवानां च नृणां त्रयः ॥ ४३ ॥
कामरूपजदेवानां ध्यानजोऽनास्रवः पुनः ।
ध्यानान्तरासंज्ञिसत्त्ववर्ज्यानामप्यरूपिणाम् ॥ ४४ ॥
क्षेमाक्षेमेतरत् कर्म कुशलाकुशलेतरत् ।
पुण्यापुण्यमनिञ्ज्यं च सुखवेद्यादि च त्रयम् ॥ ४५ ॥
कामधातौ शुभं कर्म पुण्यमानिञ्ज्यमूर्ध्वजम् ।
तद्भूमिषु यतः कर्म विपाकं प्रति नेञ्जति ॥ ४६ ॥

सुखवेद्यं शुभं ध्यानादातृतीयादतः परम् ।
अदुःखासुखवेद्यं तु दुःखवेद्यमिहाशुभम् ॥ ४७ ॥
अधोऽपि मध्यमस्त्येके ध्यानान्तरविपाकतः ।
अपूर्वाचरमः पाकस्त्रयाणां चेष्यते यतः ॥ ४८ ॥
स्वभावसम्प्रयोगाभ्यामालम्बनविपाकतः ।
सम्मुखीभावतश्चेति पञ्चधा वेदनीयता ॥ ४९ ॥
नियतानियतं तच्च नियतं त्रिविधं पुनः ।
दृष्टधर्मादिवेद्यत्वात् पञ्चधा कर्म केचन ॥ ५० ॥
चतुष्कोटिकमित्यन्ये निकायाक्षेपणं त्रिभिः ।
सर्वत्र चतुराक्षेपः शुभस्य नरके त्रिधा ॥ ५१ ॥
यद्विरक्तः स्थिरो बालस्तत्र नोत्पद्यवेद्यकृत् ।
नान्यवेद्यकृदप्यार्यः कामेऽग्रे वास्थिरोऽपि न ॥ ५२ ॥
द्वाविंशतिविधं कामेष्वाक्षिपत्यन्तराभवः ।
दृष्टधर्मफलं तच्च निकायो ह्येक एव सः ॥ ५३ ॥
तीव्रक्लेशप्रसादेन सातत्येन च यत्कृतम् ।
गुणक्षेत्रे च नियतं तत् पित्रोर्घातकं च यत् ॥ ५४ ॥
दृष्टधर्मफलं कर्म क्षेत्राशयविशेषतः ।
तद्भूम्यत्यन्तवैराग्याद् विपाके नियतं हि यत् ॥ ५५ ॥
ये निरोधारणामैत्रीदर्शनार्हत्फलोत्थिताः ।
तेषु कारापकाराणां फलं सद्योऽनुभूयते ॥ ५६ ॥
कुशलस्याविर्तकस्य कर्मणो वेदना मता ।
विपाकश्चैतसिक्येव कायिक्येवाशुभस्य तु ॥ ५७ ॥
चित्तक्षेपो मनश्चित्ते स च कर्मविपाकजः ।
भयोपघातवैषम्यशोकैश्चाकुरुकामिनाम् ॥ ५८ ॥
वङ्कुदोषकषायोक्तिः शाठ्यद्वेषजरागजे ।
कृष्णशुक्लादिभेदेन पुनः कर्म चतुर्विधम् ॥ ५९ ॥
अशुभं रूपकामाप्तं शुभं चैव यथाक्रमम् ।
कृष्णशुक्लोभयं कर्म तत्क्षयाय निरास्रवम् ॥ ६० ॥
धर्मक्षान्तिषु वैराग्ये चानन्तर्यपथाष्टके ।
या चेतना द्वादशधा कर्म कृष्णक्षयाय तत् ॥ ६१ ॥
नवमे चेतना या सा कृष्णशुक्लक्षयाय च ।
शुक्लस्य ध्यानवैराग्येष्वानन्तर्यमार्गजा ॥ ६२ ॥

अन्ये नरकवेद्यान्यकामवेद्यं द्वयं विदुः ।
दृग्धेयं कृष्णमन्येऽन्यत् कृष्णशुक्लं तु कामजम् ॥ ६३ ॥
अशैक्षं कायवाक्कर्म मनश्चैव यथाक्रमम् ।
मौनत्रयं त्रिधा शौचं सर्वं सुचरितत्रयम् ॥ ६४ ॥
अशुभं कायकर्मादि मतं दुश्चरितं त्रयम् ।
अकर्मापि त्वभिध्यादि मनोदुश्चरितं त्रिधा ॥ ६५ ॥
विपर्ययात् सुचरितं तदौदारिकसंग्रहात् ।
दश कर्मपथा उक्ता यथायोगं शुभाशुभाः ॥ ६६ ॥
अशुभाः षडविज्ञप्तिर्द्विधैकस्तेऽपि कुर्वतः ।
द्विविधाः सप्त कुशला अविज्ञप्तिः समाधिजाः ॥ ६७ ॥
सामन्तकास्तु विज्ञप्तिरविज्ञप्तिर्भवेन्न वा ।
विपर्ययेण पृष्ठानि प्रयोगस्तु त्रिमूलजः ॥६८॥
तदनन्तरसम्भूतेरभिध्याद्यास्त्रिमूलजाः ।
कुशलाः सप्रयोगान्ता अलोभद्वेषमोहजाः ॥ ६९ ॥
वधव्यापादपारुष्यनिष्ठा द्वेषेण लोभतः ।
परस्त्रीगमनाभिध्यादत्तादानसमापनम् ॥ ७० ॥
मिथ्यादृष्टेस्तु मोहेन शेषाणां त्रिभिरिष्यते ।
सत्त्वभोगावधिष्ठानं नामरूपं च नाम च ॥ ७१ ॥
समं प्राक् च मृतस्यास्ति न मौलोऽन्याश्रयोदयात् ।
सेनादिष्वेककार्यत्वात् सर्वकर्तृवदन्विताः ॥ ७२ ॥
प्राणातिपातः संचिन्त्य परस्याभ्रान्तिमारणम् ।
अदत्तादानमन्यस्वस्वीक्रिया बलचौर्यतः ॥ ७३ ॥
अगम्यगमनं काममिथ्याचारश्चतुर्विधः ।
अन्यसंज्ञोदितं वाक्यमर्थाभिज्ञे मृषावचः ॥ ७४ ॥
चक्षुःश्रोत्रमनश्चित्तैरनुभूतं त्रिभिश्च यत् ।
तद् दृष्टश्रुतविज्ञातमतं चोक्तं यथाक्रमम् ॥ ७५ ॥
पैशुन्यं क्लिष्टचित्तस्य वचनं परभेदने ।
पारुष्यमप्रियं सर्वं क्लिष्टं भिन्नप्रलापिता ॥ ७६ ॥
अतोऽन्यत् क्लिष्टमित्यन्ये लपनागीतनाट्यवत् ।
कुशास्त्रवच्चाभिध्या तु परस्वविषमस्पृहा ॥ ७७ ॥
व्यापादः सत्त्वविद्वेषो नास्तिदृष्टिः शुभाशुभे ।
मिथ्यादृष्टिस्त्रयो ह्यत्र पन्थानः सप्त कर्म च ॥ ७८ ॥

मूलच्छेदस्त्वसद्दृष्ट्या कामाप्तोत्पत्तिलाभिनाम् ।
फलहेत्वपवादिन्या सर्वया क्रमशो नृषु ॥ ७९ ॥
छिनत्ति स्त्री पुमान् दृष्टिचरितः सोऽसमन्वयः ।
सन्धिः कांक्षास्तिदृष्टिभ्यां नेहानन्तर्यकारिणः ॥ ८० ॥
युगपद् यावदष्टभिरशुभैः सह वर्तते ।
चेतना दशभिर्यावच्छुभैर्नैकाष्टपञ्चभिः ॥ ८१ ॥
सम्भिन्नालाप-पारुष्यव्यापादा नरके द्विधा ।
समन्वागमतोऽभिध्यामिथ्यादृष्टी कुरौ त्रयः ॥ ८२ ॥
सप्तमः स्वयमप्यत्र कामेऽन्यत्र दशाशुभाः ।
शुभास्त्रयस्तु सर्वत्र सम्मुखीभावलाभतः ॥ ८३ ॥
आरूप्यासंज्ञिसत्त्वेषु लाभतः सप्त शेषिते ।
सम्मुखीभावतश्चापि हित्वा सनरकान् कुरून् ॥ ८४ ॥
सर्वेऽधिपतिनिष्यन्दविपाकफलदा मताः ।
दुःखनान्मारणादोजोनाशनात् त्रिविधं फलम् ॥ ८५ ॥
लोभजं कायवाक्कर्म मिथ्याजीवः पृथक् कृतः ।
दुःशोधत्वात् परिष्कारलोभोत्थं चेन्न सूत्रतः ॥ ८६ ॥
प्रहाणमार्गे समले सफलं कर्म पञ्चभिः ।
चतुर्भिरमलेऽन्यच्च सास्रवं यच्छुभाशुभम् ॥ ८७ ॥
अनास्रवं पुनः शेषं त्रिभिरव्याकृतं च यत् ।
चत्वारि द्वे तथा त्रीणि कुशलस्य शुभादयः ॥ ८८ ॥
अशुभस्य शुभाद्या द्वे त्रीणि चत्वार्यनुक्रमम् ।
अव्याकृतस्य द्वे त्रीणि त्रीणि चैते शुभादयः ॥ ८९ ॥
सर्वेऽतीतस्य चत्वारि मध्यमस्याप्यनागताः ।
मध्यमा द्वे अजातस्य फलानि त्रीण्यनागताः ॥ ९० ॥
स्वभूमिकस्य चत्वारि त्रीणि द्वे वान्यभूमिकाः ।
शैक्षस्य त्रीणि शैक्षाद्या अशैक्षस्य तु कर्मणः ॥ ९१ ॥
धर्माः शैक्षादिका एकं फलं त्रीण्यपि च द्वयम् ।
ताभ्यामन्यस्य शैक्षाद्या द्वे द्वे पञ्च फलानि च ॥ ९२ ॥
त्रीणि चत्वारि चैकं दृग्घेयस्य तदादयः ।
ते द्वे चत्वार्यथ त्रीणि भावनाहेयकर्मणः ॥ ९३ ॥
अप्रहेयस्य ते त्वेकं द्वे चत्वारि यथाक्रमम् ।
अयोगविहितं क्लिष्टं विधिभ्रष्टं च केचन ॥ ९४ ॥
एकं जन्माक्षिपत्येकमनेकं परिपूरकम् ।
नाक्षेपिके समापत्ती अचित्ते प्राप्तयो न च ॥ ९५ ॥

आनन्तर्याणि कर्माणि तीव्रक्लेशोऽथ दुर्गतिः ।
कौरवासंज्ञिसत्त्वाश्च मतमावरणत्रयम् ॥ ९६ ॥
त्रिषु द्वीपेष्वानन्तर्यं षण्ढादीनां तु नेष्यते ।
अल्पोपकारालज्जित्वाच्छेषे गतिषु पञ्चसु ॥ ९७ ॥
सङ्घभेदस्त्वसामग्री स्वभावो विप्रयुक्तकः ।
अक्लिष्टाव्याकृतो धर्मः सङ्घस्तेन समन्वितः ॥ ९८ ॥
तदवद्यमृषावादस्तेन भेत्ता समन्वितः ।
अवीचौ पच्यते कल्पमधिकैरधिका रुजः ॥ ९९ ॥
भिक्षुर्दृक्चरितो वृत्ती भिनत्त्यन्यत्र बालिशान् ।
शास्तृमार्गान्तरक्षान्तौ भिन्ने न विवसत्यसौ ॥ १०० ॥
चक्रभेदः स च मतो जम्बूद्वीपे नवादिभिः ।
कर्मभेदस्त्रिषु द्वीपेष्वष्टाभिरधिकैश्च सः ॥ १०१ ॥
आदावन्तेऽर्बुदात् पूर्वं युगाच्चोपरते मुनौ ।
सीमायां चाप्यबद्धायां चक्रभेदो न जायते ॥ १०२ ॥
उपकारिगुणक्षेत्रनिराकृतिविपादनात् ।
व्यञ्जनान्तरितेऽपि स्यान्माता यच्छोणितोद्भवः ॥ १०३ ॥
बुद्धे न ताडनेच्छस्य प्रहारान्नोर्ध्वमर्हति ।
नानन्तर्यप्रयुक्तस्य वैराग्यफलसम्भवः ॥ १०४ ॥
संघभेदे मृषावादो महावद्यतमो मतः ।
भवाग्रचेतना लोके महाफलतमा शुभे ॥ १०५ ॥
दूषणं मातुरर्हन्त्या नियतिस्थस्य मारणम् ।
बोधिसत्त्वस्य शैक्षस्य संघायद्वारहारिका ॥ १०६ ॥
आनन्तर्यसभागानि पञ्चम स्तूपभेदनम् ।
क्षान्त्यनागामितार्हत्त्वप्राप्तौ कर्मातिविघ्नकृत् ॥ १०७ ॥
बोधिसत्त्वः कुतो यावद् यतो लक्षणकर्मकृत् ।
सुगतिः कुलजोऽव्यक्षः पुमान् जातिस्मरोऽनिवृत् ॥ १०८ ॥
जम्बूद्वीपे पुमानेव सम्मुखं बुद्धचेतनः ।
चिन्तामयं कल्पशते शेष आक्षिपते हि तत् ॥ १०९ ॥
एकैकं पुण्यशतजमसंख्येयत्रयान्तजाः ।
विपश्यी दीपकृद् रत्नशिखी शाक्यमुनिः पुरा ॥ ११० ॥
सर्वत्र सर्वं ददतः कारुण्याद् दानपूरणम् ।
अङ्गच्छेदेऽप्यकोपात् तु रागिण क्षान्तिशीलयोः ॥ १११ ॥

तिष्यस्तीव्रेण वीर्यस्य धीसमाध्योरनन्तरम् ।
पुण्यं क्रियाथ तद्वस्तु त्रयं कर्मपथा यथा ॥ ११२ ॥
दीयते येन तद्दानं पूजानुग्रहकामया ।
कायवाक्कर्म सोत्थानं महाभोग्यफलं च तत् ॥ ११३ ॥
स्वपरार्थोभयार्थाय नोभयार्थाय दीयते ।
तद्विशेषः पुनर्दातृवस्तुक्षेत्रविशेषतः ॥ ११४ ॥
दाता विशिष्टः श्रद्धाद्यैः सत्कृत्यादि ददात्यतः ।
सत्कारोदाररुचिता कालानाच्छेद्यलाभिता ॥ ११५ ॥
वर्णादिसम्पदा वस्तु सुरूपत्वं यशस्वि वा ।
प्रियता सुकुमारर्तुसुखस्पर्शाङ्गता ततः ॥ ११६ ॥
गतिदुःखोपकारित्वगुणैः क्षेत्रं विशिष्यते ।
अग्रं मुक्तस्य मुक्ताय बोधिसत्त्वस्य चाष्टमम् ॥ ११७ ॥
मातापितृग्लानधार्मकथिकेभ्योऽन्त्यजन्मने ।
बोधिसत्त्वाय चामेया अनार्येभ्योऽपि दक्षिणाः ॥ ११८ ॥
पृष्ठं क्षेत्रमधिष्ठानं प्रयोगश्चेतनाशयः ।
एषां मृद्वधिमात्रत्वात् कर्ममृद्वधिमात्रता ॥ ११९ ॥
सञ्चेतनसमाप्तिभ्यां निष्कौकृत्यविपक्षतः ।
परिवाराद् विपाकाच्च कर्मोपचितमुच्यते ॥ १२० ॥
चैत्ये त्यागान्वयं पुण्यं मैत्र्यादिवदगृह्णति ।
कुक्षेत्रेऽपीष्टफलता फलबीजविपर्ययात् ॥ १२१ ॥
दौःशील्यमशुभं रूपं शीलं तद्विरतिर्द्विधा ।
प्रतिक्षिप्ताच्च बुद्धेन विशुद्धं तु चतुर्गुणम् ॥ १२२ ॥
दौःशील्यतद्धेत्वहतं तद्विपक्षसमाश्रितम् ।
समाहितं तु कुशलं भावना चित्तवासनात् ॥ १२३ ॥
स्वर्गाय शीलं प्राधान्याद् विसंयोगाय भावना ।
चतुर्णां ब्राह्मपुण्यत्वं कल्पं स्वर्गेषु मोदनात् ॥ १२४ ॥
धर्मदानं यथाभूतं सूत्राद्यक्लिष्टदेशना ।
पुण्यनिर्वाणनिर्वेधभागीयं कुशलं त्रिधा ॥ १२५ ॥
योगप्रवर्तितं कर्म ससमुत्थापकं त्रिधा ।
लिपिमुद्रे सगणनं काव्यं संख्या यथाक्रमम् ॥ १२६ ॥
सावद्या निवृता हीनाः क्लिष्टा धर्माः शुभामलाः ।
प्रणीताः संस्कृतशुभाः सेव्या मोक्षस्त्वनुत्तरः ॥ १२७ ॥